CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

12.5

श्री दिगंबर जैन स्याद्वाद ग्रंथमालायाः
[प्रथमोपुष्पः]

ॐ

श्रीपार्श्वनाथाय नमः

श्रीमदाशाधरादिविरचितः

श्रीमज्जिनेंद्र पूजापाठः

संपादकः–
स्वस्तिश्री आर्यव्रती कुलभूषणमहाराज.

★

सचः—
सांगलीपत्तनस्थ श्री दिगंबर जैन स्याद्वाद ग्रंथमालाधिकारिणा
अहिंसा मुद्रणालये मुद्रयित्वा
प्राकाश्यं नीतः

श्रीवर्धमाननिर्वाणाब्दः २६१५] – [विक्रम संवत् २००९

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

5000

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्री दिगंबर जैन स्याद्वाद ग्रंथमालायाः

[प्रथमोपुष्पः]

श्रीपार्श्वनाथाय नमः

श्रीमदाशाधरादिविरचितः

श्रीमज्जिनेंद्र पूजापाठः

संपादकः-

स्वस्तिश्री आर्यव्रती कुलभूषणमहाराज.

★

प्रतयः

[प्रथमावृत्तिः १०००]

सत्वः—

सांगलीपत्तनस्थ श्री दिगंबर जैन स्याद्वाद ग्रंथमालाधिकारिणा

अहिंसा मुद्रणालये मुद्रयित्वा

प्राकाश्यं नीतः

श्रीवर्धमाननिर्वाणाब्दः २६१५] – [विक्रम संवत् २००९

मूल्यं रुप्यकसप्तकम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रकाशक:—
श्रीदिगंबर जैन स्याद्वाद ग्रंथमाला.
सराफगल्ली, मु. पो. सांगली (दक्षिण सातारा.)

★

-: सर्व हक्क प्रकाशकांचे स्वाधीन :-

ग्रंथ मिळण्याचें ठिकाण:—

१) श्री. जी. के. पाटील, अहिंसा प्रेस, सांगली.
२) श्रीपार्श्वनाथ दिगंबर जैन मंदिर, सराफनाका, सांगली.

★

मुद्रक:—
ए. डी. खोत
अहिंसा प्रेस, १०।११ वखारभाग, साँगली.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

5000

प्रस्तावना

पंचसंसारदुःखाब्धेः पारगान् भव्यतारकान् ॥
शाश्वताऽखंडसौख्येशान् सिद्धान्वंदे त्रिधा सदा ॥ १ ॥

जैन धर्म हा एक स्वतंत्र धर्म आहे. तसा जैन पूजाविधि हाही एक स्वतंत्र पूजा प्रकार आहे. श्रावकांच्या दररोजच्या सहा आवश्यक क्रियेपैकीं 'देवपूजा' ही पहिली क्रिया आहे. म्हणून प्रत्येक श्रावकाला देवपूजेचा नित्य व नैमित्तिक विधि माहीत असणें अगत्याचे आहे. परंतु वस्तुस्थिति अशी आहे कीं जैन श्रावकांनाच नव्हे तर देवपूजा करणाऱ्या आपल्या उपाध्याय वर्गालाही त्याची असावी तितकी माहिती नाहीं. त्यामुळें जैन पूजाविधि लुप्तप्राय होत चालला आहे.

आपल्या धर्मासंबधीचें व आचार विचारासंबधीचें हें भयंकर अज्ञानच आपल्या धर्माच्या ऱ्हासास कारणीभूत होत आहे. हा ऱ्हास थांबावा, नव्हे जैन धर्माची प्रभावना व्हावी असें प्रत्येक जैनाला वाटतें पण त्यादृष्टीनें प्रयत्न फार थोडे होतात. या विधीसंबधीं पूर्वाचार्यांनीं अनेक ग्रन्थ लिहून ठेवले आहेत. पण ते प्रकाशित न झाल्यानें कित्येकांना त्यांची कल्पनाही नाहीं.

ही अडचण लक्षांत घेऊन सुमारें ३०।३२ वर्षापूर्वी उदगांवचे स्व. नेमिशा आदाप्पा शास्त्री यांनी आशाधर पूजापाठ म्हणून एक पुस्तक प्रकाशित केलें होतें त्यांनी छापतेवेळीं त्याची तपासणी स्वर्गीय पं कल्लापा भरमापा निटवे शास्त्री नांदणी व प. कल्लापा अनंत उपाध्ये कोल्हापूर यांचेकडून करविली होती म्हणून तो क्रमबद्ध झाला आहे यांत कांहीं शंका नाहीं. त्यामुळें आजवर पूजाविधी करतांना कोणाला फारशी अडचण वाटली नाहीं. पण त्यांनीं प्रकाशित केलेला पूजापाठ आतां जवळ जवळ दुर्मिळ झाला आहे. आम्हालाही त्या पुस्तकाचें सहाय्य झालें आहे.

आम्ही एक पूजापाठ प्रसिद्ध करावा म्हणून ४।५ वर्षापासून विचार करून हा ग्रन्थ प्रसिद्ध करण्याचें ठरविलें व उदार दातारांच्या साहाय्यानें तो प्रसिद्ध करून आज आपले हातीं देत आहोत. या ग्रन्थांत उद्भट विद्वान श्रीमदाशाधरपन्डित व इतर विद्वानगणांनीं लिहिलेले पूजाविधी संकलितकेलेले आहेत. म्हणून आशाधरादि विरचित असें म्हटलें आहे. कानडी लिपीमध्यें अशी पुस्तकें बरीच आहेत. पण देवनागरी लिपीत छापलेली पुस्तकें सहसा मिळत नाहींत. ती उणीव या पुस्तकानें भरून निघावी अशी तीव्र इच्छा आहे.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

या पुस्तकांत आणखी कांहीं निराळ्या गोष्टी दिसतील. पूर्वीचा पूजापाठ पोथी आकाराचा होता तो आतां पुस्तकआकाराचा केला आहे. कागद, टाअिप, मांडणी यांतहि सुधारणा केल्या आहेत. थोडक्यांत हा ग्रन्थ सर्व दृष्टीनें परिपूर्ण करण्याचा प्रयत्न केला आहे. त्यामुळें हा ग्रन्थ प्रत्येक श्रावकाला व पंडितांना आवश्यक ग्रंथ होईल.

सदरहू पुस्तक तयार करतांना पुष्कळांची मदत झाली आहे. त्यांत एक गोष्ट मात्र नमूद करणें अवश्यक आहे. प्रगतिचे संपादक व अहिंसा प्रेसचे चालक श्री. जी. के. पाटील M. A. LL. B. यांची खूप मदत झाली आहे. आपला प्रेस आणि तो चालवणारा आस्थेवाईक आपला माणूस असल्यानें प्रकाशनाचे कार्य किती सोपे झाले आहे हे निराळे सांगायला नकोच. हा ग्रन्थ प्रकाशित करण्याचे बरेंचसे श्रेय त्यांनाच आहे.

संस्कृत छपाअिची अत्यन्त कठीण व अवघड बाब असतांनाही अहिंसा प्रेसचे चालक व कामगारवर्ग यांनीं रात्रंदिवस खपून पुस्तकाची छपाअी उत्तम करून दिली ही आनंदाची गोष्ट होय. ज्या दातारांनी आपल्या ज्ञानावरणीय कर्मक्षयार्थ या पुस्तक प्रकाशनासाठीं उदार देणग्या देऊन धर्मकार्यास मदत केली आहे. त्यांच्या याहीपेक्षां जास्त धर्मभावनांची व शक्तिची वाढ होवो अशी इच्छा बाळगतो. कारण त्यांच्या मदतीशिवाय हा ग्रंथ प्रकाशित होणे अशक्यच होते.

या एवढ्या प्रयासाने तयार केलेल्या या पुस्तकाचे महत्व ओळखून प्रत्येक जैन श्रावकानें व पंडिताने हा ग्रंथ अगत्याने संग्रही ठेवला आणि त्याचा सदुपयोग केला तर माझ्या श्रमाचे सार्थक झाले असे वाटेल.

" क्लेशः फलेन हि पुनर्नवतां विधत्ते "

वीर निर्वाणाब्द: २६१५
ता. २८-३-१९५३
श्रीमहावीर जयंति चैत्र
शु॥ १३ शा. श. १८७५

श्रीजिन चरणकंज मत्तमधुकर
स्वस्तिश्री कुलभूषणमहाराज.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्री दिगंबर जैन स्याद्वाद ग्रंथमाला, सांगली.

परम तपोनिधी प्रातःस्मरणीय परमपूज्य



गुरुवर्य चारित्रचक्रवर्ती स्वस्तिश्री १०८ आचार्यवर्य
शांतिसागर महामुनिमहाराज

श्रीमूलसंघे वरपुष्कराख्ये । गच्छेहिजातः जिनसेनसूरिः ॥
तस्यान्वयेऽभूद्वरशांतिसिंधुः । धर्मप्रभावी परमार्थवेत्ता ॥ १ ॥
कालेकलौ यः श्रमणेषु मुख्यः । आचार्यवर्यो सुगुणाब्धिचंद्रः ॥
भव्याब्जभानुर्निजसौख्यभोगी । निर्ग्रंथसम्राट् खलुधर्ममूर्तिः ॥ २॥
ज्ञानी ध्यानी तपस्वीच विरागी धर्मरक्षकः ।
सद्यः सर्वज्ञकल्पो यः पातु मां शांतिसागरः ॥ ३॥ —संपादक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्री दिगंबर जैन स्याद्वाद ग्रंथमाला सांगली

— स्वर्गीय परमतपोनिधि गुरुवर्य —



स्वस्ति श्री १०८ आचार्य श्री जयकीर्ति महामुनिराज

जन्मस्थान हेरले (कोल्हापूर)

देवेंद्राख्यपिता तथाच जननी पद्मावतीसद्गुणी ।
तद्वंशांबरचंद्रमोऽजनिगुणी त्वाचार्ययोगीश्वरः ॥
ज्ञानध्यानपरायणोगुरुवरः क्षांत्यादि धर्मान्वितः ।
सोऽस्माकं जयकीर्ति पातु सततं सद्भव्यसंतारकः ॥१॥

-संपादक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्री दिगंबर जैन स्याद्वाद ग्रंथमाला, सांगली.

श्रद्धांजली समर्पणम्

ॐ

स्वर्गीय स्वस्ति श्री गुरुवर्य परमतपस्वी मुनितिलक बालब्रह्मचारी विशुद्धचारित्रपालक श्रीमदाचार्य जयकीर्तिमहामुनिराज चरणेभ्यो त्रिकरणशुद्धीपूर्वक त्रिवारनमोस्तु ३ ॥

॥ भोगुरुवर्य ॥

भवदीय कृपाऽशीर्वाद प्रसादेन संसारसागरोत्तरणभूतं सद्धर्मश्रद्धानज्ञान चारित्रादिकं यन्मया प्राप्तं तत्संस्मरणार्थमिदं ग्रंथं भवतां करकमले सादरंसमर्प्यते—

भवदीय अनन्यतमशिष्येन श्रीकुलभूषण आर्यव्रतिना ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्री दिगंबर जैन स्याद्वाद ग्रंथमाला, सांगली.

मालासंस्थापक व ग्रंथसंपादक



स्वास्तिश्री आर्यव्रती कुलभूषणमहाराज

धर्मध्यानपरायणं गुरुवरं ध्यानाग्नि संधारणम् ।
रागद्वेषविदारणं नुतगुणं कामारिनिस्तारणम् ॥
संसारांबुधितारणं शिवधनं चारित्रसंपूरणम् ।
वंदे श्रीकुलभूषणार्ययतिपं सज्ञानसंसेविनम् ॥ १ ॥

भवदीयशिष्यः-पं० व्रम्हसूरिशास्त्री, श्रवणबेळगुळ.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

– अभिनंदनीय देणगी –

'न धर्मो धार्मिकैर्विना' धार्मिक लोकाशिवाय जशी धर्माची धारणा अन् प्रभावना होऊं शकत नाहीं; त्याचप्रमाणें धार्मिक साहित्याशिवाय धर्माची धारणा अन् प्रभावना होत नाहीं, ही दृष्टी पुढें ठेवून या **श्रीदिगंबर जैन स्याद्वाद ग्रंथमालेची स्थापना** स्वर्गीय परमपूज्य स्वस्तिश्री १०८ आचार्य श्रीजयकीर्ति महामुनिराज यांचे परमप्रियाग्रशिष्य **स्वस्तिश्री ऐलक कुलभूषणमहाराज** यांनीं केली आहे. या मालेतर्फे उत्तमोत्तम **ग्रंथांचें संशोधन, मुद्रण अन् प्रकाशन** होणार आहे.

'श्रीमज्जिनेंद्र पूजापाठ' हा ग्रंथ प्रकाशित करण्याकरितां श्रीमती **शांताबाई भ्र. भरमाप्पा चिगटेरे** रा. मागळ, सध्या मु. सांगली यांनीं आपल्या स्वर्गीय मातोश्री **रत्नाबाई भ्र. रामचंद्र शेटे** रा. बागणी यांचे स्मरणार्थ **५००** रुपये देणगी दिली. या मालेला प्रथम देणगी देणाऱ्या याच आहेत म्हणून आम्हांस त्यांच्या नांवाचा प्रामुख्यानें उल्लेख करावासा वाटतो आणि या देणगीबद्दल आम्हीं त्यांचे हार्दिक आभार मानतो.

तसेंच इतर धर्माभिमान्यांनीं या मालेकडे सहानुभूतीनें व उदार अंतःकरणानें पहावे व सहाय्य करावे हीच सदिच्छा !

शांतिनाथ यशवंत नांद्रे. अष्टे.

– मालेचे कार्यवाहक –

१ **श्री. जी. के. पाटील** M. A., LL. B.
'संपादक'–'प्रगति आणि जिनविजय'

२ **श्री. शांतिनाथ यशवंत नांद्रे, अष्टे.**

३ **श्री. गणपती शांतापा चिवटे, सांगली.**

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ग्रंथकर्त्याची संक्षिप्त माहिती.

विक्रम संवतच्या तेराव्या शतकांत पंडित आशाधर यांचा जन्म सपादलक्ष देशांतील मंडलकर नांवाच्या दुर्गामध्यें झाला. त्यांच्या पित्यांचे नांव सल्लक्षण व मातेचे नांव रत्नीबाई असें होतें. त्यांचे वडीलही अत्यंत विद्वानपंडित होते व अनेक राजदरबारी त्यांना मान होता. माताही अत्यंत सुशील व व्यवहार चतुर होती. अशा मातापित्याचे पोटीं जन्म झाल्याने लहानपणापासूनच श्रीआशाधरांचेवर एक प्रकारचे उत्तम संस्कार होत गेले आणि त्यांचे पर्यवसान असे झालें कीं, पंडित आशाधर हे त्या काळातलें एक अत्यंत प्रखरबुध्दीचे विद्वान झाले. त्यांच्या तोडीचा विद्वान त्यावेळीं दाखवणें अशक्यच होतें. याविषयीं श्रीउदयसेन मुनी महाराजांनीं त्यांचे वर्णन "कलिकालिदासः" असें केलें आहे. त्याचप्रमाणें श्रीमदनकीर्ति नामक आचार्यांनीं त्यांना "प्रज्ञापुंज" असें संबोधून कौतुक केलेलें आहे. यावरून त्यांच्या विद्वत्तेची पूर्ण कल्पना येईल.

श्रीआशाधर पंडित हे मुनी नव्हते तें एक श्रावकच होते हे लक्षांत घेण्यासारखें आहे. गृहस्थावस्थेमध्यें राहून आचार्यांकडून स्तुतिकरून घेण्याइतकी विद्वत्ता संपादणें ही एक अलौकिक गोष्ट होय. त्यांचे आचरण अत्यंत शुद्ध व कडक होते. ज्यावेळीं सपादलक्ष देशावर तुरुष्कराज शहाबुद्दीनने हल्ला केला त्यावेळीं आचारभ्रष्ट होण्याची भीति वाटली म्हणून त्यांनी तो देशच सोडून मालव देशांतील धारा नांवाच्या नगरीमध्यें येऊन त्यांनीं सहकुटुम्ब वास्तव्य केलें. यावरून ते धर्मपालनामध्यें व प्रभावना करण्यांत किती दक्ष होते हे लक्षांत येईल. त्यांची विद्वत्ता व सदाचार यामुळे तें राजदरबारांतही महामान्यता पावलेले होते. कारण ते राजनितीचेही पूर्ण ज्ञानी होतें. पंडितप्रवर श्रीआशाधरांनी फार मोठी ग्रन्थ संपदा निर्माण केली आहे त्यांनी बरेच ग्रन्थ स्वतः लिहिलेले आहेत. व त्यावर टीकाही त्यानीच रचिली आहे. याशिवाय पूर्वाचार्यांनीं निर्मिलेल्या कांहीं ग्रन्थावर यांनी टीका लिहिलेली आहे. सागारधर्मामृत अनगारधर्मामृत प्रमेयरत्नाकर, भरतेश्वराभ्युदय, जिनयज्ञकल्प वगैरे अनेक ग्रन्थ स्वतः रचलेले आहेत. त्याचप्रमाणें मूलाचार, भगवती आराधना इष्टोपदेश, आराधनासार, इत्यादि ग्रन्थावर टिकाहि पण लिहिली आहे.

अशा थोर विद्वानाने हा पूजापाठ रचिला असल्यानें तो पूजाविधीवरचा सर्वमान्य ग्रंथ समजला जातो.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

....विषयानुक्रमणिका....

विषय	पृष्ठांक
मंगलाष्टकं	१
नित्याभिषेक:	४
अग्निवासनं	३२
महाभिषेक:	४०
सकलीकरणं	१०४
स्वस्त्ययनविधानं	१२३
महर्षिस्तवनं	१२५
प्रारंभनिरुपणं	१२९
जिनयज्ञ दीक्षा	१३१
सहस्रनामपूजा	१३५
नित्यपूजाक्रम:	१४९
पंचपूजा	१६५
नवदेवताविधानं	१८१
त्रिकालतीर्थंकरपूजा	१९७
अनंतद्वार प्राण प्रतिष्ठा क्रम: (यंत्रश्च)	१९८
अनंत त्रयोदशीपूजा	२०३
अनंतचतुर्दशीपूजा	२०६
वृषभ तीर्थंकर पूजा	२०९
अजित तीर्थंकरपूजा	२१३
शंभव तीर्थंकरपूजा	२१६
अभिनंदन तीर्थंकरपूजा	२१९
सुमति तीर्थंकरपूजा	२२३
पद्मप्रभ तीर्थंकरपूजा	२२६
सुपार्श्व तीर्थंकरपूजा	२२९
चंद्रप्रभ तीर्थंकरपूजा	२३२
पुष्पदंत तीर्थंकरपूजा	२३६
शीतल तीर्थंकरपूजा	२३९
श्रेयांस तीर्थंकरपूजा	२४२
वासुपूज्य तीर्थंकरपूजा	२४५
विमल तीर्थंकरपूजा	२४८
अनंत तीर्थंकरपूजा	२५१
धर्म तीर्थंकरपूजा	२५४
शांति तीर्थंकरपूजा	२५८
कुंथु तीर्थंकरपूजा	२६१
अर तीर्थंकरपूजा	२६५
मल्लि तीर्थंकरपूजा	२६९
मुनिसुव्रत तीर्थंकरपूजा	२७२
नमि तीर्थंकरपूजा	२७५
नेमि तीर्थंकरपूजा	२७८
पार्श्व तीर्थंकरपूजा	२८३
वर्धमान तीर्थंकरपूजा	२८६
बाहुबलिस्वामिपूजा	२९१
पातालयक्षपूजा	२९६
अनंतमतियक्षीपूजा	२९८
परिशिष्ट- (ज्वालिनीपूजा)	१
पद्मावतीपूजा	४
भट्टारकपूजा	८
वास्तुविधानं (यंत्रश्च)	१४
ग्रह होम	४०
जल होम	५५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वि. सूचनाः– छापतेवेळीं नजरचुकीनें एक टीप राहिली आहे. ती येथें दिली असून अवश्य वाचून घेणें

●●●

आतां दीपपूजेची विशेष माहिती अशी आहे कीं, मूल नायक प्रतिमेस दीपपूजाकरणें झाल्यास पहिले प्रतिमेच्या पायापासून गुडघ्यापर्यंत आरती उचलून क्षणभर धरून आडवे तीनदां ओंवाळणें, नंतर तेथून पोटापर्यंत उचलून क्षणभर धरून पूर्ववत् ओंवाळणें । त्यानंतर तेथून गळयापर्यंत उचलून क्षणभर धरून पूर्वप्रमाणेंच ओंवाळणें । पुन्हा पाया-पासून गळ्यापर्यंत तीनदां ओंवाळून हळूच खालीं उतरून प्रतिमेपुढें ठेवणें, याचप्रमाणें धूप व अर्घ्य पूजाकरणें । याशिवाय गंध, अक्षता पुष्प, चरु व फल ह्या पूजा साधारणपणें तीनदां ओंवाळून करणें । मूलनायक प्रतिमेशिवाय दुसरें प्रतिमांना गंधाक्षतादि अर्घ्यपर्यंत सर्वच साधारणपणें तीनदां ओंवाळून करणें । आणि यक्ष-यक्षींना दोनदां व भूमीस तसेंच कलशास एकदां ओंवाळून करणें । हा क्रम पूजकांनीं चांगला लक्षांत ठेवावा.

●●●

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्री दिगंबर जैन स्याद्वाद ग्रंथमालायाम्

॥ ॐ नमः सिद्धेभ्यः ॥

श्रीमदाशाधरादिविरचितः

श्रीमज्जिनेंद्रपूजापाठः

मंगलाष्टकम्

[शार्दूलविक्रीडितम्]

श्रीमन्नम्रसुरासुरेन्द्रमुकुटप्रद्योतरत्नप्रभा- ।
भास्वत्पादनखेन्दवः प्रवचनाम्भोधीन्दवःस्थायिनः ॥
ये सर्वे जिनसिध्दसूर्यनुगतास्ते पाठकास्साधवः ।
स्तुत्या योगिजनैश्च पञ्चगुरवः कुर्वन्तु ते मङ्गलम् ॥ १ ॥

सम्यग्दर्शनबोधवृत्तममलं रत्नत्रयं पावनम् ।
मुक्तिश्रीनगराधिनाथजिनपत्युक्तोऽपवर्गप्रदः ॥
धर्मःसूक्तिसुधा च चैत्यमखिलं चैत्यालयाः श्र्यालयाः ।
प्रोक्तास्ते त्रिविधाश्चतुर्विधममी कुर्वन्तु ते मंगलम् ॥ २ ॥

नाभेयादिजिनाधिपास्त्रिभुवनख्याताश्चतुर्विंशतिः ।
श्रीमन्तो भरतेश्वरप्रभृतयो ये चक्रिणो द्वादश ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ये विष्णुप्रतिविष्णुलांगलधराः सप्तोत्तरा विंशति–॥
स्त्रैकाल्ये प्रथितास्त्रिषष्टिपुरुषाःकुर्वन्तु ते मंगलम् ॥ ३ ॥

यो गर्भावतरोत्सवो भगवतां जन्माभिषेकोत्सवो ॥
यो जातः परिनिष्क्रमेण विभवो यः केवलज्ञानभाक् ॥
यः कैवल्यपुरप्रवेशमहिमासम्भावितः स्वार्गिभिः ॥
कल्याणानि च तानि पञ्च सततं कुर्वन्तु ते मंगलम् ॥ ४ ॥

कैलासो वृषभस्य निर्वृतिमही, वीरस्य पावापुरी, ॥
चम्पा या वसुपूज्यसज्जिनपतेः, सम्मेदशैलोऽर्हताम् ॥
शेषाणामपि चोर्ज्जयन्तशिखरी नेमीश्वरस्यार्हतो ॥
निर्वाणावनयः प्रसिद्धविभवाः कुर्वन्तु ते मङ्गलम् ॥ ५ ॥

ज्योतिर्व्यन्तरभावनामरगृहे मेरौ कुलाद्रौ स्थिता ॥
जम्बूशाल्मलिचैत्यशाखिषु तथा वक्षाररूप्याद्रिषु ॥
इष्वाकारगिरौ च कुण्डलनगे द्वीपेच नन्दीश्वरे ॥
शैले ये मनुजोत्तरे जिनगृहाः कुर्वन्तु ते मङ्गलम् ॥ ६ ॥

ये सर्वौषधिऋद्धयः सुतपसो वृद्धिं गताः पञ्च ये ॥
ये चाष्टाङ्गमहानिमित्तकुशला येऽष्टौविधाश्चारणाः ॥
पञ्चाज्ञानधरास्त्रयोऽपि बलिनो ये बुद्धिऋध्दीश्वराः ॥
सप्तैते सकलार्चिता गणभृतः कुर्वन्तु ते मङ्गलम् ॥ ७ ॥

देव्योऽष्टौ च जयादिका द्विगुणिता विद्यादिका देवताः ॥
श्रीतीर्थंकरमातृकाश्च जनका यक्षाश्च यक्ष्यस्तथा ॥
द्वात्रिंशत्रिदशाधिपास्तिथिसुरा दिक्कन्यकाश्चाष्टधा ॥
दिक्पाला दश चेत्यमी सुरगणाः कुर्वन्तु ते मङ्गलम् ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आदित्यादि नवग्रहाः सुरवराः प्राच्यादि दिक्पालकाः ॥
नाभेयादि जिनोत्तमा गणधराश्चातुर्निकायामराः ॥
रामाद्या भरतादि चक्रिनिवहाः सर्वेपि यक्षेश्वराः ॥
यक्ष्यः शासनदेवताः प्रतिदिनं कुर्वन्तु ते मङ्गलम् ॥ ९ ॥

आकाशं मूर्त्यभावादघकुलदहनादग्निरुर्वी क्षमाप्त्या ॥
नैःसंग्याद्वायुरापः प्रगुणसमतया स्वात्मनिष्ठैः सुयज्वा ॥
सोमः सौम्यत्वयोगाद्रविरिति च विदुस्तेजसः सन्निधाना ॥
द्विश्वात्मा विश्वचक्षुर्वितरतु भवतां मंगलं श्रीजिनेशः ॥ १० ॥

यः कर्ता जगतां यमेकपुरुषं भव्यास्समाश्रीयते ॥
येनादेशि हिताहितं मुनिजना यस्मै नमस्कुर्वते ॥
यस्माद्वेदपरम्परा समुदिता श्रीर्यस्य नित्यास्पदा ॥
यस्मिन्नेत्रजगात्स्थितं स जिनपो निःश्रेयसायास्तु वः ॥११॥

इत्थं श्रीजिनमंगलाष्टकमिदं सौभाग्यसम्पत्प्रदम् ॥
कल्याणेषु महोत्सवेषु सुधियस्तीर्थङ्कराणामुषः ॥
ये श्रृण्वन्ति पठन्ति तैश्च सुजनैर्धर्मार्थकामान्विता ॥
लक्ष्मीराश्रयते व्यपायरहिता निर्वाणलक्ष्मीरपि ॥ १२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ श्री नित्याभिषेकः ॥

ॐ नमः सिद्धेभ्यः ॥ ॐ श्रीवीतरागाय नमः ॥

श्रीमदाशाधरकृतनित्याभिषेकः ॥ ॐ जयजय नमः सिध्देभ्यः ॥

[शार्दूलविक्रीडितम्]

श्रीमन्मंदरमस्तके शुचिजलैर्धौते सदर्भाक्षते ।
पीठे मुक्तिवरं निहाय रचितास्तत्पादपुष्पस्रजः ॥
इंद्रोऽहं निजभूषणार्थममलं यज्ञोपवीतं दधे ।
मुद्राकंकणशेखरानपि तथा जन्माभिषेकोत्सवे ॥ ३ ॥

इति इंद्रस्थापनम् ॥

[अनुष्टुभ्]

ॐकारं बिंदुसंयुक्तं नित्यं ध्यायंति योगिनः ।
कामदं मोक्षदं चैव ॐकाराय नमो नमः ॥ १ ॥

मंगलं भगवानर्हन्मंगलं भगवाञ्जिनः ।
मंगलं प्रथमाचार्यो मंगलं वृषभेश्वरः ॥ २ ॥

मंगलं प्रथमं लोकेषूत्तमं शरणं जिनम् ।
नत्वायमर्हतां पूजाक्रमः स्याद्विधिपूर्वकम् ॥ ३ ॥

विज्ञानं विमलं यस्य भासते विश्वगोचरम् ॥
नमस्तस्मै जिनेंद्राय सुरेंद्राभ्यर्चितांघ्रये ॥ ४ ॥

टीप— पूजा करणाऱ्यांनीं संध्यावंदन, ईर्यापथशुद्धि, सामायिक व प्रतिक्रमण इतक्या क्रिया करूनच नित्याभिषेकास प्रारंभ करावा.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[शार्दूलविक्रीडीतम्]

श्रीमद्भिर्जिनराजजन्मसमये स्नानक्रमप्रक्रियाम् ।
मेरोर्मूर्ध्नि पयःपयोनिधिपयःपूर्णैः सुवर्णात्मकैः ॥
कामं याममितश्रियं घटशतैः शक्रादयश्चक्रिरे ।
तामत्रार्यजनानुरागजननीं जातोत्सवे प्रस्तुवे ॥ ५ ॥

ॐ ह्रीं श्रीं क्ष्वीं भूः स्वाहा प्रस्तावनाय पुष्पांजलिः ॥

[वसंततिलका]

श्रीमज्जिनेंद्रकथिताय सुमंगलाय ।
लोकोत्तमाय शरणाय विनेयजंतोः ॥
धर्माय कायवचनादित्रिशुद्धितोऽहं ।
स्वर्गापवर्गफलदाय नमस्करोमि ॥ ६ ॥

[अनुष्टुभ्]

पुण्यबीजोर्जितक्षेत्रं स्नानक्षेत्रं जगद्गुरोः ।
शोधये शातकुंभोरुकुंभसंभृतवारिभिः ॥ ७ ॥

ॐ ह्रीं क्ष्वीं भूः स्वाहा पवित्रतरजलेन भूमिशुध्दिं करोमि स्वाहा ।
भूमिशोधनम् ॥

दुरंतमोहसंतानकांतारदहनक्षमम् ।
दर्भैः प्रज्वालयाम्यग्निं ज्वालापल्लवितांबरम् ॥ ८ ॥

ॐ ह्रीं श्रीं क्ष्वीं अग्नि प्रज्वालयामि निर्मलाय स्वाहा ।
अग्निप्रज्वालनम् ॥

तुष्टषष्टिसहस्रस्याप्यहीनां मोदहेतवे ।
सिंचामि सुधया भूमिं भव्यभानोर्महामहे ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ह्रीं क्ष्वीं भूः षष्टिसहस्रसंख्येभ्यो नागेभ्योऽमृतांजलिं प्रसिंचामि स्वाहा । नागसंतर्पणम् ॥

ब्रह्मेंद्रहव्यवाहानां धर्मनैऋत्युदन्वताम् ।
मरुद्यक्षेंद्रमौलीनां दिक्षु दर्भान्क्षिपाम्यहम् ॥ १० ॥

ॐ ह्रीं दर्पमथनाय नमः स्वाहा । ब्रह्मादिदशदिक्षु दर्भाः ॥

तोयगंधाक्षतैः पुष्पैः सान्नाय्यैश्च यजामहे ।
यागभूमिं जिनेंद्रस्य दीपधूपफलैरपि ॥ ११ ॥

ॐ ह्रीं नीरजसे नमः स्वाहा । ॐ ह्रीं शीलगंधाय नमः स्वाहा ।
ॐ ह्रीं अक्षताय नमः स्वाहा । ॐ ह्रीं विमलाय नमः स्वाहा ।
ॐ ह्रीं परमसिद्धाय नमः स्वाहा । ॐ ह्रीं ज्ञानोद्योताय नमः स्वाहा ।
ॐ ह्रीं श्रुतधूपाय नमः स्वाहा । ॐ ह्रीं अभिष्टफलदाय नमः स्वाहा ।
ॐ ह्रीं भूर्भूमिदेवता इदं जलादिकमर्चनं गृण्हीध्वं २ नमः स्वाहा ।

यस्यार्थं क्रियते पूजा तस्य शांतिर्भवेत्सदा ।
शांतिके पौष्टिके चैव सर्वकार्येषु सिद्धिदा ॥१२॥ शांतिधारा ॥

मदीयपरिणामसमानविमलतमसलिलस्नानपवित्रीभूतसर्वांगयष्टिः । सर्वांगीणार्द्रहरिचंदनसौगंधिदिग्धदिग्विवरो हंसांसधवलदुकूलांतरीयोत्तरीयः ॥ ॐ ह्रीं श्वेतवर्णे सर्वोपद्रवहारिणी सर्वजनमनोरंजिनी परिधानोत्तरीयं । धारिणी हंहं झंझं संसं तंतं पंपं परिधानोत्तरीयं धारयामि स्वाहा । वस्त्रावरणम् ॥

आर्या— अतिनिर्मलमुक्ताफलललितं यज्ञोपवीतमतिपूतम् ।
रत्नत्रयमिति मत्वा करोमि कलुषापहरणमाभरणम् ॥ १३ ॥

ॐ ह्रीं सम्यग्दर्शनज्ञानचारित्राय नमः स्वाहा । यज्ञोपवितसंधारणम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्नातानुलिप्तसर्वांगो धृतधौतांबरः शुचिः ।
दधे यज्ञोपवीतादीन्मुद्राकंकणशेखरान् ॥१४॥

ॐ ह्रीं सम्यग्दर्शनज्ञानचारित्राय नमः स्वाहा ॥ शेखरमंत्रः ॥

[शार्दूलविक्रीडितम्]

धृत्वा शेखरपट्टहारपदकंग्रैवेयकालंबकम् ।
केयूरांगदमध्यबंधुरकटीसूत्रं च मुद्रान्वितम् ॥
चंचत्कुंडलकर्णपूरममलं पाणिद्वये कंकणम् ।
मंजीरं कटकं पदे जिनपतेः श्रीगंधमुद्रांकितम् ॥
षोडशाभरणम् ॥ १५ ॥

(अनुष्टुभ्)

श्वेतसूत्रावृतान्पूर्णकुंभान्सदकभूषितान् ।
संस्थाप्य कोणकोष्टेषु पुष्पाणि प्रक्षिपाम्यहम् ॥ १६ ॥

[ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः नमोऽर्हते भगवते श्रीमते पद्ममहापद्मतिगिंछकेशरीमहापुंडरीकपुंडरीकगंगासिंधुरोहिद्रोहितास्याहरिद्धरिकांतासीता-सीतोदानारीनरकांतासुवर्णकूलारूप्यकूलारक्तारक्तोदाक्षीरांभोनिधिशुद्धजलं सुवर्णघटप्रक्षिप्तपरिपूरितनवरत्नगंधपुष्पाक्षताभ्यर्चितमामोदकं पवित्रं कुरु २ झ्रौं २ वं मं हं सं तं पं द्रां द्रीं असिआउसानमः स्वाहा । कलशजलशुध्दिः ॥

[ॐ ह्रीं स्वस्तये कलशं स्थापयामि स्वाहा । कलशस्थापनम् ॥

अभ्यर्च्य कलशांस्तोयप्रवाहैश्चंदनैरहम् ।
अक्षतैः कुसुमैरन्नैर्दीपधूपफलैरपि ॥ १७ ॥

ॐ ह्रीं नेत्राय संवौषट् कलशार्चनं करोमि स्वाहा । कलशार्चनम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पांडुकाख्यशिलां मत्वा पीठमेतन्महीतले ।
स्थापयामि जिनेंद्रस्य मज्जनाय महत्तरम् ॥ १८ ॥

ॐ ऱ्हीं अर्हं क्ष्मं ठठ श्रीपीठस्थापनं करोमि । श्रीपीठस्थापनम् ॥

पादपीठकृतस्वर्गपादमूलजिनेशिनः ।
शैलेंद्रस्नानपीठस्य पीठं प्रक्षालयाम्यहम् ॥ १९ ॥

ॐ ऱ्हाँ ऱ्हीं ऱ्हूँ ऱ्हौं ऱ्हः नमोऽर्हते भगवते श्रीमते पवित्रतरजलेन पीठप्रक्षालनं करोमि स्वाहा । पीठप्रक्षालनम् ॥

क्षिपामि हरितान्दर्भान्पीठे पूतमनोहरान् ॥
विधूताशेषसंतापान्दीप्तकांचननिर्मिते ॥ २० ॥

ॐ ऱ्हीं दर्पमथनाय नमः स्वाहा । पीठदर्भाः ॥

प्रक्षाल्य पीठिकां प्रार्चे तोयैर्गंधैः सतंडुलैः ।
प्रसूनैश्चरुभिर्दीपैर्धूपैर्नानाफलैरपि ॥ २१ ॥

ॐ ऱ्हीं सम्यग्दर्शनज्ञानचारित्राय नमः स्वाहा । पीठार्चनम् ॥

श्रीवर्णं विदधे शुभ्रैः सदकैः शुचिभिः फलैः ।
देवदेवस्य पीठेऽस्मिन् सर्वलक्षणसंयुते ॥ २२ ॥

ॐ ऱ्हीं श्रीं श्रीकारलेखनं करोमि स्वाहा । श्रीकारलेखनम् ।

[आर्या]

जलगंधाक्षतकुसुमैश्चरुप्रदीपधूपफलनिवहैः ।
जितकर्मारिपुं जिनपतिमंचामि प्रबलया भक्त्या ॥ २३ ॥

ॐ ऱ्हीं श्रीं श्रीयंत्रार्चनं करोमि स्वाहा । श्रीयंत्रार्चनम् ॥

जिनराजप्रतिबिंबसकलजगद्भव्यपुण्यपुंजावलंबम् ।
भक्त्या स्पृशामि परया निर्भूषणमखिललोकभूषणममलम् ॥२४॥

ॐ ऱ्हीं धात्रे वषट् प्रतिमास्पर्शनं करोमि स्वाहा । प्रीतमास्पर्शनम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(स्रग्धरा)

द्वीपे नंदीश्वराख्ये स्वयममृतभुजोऽकृत्रिमां स्नापयेयु- ।
र्भावे भावार्हतो वा भवभवभिदया भाक्तिकाश्चैत्यगेहात् ॥
आनीयास्मिन् स्थवीयस्यतिविमलतमे कृत्रिमां स्नानपीठे ।
सद्भावैः स्थापनार्हत्प्रतिकृतिमधुना यक्षयक्षीसमेताम् ॥ २५ ॥

[आर्या]

प्रणमदखिलामरेश्वरमणिमुकुटतटांशुखचितचरणाब्जं ॥
श्रीकामं श्रीनाथं श्रीवर्णे स्थापयामि जिनम् ॥ २६ ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं जगतां सर्वशांतिं कुर्वंतु श्रीवर्णे प्रतिमास्थापनं करोमि स्वाहा । श्रीवर्णे प्रतिमास्थापनम् ॥

वसंततिलका- श्रीपादपद्मयुगलं सलिलैर्जिनस्य ।
प्रक्षाल्य तीर्थजलपूततमोत्तमांगम् ॥
आह्वानमंबुकुसुमाक्षतचंदनाद्यैः ।
संस्थापनं च विदधेऽत्र हि सान्निधानम् ॥ २७ ॥

ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः नमोऽर्हते भगवते श्रीमते पवित्रतरजलेन श्रीपादप्रक्षालनं करोमि स्वाहा । श्रीपादप्रक्षालनम् ॥

अनुष्टुभ्- करोमि परमां मुद्रां पंचानां परमेष्ठिनाम् ।
श्रीनिधेर्भव्यनाथस्य सान्निधौ त्रिजगद्गुरोः ॥ २८ ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्ह अ सि आ उ सा नमः पंचगुरुमुद्रावतरणं करोमि स्वाहा ॥ पंचगुरुमुद्रावतरणं ॥ ॐ उसहाय दिव्वदेहाय सज्जोजादाय महापण्णाय अणंतचउठ्ठयाय परमसुहपइट्ठियाय णिम्मलाय सयंभुवे अजरामरपरमपदपत्ताय चउमुहपरमेट्ठिणे अरंहते

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तिलोयणाहाय तिलोयपुज्जाय अट्ठादिव्वदेहाय देवपरिपुज्जाय परम-पदाय ममत्तेह सण्णिधाय स्वाहा ॥

अनुः— अनंतज्ञानदृग्वीर्यसुखरूपजगत्पतेः ।
पाद्यं समर्चयाम्यद्भिर्निर्मलैः पादपंकजे ॥ २९ ॥

ॐ ह्रीं अर्हंत इदं पाद्यं गृण्हीध्वं २ नमोऽर्हंभ्यः स्वाहा ॥

अनुः— कनत्कनकभृंगारनालाद्गलितवारिभिः ।
जगत्त्रितयनाथस्य करोम्याचमनक्रियाम् ॥ ३० ॥

ॐ ह्रीं झ्वीं क्ष्वीं वं मं हं सं तं पं द्रां द्रीं हं सः स्वाहा । अर्घ्यपाद्याचमनक्रियाः ॥

इंद्रवज्रा- भस्मान्नमृद्गोमयपिंडदार्पैरद्भिः फलैर्मिश्रितगंधपुष्पैः ।
त्वां वर्धमानैः सह पात्रसंस्थैर्दर्भाग्निकीलैरवतारयेऽर्हन् ॥ ३१ ॥

ॐ ह्रीं दशविधपिंडावतरणं करोमि स्वाहा ॥ दशविधपिंडावतरणम् ॥

अनुष्टुभ्— नीराजनविधिद्रव्यैर्वर्धमानैः फलैरपि ।
विदधामि जिनेंद्रावतारं पापोपशांतये ॥ ३२ ॥

ॐ ह्रीं समस्तनीराजनद्रव्यैर्नीराजनं करोमि स्वाहा । दुरितमस्माकमपनयतु भगवान् स्वाहा । नीराजनावतरणम् ॥

उपेंद्र— करोमि भक्त्या कुसुमाक्षताद्यैः । सुसंभृतैः पाणिपवित्रपात्रे ।
जिनेश्वराणामिह पादपीठे । प्रकाशमाह्वाननपूर्वमादौ ॥ ३३ ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं अत्र एहि २ संवौषट् स्वाहा । ॐ अत्र तिष्ठ २ ठठ स्वाहा । ॐ अत्र मम सन्निहितो भव २ वषट् स्वाहा । आह्वानस्थापनसन्निधीकरणं ॥ ॐ ह्रीं परमेष्ठिने नमः जलं निर्वपामि स्वाहा । ॐ ह्रीं परमात्मकेवलिभ्यो नमः गंधं । ॐ ह्रीं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनादिनिधनेभ्यो नमः, अक्षतान् । ॐ ह्रीं सर्वनृसुरासुरपूजितेभ्यो नमः, पुष्पं । ॐ ह्रीं अनंतानंतसुखसंतृप्तेभ्यो नमः, चरुं । ॐ ह्रीं अनंतानंतदर्शनेभ्यो नमः, दीपं । ॐ ह्रीं अनंतानंतवीर्येभ्यो नमः, धूपं । ॐ ह्रीं अनंतानंतसौख्येभ्यो नमः फलम् ।

स्रग्धरा—सामोदैः स्वच्छतोयैरुपहिततुहिनैश्चंदनैः स्वर्गलक्ष्मी ।
लीलाढ्यैरक्षतौघैर्मिलदलिकुसुमैरुद्रमैर्नित्यहृद्यैः ॥
नैवेद्यैर्नव्यजांबूनदमददसकैर्दीपकैः काम्यधूम ।
स्तूपैर्धूपैर्मनोज्ञैर्गृहसुरभिफलैः ✱ पूजये त्वाऽर्हदीश ॥३४॥

ॐ ह्रीं अर्हं नमः परमब्रह्मणे विनष्टाष्टकर्मणे अर्घ्यं निर्वपामि स्वाहा ॥ शांतिधारा । पुष्पांजलिः ॥

इंद्रमग्निं यमं रक्षो वरुणं नवमारुतं ।
कुबेरेशाननागेंद्रचंद्रानाहूय दिक्पतीन् ॥ ३५ ॥

ॐ ह्रीं क्रौं इंद्रादिदशदिक्पालकदेवा अत्र आगच्छत २ संवौषट् स्वाहा । ॐ अत्र तिष्ठत २ ठठ स्वाहा । ॐ अत्र मम सन्निहिता भवत २ वषट् स्वाहा ॥ आह्वानस्थापनसान्निधिकरणं ॥ हे इंद्रादिदशदिक्पालकदेवा इदमर्घ्यं पाद्यं जलं गंधं अक्षतान्पुष्पं चरुं दीपं धूपं फलं बलिं स्वस्तिकं यज्ञभागं च यजामहे प्रतिगृह्यतां २ स्वाहा ॥ यस्यार्थं क्रियते पूजा० ॥ शांतिधारा ॥

॥ अथ महाप्रशास्ति पाठः ॥

॥ ॐ नमः सिद्धेभ्यः ॥

पृथ्वी०—यतध्वमधुना निशं प्रतिदिशं शमं रक्षणैः ।
भजध्वमनघाध्वरं प्रथम पालकैर्भाक्तिकैः ॥

✱ पूजयाम्यर्हदीश इति साधू—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समाध्वमुचितासनेषु निहितेषु दिक्पालकान् ।
जिनेंद्र सवनं मया विरचितं क्षयध्वं मुदा ॥ १ ॥

ॐ स्वस्ति यजमानप्रभृतीनां सर्वशांतिं कुरु २ स्वाहा ॥

स्रग्धरा० श्रीमल्लेखाच्छलोद्यच्छविकरविलसत्पाण्डुकासारपीठे
देवेन्द्रैर्नूत्नवाहाभरणमितमहारत्नकुम्भप्रपूर्णैः ॥
दुग्धांभोराशिनीरैः सलिल जिनपतिः स्नापितः पापलोपः ।
पायाद्भव्यानजस्रं वृषभजिनपतिः श्रीपतिर्भूपतीशः ॥ २ ॥

ॐ जय जय जितामयांतक जय जय निष्कलंक लोकविभो जय जय तीर्थंकर जय जय देव मे सुखं दद्याः ॥ जय दुरितविनाश नमस्ते वरभव्यांभोजसूर्यनमस्ते ॥ स्मरदर्पहरनमस्ते वरगुणचिंतामणे धीर नमस्ते ॥

शार्दूल०— पूर्णस्वर्णगिरिंद्रमस्तकलसन्माणिक्यभा भासिते ।
पीठे पांडुकनामधेय सुभगे जन्माभिषेकोत्सवे ॥
देवेंद्रैः शुभमानसैर्विरचितः संसारसंतापहा ।
देवःपातु जिनेश्वरः शुभमतिः सुश्राविकीयांसभाम् ॥ ३ ॥

स्रग्धरा—आहार्यप्रातिहार्य प्रकटितमहिमा नव्यदिव्यादि भाषा ।
भूपः श्रीशांतिनाथः प्रथित गुणगणा रम्यलीला सुगम्यः ॥
पातुश्रेयः कलापः कलितवसुचयःसंचितागण्यपुण्यः ।
भव्यःश्रद्धानपूजागुणमणि निवह स्थानकं जैनसंघम् ॥ ४ ॥
श्रीनाभेयोऽजितःसंभवनमि विमलाः सुव्रतानंतधर्मा— ॥
श्चंद्रांकः शांतिकुंथूसुसुमतिसुविधी शीतलो वासुपूज्यः ॥
मल्लिःश्रेयान् सुपार्श्वो जलजरुचिहरो नंदनः पार्श्वनेमी ।
श्रीवीरश्चेति देवाः प्रविददतु चतुर्विंशतिर्मंगलानि ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मालिनी— सजयतु जिनचंद्रः सद्‌गुणांभोधिचंद्रः ।
कुगतिगजमृगेंद्रस्तुंगभद्रो नरेंद्रः ॥
शमदमयमरुंद्रश्चारुचारित्र सांद्रः ।
परमनुतसुरेंद्रः क्लिपाकापुरींद्रः ॥ ६ ॥

शार्दुल०— विद्यानंदसमंतभद्रगुरवः श्रीपूज्यपादादयः ।
सद्धर्मार्हदनंतवीर्यविभवो भट्टाकलंकस्तुयः ॥
सिद्धांतोदधिसेनवीरजिनसेनाचार्यवर्यादयः ।
सद्धर्मं कलयंतु भव्यनिकरे स्वश्रीपदं श्रीपदम् ॥ ७ ॥

ॐ स्वस्त्यनवरतविनयविनमदमरपतिमुकुटतटघटितमाणिगण—किरणसर्वरत्नाभरणखर्वरितपदकमलयुगलसर्वात्महितसर्वभाषात्मक—दिव्यभाषासुधावर्षनिर्वापितसर्वभव्यजनदुर्वारसंसारकांतारदुःखदावा—नलदहनसंतापशमनसमर्थसर्वज्ञवीतरागार्हत्परमेश्वरप्रणीतसन्मार्गप्रव—र्तकानां । एकांत विपरीत वैनायिक सांशयिकाज्ञान पंच मिथ्यात्वागाध वेगवत्तरंगिणी पतित भव्यजनपरमकारुण्यप्रदत्तपरमधर्मोपदेश हस्तावलंबानां । उभयनय सम्यक्त्व प्रयोग निर्णिक्त निखिल पदार्थोप देश स्वरूपाणाम् त्रिदंड त्रिशल्य त्रिधाघ विदूराणां । चतुर्गति महारण्य संक्रमण हेतुभूतचतुष्कषायरहितानां । पंचमगतिप्रापणप्रवण पंचमहाव्रत पंचसमिति त्रिगुप्ति पंचाचार समन्वितानां । षडनाय-तन सेवा षड्जीवनिकाय बाधारहितानां । सप्तपरमस्थान प्रदायक रत्नत्रयैक मूर्तिभूत दिव्यदेहधराणां । पवित्रीकृत निजगात्राणां । अष्टमदमत्तमातंगकुंभस्थल विदलन पटुतर प्रचंड पंचाननानां । नवविध ब्रह्मचर्य निर्मलीकरण प्रवीणानां । दशविध धर्म्यध्यान धराणां । एकादशोपासकाचारव्याख्यानचतुरतरधिषणानां द्वादशविध तपःप्रियसुदृढतरपरिरंभच्छरीराणां । त्रयोदशक्रिया

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निरतानां। चतुर्दश गुणस्थान मार्गणा जीवस्थान वितरण प्रवीणानां। पंचदश कर्मभूमि धर्मप्रवर्त्तकानां। षोडशभावना तत्पराणां। सिंहइवैकांत तपः शूराणां। गज इवाभिमानिना। वृषभ इव धर्मरथ धुरंधराणां। मृग इवा नियत दिश निवासिनां। वायुरिव निःसंगानां। सूर्य इव लोकालोक प्रकाशकानां। चंद्र इव सकल जगदाल्हादकानां। समुद्र इव गंभीराणां। मंदर इवाचलितानां। पृथ्वीव क्षमावतानां। गगनमिव निर्लेपानां। निर्मलजलमिव प्रसन्न हृदयाणां। वन्हिरिव कर्मारण्य दहन दक्षकानां। यम नियम स्वाध्याय ध्यान मौनानुष्ठान तत्पराणां। अहर्द्वल्याचार्याणां। भूतवल्याचार्याणां। माघनंद्याचार्याणां। पुष्पदंताचार्याणां। उमाचार्याणां। एलाचार्याणां। कुंदकुंदाचार्याणां। गृध्रपिच्छाचार्याणां। मयूरपिच्छाचार्याणां। धरसेनाचार्याणां। सिद्धसेनाचार्याणां। वीरसेनाचार्याणां। जिनसेनाचार्याणां। रामसेनाचार्याणां। जिनचंद्राचार्याणां। नेमिचंद्राचार्याणां। प्रभाचंद्राचार्याणां। वासवचंद्राचार्याणां। बालचंद्राचार्याणां। मेघचंद्राचार्याणां। सर्वभूतहित भट्टारकानां। त्रिभुवन स्वयंभु भट्टारकानां। समाधिगुप्ति भट्टारकानां। श्रुतसागर भट्टारकानां। शिवगुप्ति भट्टारकानां। समंतभद्रस्वामिनां। शिवकोटि स्वामिनां। पूज्यपाद स्वामिनां। अकलंक स्वामिनां। निष्कलंक स्वामिनां। अनंतवीर्य स्वामिनां। विद्यानंदि स्वामिनां। माणिक्यनंदि स्वामिनां। कविपरमेष्ठि स्वामिनां। वर्धमान स्वामिनां। गुणभद्र स्वामिनां। भद्रबाहु स्वामिनां। मुख्य प्रवर्त्तमान पंचमकाल धर्मप्रवर्धकानां। द्वितीयार्धद्वीपस्थकानां। वर्तमान सकल पूर्वाचार्याणां। श्रीपादपद्मयुग्माय नमोऽस्तु ॥ ३ ॥ सर्वलोक शांत्यर्थ श्रीमच्चतुर्विंशति तीर्थंकर स्वामिनां मंगलाभिषेकं कुर्महे ॥

॥ इति पूर्वाचार्य गद्यम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ विरुदावलिः ॥

शार्दूल० श्रेयःपद्मविकासवासरमणिः स्याद्वादरक्षामणिः ।
संसारोरगदर्पगारुडमणिर्भव्यौघचिंतामणिः ॥
अश्रांताक्षयशांतमुक्तिरमणिः सीमंतमुक्तामणिः ।
श्रीमान् देवशिरोमणिर्विजयते श्रीवीतरागः प्रभुः ॥१॥

आहाराभयभैषज्यशास्त्रदानदत्तावधानानां । खंडस्फुटितजीर्णजिनचैत्यचैत्यालयोद्धारणैकधीराणां । यात्राप्रतिष्ठादिकसप्तक्षेत्रधनवितरणैकशीलानां । तर्कव्याकरणच्छंदोऽलंकारसाहित्यसंगीतकाव्यनाटकाभिधानशास्त्रसरोजरसास्वादनमदोत्कटमधुकरसमानानां । निजकुलकमलविकासनैकमार्तंडावताराणां । श्रीदिल्लिकोल्हापूरजिनकंचिपिनगोंडिचतुःसिद्धसिंहासनाधीश्वरश्रीकोल्हापुरविराजमानभट्टारकश्रीजिनसेनतपस्तेजोलालसानां । श्रीकरवीरक्षेत्रश्रीवृषभदेवपदकमलाराधकानां । श्रीमूलसंघपुण्यार्थं मंगलार्थं तुष्टिपुष्टयारोग्यार्थं भव्यजनक्रियमाणे जिनेश्वराभिषेके सावधाना भवंतु । पूर्वाचार्येभ्यो नमोऽस्तु नमोऽस्तु नमोऽस्तु ॥

॥ अथ कलशोद्धरणम् ॥

अनु० तूर्यगीतस्तुतिध्वानव्रातैः सद्धालिरोदसी ।
मया जिनाभिषेकाय पूर्णकुंभोऽयमुद्धतः ॥१॥

ॐ ह्रीं स्वस्तये कलशोद्धरणं करोमि स्वाहा । कलशोद्धरणं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ जलाभिषेकः ॥

अनु– मतैरिव जिनेंद्रस्य वारिभिस्तापहारिभिः ।
निर्मलं स्नापयामीशं विशुद्धं मद्विशुद्धये ॥१॥

शार्दूल० श्रीमद्भिः सुरसैर्निसर्गविमलैः पुण्याशयाभ्याहृतैः ।
शीतैश्चारुघटाश्रितरवितथैः संतापविच्छेदकैः ॥
तृष्णोद्रेकहरैरजःप्रशमकैः प्राणोपमैः प्राणिनां ।
तोयैर्जैनवचोमृतातिशयिभिः संस्नापयामो जिनम् ॥२॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं वं मं हं सं तं पं वं वं हं हं सं सं तं तं पं पं झं झं झ्वीं झ्वीं क्ष्वीं क्ष्वीं द्रां द्रां द्रावय द्रावय नमोऽर्हते भगवते श्रीमते पवित्रतरजलेन जिनमभिषेचयामि स्वाहा । जलस्नपनम् ॥

शीतैर्जलैर्मलयजैर्बहुलैरखंडैः ।
शाल्यक्षतैः सुखकरैः कुसुमैर्हविर्भिः ॥
दीपप्रदीपपटलैर्रुचिरैर्विचित्रैः ।
धूपैः फलैरपि मुदा जिनमर्चयामि ॥ अष्टविधार्चनम् ॥

॥ अथ नालिकेरादिरसाभिषेकः ॥

शार्दूल० सुस्निग्धैर्नवनालिकेरफलजैराम्रादिजातैस्तथा ।
पुंड्रेक्ष्वादिसमुद्भवैश्च गुरुभिः पापापहैरंजसा ॥
पीयूषद्रवसन्निभैर्वररसैः संज्ञानसंप्राप्तये ।
सुस्वादैरमलैरलं जिनविभुं भक्त्याऽनघं स्नापये ॥१॥

ॐ ह्रीं नालिकेराम्रकदलीद्राक्षादिरसस्नपनम् ॥

अनु० नालिकेरजलैः स्वच्छैः शीतैः पूतैर्मनोहरैः ।
स्नानक्रियां कृतार्थस्य विदधे विश्वदर्शिनः ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ह्रीं नालिकेररसेन जिनमभिषेचयामि स्वाहा । नालिकेररसस्नपनम् ॥
वनसुगंधसदक्षतपुष्पकैर्मनसिजातसुहव्यप्रदीपकैः ।
अनुपमागरुधूपसु सत्फलैर्जिनपतेः पदपद्मयुगं यजे । अष्टविधार्चनम् ॥३॥

॥ अथ आम्ररसाभिषेकः ॥

सुपक्वैः कनकच्छायैः सामोदैर्मोदकारिभिः ।
सहकाररसैः स्नानं कुर्मः शर्मैकसद्मनः ॥ १ ॥
ॐ ह्रीं पवित्रतरचूतरसेन जिनमभिषेचयामि स्वाहा । चूतरसस्नपनम् ॥

द्रुतवि० उदकचंदनतंडुलपुष्पकैश्चरुसुदीपसुधूपफलार्घ्यकैः ।
धवलमंगलगानरवाकुलैर्जिनगृहे जिननाथमहं यजे ॥
अष्टविधार्चनम् ॥ २ ॥

॥ अथ शर्कराभिषेकः ॥

इंद्रवज्रा—मुक्त्यंगनानामविकीर्यमाणैरिष्टार्थकर्पूररजोविलासैः ।
माधुर्यधुर्यैर्वरशर्करौघैर्भक्त्या जिनस्य स्नपनं करोमि ॥
ॐ ह्रीं पवित्रतरशर्करौघेन जिनमभिषेचयामि स्वाहा । शर्करास्नपनम् ॥

जलेन गंधेन सदक्षतैश्च पुष्पेण शाल्यन्नचरुष्करेण ।
दीपेन धूपेन फलेन भक्त्या । सुरासुराच्यं जिनमर्चयामि ॥
अष्टविधार्चनम् ॥ २ ॥

॥ अथ इक्षुरसाभिषेकः ॥

स्रग्धरा—देवानीकैरनेकैः स्तुतिशतमुखरैर्वीक्षिता याऽतिहृष्टैः ।
शक्रेणोच्चैः प्रयुक्ता जिनचरणयुगे चारुचामीकराभा ॥
धारांभोजक्षितीक्षुप्रचुरवररसश्यामला वो विभूत्यै ।
भूयात्कल्याणकाले सकलकलिमलक्षालनेऽतीवदक्षा ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्राणिनां प्रीणनं कर्तुं दक्षैरिक्षुरसैर्मुदा ।
सौवर्णकलशैः पूर्णैः स्नापयेऽहं निरंजनम् ॥ २ ॥

ॐ ह्रीं पवित्रतरेक्षुरसेन जिनमभिषेचयामि स्वाहा । इक्षुरसस्नपनम् ॥

इंद्रवज्रा–शीतोदकैर्मंजुलगंधलेपैः । सत्तंडुलैः पुष्पवरैश्च हव्यैः ॥
दीपैश्च धूपैरुचिरैः फलौघै । रंचामि भक्त्या जिननाथमेनम् ॥
अष्टविधार्चनम् ॥

॥ अथ घृताभिषेकः ॥

शार्दूल०दंडीभूततडिद्गुणप्रगुणया हेमाद्रिवत्स्निग्धया ।
चंचच्चंपकमालिकारुचिरया गोरोचनापिंगया ॥
हेमाद्रिस्थलसूक्ष्मरेणुविलसद्धातूलिकालीलया ।
द्राघीयोघृतधारया जिनपतेः स्नानं करोम्यादरात् ॥ १ ॥

अनुष्टु०कनत्कनकसंजातपालिकारुचिरत्विषा ।
प्राज्येनाज्येन निर्वाणराज्यार्थं स्नापयाम्यहं ॥ २ ॥

ॐ ह्रीं पवित्रतरघृतेन जिनमभिषेचयाभि स्वाहा । घृतस्नपनम् ॥

आर्या– अंचामि सलिलमलयजतंडुलपुष्पान्नदीपधूपफलनिवहैः ।
नमदमरमौलिमालालालितपदकमलयुगलमर्हंतम् ॥
अष्टविधार्चनम् ॥३ ॥

॥ अथ क्षीराभिषेकः ॥

शार्दूल०माला तीर्थकृतः स्वयंवराविधौ क्षिप्ताऽपवर्गाश्रिया ।
तस्येयं सुभगस्य हारलतिका प्रेम्णा तया प्रेपिता ॥
वर्त्मन्यस्य समीक्षितेति विनतदृग्वीथिशंकाकृता ।
कुर्मः शर्मसमृद्धये भगवतः स्नानं पयोधारया ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुष्टु० स्थूलकल्लोलदुग्धाब्धेर्वेलाफेनानुकारिणा ।
क्षीरपूरेण मारेरः प्रारभे स्नपनक्रियाम् ॥ २ ॥

ॐ ह्रीं पवित्रतरक्षीरेण जिनमभिषेचयामि स्वाहा । क्षीरस्नपनम् ॥

आर्या–सलिलघनसारसदकप्रसवहविर्दीपधूपफलनिवहैः ।
नमदमरमौलिमालालालितपदकमलयुगलमर्हंतम् ॥
अष्टविधार्चनम् ॥ ३ ॥

॥ अथ दध्यभिषेकः ॥

शार्दूल० शुक्लध्यानमिदं समृद्धिमथवा तस्यैव भर्तुर्यशो ।
राशीभूतमितस्वभावविशदं वाग्देवतायाः स्मितम् ॥
आहो श्वेतसुपुष्पवृष्टिरियमित्याकारमातन्वता ।
दध्नैनं हिमखंडपांडुररुचा संस्नापयामो जिनम् ॥१॥
लोकत्रयपतेः कीर्तिमूर्तिसाम्यदीव स्वयम् ।
संलब्धस्तब्धभावेन दध्ना मज्जनमारभे ॥२॥

ॐ ह्रीं पवित्रतरदध्ना जिनाभिषेचयामि स्वाहा । दधिस्नपनम् ॥
सलिलमलयजसदककुसुमसन्नायप्रदीपधूपफलस्तबकशांतिधाराद्यष्टमंगलद्रव्यैराराधयामि ॥ अष्टविधार्चनम् ॥

॥ अथ कल्कचूर्णोद्वर्तनम् ॥

अनु० पिष्टैश्च कल्कचूर्णैश्च गंधद्रव्यसमुद्भवैः ।
जिनांगं संगताज्याद्यैः स्नेहपूतं करोम्यहम् ॥१॥ ।

ॐ ह्रीं पवित्रतरकल्कचूर्णेन जिनांगोद्वर्तनं करोमि स्वाहा । सुगंधकल्कचूर्णोद्वर्तनम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ लाजादिचूर्णोद्वर्तनम् ॥

मालिनी-सकलकलमलाजैर्मल्लिकाफुल्लजातैरिव सितसमवर्णैर्लाजचूर्णप्रपूर्णैः॥
बहुलपरिमलैर्घैर्हारहारिद्रचूर्णैर्जिनपतिमहमुच्चैः संप्रसिंचे रजोभिः ॥

ॐ ह्रीं पवित्रतरलाजादिचूर्णोद्वर्तनम् ॥

॥ अथ नीराजनावतरणम् ॥

अनुः— वर्णानांप्रमुखैर्द्रव्यैर्जिनेंद्रमवतारये ।
संसारसागरोत्तारं पूतं पूतगुणालयम् ॥ १ ॥

ॐ ह्रीं समस्तनीराजनद्रव्यैर्दुरितमस्माकमपनयतु भगवान् स्वाहा ।
नीराजनावतरणम् ॥

॥ अथ कषायोदकस्नपनम् ॥

स्रग्धरा० कंकोलैर्ग्रंथिपर्णागरुतुहिनजटाजातिपत्रैर्लवंगैः
श्रीखंडैलादिचूर्णैः प्रतनुभिरवधूलींदुधूलीविमिश्रैः ॥
आलिप्तोद्वर्तशुद्धैः समलयजरसैः कालभैः पिष्टपिंडैः ।
प्लक्षादित्वक्कषायैर्जिनतनुमभितः स्नेहमाक्षालयामि ॥ १ ॥

वसंत० संस्नापितस्य घृतदुग्धदधिप्रवाहैः ।
सर्वाभिरौषधिभिरर्हत उज्वलाभिः ॥
उद्वर्तितस्य विदधाम्यभिषेकमेवं ।
कालेयकुंकुमरसोत्कटचारुपूरैः ॥ २ ॥

अनु० क्षीरिभूरुहसंजातत्वक्कषायजलैरहं ।
मज्ञातमलविच्छित्यै मज्जनं विदधे विभोः ॥ ३ ॥

ॐ ह्रीं पवित्रतरकषायोदकेन जिनमभिषेचयामि स्वाहा ।
कषायोदकस्नपनम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ चतुष्कोणकुंभोदकस्नपनम् ॥

शार्दूल०हृद्योद्वर्तनकल्कचूर्णनिवहैः स्नेहापनोदं तनोः ।
वर्णाढ्यैर्विविधैः फलैश्च सलिलैः कृत्वाऽवतारक्रियां ॥
संपूर्णैः सकृदुध्दृतैर्जलधराकारैश्चतुर्भिर्घटै ।
रंभःपूरितदिग्मुखैरभिषवं कुर्मस्त्रिलोकीपतेः ॥ १ ॥

अनु०-अंभोभिः संभृतैः कुंभैरंभोवरनिभैः शुभैः ।
कोणस्थैरभिषिंचामि चतुर्भिर्भुवनप्रभुम् ॥ २ ॥

ॐ ऱ्हीं पवित्रतरचतुष्कोणकुंभोदकेन जिनमभिषेचयामि स्वाहा ।

चतुष्कोणकुंभोदकस्नपनम् ॥

॥ अथ चंदनानुलेपनम् ॥

इंद्रवज्रा-संसिद्धशुद्ध्या परिहारशुद्ध्या । कर्पूरसंमिश्रितचंदनेन ॥
जिनेंद्रदेवंसुरपुष्पवृष्टिं । विलेपनं चारु करोमि भक्त्या ॥

चंदनानुलेपनम् ॥१॥

॥ अथ पुष्पोध्दरणम् ॥

इंद्रवज्रा-वासंतिकाजातिशिरीषवृंदैर्बंधूकवृंदैरपि चंपकाद्यैः ॥
पुष्पैरनेकैरलिभिर्हृताग्रैः श्रीमज्जिनेंद्रांघ्रियुगं यजेऽहम् ॥

पुष्पोध्दरणम् ॥१॥

॥ अथ गंधोदकस्नपनम् ॥

शार्दूल०कर्पूरोल्वणसांद्रचंदनरसप्राचुर्यशुभ्रत्विषा ।
सौरभ्याधिकगंधलुब्धमधुपश्रेणीसमाश्लिष्टया ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सद्यः संगतगांगयामुनमहास्रोतोविलासश्रिया ।
सद्गंधोदकधारया जिनपतेः स्नानं करोमि श्रियै ॥१॥

अनु०–गंधोदकैर्भ्रमद्भृंगसंगीतध्वनिबंधुरैः ।
अभिषिंचामि सम्यक्त्वरत्नाब्धि विमल प्रभो ॥२॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं नमोऽर्हते भगवते श्रीमते प्रक्षीणाशेषदोषकल्मषाय दिव्यतेजोमूर्तये नमः श्रीशांतिनाथाय शांतिकराय सर्वपापप्रणाशनाय, सर्वविघ्नविनाशनाय सर्वरोगापमृत्युविनाशनाय सर्वपरकृतक्षुद्रोपद्रवविनाशनाय सर्वक्षामडामरविनाशनाय ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः अ सि आ उ सा पवित्रतरगंधोदकेन जिनमभिषेचयामि । मम सर्वशांतिं कुरु कुरु तुष्टिं कुरु कुरु । पुष्टिं कुरु कुरु स्वाहा ।

गंधोदकस्नपनम् ॥

शार्दूल०स्नानानंतरमर्हतः स्वयमपि *स्नानांबुशेषार्द्रितो ।
वार्गंधाक्षतपुष्पदामचरुकैर्दीपैः सुधूपैः फलैः ॥
कामोद्दामगजांकुशं जिनपतिं स्वभ्यर्च्य संस्तौति यः ।
स स्यादारविचंद्रमक्षयसुखंप्रख्यातकीर्तिध्वजः ॥ १ ॥

इत्यर्चनाफलम् ॥

॥ अथ अष्टकम् ॥

अनु०–आह्वयाम्यहमर्हंतं स्थापयामि जिनेश्वरं ।
सन्निधीकरणं कुर्वे पंचमुद्रान्वितं महे ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं अत्र एहि २ संवौषट् स्वाहा ॥
ॐ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा । आह्वानस्थापनसन्निधीकरणम् ॥

भुजंग–द्युगंगादिजैर्वारिपूरैः पवित्रैः । सुधासोपमैश्चंद्रद्रव्यादिमिश्रैः ।
बुधाः पूजयेऽहं सदा वीरनाथं । कलौ कल्मषक्षंतकं पूज्यपादम् ।

*धृतो इत्यपिपाठः,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ह्रीं श्रीवीरवर्धमानतीर्थंकराय नमः जलं निर्वपामि स्वाहा ॥ १ ॥

सुरारम्यश्रीखंडजातैः सुगंधै । र्द्रवैर्भूरिसौरम्यकाश्मरियुक्तैः ॥
बुधाः० ॥ ॐ० ॥ गंधं ॥ २ ॥

क्षताघव्रजैरक्षतैरक्षतौघे- । र्ज्वलद्दिग्विवारैर्निधीनप्रकाशैः ॥
बुधाः० ॥ ॐ० ॥ अक्षतं ॥ ३ ॥

जपाजातिमंदारकुंदादिपुष्पै । रणद्गंधलुब्धालिवारावकर्षैः ॥
बुधाः० ॥ ॐ० ॥ पुष्पं ॥ ४ ॥

महामंडकैर्मोदकैः शालिभक्ष्यैः । सितैर्हव्यपाकैः स्फुरद्भाजनस्थैः ।
बुधाः० ॥ ॐ० ॥ चरुं ॥ ५ ॥

ज्वलत्कीलजालैर्घृतादिप्ररोहै- । र्महामोहध्वांताहतैः सत्प्रदीपैः ।
बुधाः० ॥ ॐ० ॥ दीपं ॥ ६ ॥

लसध्दूपधूम्रैः सुराधूपकौघै- । र्महाकर्मकाष्ठाहतैः सत्प्रधूपैः ॥
बुधाः० ॥ ॐ० ॥ धूपं ॥ ७ ॥

मनोनेत्रहार्यैः सुपक्काम्रपूगैः । कदंबैश्च मोदैः सुनानाफलौघैः ॥
बुधाः० ॥ ॐ० ॥ फलं ॥ ८ ॥

इंद्रवज्रा-पानीयगंधाक्षतपुष्पचारु- । नैवेद्यसद्दीपसुधूपवर्गैः ॥
फलैर्महार्घ्यैर्वरवर्धमान- । मुत्तारयध्वं खलु स्वेष्टसिध्यै ॥
अर्घ्यम् ॥ ९ ॥

अनु०-ततो जिनेंद्रपादांते वारिधारां निपातये ।
भृंगारनालिकोद्भातां विनमल्लोकशांतये ॥ शांतिधारा ।
दिव्यपुष्पांजलिः ॥ १० ॥

॥ अथ जयमाला ॥

अनु०-चंद्रार्ककोटिसंकाशं कंदर्पाग्निशरं चिरं* ।
कनत्कांचनसद्वर्णं भजेऽहं वृषवर्धनम् ॥ १ ॥

---

*हरं, इति साधुः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पादाकुलक-सन्मतिजिनपं सरसिजवदनं । संजनिताखिलकर्मकमथनं ॥
पद्मसरोवरमध्यगतेंद्रं । पावापुरि महावीरजिनेंद्रं ॥ १ ॥
वीरभवोदधिपारोत्तारं । मुक्तिश्रीवधुनगरविहारं ॥ पद्म० ॥२॥
द्विर्द्वादशकं तीर्थपवित्रं । जन्माभिषवणकृतनिर्मलगात्रं ॥पद्म०।३।
वर्धमाननामाख्यविशालं । मानप्रमाणलक्षणदशतालम् ।पद्म०।४।
शत्रुविमथनविकटभटवीरं । इष्टैश्वर्यधुरीकृतदूरं ॥ पद्म० ॥ ५ ॥
कुंडलपुरि सिद्धार्थभूपाल । स्तत्पत्नीप्रियकारिणिबालं ॥पद्म०।६।
तत्कुलनलिनविकाशितहंसं । घातपुरोघातिकविध्वंसं ॥पद्म०।७॥
ज्ञानदिवाकरलोकालोकं । निर्जितकर्मारातिविशोकं ॥ पद्म०॥८॥
बालत्वे संयमसुपालितं । मोहमहानलमथनविनीतं ॥पद्म० ॥९॥

घत्ता— सर्वसाम्राज्यसंत्याज्यं कृत्वा तं श्रीमहानयं ॥
खंडितं कर्मवैरीणां लब्धश्रीसंगमं परं ॥ अर्घ्यम् ॥ १० ॥

॥ अथ श्रुतपूजा ॥

वसंततिलका-श्रीमज्जिनेंद्रलपनांबुरुहात्मलाभ ।
माहात्म्यविश्वमहिते सुरसार्थसार्थे ॥
स्यात्कारलांछितपदप्रमितत्विषांगे ।
एहीह तिष्ठ बत वाणि मम प्रसिध्यै ॥ १ ॥

ॐ ह्रीं शब्दब्रह्ममुखोत्पन्नद्वादशांगश्रुतदेवि अत्र एहि २ संवौषट् स्वाहा। ॐ० अत्र तिष्ठ २ ठठ स्वाहा। ॐ०अत्र मम सन्निहिता भव २ वषट् स्वाहा। आह्वानस्थापनसन्निधीकरणम् ॥

वसंत०—श्रीहेमकुंभपरिपूरितदिव्यतोयैः ।
संपूजयामि वरभव्यसुखाय वाणीं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ह्रीं शुद्धब्रह्ममुखोत्पन्नद्वादशांगश्रुतदेव्यै दिव्यजलं निर्वपामि स्वाहा ॥ १ ॥

श्रीखंडसारघनसारसुकुंकुमाद्यैः । संपू० ॥ ॐ० ॥ गंधं ॥ २ ॥

सौगंध्यबद्धकलमाक्षतपुण्यपुंजैः । संपू० ॥ॐ०॥ अक्षतं ॥ ३ ॥

वासंतिकाबकुलमालतिचंपकाद्यैः । संपू० ॥ॐ०॥ पुष्पं ॥ ४ ॥

संसिद्धशुद्धपरमान्नसिताज्यभक्ष्यैः । संपू० ॥ॐ०॥ चरुं ॥ ५ ॥

प्रालेयकालवरनिर्मलरत्नदीपैः । संपू० ॥ ॐ० ॥ दीपं ॥ ६ ॥

कालागरुप्रसरसौरभधूपधूम्रैः । संपू० ॥ॐ०॥ धूपं ॥ ७ ॥

नारंगनिंबुकदलीपनसाम्रपक्वैः । संपू० ॥ ॐ० ॥ फलं ॥ ८ ॥

क्षीरोदचिन्हादिविजांगविशेषवस्त्रैः । संपू ॥ॐ०॥ वस्त्राभरणं ॥९॥

केयूरहारमणिकुंडलशेखराद्यैः । संपू०॥ॐ०॥ षोडशाभरणं ॥१०॥

श्रीमज्जिनेंद्रमुखपद्मविराजमानां । संपू० ॥ ॐ०॥ अर्घ्यं ॥११ ॥

शांतिधारा । पुष्पांजलिः ॥

॥ अथ गुरुपूजा ॥

इंद्रवज्रा- सम्यक्त्वमूलं सुमतिप्रकांडं । सुवृत्तशाखं विबुधालिसेव्यं ॥
अभीष्टदं सद्गुणगंधिपुष्पं । सुरेंद्रकल्पद्रुममर्चयेऽहम् ॥१॥

ॐ ह्रीं चतुरशीतिलक्षगुणगणधरचरणा अत्र अवतरत २ संवौषट् स्वाहा । ॐ० अत्र तिष्ठत २ ठठ स्वाहा । ॐ० अत्र मम सन्निहिता भवत २ वषट् स्वाहा ॥ आह्वानस्थापनसन्निधीकरणम् ॥

अनु- हेमभृंगारनिर्यांतहारया वारिधारया ।
श्रीमत्साधुसमूहस्य पादमभ्यर्चयाम्यहम् ॥

ॐ ह्रीं गणधरचरणेभ्यो जलं निर्वपामि स्वाहा ॥१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनु०—श्रीखंडागरुकर्पूरमिश्रया गंधचर्चया । श्रीम०॥ॐ०॥ गंधं ॥२॥
अक्षतैरक्षयानंतसंपत्संपादनक्षमैः । श्रीम० ॥ॐ०॥ अक्षतं ॥३॥
पुष्पैश्चंपकपुन्नागमल्लिकाबकुलादिभिः । श्रीम० ॐ०॥ पुष्पं ॥४॥
नैवेद्येनानवद्येन सुधासारसमत्विषा । श्रीम० ॥ ॐ० चरुं ॥५॥
दीपैः कर्पूरमाणिक्यवर्तिकाग्रविनिर्गतैः । श्रीम०॥ॐ॥ दीपं ॥६॥
सौरभ्यकृष्णभाधूमैर्धूपैरगरुसंभवैः । श्रीम० ॥ ॐ० ॥ धूपं ॥७॥
फलैर्नारंगजंबीरजंब्वाद्यैर्हृद्यतांगतैः । श्रीम० ॥ ॐ० ॥ फलं ॥८॥

मालिनी-यमनियमनिधीनामर्चयित्वा यतीना— ।
मपरिमितगुणानामंघ्रिपद्मानि भक्त्या ॥
तदनुसकलभव्यप्राणिकर्मोपशांत्यै ।
शुचिमुपरचयामो वारिभिः शांतिधारां ॥
अर्घ्यं ॥ शांतिधारा ॥ पुष्पांजलिः ॥

॥ अथ यक्षपूजा ॥

स्रग्धरा- यस्य श्रीपादसेवानमदमरगणाः शंखभेरीमृगारि ।
ध्वानद्घंटानिनादादहमहमिकयाऽऽगत्य संभूरिभक्त्या ॥
तद्देवस्योपतीर्थव्यवहृतिसमये नंदयन्भव्यलोकान् ।
धर्मद्रोहान् विलिंपन्जगति नुतिमितो यक्षदेवैः समेतः ॥

ॐ न्हीं क्रों प्रशस्तवर्णसर्वलक्षणसंपूर्णस्वायुधवधूचिन्हसपरिवार हे यक्ष अत्रागच्छागच्छ संवौषट् स्वाहा । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ आह्वानस्थापनसन्निधीकरणम् ॥

इंद्रवज्रा-सन्मंगलैः पूर्णघटातपत्रै । र्ध्वजोल्लसच्चामरदर्पणाद्यैः ।
धर्मप्रभावप्रवणप्रवीणं । धर्मानुरागेण यजामि यक्षम् ॥

ॐ न्हीं क्रों प्र० हे यक्ष इदमर्घ्यं इत्यादि ॥ यस्या० ॥ शांतिधारा ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ यक्षीपूजा ॥

इंद्रवज्रा- जातं भवान्वर्थविभावतो वा हुंडावसर्पिण्यतिदोषतो वा ।
मिथ्यामतं नाशयितुं समर्थां यक्षीं समाहूय वृषानुरक्तां ॥

ॐ ह्रीं क्रों प्रशस्तवर्णे सर्वलक्षणसंपूर्णे स्वायुधाचिन्हसपरिवारे हे यक्षिणि अत्रागच्छागच्छ संवौषट् स्वाहा । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ० अत्र मम सन्निहिता भव २ वषट् स्वाहा ॥ आह्वानस्थापनसन्निधीकरणम् ॥

इंद्रवज्रा- संगीतभृंगारपुरःसरेण । सन्मंगलेनापि मनोहरेण ।
दुर्मार्गसक्तानतुशासमानां । यजामि यक्षीं वृषपक्षपाताम् ॥

ॐ ह्रीं क्रों प्र० हे याक्षिणि इदमर्घ्यं इत्यादि ॥ यस्यार्थं०॥ शांतिधारा ॥

॥ अथ क्षेत्रपालपूजा ॥

शार्दूलवि० आस्मिञ्जैनमहामहोत्सवविधाविंद्रादिदिक्पालक-
स्थित्यर्थं परितो दिशास्वभिमुखं निक्षिप्य दर्भासनं ॥
आरोप्यार्घ्यमनर्घ्यमंत्रयजनैर्विघ्नौघविच्छित्तये ।
शक्राद्यैरभिपूज्यते तरुभुवि श्रीक्षेत्रपालाधिपः ॥१॥

ॐ ह्रीं क्रों प्रशस्तवर्ण सर्वलक्षणसंपूर्ण स्वायुधवाहनचिन्हसपरिवार हे क्षेत्रपाल अत्रागच्छागच्छ संवौषट् स्वाहा ॐ० अत्र तिष्ठ २ ठ ठ स्वाहा, । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ आह्वानस्थापनसन्निधीकरणम् ॥

इंद्रवज्रा—सन्मंगलाद्यैर्वरभाजनस्थैः । संपूर्णतोयादिसमन्वितैश्च ॥
रक्षत्सुचैत्यालयभूमिभागं । श्रीक्षेत्रपालं परिपूजयामि ॥

ॐ ह्रीं क्रों क्षेत्रपालाय अर्घ्यं समर्पयामि ॥ शांतिधारा ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ मंगलारती ॥

जय मंगलं नित्यशुभमंगलं । जय विमल गुणनिलय पुरुदेव ते ॥ जय मंगलं ॥धृ॥ वंदारुजिनवृषभवृंदवंदितचरण । मंदारकुंद-सितकीर्तिधर ते ॥ इंदुकरघृणिकोटिजितविशदतनुकिरण । मंदरगिरीं-द्रनिभवरधीर ते ॥जय०॥१॥ घोरतरसंसारवाराशिगततीर । नारीजना-काररागहर ते ॥ मारवीरेशकरकोदंडभंगकर । सारशिवसाम्राज्यसुखसार ते ॥ जय० ॥२॥ सुकिसलयततिविततकंकेलितरुनिकट । सुखविनुत-सुरकुसुमवर्षयुत ते ॥ अकलंकजनहृदयतिमिरौघनुदनिनद । सकल-शशिसितचमरनिकरधुत ते ॥३॥ चंडकेसरिविधृतपुंडरीकासनक । मंडित-सुभामंडलभात ते खंडिताशनिघोषदिविजदुंदुभिनाद । पुंडरीकत्रितय-जितचंड ते ॥ जय० ॥४॥ निरुपम निरातंक निःशेष निर्माय । निर-शन निःशोष निर्मोह ते ॥ परमसुख परदेव परमेश परवीर्य । निरव निर्मलरूप वृषभेश ते जय० ॥

वसंत· दध्युज्वलाक्षतमनोहरपुष्पदीपैः ।
पात्रर्पितैः प्रतिदिनं महतादरेण ॥
त्रैलोक्यमंगलसुखालय कामदाह ।
मालार्तिकां तव विभोर वतारयामि ॥ १ ॥

इति मंगलार्तिकावतरणम् ॥

॥ अथ सरस्वतीमंगलारती ॥

जय मंगलं भवतु शुभमंगलं । जय शीलविमलतरललितांगि ते ॥ जय मगलं भवतु शुभमंगलं ॥ धृ० ॥ सुरनरोरगमुकुटकिरणरंजितचरणे परमजिनमुखकमलसंभवाति ते ॥ दुरितघनवनविषयतरुनिकरपरशुनिभे ॥ वरसदागमसारस्यंदितनु ते ॥ जय० ॥ १ ॥ सारानिःसारसुविचारपरभाषणे ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भूरिवरसारगुणमणिभूषणे ॥ मारसूरेशकरशरवारिरोषणे । नारीजनाकारनीत-धिषणे ॥ जय० ॥ २ ॥ पद्मपादे पद्मदलविलसलोचने । पद्मनाभे सुभगे पद्मपाणे ॥ पद्मगंधि पद्मदलविलसदानने । पद्मयाने सुरभिपद्मासने ॥ जय० ॥ ३ ॥ पावनचरित्रधरभावज्ञमुनिशरणे । भावितसुभावनामतिरूपिणि ॥ भावजसुभामिनीरूपमददारिणि । भावसंदोहशुभभावजननि ॥ जय० ॥४ ॥ मंगलांगिनि तुंगमंगलोत्तमशरणे । मंगलाकारयुतमंगलाभरणे ॥ मंगलसुधा-सूक्तिरसपूरपूरणे । मंगलचिदानंदसंगधरणे ॥ जय० ॥ ५ ॥

॥ अथ गणधरमंगलारती ॥

जय मंगलं भवतु शुभमंगलं । जय योगिराज गणधरदेव ते ॥ जय मंगलं भवतु शुभमंगलं ॥ धृ० ॥ अमलचतुराशीतिलक्षगुणगणधरण । विमलमूर्ते विरज निर्मोह ते ॥ अमरेंद्र नागेंद्रनुतचरण मुनिशरण । हिमर-श्मिशांतरससंदोह ते ॥ जय० ॥ १ ॥ मतिश्रुतावधिमनःपर्ययज्ञानधर ॥ शतमन्युवंद्यपदपद्मयुग ते ॥ श्रुतजलधिपार महावनाधिसमगंभीर । जितकाम जितक्रोध जितराग ते ॥ जय० ॥ पंचमहाचार पंचमहाव्रतधार । पंचेंद्रि-यमथक सन्मुनिनाथ ते ॥ पंचसत्सामितिपालनचतुर महाधीर । पंचमस्थान-योषिन्नाथ ते ॥ जय० ॥ ३ ॥

॥ अथ शांतिभक्तिः ॥

अथ जिनेंद्रमहापूजायां पूर्वाचार्यानुक्रमेणसकलकर्मक्षयार्थं भावपूजावंदनास्तवसमेतं श्रीमच्छांतिभक्ति कायोत्सर्गं करोम्यहम् ॥

दोधक०**शांतिजिनं शशिनिर्मलवक्त्रम् । शीलगुणव्रतसंयमपात्रम् ॥**
अष्टशतार्चितलक्षणगात्रं । नौमि जिनोत्तममंबुजनेत्रम् ॥१॥
पंचममीप्सितचक्रधराणां । पूजितमिंद्रनरेंद्रगणैश्च ॥
शांतिकरं गणशांतिमभीप्सुः । षोडशतीर्थकरं प्रणमामि ॥२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दिव्यतरुः सुरपुष्पसुवृष्टि । दुंदुभिरासनयोजनघोषः ॥
आतपवारणचामरयुग्मे । यस्य विराजितमंडलतेजः ॥३॥
तं जगदर्चितशांतिजिनेंद्रं । शांतिकरं शिरसा प्रणमामि ॥
सर्वगणाय तु यच्छतु शांतिं । मह्यमरं पठते परमां च ॥४॥

भुजंग— अशोकवृक्षः सुरपुष्पवृष्टि- । र्दिव्यध्वनिश्चामरमासनं च ॥
भामंडलं दुंदुभिरातपत्रं । सत्प्रातिहार्याणि जिनेश्वराणाम् ॥५॥

वसंत० येऽभ्यर्चिता मुकुटकुंडलहाररत्नैः ।
शक्रादिभिः सुरगणैः स्तुतपादपद्माः ॥
तेमेजिनाः प्रवरवंशजगत्प्रदीपा- ।
स्तीर्थंकराः सततशांतिकरा भवंतु ॥६॥

इंद्रवज्रा- संपूजकानां प्रतिपालकानां । यतींद्रसामान्यतपोधनानाम् ।
देशस्य राष्ट्रस्य पुरस्य राज्ञः । करोतु शांतिं भगवाञ्जिनेंद्रः ॥७॥

स्रग्धरा० क्षेमं सर्वप्रजानां प्रभवतु बलवान्धार्मिको भूमिपालः ।
काले काले च सम्यग्वर्षतु मघवा व्याधयो यांतु नाशं ॥
दुर्भिक्षं चोरमारी क्षणमपि जगतां मास्मभूज्जीवलोके ।
जैनेंद्रं धर्मचक्रं प्रभवतु सततं सर्वसौख्यप्रदायि ॥८॥

अनुष्टुप्० प्रध्वस्तघातिकर्माणः केवलज्ञानभास्कराः ॥
कुर्वंतु जगतः शांतिं वृषभाद्या जिनेश्वराः ॥९॥

इच्छामि भंते संतिभत्तिकाउस्सग्गो कओ । तस्सालोचेउं । पंच–महाकल्लाणसंपण्णाणं । अट्ठमहापाडिहेरसहियाणं । चउतीस अइस–यविसेससंजुत्ताणं । बत्तीसदेविंदमणिमउलिमत्थयमहियाणं । बलदेव-वासुदेवचक्कहररिसिमुणिजइअणगारावगूढाणं । थुइसयसहस्सणिलयाणं उसहाइवीरावसाणाणं । मंगलमहापुरिसाणं । भत्तिये णिच्चकालमच्चेमि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पूजेमि वंदामि णमंसामि । दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहिमरणं जिणगुणसंपत्ति होउ मज्झं ॥

॥ ऽअथ पुष्पांजलिः ॥

मालिनी-कमलवकुलवालोत्फुल्लकल्हारमल्ली-
कुमुदकुरबकोद्यद्द्योतिताकेतकीनाम् ॥
दवनमरुबकाणां मालतीचंपकानाम् ।
जिनचरणपुरस्तादंजलिं प्रोत्क्षिपामः ॥ १ ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हन् इदं पुष्पांजलिप्रार्चनं गृण्ह २ नमोऽर्हते स्वाहा ॥

॥ अथ पंचांगप्रणामः ॥

स्रग्धरा—प्रध्वस्ताशेषघातिप्रकटनिरवधिज्ञानदृग्वीर्यसौख्यः ।
कल्याणैः पंचभेदैः प्रविलसति चतुस्त्रिंशता चातिशेषैः ॥
तैरष्टप्रातिहार्यैस्त्रिजगदधिपतिर्यस्तमेनं प्रवंदे ।
स्याद्वादामोघवाक्यं सकलसुखकरं सन्नतेंद्रं जिनेंद्रम् ॥१॥

इति पंचांगप्रणामः ॥

॥ अथविसर्जनम् ॥

अनु०—आह्वानं स्थापनं चैव । सन्निधीकरणं तथा ॥
पंचोपचारविधिना । पूजनं तु विसर्जनम् ॥ १ ॥

ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः अ सि आ उ सा अर्हत्परमेष्ठिन् स्वस्थानं गच्छ २ जः जः जः ॥ ॐ ह्रीं सरस्वतीदेवि स्वस्थानं गच्छ २ जः ३॥ ॐ ह्रीं गणधरदेव स्वस्थानं गच्छ २ जः ३ ॥ ॐ आं क्रों ह्रीं हे यक्ष स्वस्थानं गच्छ २ जः ३ ॥ ॐ आं क्रों ह्रीं हे यक्षि स्वस्थानं गच्छ २ जः ३ ॥ ॐ आं क्रों ह्रीं हे क्षेत्रपाल स्वस्थान गच्छ २ जः ३ ॥

ऽ येथें मंगलाष्टक म्हणावयाचें असल्यास; प्रथम पानांत आहे म्हणून घ्यावें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शार्दूल० मोहध्वांतविदारणं विशदविश्वोद्भासिदीप्तिश्रियम् ।
सन्मार्गप्रतिभासकं विबुधसंदोहामृतापादकं ॥
श्रीपादं जिनचंद्रशांतिशरणं सद्भक्तिमानेऽमिते ।
भूयस्तापहरस्य देव भवतो भूयात् पुनर्दर्शनम् ॥ १ ॥
इति नित्याभिषेकः समाप्तः ॥

स्वामीस गंधोदक देणेचा मंत्र.

अनु०- यत्प्रसादाद्धि चारित्ररत्नमासाध्यमुच्यते ॥
भूता भवंतो भव्याश्च प्रणम्य गुरुपादयोः ॥ १ ॥

समस्त श्रावक व श्राविका यांना गंधोदक देणेचा मंत्र

निर्मलं निर्मलकरं पवित्रं पापनाशनम् ॥ श्रीमज्जिनगंधोदकं सकलकर्मनिवारणम् ॥ सकलदोषनिवारणम् ॥

श्रीमदाशाधरकृतपूजांगम् ।

॥ 卐 अथ अधिवासनम् ॥

ॐ नमः सिद्धेभ्यः । श्रीवीतरागाय नमः श्रीसरस्वत्यै नमः ।
श्रीगुरुभ्यो नमः ॥

इंद्रवज्रा- जिनान्नमस्कृत्य जिनप्रतिष्ठा । शास्त्रोपदेशाद्व्यवहारदृष्ट्या ।
श्रीमूलसंघे विधिवत्प्रबुद्धा । न्भव्यान्प्रवक्ष्ये जिनयज्ञकल्पम् ॥१॥

ॐ ह्रीं विधियज्ञप्रतिज्ञापनाय जिनप्रतिमोपरि पुष्पांजलिं क्षिपेत् ॥
[या मंत्रानें जिनप्रतिमेवर +पुष्पांजलि करणें]

वसंत- श्रीवीतरागममृतेशमनंतबोधं ।
ब्रह्मादिदेवनुतपादसरोजयुग्मं ॥

卐 अधिवास्यैव कर्त्तव्यं पूजनं परमेष्ठिनां । स्नपनं वा ततः पूर्वकर्मस्यादधिवासनं ॥ १ ॥

\+ दोन्हीं हातानीं ओंजळ करून फ़ुलें टाकणें याला पुष्पांजलि म्हणतात.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भक्त्या प्रणम्य जिनराजमहं समासा-।
द्वक्ष्ये जिनेंद्रसवनं तनुधीसमेतः ॥ २ ॥
रागादिदोषरहितं सुरराजवंद्यं ।
नत्वा जिनेशमखिलामलयोगिसेव्यं ॥
पुष्पांजलिं जिनमखे वरमुत्क्षिपामि ।
श्रीमूलसंघवरभव्यजगत्प्रशांत्यै ॥ ३ ॥
इति ×प्रस्तावनाय पुष्पांजलिः ॥

अनु०- मंगलं भगवानर्हन्मंगलं भगवाञ्जिनः ।
मंगलं प्रथमाचार्यो मंगलं वृषभेश्वरः ॥ ४ ॥
मंगलं प्रथमं लोकेषूत्तमं शरणं जिनं ।
नत्वायमर्हतः पूजाक्रमः स्याद्विधिपूर्वकम् ॥ ५ ॥
विज्ञानं विमलं यस्य भासते विश्वगोचरं ।
नमस्तस्मै जिनेंद्राय सुरेंद्राभ्यर्चितांघ्रये ॥ ६ ॥

ॐ जय जय नमोऽस्तु नमोऽस्तु नमोऽस्तु ॥ ॐ णमो अरिहंताणं । णमो सिद्धाणं णमो आइरियाणं । णमो उवज्झायाणं । णमो लोए सव्वसाहूणं ॥

वसंत- श्रीमज्जिनेंद्रकथिताय सुमंगलाय ।
लोकोत्तमाय शरणाय विनेयजंतोः ॥

× प्रस्तावना, पुराकर्म, स्थापन, सन्निधापन, स्नपन आणि पूजन अशी ६ प्रकारची जिनसेवा आहे. १ ॐकार शब्दोच्चारपूर्वक पुष्पांजलि करणें, याला प्रस्तावनसेवा म्हणतात. २ पंचकुमारादि षोडशाभरणपर्यंत विधि करणें, याला पुराकर्म सेवा म्हणतात. ३ कलशस्थापनादि श्रीजिनप्रतिमास्थापनपर्यंत विधिकरणें, याला स्थापनसेवा म्हणतात. ४ आह्वाहनादि अष्टविधार्चनापर्यंत विधिकरणें, याला सन्निधापनसेवा म्हणतात. ५ दिक्पालाव्हाहनादि गंधोदकाभिषेकपर्यंत विधिकरणें, याला स्नपनसेवा म्हणतात. ६ देव गुरुशास्त्रादि यक्षयक्षीपर्यंत पूजाविधि करणें, याला पूजनसेवा म्हणतात. पीठयंत्राराधनादि मोठमोठें विधान करणें यालाही पूजनसेवा असें म्हटलें आहे. याप्रमाणें जिनसेवा ६ प्रकारची आहे.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धर्माय कायवचनाशयशुद्धितोऽहं ।
स्वर्गापवर्गफलदाय नमस्करोमि ॥

वसंत०देवेंद्रवंद्यमभिवंद्य विशोध्य हस्ता ।
वीर्यापथस्य परिशुद्धिविधिं विधाय ॥

सद्धज्ञपंजरगतकृतसिद्धभक्ति। देवं समर्च्य सकलीकरणं करोमि ॥८॥

ॐ न्हीं असुजर सुजर भव भव हस्तशुद्धिं करोमि स्वाहा ।

हस्तप्रक्षालनम् ॥

(या मंत्रानें आपल्या दोन्ही हातांस पाणी लावून घेणें)

अनु०—अपवित्रः पवित्रो वा सुस्थितो दुस्थितोऽपि वा ।
ध्यायेत्पंचनमस्कारं सर्वपापैः प्रमुच्यते ॥ ९ ॥

अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपि वा ।
यः स्मरेत्परमात्मानं स बाह्याभ्यंतरे शुचिः ॥ १० ॥

ॐ न्हां न्हीं न्हूं न्हौं न्हः अ सि आ उ सा मम सर्वांगशुद्धिं करोमि स्वाहा । सर्वांगशोधनम् ॥

(या मंत्राने आपल्या दोन्ही हातांनीं अंगावर पाणी शिंपून घेणें.)

ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय २ सं सं क्लीं क्लीं ब्लूं ब्लूं द्रां द्रां द्रीं द्रीं द्रावय द्रावय हं झं झ्वीं क्ष्वीं हं सः स्वाहा । इत्यमृतस्नान मंत्रः ॥ (या मन्त्रानें आपल्या दोन्ही हातांच्या अंगठयाजवळ असलेल्या तर्जनी बोटांनीं डोक्यावर पाणी घेणें.)

अणुव्रतपंचकं गुणव्रतत्रयं शिक्षाव्रतचतुष्टयं । अर्हत्सिद्धाचार्योपाध्याय-सर्वसाधून् साक्षी कृत्य । सम्यक्त्वपूर्वकं सुव्रतं दृढव्रतं समारूढं मे भवतु ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(या मंत्रानें अणुव्रतादि × १२ व्रतें स्वीकारणें.)

वसंत—अद्याभवत्सफलता नयनद्वयस्य ।
देव त्वदीयचरणांबुजवीक्षणेण ।
अद्य त्रिलोकतिलक प्रतिभासते मे
संसारवारिधिरयं चुलकप्रमाणम् ॥११॥

अनु०— अद्य मे क्षालितं गात्रं नेत्रेच विमले कृते ।
स्नातोऽहं धर्मतीर्थेषु जिनेंद्र तव दर्शनात् ॥१२॥
अपराजितमंत्रोऽयं सर्वविघ्नविनाशनः ।
मंगलेषु च सर्वेषु *प्रथमं भवति मंगलम् ॥१३॥

अनु०--एसो पंच णमोयारो सव्वपावप्पणासणो ।
मंगलाणं च सव्वेसिं पढमं होइ मंगलं ॥१४॥

ॐ चत्तारिमंगलं अरहंता मंगलं । सिद्धा मंगलं । साहू मंगलं । केवलीपण्णत्तो धम्मो मंगलं ॥ चत्तारिलोगुत्तमा । अरहंतालोगुत्तमा । सिद्धालोगुत्तमा । साहूलोगुत्तमा । केवलिपण्णत्तोधम्मोलोगुत्तमा ॥ चत्तारिसरणंपव्वज्जामि । अरहंते सरणं पव्वज्ञामि । सिद्धे सरणं पव्वज्ञामि । साहूसरणंपव्वज्ञामि । केविलिपण्णत्तोधम्मोसरणंपव्वज्ञामि ॥ ॐ नमोऽर्हते स्वाहा ॥ (येथें दोन्ही हात जोडून जिनप्रतिमेस नमस्कार करणें.)

×बाराव्रतेः—अणुव्रते-१ अहिंसा, २ सत्य, ३ अस्तेय, ४ स्वदारसंतोष, ५ परिग्रहप्रमाण. गुणव्रते- १ दिग्व्रत, २ देशव्रत, ३ अनर्थदंडविरति. शिक्षाव्रते- १ सामायिक, २ प्रोषधोपवास, ३ भोगापभोगपरिमाण ४ अतिथि संविभाग.

* प्रथमं मंगलं भवेत् इति साधुः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनु० अर्हमित्यक्षरं ब्रह्मवाचकं परमेष्ठिनां ।
सिद्धचक्रस्य सद्बीजं सर्वतः प्रणिदध्महे ॥

शार्दूल०आकृष्टिं सुरसंपदां विदधते मुक्तिश्रियो वश्यता— ।
मुच्चाटं विपदां चतुर्गति भवां विद्वेषमात्मैनसां ॥
स्तंभं दुर्गमनं प्रति प्रयततो मोहस्य संमोहनं ।
पायात्पंचनमस्क्रियाक्षरमयी साऽऽराधना देवता ॥१६॥

इत्याशिर्वादः ॥ (येथें हातांत थोडे तांदूळ घेऊन टाकणें.)

वसंत०श्रीमज्जिनेंद्रमभिवंद्य जगत्त्रयेशं ।
स्याद्वादनायकमनंतचतुष्टयार्हं ॥
श्रीमूलसंघसुदृशां सुकृतैकहेतु ।
जैनेंद्रयज्ञविधिरेष मयाऽभ्यधायि ॥१७॥
स्वस्ति त्रिलोकगुरवे जिनपुंगवाय ।
स्वस्ति स्वभावमहिमोदयसुस्थिताय ॥
स्वस्ति प्रकाशमहिमोर्जितदिग्मुखाय ।
स्वस्ति प्रसन्नललिताद्भुतवैभवाय ॥१८॥
स्वस्ति ज्वलद्विमलबोधसुधाप्लवाय ।
स्वस्ति स्वभावपरभावविभासकाय ॥
स्वस्ति त्रिलोकविदितोज्वलचिन्मयाय ।
स्वस्ति त्रिकालसकलायतिविश्रुताय ॥१९॥
अर्हन् पुराणपुरुषोत्तम पावनानि ।
वस्तून्यनल्पमहिमान्यहमेक एव ॥
अस्मिन् ज्वलद्विमलकेवलबोधवन्हौ ॥
पुण्योदयाग्रमहिमैकमना जुहोमि ॥२०॥
द्रव्यस्य शुद्धिमधिगम्य यथानुरूपां ॥
भावस्य शुद्धिमधिकामधिगंतुकामः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आलंबनानि विविधान्यवलंब्य वल्गन् ।
भूतार्थयज्ञपुरुषस्य करोमि यज्ञम् ॥२१॥

ॐ ऱ्हीं विधियज्ञप्रतिज्ञापनाय जिनप्रतिमोपरि पुष्पांजलिं क्षिपेत् ॥

स्रग्धरा-चिद्रूपं विश्वरूपं व्यतिकलितमनाद्यंतमानंदसांद्रं ॥
यत्प्रासैस्तैर्विवृत्तैर्व्यहरदधिपतेर्दुःखसौख्याभिमानैः ॥
कर्मोद्रेकात्तदात्मप्रत्ययमलभिदोद्भिन्ननिःसीमतेजः ।
प्रत्यासीदत्परौजः स्फुरदिह परमब्रह्मयज्ञार्हमर्हं ॥ २२ ॥

ॐ ऱ्हीं नमः परमब्रह्मणे विधियज्ञप्रतिज्ञापनाय प्रतिमोपरि पुष्पांजलिं क्षिपेत् ॥

शालिनी-स्वामिन्संवौषट्कृताह्वाहनस्य । द्विष्ठांतेनोट्टंकितस्थापनस्य ।
स्वाहानिर्विष्टे वषट्कारजाग्रे । सान्निध्यस्य प्रारभे ¹ह्यष्टधेष्टिं ॥२३॥

---

१ जल गंध, अक्षत, पुष्प, चरु, दीप, धूप फ़ल अशी आठ प्रकारची मुख्य जिनपूजा आहे. यांत अर्घ्य शांतिधारा व पुष्पांजली ह्या ३ पूजा मिळविल्या म्हणजे हीच जिनपूजा ११ प्रकारची होते. आतां जलपूजा झारीनें किंवा इतर पात्रानें पाण्याची धार सोडून करणें. गंध अक्षत पुष्प व फल ह्या ४ पूजा हातानें किंवा पात्रानें करणें. चरुपूजा सुवर्णपात्रानें करणें. दीपपूजा दीपपात्रानें करणें. धूपपूजा धूपपात्रानें करणें अर्घ्यपूजा पात्रानेच करणें. शांतिधारापूजा झारीनें किंवा इतर पात्रानें पाण्याची धार सोडून करणें. व तसेंच पुष्पांजलिपूजा हातानेंच करणें. १ आह्वाहन, स्थापन, सन्निधीकरण, विनय व नमस्कार अशा ५ मुद्रा आहेत. दोन्ही हाताच्या करंगळी-जवळ असलेल्या अनामिक बोटावर अंगठे ठेऊन ओंजळ करून धरणें, याला आह्वानमुद्रा म्हणतात. तीच मुद्रा उलट करून धरणें, याला स्थापनमुद्रा म्हणतात. अंगठे वर करून धरलेल्या दोन्ही मुठी जुळवून धरणें, याला सन्निधीकरणमुद्रा म्हणतात. कमलाच्या कळीप्रमाणें हात जोडून धरणें, याला विनयमुद्रा म्हणतात. दोन्ही हातांचे तळवटे एकमेकास चिकटावून हात जोडणें व दोन्ही अंगठे जुळवून कपाळास लावून नमस्कार करणें, याला नमस्कार मुद्रा म्हणतात या ५ मुद्रेनें देव, गुरु, शास्त्र, यक्ष, यांचें आह्वाहन करीत जाणें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आर्या– मलयरुहललिततंडुलपुष्पैरधिवासनं जिनेंद्रस्य ।
संवौषट् ठठ वषडिति पल्लवमंत्रैस्त्रिकरणैः कुर्वे ॥ २४ ॥

॥ अथ आह्वाहनादिपुरःसरपूजां कुर्यात् ॥

शार्दूलः-श्रीमत्कुंडपुराधिनाथविलसत्सिद्धार्थभूवल्लभ ।
प्रेमार्द्राप्रियकारिणीप्रियसुतः संप्रार्च्यते सन्मतिः ॥
पंचास्योन्नतकेतनः कनकरुग्मातंगसिद्धायिनी ।
माणिक्याभरणाभिरंजितपदप्रोत्फुल्लपंकेरुहः ॥ २५ ॥

अनु०– आह्वयाम्यहमर्हंतं स्थापयामि जिनेश्वरं ।
सन्निधीकरणं कुर्वे पंचमुद्रान्वितं महे ॥ २६ ॥

ॐ ह्रीं अर्हत्परमेष्ठीन् अत्र एहि एहि संवौषडित्यादि ।

॥ 卐अथ अष्टकम् ॥

॥ अथ पंचमेरुपूजा ॥

अनु०– आदिः सुदर्शनो मेरुर्विजयोऽप्यचलस्ततः ।
चतुर्थो मंदरो नाम विद्युन्माली च पंचमः ॥ १ ॥

ॐ ह्रीं पंचमेरुस्थितशाश्वतजिनाबिंबा अत्र अवतरतावतरत संवौषट् स्वाहा । ॐ ह्रीं पंचमे० अत्र तिष्ठत तिष्ठत ठठ स्वाहा । ॐ ह्रीं पंचमे० अत्र मम सन्निहिता भवत भवत वषट् स्वाहा आह्वान-स्थापन सन्निधीकरणं ॥ १ ॥

इंद्रवज्रा–मंदाकिनीतीर्थजलैः सुगंधैः । सुवर्णभृंगारभृतैर्विशुद्धैः ॥
यः शाश्वतो मेरुषु पंचस्वच्छैः । प्रशामयैत्रा जिनमायजे तं ॥

卐 टीपः–हें अष्टक व जयमाला पान २२।२३ वर पाहून वाचणें; द्विरुक्ती नको म्हणून सोडले आहे.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ह्रीं पंचमेरुस्थितशाश्वतजिनबिंबेभ्यो जलं निर्वपामि स्वाहा ॥ १ ॥

श्रीखंडसारेण विलेपनेन । कर्पूरसत्कुंकुममिश्रितेन । यः शा० ॥

ॐ ह्रीं पंचमे० ॥ गंधं ॥ २ ॥

सुगंधशाल्यक्षतशुभ्रपुंजैः । पुण्यांकुरैर्दीर्घतरैरिवोच्चैः ।

यः शा० ॥ ॐ ह्रीं पंचमे० ॥ अक्षतान् ॥ ३ ॥

मंदारसत्केतकिचंपकाद्यैः । पद्मप्रसूनैः सुरभित्वसारैः ।

यः शा० ॥ ॐ ह्रीं पंचमे० ॥ पुष्पं ॥ ४ ॥

पीयूषपिंडैरिव मोदकाद्यैः । पक्वान्नशाल्योदनसान्निवेद्यैः ।

यः शा० ॥ ॐ ह्रीं पंचमे० ॥ चरुं ॥ ५ ॥

कर्पूरजातैर्घनजैर्मनोज्ञैः । सुवर्णपात्रोज्वलरत्नदीपैः ।

यः शा० ॥ ॐ ह्रीं पंचमे० ॥ दीपं ॥ ६ ॥

सुस्निग्धकृष्णागरुसारधूपैः । कर्पूरसच्चंदनहृद्यगंधैः ।

यः शा० ॥ ॐ ह्रीं पंचमे० ॥ धूपं ॥ ७ ॥

सौरभ्यसौरम्यसुरूपकाद्यै । गुणाधिकैः साधुफलैर्मनोज्ञैः ॥

यः शा० ॥ ॐ ह्रीं पंचमे० ॥ फलं ॥ ८ ॥

स्वच्छांबुगंधाक्षतपुष्पसारै । नैवेद्यकैर्दीपसुधूपवर्गैः ।

फलैर्महार्घ्यं जयतूर्यनादै । मेरोर्जिनार्चामवतारयामि ॥

ॐ ह्रीं पंचमेरुस्थितशाश्वतजिनबिंबेभ्योऽर्घ्यं निर्वपामि स्वाहा ॥

शांतिधारा । पुष्पांजलिः ॥

॥ अथ जयमाला ॥

जय मदनमदनिवारण मुक्तिसुखकारण विदितत्रिभुवन कृपाकर । जय जिन प्रभाकर परमदयाकर सप्ततत्वोज्वलदिवाकर ॥ १ ॥ सुरासुरशंकरपूजितपाद मनोभवपादपनगसुनाग । सुदर्शन-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मेरुसमाश्रितराम प्रसिद्ध विशुद्ध विमोह विकाम ॥ २ ॥ नरेंद्रफणीं-द्रखगेंद्ररमाद कुकर्मकुकाननवन्हिकलाद । सुदर्श० ॥ ३ ॥ अनंतगुणेश सदोदययुक्त कलाधर कामकुतूहलमुक्त । सुदर्श० ॥ ४ ॥ तथा सुसीमंधर तत्वविचार युगंधर बाहो गणेश विचार । सुदर्श० ॥ ५ ॥ सुबाहुजिनाधिप लुंचितकेश सुवर्णशरीर महेष्ट रमेश । सुदर्श० ॥ ६ ॥ चतुर्गतिदुःखनिवारक देव विरोचनचंद्ररमाकृतसेव । सुदर्शन० ॥ ७ ॥

घत्ता मालिनीः--सकलगुणसयुक्तं संपदो धाममिष्टं ।
विमलयतिसुवंद्यं धर्मभूपं मनोज्ञं ॥
स्मरति पठति मालां हृन्मुखे सिद्धिकांतं ।
भवति भुवनपूज्यः सारदेवेंद्रकीर्तिः ॥ अर्घ्यं ॥ ८ ॥

॥ ✠अथ श्रुतपूजा ॥

॥ इत्यधिवासनम् ॥

॥ अथ महाभिषेकः ॥

अनु० मंगलं भगवानर्हन् मंगलं भगवाञ्जिनः ।
मंगलं प्रथमाचार्यो मंगलं वृषभेश्वरः ॥ १ ॥
मंगलं प्रथमं लोकेषूत्तमं शरणं जिनं ।
नत्वायमर्हतः पूजाक्रमः स्याद्विधिपूर्वकम् ॥ २ ॥
विज्ञानं विमलं यस्य भासते विश्वगोचरं ।
नमस्तस्मै जिनेंद्राय सुरेंद्राभ्यर्चितांघ्रये ॥ ३ ॥

वसंत० प्रारब्धतांडवशचीपतिबाहुदंड ।
श्रैवानकप्रतिहतो मणिकांडको वा ॥

✠श्रुत गुरु, यक्ष-यक्षी व क्षेत्रपालपूजा पान २४ ते २७ पर्यंतची सर्व पूजा या ठिकाणीं करून घेणे.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यस्याभिषेकसमये सविता बभूव ।
दद्यादसौ जिनपतिर्मम मंगलानि ।। ४ ।।

ॐ परमब्रह्मणे नमो नमः स्वस्ति २ जीव २ नंद २ वर्धस्व २ विजयस्व २ अनुशाधि २ पुनिहि २ पुण्याहं २ मांगल्यं २ पुष्पांजलिः ।।

स्रग्धरा० घंटाटंकारवीणाक्कणितमुरजधां धां क्रियां काहलार्चि ।
झींकारोदारभेरीपटहदलदलंकारसंभूतघोषैः ।
आक्रम्याशेषकाष्ठातटमघटितं प्रोद्घटं दभ्रटिभ्र ।।
भिष्टाभिष्टार्हदिष्टिप्रमुखमिह लतांतांजलिं प्रोत्क्षिपामि ।। ५ ।।

ॐ ह्रीं वाद्योद्घोषेण सह पुष्पांजलिं करोमि स्वाहा ।। (येथें घंटादि नानाप्रकारें वाद्यें वाजवीत पुष्पांजलि करणें.)

स्रग्धरा० श्रीमन्मेरोः सुमूर्धन्यमरपरिवृढैरंबुभिः क्षीरसिंधो ।
रुद्धृत्योद्धृत्य मूर्ध्नाऽमितभुजगमितैर्हाटकैर्यैर्घटौघैः ।।
जन्मन्युच्चैर्जिनानां विधिरभिषवणे योऽभ्यदायिद्धशोभः, ।
सोऽस्मिन् प्रस्तूयतेऽद्य प्रकृतिपरिकरैः सर्वलोकैकशांत्यै ।।६।।

सर्वात्मप्रदेशघनघटितघातिजातप्रथितदुरघविघटनप्रकटीभूतपरमात्म-भावस्य सकलविमलकेवलावबोधप्रभाप्रभावावबोधितभव्यपद्माकरस्य सुरासुराधीशमुकुटतटघटितमणिगणकिरणवारिधाराधौतचारुचरणार---विंदस्य भगवतो जिनेंद्रस्य अभ्रंकषायदभ्रविभ्रमविचित्रकूटकोटिपिनद्ध-विततविधूयमानविविधध्वजराजिराजितविराजमानस्य नवसुधाधवलवि-मलितनिखिलदिक्पालनिलयस्य श्रीमदर्हत्परमेश्वरचारुचरणाराधनास-क्तविनेयजनसमाश्रयात्पुण्यपुंजायमानस्य चंद्रार्कायमाणमणिदर्पणादिना नोपपकरणकिरणाभिद्योतिताभ्यंतरस्य विचित्रचित्रितभित्तिचैत्यालयस्य मध्ये कृतमहामेरुतया जंबूद्वीपोपमाने प्रांगणे मंडपव्यावर्णनं सोदकानि पुष्पाणि क्षिपेत् ।। [येथें हातांत पाणी व फुलें घेऊन टाकणें.]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

अनु०–शोधयाम्यथ भूभागं जिनेंद्राभिषवोत्सवे ।
कलधौतोज्वलस्थूलकलशापूरवारिणा ॥

ॐ ह्रीं नमः सर्वलोकनाथाय धर्मतीर्थकराय श्रीशांतिनाथाय शांतिकराय परमपवित्राय पवित्रतरजलेन भूमिशुद्धिं करोमि स्वाहा । भूमिशोधनं ॥ (येथें पवित्रजलानें भूमिशोधन करणें.)

॥ अथ पंचकुमारपूजा ॥

शार्दूल०श्रीमज्जैनमहामहोत्सवविधिव्यापारसंसिद्धये ।
भव्यानामपि तन्नियोगनिचयश्रद्धापरीतात्मनां ॥
क्षेमार्थं क्रियमाणवास्तुविधिवत्संघातसंपूजनं ।
प्रस्तावे प्रविकीर्यते जयजयारावेण पुष्पांजलिः ॥

ॐ ह्रीं श्रीं क्षीं भूः स्वाहा वास्तुपुष्पांजलिः ॥ १ ॥

वसंत –उत्खातपूरितशमीकृतसंस्कृतायां ।
पुण्यात्मनीय भगवन्मखमंडपोर्व्यां ॥
वास्त्वर्चनादिविधिलब्धिमखादिभाग ।
वेद्यां यजामि शशिभृद्दिशि वास्तुदेवं ॥ २ ॥

ॐ आं क्रों ह्रीं हे वास्तुकुमारदेव अत्रागच्छागच्छ संवौषट् स्वाहा । ॐ आं क्रों ह्रीं हे वा० अत्र तिष्ठ तिष्ठ ठठ स्वाहा । ॐ आं क्रों ह्रीं हे वा० अत्र मम सन्निहितो भव भव वषट् स्वाहा । आह्वाहनं स्थापनं सन्निधीकरणं ॥ ॐ आं क्रों ह्रीं हे वास्तुकुमारदेव इदमर्घ्यं[1] पाद्यं[2] जलं गंधं अक्षतान् पुष्पं चरुं दीपं धूपं फलं बलिं[3] स्वस्तिकं[4] यज्ञभागं[5] च यजामहे प्रतिगृह्यतां २ स्वाहा ॥ यस्यार्थं० ॥ शांतिधारा ॥

---

१ यक्षादिपूजेमध्यें गंध, अक्षत, पुष्प आणि दर्भ हीं अर्घ्यद्रव्यें होत । २ केवळ पाणी हें पाद्यद्रव्य होय । ३ सामान्यपूजा "बलिः सामान्यतःपूजा बलिःस्याद्वलिवर्तिका । बलिस्याद्वर्णपूरोपि, बलिरन्नंसतोयकम्" ॥१॥ ४ गंधानें किंवा अक्षतानें तबकांत असें (卐) स्वस्तिक चिन्ह काढणें, याला स्वस्तिक असें म्हटलें आहे । ५ जल, गंध, अक्षत आणि पुष्प हीं द्रव्यें एका वस्त्रांत बांधणें, याला यज्ञभाग म्हणतात. ।

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उपेन्द्र०विभोः सभायाः परितः प्रभक्त्या, । महीतलं योजनमेकमात्रं ।
विशोधितं येन मरुत्कुमारः । संमार्जयेदध्वरयागभूमिम् ॥
ॐ ह्रीं वायुकुमार सर्वविघ्नविनाशनाय महीं पूतां कुरु २ हूं फट् स्वाहा । षड्दर्भपूलेन[१] भूमिं संमार्जयेत् ॥ ॐ ह्रीं हे वायुकुमार अत्रागच्छागच्छ संवौषट् स्वाहा । इत्यादि । ॐ ह्रीं हे वायुकुमार इदमर्घ्यमित्यादि ॥३॥

शार्दूल०घंटाटंकृतझंकृतोद्यमुरजश्रीकाहलाझींकृतैः ।
ढक्काढींकृतशंखभूंकृतसुभेरीभूरि भों भोंकृतैः ॥
गंगासिंध्वधिसंगमंगलजलैर्दुर्वारमेघैरलं ।
कुर्वे चारु जिनेंद्रयज्ञधरणीं भूरिं समृद्धिश्रियम् ॥३॥
ॐ ह्रीं मेघकुमार धरां प्रक्षालय २ तेषां प्रवोधनार्थं अं हं सं वं झं ठं क्षः हूं फट् स्वाहा । षड्दर्भपूलोपात्तजलेन[२] भूमिं सिंचेत् ॥ ॐ ह्रीं हे मेघकुमार आत्रागच्छागच्छ० ॥ ॐ ह्रीं हे मेघकुमार इदमर्घ्यमित्यादि ॥ ४ ॥

उपेन्द्र०षड्दर्भपूलाग्रमलंकरिष्णुः । प्रज्वल्य दीपप्रभया धरित्रीं ।
करोमि सिद्धांचलसिद्धिबद्धा । मध्यात्मबुध्याग्रजया श्रियाभां ॥४॥
ॐ ह्रीं क्रों हम्ल्व्र्यूं अग्निकुमार ज्वल प्रज्वल अमिततेजसे स्वाहा । षड्दर्भपूलानलेन[३] भूमिं ज्वालयेत् ॥ ॐ ह्रीं हे अग्निकुमार अत्रागच्छागच्छ० ॥ ॐ ह्रीं हे अग्निकुमार इदमर्घ्यमित्यादि ॥ ५ ॥

मालिनी-फणमणिगणराजिज्योतिरालीढभूमि- ।
प्रणयधरणदक्षान्मोक्षलक्ष्मीसमक्षान् ॥

---

१ दर्भाच्या सहा काडया घेऊन त्यांच्या शेंडयांनीं भूमि झाडून काढणें.

२ दर्भाच्या सहा काड्या घेऊन त्यांचे शेंडे पाण्यांत बुडवून भूमीवर शिंपणें.

३ दर्भाच्या सहा काडया घेऊन त्यांचें शेंडे दिव्यावर धरून पेटवून त्यांनीं भूमि जाळणें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रणुतसुजनसेव्यान्नव्यगव्यामृतैःश्री ।
फणभृदधिगणस्थांस्तर्पयाम्यर्पिताघ्यैः ॥

ॐ ऱ्हीं श्रीं भूषष्टिसहस्रसंख्येभ्यो नागेभ्योऽमृतांजलिं प्रसिंचामि स्वाहा । नागसंतर्पणार्थमैशान्यां[1] दिशि क्षीरांजलिं क्षिपेत् ॥ ॐ ऱ्हीं नागकुमारा अत्रागच्छतागच्छत ॐ ऱ्हीं नागकुमारा इदमर्घ्यमित्यादि ६

॥ अथ क्षेत्रपालपूजा ॥

स्रग्धरा—क्षेत्रं सर्वं पवित्रं गृहनगरवनोद्यानधन्वादिभेदं ।
यो रक्षत्यक्षसाक्षादपि समवसृतेः क्षेत्रमेतद्विशेषात् ।
तैलैः सिंदूरधूलीगुडकुसुमलसद्गंधकौसुंभवस्त्रै ।
रत्नाद्यैश्चापि यज्ञे प्रमुदितहृदयं तं यजे क्षेत्रपालम् ॥ १ ॥

विबुधप्रिया—सिंहशावकसन्निभांजननीलनीरजमेचकं ।
रात्रिजागरमूढमायतबाहुभिर्विधृतं सदा ॥
स्वर्णपात्रमसिंहदंडमरं नवोरगभूषणं ।
क्षेत्रपालमिहाह्वये विविधांतरारिविघातिनम् ॥

ॐ आं क्रों ऱ्हीं प्रशस्तवर्ण सर्वलक्षणसंपूर्ण स्वायुधचिन्हसपरिवार हे क्षेत्रपाल अत्रागच्छागच्छ संवौषट् स्वाहा । ॐ० अत्र तिष्ठ २ ठ ठ स्वाहा। ॐ अत्र मम सन्निहितो भव २ वषट् स्वाहा । आह्वाहनं स्थापनं सन्निधीकरणं ॥ २ ॥

अनुष्टुभ्—सद्येनापि सुगंधेन स्वच्छेन बहुलेन च ।
स्नपनं क्षेत्रपालस्य तैलेन प्रकरोम्यहम् ॥ ३ ॥

ॐ ऱ्हीं क्षेत्रपालाय तैलाभिषेचनं करोमि स्वाहा । तैलस्नपनं ॥
(या मंत्रानें क्षेत्रपालास तेलाचा अभिषेक करणे.)

---

१ ईशान्य दिशेला दूध ओंझळभर घेऊन सोडणें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुष्टुभ्–सुंदरैररुणाकारैः पीतवर्णादिसंभवैः ।
चर्चनं क्षेत्रपालस्य सिंदूरैः प्रकरोम्यहम् ॥

ॐ ऱ्हीं क्षेत्रपालाय सिंदूरधूलिसेचनं करोमि स्वाहा । सिंदूरधूलिसेचनं ।
(या मंत्रानें क्षेत्रपालास शेंदूर लावणें.)

वसंततिलक-सिंदूरसुंदरभरेण सुकुंकुमेन ।
तैलैन तीर्थजलसन्निभपावनेन ॥
अर्घ्येण सद्गुडतिलस्य च मोदकेन ।
क्षेत्राधिपं जिनसुसेवकमर्चयामि ॥ ५ ॥

ॐ ऱ्हीं क्षेत्रपालाय सुगंधगंधानुलेपनं करोमि स्वाहा ॥
(या मंत्रानें क्षेत्रपालास गंध लावणें.)

ॐ ऱ्हीं क्षेत्रपालाय कौसुंभवस्त्रवेष्टनं करोमि स्वाहा ।
(या मंत्रानें क्षेत्रपालास तांबडे वस्त्र पांघरणें.)

ॐ ऱ्हीं क्षेत्रपालाय पुष्पमालावेष्टनं करोमि स्वाहा ॥
(या मंत्रानें क्षेत्रपालास फुलाची माळ घालणें.)

ॐ ऱ्हीं क्षेत्रपालाय गुडमोदकार्पणं करोमि स्वाहा ॥
(या मंत्रानें क्षेत्रपालास गूळ व मोदक अर्पण करणें.)

ॐ ऱ्हीं क्षेत्रपालाय सुगंधद्रव्यार्चनं करोमि स्वाहा ॥
(या मंत्रानें क्षेत्रपालास सुगंधद्रव्य अर्पण करणें.)

॥ अथ अष्टकम् ॥

दोधक–स्वर्णघटोदरसंभृतकुंभै । रिंद्रनदीजलचंदनयुक्तैः ।
संभ्रमरोज्वलजैनपदाब्ज । क्षेत्रपतेः पदपंकजपूजां ॥
ॐ ऱ्हीं क्षेत्रपालाय जलं समर्पयामि ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चंदनकुंकुमकर्पुरसारैः । कस्तुरिजीवनगंधसुपंकैः ।
संभ्रम० ॥ ॐ ह्रीं क्षेत्र० ॥ गंधं ॥ २ ॥
अक्षसमुद्रजफेनसुपिंडैः । शालियतंडुलपांडुरपुंजैः ।
संभ्रम० ॥ ॐ ह्रीं क्षेत्र० ॥ अक्षतान् ॥ ३ ॥
पद्मलतारुणचंपकजाती । मल्लिसुपाटलफुल्लसुवृंदैः ।
संभ्रम० ॥ ॐ ह्रीं क्षेत्र० ॥ पुष्पं ॥ ४ ॥
रत्नसुवेष्टितपात्रगताज्यै । भक्ष्यसितोदनपायसशाकैः ।
संभ्रम० ॥ ॐ ह्रीं क्षेत्र० ॥ चरुं ॥ ५ ॥
इंद्रमयोर्जितरंगसुतेजै । श्चंद्रमयोगविराजितदीपैः ।
संभ्रम० ॥ ॐ ह्रीं क्षेत्रपालाय दीपं समर्पयामि ॥ ६ ॥
कालागरुश्रीखंडनरालै । धूपितवन्हिसुयोगसुधूपैः ।
संभ्रम० ॥ ॐ ह्रीं क्षेत्र० ॥ धूपं ॥ ७ ॥
आम्रसुदाडिमलांगलिपूगैः । पात्रग गोस्तनि रंभकपित्थैः ॥
संभ्रम० ॥ ॐ ह्रीं क्षेत्र० ॥ फलं ॥ ८ ॥

इन्द्रवज्रा--श्रीजैनपादांबुजसेव्यभृंगं ।
श्रीजैनगेहं प्रतिपालयंतं ॥
मुनीश्वरेषां सुखकारणोक्तं ॥
श्रीक्षेत्रपालं परिपूजयामि ॥ ॐ ह्रीं क्षेत्र०॥ अर्घ्यम् ॥ ९ ॥

दोधक० सर्वजनस्तुतपूजितदेहं । पापविनाशनशांतिकधारां ।
संभ्रम० ॥ शांतिधारां ॥ १० ॥

॥ अथ स्तोत्रम् ॥

स्रग्धरा० एकं खट्वांगहस्तं पुनरपि भुजगं पाशमेकं त्रिशूलं ।
कापालं खड्गहस्तं डमरुगसहितं वामहस्ते पिनाकं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चंद्रांकं केतुमालायुवतिनखशिखासर्पयज्ञोपवीतं ।
कालं कालांधकारं मम हरतु भयं भैरवः क्षेत्रपालः ॥ १ ॥

नीलं जीमूतवर्णं सकलशिवमयं भैरवं भीमरूपं ।
रौद्रं रौद्रावतारं ज्वलितशिखिशिखारौद्रकेशं सुदंष्ट्रं ॥
भीमं गंभीरनादं किलिकिलितरवं वंद्यपादौ त्रिलोक्यां ।
ज्वालामालाकरालं मम हरतु० ॥ २ ॥

कैलासे मेरुशृंगे दशदिशगमने दैत्यनीलालिवासे ।
पाताले मर्त्यलोके जलनिधिसलिले कानने सर्वतीर्थे ॥
सोमे सूर्याधिवासे ग्रहगणनिलये द्वीपद्वीपांतरेषु ।
सर्वस्थानेषु पूज्यो मम हरतु० ॥ ३ ॥

सिद्धांते कालमार्गे प्रतिकुलगमने मंत्रतंत्रे समस्ते ।
वेद्या ब्रह्मावतारं विविधजपमतिसर्वशास्त्रप्रसिद्धे ॥
खड्गं पातालमूलं वरनखसहितं पाशखट्वांगहस्तं ।
द्रां द्रीं द्रूं मेघरूपं मम हरतु० ॥ ४ ॥

हूंकारैर्घोरनादैश्चलितवसुमतौ सागरे मेरुशृंगे ।
ब्रह्मांडे ब्रह्मकांडे स्फुटितगिरिगुहारावरौद्राट्टहासं ॥
खड्गं पातालशूलं वरशिरघुटिकामंजनं पादलेपं ।
सर्वं दातुं समर्थं मम हरतु० ॥ ५ ॥

कंकालं कालरूपं किलिकिलिसहितं भूतवेतालनाशं ।
रां रीं रूं मूर्तिमंतं घघघघ घटितं घोररौद्रादिमंत्रैः ॥
भूतैः प्रेतैः प्रशस्तैरुपशमितमहायक्षरक्षःपिशाचैः ।
रां रीं श्रीं पूज्यपादौ मम हरतु० ॥ ६ ॥

ब्रह्मा विष्णुः स्वरौद्रं सुरसरिदमरः सोमसूर्याग्निरूपं ।
आकाशे भूमिमध्ये जलनिधिसलिले जैनवासं समस्तं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वानंदं नादवेद्यं सकलशिवमयं यस्य रूपं समस्तं ।
सर्वं कल्याणहेतुं मम हरतु० ॥ ७ ॥
क्षेत्रे पीठे प्रपीठे त्रिभुवननिलये दीप्तचंडे प्रचंडे ।
चामुंडे विघ्नहंते गणपतिसहिते भूतप्रेतैः पिशाचैः ॥
राज्ञो वश्यंकरिष्णौ कुशलतरमहायंत्रमंत्रे समस्ते ।
सर्वं कल्याणहेतुं मम हरतु० ॥ ८ ॥

अनुष्टुभ्—सर्वपापहरं स्तोत्रं स्तोतव्यं भैरवाष्टकं ।
ब्रह्मराक्षसनाशं च व्याध्यपस्मारिनाशनम् ॥ ९ ॥
अपुत्रो लभते पुत्रं निर्धनो धनवान् भवेत् ।
व्याधितो मुच्यते रोगी पठ्यमानो हि नित्यशः ॥ १० ॥
त्रिकरणशुद्धितैर्भव्यैः स्त्रोत्र मेताद्धि भाक्तिकैः ।
त्रिसंध्यं पठितं नित्यं सर्वसिद्धिमवाप्नुयात् ॥ ११ ॥

स्रग्धरा० कालींरे चित्रकूटे सुभुवि नगवने कांतजालांधकारे ।
सौराष्ट्रे सिंधुदेशे मगधपुरवरे कौशले वा कलिंगे ॥
कर्णाटे कोंकणे वा भृगुजपुरवरे कुब्जकर्णे[1] स्थिता ये ।
ते सर्वे सर्वरूपा अपहरणभयात् पांतु वो क्षेत्रपालाः ॥ १२ ॥
इति स्तोत्रार्घ्यम् ॥

॥ अथ जयमाला ॥

शार्दूल लक्ष्मीधामकरं जगत्सुखकरं सद्दीर्घकायं वरं ।
रात्रीजागरवाहनं सुरवरं कर्वालपाणीधरं ॥
निर्विघ्नं ग्रहनाशनं भयहरं भूतादित्रासोत्करं ।
वंदे श्रीजिनसेवकं हरिहरं श्रीक्षेत्रपालं सदा ॥ १ ॥

१ कर्णकुब्जे इत्यपि.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुरासुरखेचरपूजितपाद । गुणाकर सुंदर हूंकृतनाद ।
मनोहर पन्नगकंठविमाल । सदा सुमहोदय जय क्षेत्रपाल ॥ २ ॥
सुडाकिनि शाकिनिनाशनवीर । सुयाकिनिराकिनिभ्रंशनधीर ।
अनुपमसस्तकशोभितमाल । सदा । सु० ॥ ३ ॥
सुलाकिनि हाकिनिपन्नगत्रास । सुभूपतितस्कर दुर्भयनाश ।
निशाकरशेखरमंडितभाल । सदा सु० ॥ ४ ॥
समुद्गलशार्दुलसूकरवृंद । सुराक्षसभोंकसदुर्भयकंद ।
सदामलकोमलदेहविशाल । सदा सु० ॥ ५ ॥
सुचित्रककुंजर सागरपार । सुदुर्जनशोचन शत्रुसंहार ।
सुकंपितकिन्नरभूतरसाल । सदा सु० ॥ ६ ॥
सुवृद्धिसमृद्धिसुदायकसूर । सुपुत्रकमित्रकलत्रसुपूर ।
सुरंजितनरसुरकामिनिबाल । सदा सु० ॥ ७ ॥
सुकेयूरकुंडलहारसुवाद । सुशेखर सुस्वरकिंकिणिनाद ।
भयंकर भीषण भासुर काल । सदा सु० ॥ ८ ॥
सुकामिनिक्षालनदिव्यशरीर । सुवाहन हासन मोदन धीर ।
सुभाषणरंजिततत्वविचार । सदा सु० ॥ ९ ॥
सुस्थापितनिर्मलजैनसुवाक्य । निकंदितदुर्मतदुर्मतिसांख्य ।
प्रकाशितशासनजैनरसाल । सदा सु० ॥ १० ॥
सुभावितश्रेय सुभव्य सुवंश । महोदय जैनसरोवरहंस ।
महासुखसागरकेलिविशाल । सदा सु० ॥ ११ ॥

घत्ता मालिनी—असमयसुखसारं तीक्ष्णदंष्ट्राकरालं ।
स्वकरकृतजटीलं दीर्घजिह्वाकरालं ॥
सुघटविकृतवक्त्रम् शांतिदासप्रसस्यम् ।
भजतु नमतु जैनं भैरवं क्षेत्रपालं ॥ अर्घ्यम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शार्दूल०लक्ष्मीप्राप्तकरी कलत्रसुकरी चौरादिशत्रूनृहरी ॥
शाकिन्यादिहरी प्रशर्मसुचरी राज्यर्द्धिसंवर्धिनी ॥
विद्यानंदघनौघधामनगरी विघ्नौघनिर्नाशिनी ।
पूजा श्रीजिनक्षेत्रपस्य भवतु संपत्करी चित्करी । इत्याशीर्वादः

॥ अथ पुण्याहवाचनम् ॥

इंद्रवज्रा—श्रीनिर्जरेशाधिपचक्रपूर्वं । श्रीपादपंकेरुहयुग्ममीशं ।
श्रीवर्धमानं प्रणिपत्य भक्त्या । संकल्पमे तत्कथयामि सिध्यै ॥१॥

ॐ स्वस्ति श्रीयजमानाचार्यप्रभृतिसमस्तभव्यजनानां सद्धर्मश्रीबलायु-रारोग्यैश्वर्याभिवृद्धिरस्तु । अद्य भगवतो महापुरुषस्य श्रीमदादिब्रम्हणो मते त्रैलोक्यमध्यमध्यासीने मध्यमलोके श्रीमदनावृतयक्षसंसेव्यमाने दिव्यजंबूवृक्षोपलक्षिजंबूद्वीपे महनीयमहामेरोर्दक्षिणभागे अनादिकाल--संसिद्धभरतनामधेयप्रविराजितषट्खंडमंडितभरतक्षेत्रे सकलशलाकापु-रुषसंभूतिसंबंधविराजितार्याखंडे परमधर्मसमाचरणदक्षिणदेशे अस्मिन् विनेयजनताभिरामे [१]सांगलीनगरे महाशांतिकर्मणोचिते अत्र [२]पार्श्वनाथस्य दिव्यमहाचैत्यालयप्रदेशे एतदवसर्पिणकालावसने प्रवृत्तसुवृत्तचतुर्दशमंनूपमान्वितसकललोकव्यवहारे श्रीवृषभस्वामीपौरस्त्यमंगलमहापुरुषपरिषत्प्रतिपादितपरमोपशमपर्व-क्रमे । वृषभसेनसिंहसेनचारुसेनादिगणधरस्वामिनिरूपितविशिष्ट-धर्मोपदेशे । दुषमसुपमानंतरप्रवर्तमानकलियुगापरनामधेयदुष्य-माभिधानपंचमकाले प्रथमपादे । महतिमहावीरवर्धमानतीर्थंकरो-पदिष्टसद्धर्मव्यतिकरे । श्रीगौतमस्वामिप्रतिपादितसन्मार्गप्रवर्त--

---

१ व २ याठिकाणीं पूजकानें जेथें पूजा चालते त्या गांवचें व मूलनायक तीर्थंकरांचें नांव घेणें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

माने । श्रेणिकमहामंडलेश्वरसमाचरितसन्मार्गावशेषे । विक्रमांकनृपालपालितप्रवर्त्तमानानुकूलशकनृपकाले । नवोत्तराद्विसहस्रवर्षसंमिते । प्रवर्तमान नन्दननामसंवत्सरे । उत्तरायणे, शिशिर्तौ माघमासे शुक्लपक्षे द्वादश्यां तिथौ । चंद्रवारयुक्तायां । प्रशस्ततारकायोगकरणद्रेष्काणहोरामुहूर्तलग्नयुक्तायां । अष्टमहाप्रातिहार्यशोभितश्रीमदर्हत्परमेश्वरसन्निधौ । श्रीशारदासन्निधौ । राजर्षिदेवर्षिपरमर्षिब्रह्मर्षिसन्निधौ । विद्वत्सामाजिकसन्निधौ । अनादिश्रोतृसन्निधौ । देवब्राह्मणसन्निधौ । सुब्राह्मणसन्निधौ । यागमंडलभूमिशुध्यर्थं द्रव्यशुध्यर्थं पात्रशुध्यर्थं क्रियाशुध्यर्थं मंत्रशुध्यर्थं महाशांतिकर्मसिद्धिसाधनयंत्रमंत्रतंत्रविद्याप्रभावसंसिद्धनिमित्तविधीयमानस्य कलशाभिषेकमहोत्सवप्रारंभे पुण्यहवाचनं करिष्ये । सर्वैः सभाजनैरनुज्ञायतां । विद्वद्भिशिष्टजनैरनुज्ञायतां । महाजनैरनुज्ञायतां । तद्यथा । प्रस्थ[3]मात्रतंडुलस्योपरि-ह्रींकारसंवेष्टित स्वस्तिकयंत्रे मंत्रपरिपूजितमणिमयमंगलकलशं संस्थाप्य । यजमानाचार्यः सव्यहस्तेन धृत्वा पुण्याहमंत्रमुच्चारयन् सिंचेत् । ॐ स्वस्तये कलशस्थापनं करोमि स्वाहा । ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः नमोऽर्हते भगवते श्रीमते समस्तगंगासिंध्वादिनदीनदतीर्थजलं भवतु स्वाहा । जलपवित्रीकरणं ॥

---

१ या ठिकाणी चालू संवत्, संवत्सर, अयन, ऋतु, मास, पक्ष, मिति, वार वगैरे जरुरी प्रमाणें पूजेचे वेळीं असतील ते घालून वाचणें.

२ या ठिकाणीं आरंभलेल्या पूजेचे व क्रीयेचें नांव घेणें.

३ 卐 ह्रीं हें यंत्र जमीनीवर शेरभर तांदूळ पसरून त्याजवर काढणें व व त्या यंत्रावर कलश मांडून उजव्या हाताने पुण्याहमंत्र म्हणत सेचन करणें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुष्टुभ—अभ्यर्च्य कलशं तोयप्रवाहैश्चंदनैरहं ।
अक्षतैः कुसुमैरन्नैर्दीपधूपफलैरपि ॥

ॐ ऱ्हीं पुण्याहकलशार्चनं करोमि स्वाहा । कलशार्चनं ॥ २ ॥ जयतु जिनेश्वरशासनमखिलसुखं मे भवतु । जगति जनानां देशे भवतु सुभिक्षं । पांतु चिरं वसुमतिं राज्ञः । ॐ अर्हद्भ्यो नमः । सिद्धेभ्यो नमः । सूरिभ्यो नमः । पाठकेभ्यो नमः । सर्वसाधुभ्यो नमः । अतीतानागतवर्तमानत्रिकालगोचरानंतद्रव्यगुणपर्यायात्मकवस्तुपरिच्छेदकसम्यग्दर्शनज्ञान-चारित्राद्यनेकगुणगणाधारपंचपरमेष्ठिभ्यो नमोनमः । ॐ पुण्याहं ३ प्रीयंतां ३ भगवंतोऽर्हंतः सर्वज्ञाः सर्वदर्शिनः सकलवीर्याः सकलसुखाः त्रिलोकेशाः त्रिलोकेश्वरपूजिताः त्रिलोकनाथाः त्रिलोकमहिताः त्रिलोकप्रद्योतनकराः । ॐ श्रीमद्भगवदर्हत्सर्वज्ञपरमेष्ठिपरमपवित्रशांति—भट्टारकपादपद्मप्रसादात् सध्दर्मश्रीबलायुरारोग्यैश्वर्याभिवृध्दिरस्तु ॥ वृषभादयो महतिमहावीर वर्धमानपर्यंताः परमतीर्थंकरदेवा—श्चतुर्विंशत्यर्हंतो भगवंतः सर्वज्ञाः सर्वदर्शिनः संभिन्नतम—स्का वीतरागद्वेषमोहास्त्रिलोकनाथास्त्रिलोकमहितास्त्रिलोकप्रद्योतनकरा जातिजरामरणविप्रमुक्ताः। सकलभव्यजनसमूहकमलवनसंबोधदिनकराः। देवाधिदेवाः अनेकगुणगणशतसहस्रालंकृतदिव्यदेहधराः पंचमहा—कल्याणाष्टमहाप्रातिहार्यचतुस्त्रिंशदतिशयविशेषसंप्राप्ताः इंद्रचक्रधरबलदेव-वासुदेवप्रभृतिदिव्यसमानभव्यवरपुंडरीकपरमपुरुषवरमुकुटतटनिबिडनि-बद्धमणिगणकरनिकरवारिधाराभिषिक्तचारुचरणकमलयुगलाः स्वशिष्य-परशिष्यवर्गं प्रसीदंतु वः परममांगल्यनामधेयाः सद्धर्मकार्येष्विहामुत्र च सिद्धाः सिद्धिं प्रयच्छंतु नः अतीतकालसंजात विविधविबुधनिवहप्रा—र्थितार्थप्रदानसद्धर्मपारिजातपादपप्रभावोभ्दूतसंपत्समेताः निखिलभुवन-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कुहरविश्रुतयशोराशिधवलितहरिद्वलयानिलयनिर्लिपानितंविनीजनमनोवि-तर्क्समानकल्याणपरंपराः । अनवरतविनमदखिलसुरनरोरगखचरपति-मुकुटतटताटितमाणिक्यमयूखमालालंकृतक्रमकमलयुगलाः । ॐ निर्वाण सागर महासाधु विमलप्रभ श्रीधर सुदत्त अमलप्रभ उद्धर अंगिर सन्मति सिंधु कुसुमांजलि शिवगण उत्साह ज्ञानेश्वर परमेश्वर विमलेश्वर यशोधर कृष्णमति ज्ञानमति शुध्दमति श्रीभद्र अति-क्रांत शांताश्चेति चतुर्विंशत्यतीतकलातीर्थंकरपरमजिनदेवाश्च वः प्रीयंतां २ ॥ ॐ संप्रतिकालश्रावकश्रेयस्करस्वर्गावतरणजन्माभिषवणप-रिनिष्क्रमणकेवलज्ञाननिर्वाणकल्याणविभूतिभूपितमहाभ्युदयाः । सिध्द-विद्याधरराजमहाराजमंडलीकमहामंडलीककुमुटवद्धवलकेशवसार्वभौमदि–विजदानवोरगेंद्रकिरीटप्रभामाणिगणप्रभामरुद्ध्वनिज़लप्रव.हप्रक्षालित-–चारुचरणनखकिरणचंद्रचंद्रिकाप्रतिहतपापांधकाराः । ॐ वृषभ अजित शंभव अभिनंदन सुमति पद्मप्रभ सुपार्श्व चंद्रप्रभ पुष्पदंत शीतल श्रेयान् वासुपूज्य विमल अनंत धर्म शांति कुंथु अर मल्लि मुनिसुव्रत नमि नेमी पार्श्व श्रीवीरवर्धमानाश्चेति चतुर्विंशतिवर्तमान कालतीर्थंकरपरमजिनदेवाश्च वः प्रीयंतां २ ॥ ॐ भविष्यत्कालभ-व्याभ्युदयनिमित्तनिखिलकल्याणरमणीयकात्रिभुवनैश्वर्यशोभितमहा–-प्रभावाः । सहर्षसंभ्रमप्रणुतचतुर्निकायामरपतिनिकरमौलिविलासित रत्नरंजितानेकमणिगणखचितसुवर्णसिंहासनालंकृतसहस्रदलकमलवि-ष्टराधिष्ठितपादपद्मयुगलाः । ॐ महापद्म सुरदेव सुपार्श्व स्वयंप्रभ सर्वात्मभूत देवपुत्र कुलपुत्र उदंक प्रौष्ठिल जयकीर्ति मुनिसुव्रत अर निष्पाप निष्कषाय विपुल निर्मल चित्रगुप्त

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समाधिगुप्त स्वयंभू अनिवर्तक जय विमल देवपाल अनंत—वीर्यश्चेति चतुर्विंशति अनागतकालतीर्थंकरपरमजिनदेवाश्च वः प्रीयंतां २ ॥ ॐ अनाद्यविद्याविलासदुस्तरतमःपटलपटावगुंठि—तजगदूर्जितज्योतिःस्वरूपयथावस्थितसमस्तवस्तुस्वरूपनिरूपणप्रवी—णादिब्रह्मवदनकंजसंजातद्वादशांगचतुर्दशपूर्वप्रपंचप्रवचनपारावारपा—रीणाः । ॐ वृषभसेन कुंभ दृढरथ शतधनु देवशर्म धनदेव नंदन सोमदत्त सूरदत्त वायुशर्म यशोबाहु मार्गदेव अग्नि अग्निदेव अग्निगुप्त चित्राग्नि हलधर महीधर माहेंद्र वासुदेव वसुंधर अचल मेरुधर मेरुभूति सर्वयशः सर्वयज्ञ सर्वगुप्त सर्वप्रिय सर्वदेव सर्वविजय विजयगुप्त विजयमित्र विजयिल अपराजित वसुमित्र विश्वसेन [1]सुसेन सत्यदेव देवसत्य सत्यगुप्त सत्यमित्र निर्मल विनीत संवर मनिगुप्त मुनिदत्त मुनियज्ञ मुनिदेव गुप्तयज्ञ मित्रयज्ञ स्वयंभू भगदेव भगदत्त भग-फल्गु गुप्तफल्गु मित्रफल्गु प्रजापति सर्वसह वरुण धनपाल मघव तेजोराशि महावीर महारथ विशालाक्ष महाबल सुवि-शाल वज्र वज्रसार चंद्रचूल मेघेश्वर महारस कच्छ महाकच्छ नमि विनामि बल अतिबल [3]वज्रबल नंदी महाभागी नंदिमित्र कामदेव अनुपमाश्चेति आदिब्रह्मसमवशरणप्रवर्त्तमानचतुरशी—तिगणधरदेवाश्च वः प्रीयंतां २ ॥ ॐ वृषभसेन सिंहसेन चारुसेन वज्रनाभि चामर वज्रचामर बल दत्त विदर्भ अन—गार कुंथु धर्म मंदर जयार्य अरिष्टसेन चक्रायुध स्वयंभू

१ साधुसेन, २ सर्वसंघ, ३ बलभद्र.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कुंभार्य विशाख मल्लि सुप्रभ वरदत्त स्वयंभू गौतमाश्चेति चतुर्विंशति तीर्थंकरसभाभासमानगणधरमुख्याश्च वः प्रीयंतां २॥ ब्राह्मी आत्मगुप्ता धर्मश्री मेरुषेणा अनंतमति रतिषेणा मीनश्री वरुणश्री घोषावती धरणश्री धारणा वरसेना पद्मश्री सर्वश्री सुव्रता हरिषेणा भावश्री कूर्मश्री[1] अमरसेना पुष्पदत्ता मार्गश्री[3] यक्षश्री सुलोचना चंदनाश्चेति चतुर्विंशतिगणिनीमुख्याश्च वः प्रीयंतां २॥ श्रेयांस ब्रह्मदत्त सुरेंद्रदत्त इंद्रदत्त पद्मदत्त सोमदत्त महेंद्रदत्त सोम पुष्यमित्र पुनर्वसु नंदन सौंदर जय विशाख धान्यसेन धर्ममित्र सुमित्र अपराजित नंदिषेण वृषभसेन दत्त वरदत्त धन्य नंदनाश्चेति चतुर्विंशतिदातृमुख्याश्च वः प्रीयंतां २॥ भरत [4]सत्यभाव सत्यवीर्य मित्रभाव मित्रवीर्य धर्मवीर्य दानवीर्य मघव [5]युद्धवीर्य श्रीमंधर त्रिपिष्ट द्विपिष्ट स्वयंभू पुरुषोत्तम पुरुषवर पुंडरीक दत्त कुनाल नारायण सुभौम अजितंजय उग्रसेन अजित श्रेणिकाश्चेति चतुर्विंशतिश्रोतृमुख्याश्च वः प्रीयंतां २॥ गोमुख महायक्ष त्रिमुख यक्षेश्वर तुंबुरु कुसुम वरनंदी [6]विजय अजित ब्रह्म ईश्वर कुमार षण्मुख अजित पाताल किन्नर गरुड गंधर्व महेंद्र कुबेर वरुण [7]विद्युत्प्रभ सर्वाण्ह धरणेंद्र मातंगनामानश्चेति चतुर्विंशतियक्षेंद्राश्च वः प्रीयंतां २॥ चक्रेश्वरी रोहिणी प्रज्ञप्ती वज्रशृंखला [8]पुरुषदत्ता मनोवेगी काली ज्वालामालिनी महाकाली मानवी गौरी गांधारी वैरोटी अनंतमति मानसी महामानसी जया विजया अपराजिता बहुरूपिणी चांमुडी कूष्मांडी पद्मावती सिद्धायिनी चेति, चतु—

१ प्राकुब्जा, २ रक्षिला, ३ मंगिनी, ४ सगर, ५ बुद्धवीर्य, ६ शाम, ७ भ्रूकुटी, ८ वज्रांकुशा.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विंशति शासनदेवताश्च वः प्रीयंतां २ ॥ नाभिराज जितशत्रु दृढराज स्वयंवर मेघरथ धरणराज सुप्रतिष्ठ महासेन सुग्रीव दृढरथ विष्णुराज वसुपूज्य कृतवर्म सिंहसेन भानुराज विश्व-सेन सूरसेन सुदर्शन कुंभराज सुमित्र विजयराज समुद्रविजय अश्वसेन सिद्धार्थाश्चेति चतुर्विंशति जिनजनकाश्च वः प्रीयंतां २ ॥ मरुदेवी विजया सुषेणा सिद्धार्था सुमंगला सुषीमा पृथ्वी लक्ष्मणा जयरामा सुनंदा नंदा जयावती जयश्यामा शर्मा सुप्रभा ऐरादेवी श्रीकांता मित्रसेना प्रभावती सोमा वर्मिला शिव-देवी ब्राह्मी प्रियकारिणी चेति चतुर्विंशतिजिनमातृकाश्च वः प्रीयंतां २॥ प्रतिश्रुति सन्मति क्षेमंकर क्षेमंधर सीमंकर सीमंधर विमल-वाहन चक्षुष्मान् यशश्वान् अभिचंद्र चंद्राभ मरुदेव प्रसेनजित् नाभिराजाश्चेति वर्तमानचतुर्दशकुलधराश्च वः प्रीयंतां २ ॥ कनक कनकप्रभ कनकराज कनकध्वज कनकपुंगव नलिन नलिनप्रभ नलिनराज नलिनध्वज नलिनपुंगव पद्म पद्मप्रभ पद्मराज पद्मध्वज पद्मपुंगव महापद्माश्चेति भविष्यत्कुलधराश्च वः प्रीयंतां २ ॥ श्रीषेण पुंडरीक वज्रनाभि वज्रदत्त वज्रघोष चारुदत्त श्रीदत्त सुवर्णप्रभ भूवल्लभ गुणपाल धर्मसेन कीर्त्यौघाश्चेति अतीतद्वादशचक्रवर्तिनश्च वः प्रीयंतां २ ॥ भरत सगर मघव सनत्कुमार शांति कुंथु अर सुभौम महापद्म हरिषेण जयसेन ब्रह्मदत्ताश्चेति वर्तमानद्वादश-चक्रवर्तिनश्च वः प्रीयंतां २ ॥ भरत दीर्घदंत मुक्तदंत गूढदंत श्रीभूति श्रीषेण श्रीकांत पद्म महापद्म चित्रवाहन विमलवाहन अरिष्टसेनाश्चेति अनागतद्वादशचक्रवर्तिनश्च वः प्रीयंतां २ ॥ श्रीकांत शांतचित्त वरबुद्धि मनोरथ दयामूर्ति विपुलकीर्ति प्रभाकर संजयंत जयं-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ताश्चेति अतीतनवबलदेवाश्च वः प्रीयंतां २ ॥ विजय अचल सुधर्म सुप्रभ सुदर्शन नंदिषेण नंदिमित्र राम [1]पद्माश्चेति वर्तमाननवबलदेवाश्च वः प्रीयंतां २ ॥ चंद्र महाचंद्र चंद्रधर हरिचंद्र सिंहचंद्र [2]वरचंद्र पूर्णचंद्र [3]शुभचंद्र श्रीचंद्राश्चेति अनागतनवबलदेवाश्च वः प्रीयंतां २ ॥ काकुत्स वरभद्र सुभद्र सुश्लिष्ट वरवीर शत्रुंजय [4]अमितारि प्रियदत्त विमलवाहनाश्चेति अतीत नव वासुदेवाश्च वः प्रीयंतां २ ॥ त्रिपिष्ठ द्विपिष्ठ स्वयंभू पुरुषोत्तम पुरुषसिंह पुंडरीक दत्त लक्ष्मीधर कृष्णाश्चेति वर्तमाननववासुदेवाश्च वः प्रीयंतां २॥ नंदि नंदिमित्र नंदिषेण नंदिभूति बल [5]महाबल अतिबल त्रिपिष्ठ द्विपिष्ठाश्चेति अनागत नव वासुदेवाश्च वः प्रीयंतां २ ॥ निशुंभ विद्युत्प्रभ रणरसिक मनोवेग चित्रवेग दृढरथ वज्रजंघ विद्युज्जंघ प्रल्हादाश्चेति अतीतनवप्रतिवासुदेवाश्च वः प्रीयंतां २ ॥ अश्वग्रीव तारक मेरुक निशुंभ मधुकैटभ बलि प्रहरण रावण जरासंधा-श्चेति वर्तमाननवप्रतिवासुदेवाश्च वः प्रीयंतां २ ॥ श्रीकंठ हरिकंठ नीलकंठ अश्वकंठ सुकंठ शिखिकंठ अश्वग्रीव हयग्रीव मयूरग्रीवा-श्चेति अनागतनवप्रतिवासुदेवाश्च वः प्रीयंतां २ ॥ भीम महाभीम रुद्र महारुद्र काल महाकाल दुर्मुख निर्मुख अधोमुखाश्चेति वर्त-मान नव नारदाश्च वः प्रीयंतां २ ॥ भीमावलि जितशत्रु रुद्र विश्वानल सुप्रतिष्ठ अचल पुंडरीक अजितंधर जितनाभि पीठ सत्यकीपुत्राश्चेति वर्तमान एकादशरुद्राश्च वः प्रीयंतां २ ॥ प्रमद संमद प्रकाम कामद भवहर मनोहर मनोभव मार काम

---

१ बलभद्र, २ भूचंद्र, ३ सुचंद्र, ४ दमितारी, ५ वज्रबल

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रुद्र अंगदाश्चेति अनागत एकादश रुद्राश्च वः प्रीयंतां २ ॥ असुर नाग विद्युत् सुपर्ण अग्नि वात स्तनित दधि द्वीप दिक्कु-माराश्चेति दशविध भवनेंद्राश्च वः प्रीयंतां २ ॥ चमर वैरोचन भूतानंद धरण वेणु वेणुधारी पूर्ण वशिष्ठ जलकांत जलप्रभ हरिषेण हरिकांत घोष महाघोष अमितगति अमितवाहन अग्नि-शिखि अग्निवाहन वैलंब प्रभंजनाश्चेति विंशतिभवनेंद्राश्च वः प्रीयंतां २ ॥ किन्नर किंपुरुष महोरग गंधर्व यक्ष राक्षस भूत पिशाचाश्चेति अष्टविधव्यंतराश्च वः प्रीयंतां २ ॥ किन्नर किंपुरुष सत्पुरुष महापुरुष अतिकाय महाकाय गीतरति गीतयशः मणिभद्र पूर्णभद्र भीम महाभीम सुरूप प्रतिरूप काल महाकालाभिधानाश्चेति षोडशव्यंतरेंद्राश्च वः प्रीयंतां २ ॥ चंद्र आदित्य ग्रह नक्षत्र प्रकीर्णक-तारकाश्चेति पंचविध ज्योतिष्काश्च वः प्रीयंतां २ ॥ सौधर्म ईशान सनत्कुमार माहेंद्र ब्रह्म लांतव शुक्र शतार आनत प्राणत आरण अच्युतेंद्राश्चेति द्वादश कल्पेंद्राश्च वः प्रीयंतां २॥ हिट्ठिमहिट्ठिम हिट्ठिममज्झिम हिट्ठिमोपरिम मज्झिमहिट्ठिम मज्झिममज्झिम मज्झि-मोपरिम उपरिमहिट्ठिम उपरिममज्झिम उपरिमोपरिमाख्य नव-ग्रैवेयकनिवासिनोऽहमिंद्रदेवाश्च वः प्रीयंतां २ ॥ [1]अच्छ गच्छ वज्र वैरोचन अच्छमालिनी गच्छमालिनी वज्रमालिनी वैरोचनमालिनी आदित्यविमाननाम नवानुदिशनिवासिनोऽहमिंद्रदेवाश्च वः प्रीयंतां २॥ विजय वैजयंत जयंत अपराजित सर्वार्थसिद्धिनामधेय पंचानुत्त-रविमानवासिनोऽहमिंद्रदेवाश्च वः प्रीयंतां २ ॥ त्रिलोकविषयलो-

१ अर्चि, अर्चिमालिनी, वैरं, वैरोचनं, सौम्य, सौम्यरूप, अंक स्फटिक, आदित्य,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कालोकवर्तिसर्वद्रव्यपर्यायक्रमकरणव्यवधानातिक्रमसाक्षात्करणकेवला-ख्यपरंज्योतिःप्रमुख स्वाभाविकानंततगुणविशेषविभूषिताः। सकलच-क्रिकुरुभवार्यफणींद्राहमिंद्रत्रिकालसंभवित सुखानंतगुणितसुखसंभावित-क्षीणपर्यायसर्वकालशाश्वतपरमोत्कृष्टसुखानंदमंदिरायमाणाः। वीतराग-द्वेषमोहाः। जातिजरामरणविमुक्ताः। देवाधिदेवाः। परमनिर्वाणसंप्राप्ताः। परममांगल्यनामधेयाः। अष्टकर्ममलविलयस्पष्टीभूतक्षायिकसम्यक्त्वाद्यष्ट-गुणविशिष्टसकलसिद्धसमूहाश्च वः प्रीयंतां २॥ रोहिणी प्रज्ञप्ती वज्रशृंखला वज्रांकुशा अप्रतिचक्रा पुरुषदत्ता काली महाकाली गौरी गांधारी ज्वालामालिनी मानवी वैरोटी अच्युता मानसी महामानसी चेति षोडशविद्यादेवताश्च वः प्रीयंतां २॥ जया विजया अजिता अपराजिता जंभा मोहा स्तंभा स्तंभिनी चेति अष्ट महादेवताश्च वः प्रीयंतां २॥ श्री ह्री धृति कीर्ति बुद्धि लक्ष्मी शांति पुष्टिश्चेती अष्टदिक्कन्यकाश्च वः प्रीयंतां २॥ नित्यप्रवृत्ततारकायोगकरणाद्युपेतपक्षतिथिप्रभृतिसमस्ताततिथिप्रभावप्रयो-जनप्रधानाः यक्ष वैश्वानर राक्षस नधृत पन्नग असुर सुकुमार पितृ विश्वमालिनी चमर वैरोचन महाविद्युत् मार विश्वेश्वर पिंडा-शिनी चेति पंचदशातिथिदेवताश्च वः प्रीयंतां २॥ अनंत वासुकी तक्षक कर्कोटक शंखपाल कुलिक जय विजयादि अष्ट महानागाश्च वः प्रीयंतां २॥ इंद्र अग्नि यम नैऋत्य वरुण वायु कुबेर ईशान धरणेंद्र चंद्राश्चेति दश दिक्पालदेवाश्च वः प्रीयंतां २॥ आदित्य सोम मंगल बुध बृहस्पति शुक्र शनि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

राहु केतु नाम नवग्रहाश्च वः प्रीयंतां २ ॥ [1]कालविकाल लोहित कनक कनकसंस्थान अंतरद कचयव दुंदुभि रत्ननिभ रूप—निर्भास नील नीलाभास अश्व अश्वस्थान कोश कंशवर्ण कंस शंखपरिमाण शंखवर्ण उदय पंचवर्ण तिल तिलपुच्छ क्षारराशि धूम धूमकेतू एकसंस्थान अक्ष कलेवर विकट अभिन्नसंधि ग्रंथि मान चतुःपाद विद्युज्जिह्व नभ सदृश निलय काल कालकेतु अनय सिंहायु विपुल काल महाकाल रुद्र महारुद्र संतान संभव सर्वार्थीदि शांति वस्तून निश्चल प्रलंभ निर्मंत्र ज्योतिष्मत् स्वयंप्रभ भासुर विरज निर्दुःख वीतशोक सीमंकर क्षेमंकर अभयंकर विजय वैजयंत जयंत अपराजित विमल त्रस्त विजयिष्णु विकस करिकाष्ठ एकजटि अग्निज्वाल जलकेतु केतु क्षीररस अघ श्रवण राहु महाग्रह भावग्रह कुज शनि बुध शुक्र गुरवश्चेति अष्टाशीति ग्रहाश्च वः प्रीयंतां २ ॥ ग्राम नगर खेड खर्वड मडंब पत्तन द्रोणमुख संवाहन घोष राजधानी जिनधाम प्रासाद गोपुर गृह मंडप समस्त वास्तुवास्तव्यास्ताः

---

१ पाठांतर, तिलोय पण्णत्ती शास्त्राप्रमाणे,

बुध शुक्र, बृहस्पति, मंगल, शनि, काल लोहित, कनक, नील, विकाल, केश, कवयव, कनक संस्थान, दुंदुभक, रक्तनिभ, नीलाभास, अशोकसंस्थान, कंस, रूपनिभ, कंसकवर्ण, शंखपरिणाम, तिलपुच्छ. शंखवर्ण, उदकवर्ण पंचवर्ण, उत्पात, धूमकेतु तिल, नभ क्षारराशि, विजिष्णु, सदृश, संधि, कलेवर, अभिन्न, ग्रंथि, मानवक, कालक, कालकेतु, निलय, अनय, विद्युज्जिव्ह, सिंह, अलक, निर्दुःख, काल, महाकाल, रुद्र, महारुद्र, संतान, विपुल, संभव, सर्वार्थी, क्षेम, चंद्र, निर्मंत्त, ज्योतिष्मान्, दिशसंस्थित, विरत, वीतशोक, निश्चल, प्रलंब, भासुर, स्वयंप्रभ, विजय, वैजयंत, सीमंकर, अपराजित, जयंत, विमल, अभयंकर विकस, काष्ठी, विकट, कज्जली, अग्निज्वाल, अशोक, केतु, क्षीरस, अघ, श्रवण, जलकेतु, केतु, अंतरद, एकसंस्थान, अश्व, भावग्रह, महाग्रह.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समर्चनीयाः । ब्रह्म इंद्र अग्नि यम नैर्ऋति वरुण वायु कुबेर ईशान आर्य विवस्वत् मित्र भूधर सविंद्र साविंद्र इंद्र इंद्रराज रुद्र रुद्रराज अप अपवत्स पर्जन्य जयंत भास्कर सत्यक भृश अंतरिक्ष पुष वितथ राक्षस गंधर्व भृंगराज मृष दौवारिक सुग्रीव पुष्पदंत असुर शोष रोग नाग मुख्य भल्लाट मृगदेव अदिति उदिति विचारी पूतना पापराक्षसी चरकीनामधेया वास्तुदेवताः । सर्वे गुरुभक्ता अक्षीणकोशकोष्ठागारा भवेयुः । दानत-पोवीर्यधर्मानुष्ठानं नित्यमेवास्तु । मातृ पितृ भ्रातृ पुत्र पौत्र कलत्र गुरु सुहृत् स्वजनसंबंधिबंधुवर्गसहितस्य अस्य यजमानस्य धनधान्यैश्वर्यद्युतिबलायुर्यशस्कीर्तिबुद्धिवर्धनं भवतु । सामोदप्रमोदा भवंतु । ग्रामदेवताः प्रसीदंतु । गृहदेवताः प्रसीदंतु । कुलदेवताः प्रसी दंतु । दीक्षागुरवः प्रसीदंतु । शिक्षागुरवः प्रसीदंतु । विद्यागुरवः प्रसीदंतु । चातुर्वर्णसंघा प्रसीदंतु । शांतिर्भवतु । कांतिर्भवतु । तुष्टिर्भवतु । पुष्टिर्भवतु । सिद्धिर्भवतु । वृद्धिर्भवतु । अविघ्नमस्तु । आरोग्यमस्तु । आयुष्यमस्तु । शिवंकर्मास्तु । कर्मसिद्धिरस्तु । शास्त्रसमृद्धिरस्तु । इष्टसंपदस्तु । अरिष्टनिरसनमस्तु । धनधान्यसमृद्धि-रस्तु । काममांगल्योत्सवाः संतु । शाम्यंतु घोराणि । शाम्यंतु पापानि । पुण्यं वर्द्धतां । धर्मो वर्धतां । श्रीर्वर्धतां । णायुर्वर्धतां । कुलं गोत्रंचा-भिवर्धतां । स्वस्ति भद्रं चास्तु वः । स्वास्ति भद्रं चास्तु नः । हतास्ते परिपंथिनः । शत्रवो निधनं यांतु । निःप्रतिघमलमस्तु । शिवमतुलमस्तु

अनुष्टुभ- यत्सुखं त्रिषु लोकेषु व्याधिव्यसनवर्जितं।
अभयं क्षेममारोग्यं स्वस्तिरस्तु विधीयते ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वसंत ति. श्रीशांतिरस्तु शिवमस्तु जयोऽस्तु नित्य।
मारोग्यमस्तु [1]तव पुष्टिसमृद्धिरस्तु ॥
कल्याणमस्तु सुखमस्त्वभिवृद्धिरस्तु ।
दीर्घायुरस्तु कुलगोत्रधनं सदास्तु । ॥३॥

अनुष्टुभ भूता भवंतो भव्याश्च जिनाधीशा गणाधिपाः।
गणिन्यो दातृमुख्याश्च श्रोतारो यक्षनायकाः ॥ ४ ॥

यक्ष्यो जिनानां पितरो मातरो मनवस्तथा।
चक्रिणो बलदेवाश्च केशवाः प्रतिकेशवाः ॥ ५ ॥

नारदाश्च ततो रुद्राश्चतुर्विधसुराधिपाः।
रोहिण्याद्या जयाद्याश्च श्र्यादयस्तिथिदेवताः ॥ ६ ॥

महानागाश्च दिक्पाला ग्रहावास्तुसुरास्तथा ।
ग्रामाधिदेवता वेश्मदेवताः कुलदेवताः ॥ ७ ॥

एते देवगणाः सर्वे भण्याः पुण्याहवाचने।
ततो देवाः प्रसीदंतु विघ्ना नश्यंतु सर्वथा ॥ ८ ॥

महायज्ञसमारंभे गंधांबुस्नपने तथा ।
गंदोदकप्रदाने च शांतिपुष्ट्याद्युपक्रमे ॥ ९ ॥

आधानादिक्रियारंभे ग्रहवक्रत्वसंभवे ।
परमंत्रप्रयोगे च महोत्पाते महारुजि ॥ १० ॥

सर्वेष्वपि च ऽ होमेषु बीजानां सेचने तथा।
पुण्याहवाचना पुण्या भण्या संकल्पपूर्विका ॥ ११ ॥

॥ इतिमहापुण्याहवाचनाविधिः ॥

---

१ सह.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

।। अथ दशदर्भः ।।

उपेंद्रवज्रा– पवित्रभूमिं परितो दिशासु ।
पूर्वादिकासु प्रथितान् प्रशस्तान् ।।
अशेषविघ्नोपशमाय दर्भान् ।
संस्थापयामो हरितान् क्रमेण ।। १ ।।

अनु० दर्भखंडे समादाय विश्वविघ्नैकखंडनं ।
क्षिपामि ब्रम्हणः स्थाने भक्त्या ब्रह्ममहामये ।। २ ।।

ॐ ह्रीं दर्पमथनाय नमः स्वाहा । ब्रम्हदर्भः ।।

अनु०– मघोनककुद्भागे दर्भं निर्भग्नविघ्नकं ।
भोगैश्वर्याभिवृध्यर्थं क्षिपामि क्षिप्तकल्मषं ।। ३ ।।

ॐ ह्रीं अनंतज्ञानाय अनंतदर्शनाय अनंतवीर्याय अनंतसुखात्मकाय पूर्वदिग्मुखे दर्भमवस्थापयामि स्वाहा । इंद्रदर्भः ।।

अनु०– संतापपापनोदार्थं प्राणिनां प्रक्षिपाम्यहं ।
दर्भं हुताशनाशायां सर्वज्ञसवनोत्सवे ।। ४ ।।

ॐ ह्रीं ब्रह्मणे स्वाहा । प्रजापतये स्वाहा । जिनाय स्वाहा । जिनोत्तमाय स्वाहा । धवाय स्वाहा । धवोत्तमाय स्वाहा । शुचिष्ठाशुचिष्ठेषु कोणाकोणेषु आग्नेय्यां दिशि दर्भमवस्थापयामि स्वाहा । अग्निदर्भः ।।

अनु०– तीक्ष्णं दक्षिणाशायां दर्भं लक्ष्म्या समीक्षितं ।
क्षिपाम्यभिषवारंभे यमारंभबिभित्सया ।। ५ ।।

ॐ ह्रीं अनंतवीर्याय जितेंद्रियाय नमः दक्षिणस्यां दिशि दर्भमवस्थापयामि स्वाहा । यमदर्भः ।।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नरारोहणदिग्भागे निःशेषक्लेशनाशनं ।
विदधे दर्भमारब्धजिनेंद्राभिषवक्रियं ॥ ६ ॥

ॐ ह्रीं परमब्रह्मणे नैऋत्यांदिशि दर्भमवस्थापयामि स्वाहा नैऋतिदर्भः ॥

त्रैलोक्येशस्य नाथाय नमस्कृत्वा जिनेशिने ।
वरुणस्य हरिद्भागे स्थापये दर्भमद्भुतं ॥ ७ ॥

ॐ ह्रीं परममंगलाय परमपवित्राय परमनिर्वाणकारणाय नमः अपरस्यां दिशि दर्भमत्थापयामि स्वाहा, वरुणदर्भः ॥

मातरिश्वस्य दिग्देशं विश्वविश्वंभरप्रभोः ।
अभिषेकसमारंभे दर्भगर्भं प्रकल्पयेत् ॥ ८ ॥

ॐ ह्रीं पंचकल्याणसंपूर्णाय वायव्यांदिशि दर्भमवस्थापयामि स्वाहा वायव्यदर्भः ॥

यक्षरक्षितक्षेत्रेषु क्षिपाम्यक्षूणवीक्षणं ।
यागदिक्षु क्षणे क्षेमं विदधे दर्भमद्भुतं ॥ ९ ॥

ॐ ह्रीं त्रैलोक्यनाथाय त्रिलोकमहिताय शुचिरत्नत्रयप्रदेशनकराय उत्तरस्यां दिशी दर्भमवस्थापयामि स्वाहा । यक्षदर्भः ॥

सर्वस्य शांतये शांतं नत्वा श्रीवृक्षलक्षितं ।
वर्धमानैशमैशान्यां दर्भं च विदधे दिशि ॥ १० ॥

ॐ ह्रीं नमो नवकेवललब्धिसमन्विताय देवाधिदेवाय ऐशान्यां दिशि दर्भमवस्थापयामि स्वाहा । ईशानदर्भः ॥

वसंत० स्फूर्जत्फणामणियुतोरगवृंदवंद्य ।
संसेव्यमानकमलेक्षणनागराज ।
अस्मिन् जरामरणनाशमहोत्सवेऽहं ।
दर्भं दादामि सजलाक्षतचंदनं ते ॥ ११ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुष्टुभः-पूर्वैशानदिविग्भागे शांत्यर्थं जगतामिह ।
पातालवासिने दर्भं क्षिपामि भुजगेशिने ॥ १२ ॥

ॐ ऱ्हीं क्रों फणालंकृतमूर्तये धरणेंद्राय कूर्मवाहनसमन्विताय ईशानेंद्रमध्ये अधरस्यां दिशि दर्भमवस्थापयामि स्वाहा। धरणेंद्रदर्भः॥

वसंत० जैवातृके हिमसुशीतल सिंहयान ।
लोकप्रदीपपर रोहिणिसौख्यधाम ।
यक्षे शशांक सुविभूषण सूरिधाम ।
दर्भं ददामि हरिचंदनमक्षतं ते ॥ १३ ॥

अनु० जैनेंद्रेष्टिविशुध्यर्थं प्रत्यग्नैर्ऋतिकाष्ठयोः ॥
अंतराले कुशन्यासं करोमि श्वेतभानवे ॥ १४ ॥

ॐ ऱ्हीं क्रों हरिणलांछनसमन्विताय सोमाय नैर्ऋतिवरुणमध्ये ऊर्ध्वायां दिशि दर्भमवस्थापयामि स्वाहा । सोमदर्भः ॥

॥ अथ भूदेवतार्चनम् ॥

जलमलयजाक्षतपुष्पचरुप्रदीपधूपफलनिवहैः ।
अर्हन्महामहे महीमहमद्याध्वरे विदधे ॥ १ ॥

ॐ ऱ्हीं निरजसे नमः । ॐ ऱ्हीं शीलगंधाय नमः । ॐ ऱ्हीं अक्षताय नमः । ॐ ऱ्हीं विमलाय नमः । ॐ ऱ्हीं परमसिद्धाय नमः । ॐ ऱ्हीं श्रुतधूपाय नमः । ॐ ऱ्हीं अभीष्टफलदाय नमः । ॐ ऱ्हीं भूर्भूमिदेवतायै भूम्यर्चनं करोमि स्वाहा । भूम्यर्चनं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ इंद्रालंकारः ॥

ॐ मदीयपरिणामसमानविमलतमसलिलस्नानपवित्रीभूतसर्वांगयष्टिः । सर्वांगीणार्द्रहरिचंदनसौगंध्यदिग्विदिग्विवरो हंसांसधवलधौतदुकूलांतरीयोत्तरीयः ॥ ॐ श्वेतवर्णे सर्वोपद्रवहारिणि सर्वजनमनोरंजिनि परिधानोत्तरीयं धारिणी हंहं झंझं वंवं संसं तंतं पंपं परिधानोत्तरीयं धारयामि स्वाहा । [1]वस्त्राभरणं ॥ १ ॥

आर्या० अतिनिर्मलमुक्ताफलललितं यज्ञोपवीतमतिपूतं ।
रत्नत्रयमिति मत्वा करोमि कलुषापहरणमाभरणं ॥
ॐ ह्रीं सम्यग्दर्शनज्ञानचारित्राय नमः स्वाहा ।
[2]यज्ञोपवीतसंधारणं ॥ २ ॥

आर्या० नवसुगंधनानाप्रसूनरचितां विचित्रतरमालां ।
गुणमणिमालामिव जिनपादादादाय धारये शिरसा ॥
ॐ ह्रीं सम्यक्चारित्राय नमः स्वाहा । [3]शेखरमंत्रः ॥ ३ ॥

वसंत० सद्धर्मनिर्मितसुरत्नविराजमानं ।
सत्कर्णकुंडलयुगं वरमोक्षलक्ष्म्याः ।
कर्णे क्रियेऽतिललितं मणिभूषणानां ।
स्नानोत्सवे सपदि गोपतिना जिनस्य ॥
ॐ ह्रीं सम्यग्ज्ञानाय नमः स्वाहा । [4]कुंडलमंत्रः ॥ ४ ॥

यत्सर्वरत्नरचितं रचितेंद्रचाप ।
व्यापिप्रभाहतहरिद्विवरांधकारं ।

---

१ पीतांबर एक नेसणें व पांघरणें. २ जानवें गळ्यांत घालणें. ३ शेंडीच्या गाठीला फुलांची माळ बांधणें. ४ कानांत कुंडल घालणें. ५ दोन्ही हातांत कंकण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वर्गापवर्गसुखसारमिनप्रसादा ।
च्छ्रीकिंकणं करयुगे कलितं करोमि ॥
ॐ ऱ्हीं सम्यग्दर्शनाय स्वाहा । [५]कंकणमंत्रः ॥ ५ ॥

आर्या० शुद्धरत्नरचितामिव सुभगायाः सुमुक्तिकन्यायाः ।
करवाणि करगतां यां मदंगुलाममलमुद्रिकामुद्रां ॥
ॐ ऱ्हीं सम्यग्दर्शनज्ञानचारित्राय नमः स्वाहा । [६]मुद्रिकामंत्रः ॥ ६ ॥

शार्दूल० धृत्वा शेखरपट्टहारपदकं ग्रैवेयकालंबकं ।
केयूरांगदमध्यबंधुरकटीसूत्रं च मुद्रान्वितं ॥
चंचत्कुंडलकर्णपूरममलं पाणिद्वये कंकणं ।
मंजीरं कटकं पदे जिनपतेः श्रीगंधमुद्रांकितं । षोडशाभरणं ॥७॥

॥ अथ चतुर्द्वारपालानुकूलनम् ॥

अनुष्टुभ् मंडपस्यास्य रक्षार्थं कुमुदांजनवामनान् ।
पुष्पदंतं च पूर्वादिद्वारेषु स्थापयाम्यहं ॥
तोरणोपांतापसव्यदेशेषु कुंकुमाक्तपुष्पाक्षतं क्षिपेत् ॥ १ ॥

(येथें केशरानें रंगविलेले तांदूळ व फुलें तोरणद्वाराच्या उजव्या बाजूकडून चारी दिशेला टाकणें.)

शार्दूल० मुक्तास्वस्तिकमास्थितं नवसुधाधौतं मुखैः पंचभिः ।
भांतं नव्ययवप्ररोहरुचिरैः कुंभं दृशा लालयेत् ॥
रंभास्तंभरुचाश्मगर्भखचितं सौवर्णदंडं दधत् ।
प्राग्द्वाराधिकृत प्रतीच्छ कुमुद त्वं पूतमेतं बलिम् ॥

घालणें ६ हातांत मुद्रिका घालणें. फुलांची माळ, पीतांबर, मोत्यांचा हार, पदक, मोत्याचा कंठा. गोप, बाजूबंद, पैंजण, कंमरपट्टा, कडदोरा, मुद्रिका, कुंडल, (एक प्रकारचें कर्णभूषण) कंकण, तोडे, पोचे, हे सर्व अंगावर घालणें

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ह्रीं कुमुदप्रतीहार निजद्वारे तिष्ठ २ ठठ इदमर्घ्यं पाद्यं जलं गंधमक्षतान् पुष्पं चरुं दीपं धूपं फलं बलिं स्वस्तिकं यज्ञभागं यजामहे प्रतिगृह्यतां २ ॥ शांतिधारा ॥ १ ॥ मुक्तास्वस्तिक० लाहि तत्रं बलिमंजनांजनरुचे द्वारे स्थिते दक्षिणे ॥ ॐ ह्रीं अंजनप्रतीहार दक्षिणद्वारे तिष्ठ २ ठठ इदमर्घ्यमित्यादि ॥ २ ॥ मुक्तास्वस्तिक० प्रत्यग्द्वारानियुक्त वामन बलिं कुंदद्युते स्वीकुरु ॥ ॐ वामनप्रतीहार पश्चिमद्वारे तिष्ठ २ ठठ इदमर्घ्यमित्यादि ॥ ६ ॥ मुक्तास्वस्तिक० स्रक्पुष्पोज्वल पुष्पदंत बलिना तृप्त्योत्तरद्वाःस्थिते ॥ ॐ ह्रीं पुष्पदंतप्रतीहार उत्तरद्वारे तिष्ठ २ ठठ इदमर्घ्यमित्यादि ॥ ४ ॥

॥ अथ यागमंडलवर्त्तनविधानम् ॥

इंद्रवज्रा० नागेंद्रचूर्णेन सितेन रैदं । पीतेन नीलप्रभ नीलकेन ।
रक्ताभ रक्तेन लिखासिताभ । कृष्णेन सन्मंडलमिष्टिहृष्टये ॥

ॐ ह्रीं श्री क्लीं श्वेतपीतहरितारुणकृष्णमणिचूर्णं स्थापयामि स्वाहा । चूर्णपंचकस्थापनं ॥ १ ॥

चंद्राभ चंद्राभविमान माल्या । भूषांगरागांबर नागराज ।
हस्तांबुजस्थार्जुनरत्नचूर्णैं । वेंदीं लिखागत्य जिनेंद्रयज्ञे ॥

ॐ ह्रीं नागराजाय अमिततेजसे स्वाहा । श्वेतचूर्णस्थापनं ॥ १ ॥

हेमाभ हेमाभविलेपनस्रा । ग्विमानभूषांशुक यक्षराज ।
हस्तार्पितप्रत्नसुवर्णचूर्णैं । वेंदीं लिखागत्य जिनेंद्रयज्ञे ॥

ॐ ह्रीं हेमप्रभाय धनदाय ठठ स्वाहा । पीतचूर्णस्थापनं ॥ २ ॥

उपेंद्र०-हरित्प्रभामर्त्य हरित्प्रभास्रा । ग्वासोविमानाभरणांगराग ।
कराक्तगारुत्मजरत्नचूर्णैं । वेंदीं लिखागत्य जिनेंद्रयज्ञे ॥

ॐ ह्रीं हरिप्रभाय शत्रुमथनाय स्वाहा । हरितचूर्णस्थापनं ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इंद्र०— रक्तप्रभामर्त्य जपाभभूषा। स्राग्वर्णकालंकरणाश्रयान।
करांबुरुरागात्कुरुविंदचूर्णै। वेंदीं लिखागत्य जिनेंद्रयज्ञे ॥

ॐ ह्रीं रक्तप्रभाय सर्ववशंकराय वषट् स्वाहा। अरुणचूर्णस्थापनं ॥४॥

भृंगांगवृंदारक कृष्णवस्त्र। विलेपनाकल्पविमानधाम।
पाणिप्रणीतासितरत्नचूर्णै। वेंदीं लिखागत्य जिनेंद्रयज्ञे ॥

ॐ ह्रीं कृष्णप्रभाय मम शत्रुमथनाय फट् घे घे स्वाहा कृष्णचूर्णस्थापनं ॥ ५ ॥

उपेंद्रवज्राः-शचीकटाक्षेषुशरव्यशक्र। त्वमेत्य विघ्नौघविघातहेतोः।
करस्फुरद्वज्ररजोभरेण। कोणेषु वज्राणि लिखस्व वेद्याः॥

ॐ ह्रीं वेदिकोणेषु प्रत्येकं हीरकं न्यसेत्। वज्रस्थापनं ॥ ६ ॥

अनु० चतुरस्रं क्षिबीजाप्तं दिग्विदिग्वीतलांतकं।
वज्रांकितचतुष्कोणं पीताभक्षितिमंडलं ॥ ७ ॥

॥ अथ कलशन्यासविधानम् ॥

स्वर्गाग्रमेवानिरर्गलं पुष्टकामे। पवमानचलितललितकेतुमालाविलसिते। भाभारभास्वन्माणिक्यमयस्तंभसंभृते। नानारत्नरचितविचित्रनेत्रापिनद्धविततवितानातिशयशोभिते। जैने शशिविशदयशोराशिबिंबाभिनवमुक्ताफललंबूषभूषिते। सुगंधिसलिलसंसिक्तससमुत्सर्पद्धूराभूरिसौरभाभिरामे। विन्यस्तविविधार्चनाभिषेकपरिकरपरिपूर्णे। पूर्णकलशचतुष्टयमध्यस्थाभिषेकपीठे। महाभिषेकमंडपे दर्भस्वस्तिकविन्यासशालिशालिनिकरसमास्तरणकल्याणेषु। भगवदर्हदभिषवणधरणिकोणेषु। अष्टोत्तरशतकलशस्थानेषु ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्रग्धरा० [1]सूत्राणि त्रिंशदष्टोत्तरशतकलशान् न्यासतः पंच कुंभान् ।
दिग्मध्ये द्विशमार्गे प्रथमपदयुगे द्वे चतुर्थे च षष्ठे ॥
मध्ये तीर्थांबुपूर्णान् निखिलपरिमलद्रव्यदिव्यौषधार्चान् ।
अर्हज्जन्माभिषेके विधिवदहमिह स्थापये पीठिकाग्रे ॥ १ ॥

अनु०-- प्रस्थं प्रस्तीर्य शालीनां प्रत्येकं परिशोभितं ।
तदूर्ध्वे तंडुले पद्मं चतुर्दलसमन्वितं ॥ २ ॥
कर्णिकायां लिखेस्स्वस्तिरेखां तत्कोष्ठतः श्रियं ।
दलेषु ऱ्हीं चतुष्कं च बाह्ये वा क्षितिमंडलं ॥ ३ ॥

अर्धचंद्रघटीरूपं पंचपत्रांबुजानलं ।
नांतलांताप्तदिक्कोणं धवलं जलमंडलं ॥ ४ ॥

प्रत्येककलशान् पूर्णान् चंदनाक्षतचर्चितान् ।
पद्मादर्शमुखान् बीजपूरकेणोपशोभितान् ॥ ५ ॥

---

१ पीठासमोर निर्मिलेल्या चौकोनी कट्टयावर उभ्या १५ व आडव्या १५ अशा ३० दोऱ्या मारणें म्हणजे त्यांचीं घरें १९६ पडतात. त्यांपैकीं पूर्वादि चारी दिशेला मार्गाबद्दल एकंदर ४० घरें सोडणें. पहिल्या दोन ओळींत व चौथ्या व सहाव्या ओळींत जितकीं घरें असतील त्या प्रत्येक घरांत शेरभर भात घालून पसरणें व त्यावर तांदूळही घालून पसरणें. त्याजवर स्वस्तिक यंत्र काढणें. तें असेंकीं मध्यभागीं चार दळांचें कमळ काढून त्याच्या सभोंवतीं वर्तुळाकृतीनें एक मंडल काढणें. व त्या मंडलाबाहेर एक चौकोनी मंडल काढणें. त्यानंतर कमलकर्णिकेंत स्वस्तिक काढणें. त्याच्या कोष्ठांत श्री हें अक्षर लिहावें. चारी दळांत ऱ्हीं हें अक्षर लिहावें वर्तुळाकृती मंडळांत पूर्वादि चार दिशेला पं हें अक्षर लिहावें. अग्नेयादि चार दिशेला वं हें अक्षर लिहावें या मंडलाबाहेर काढलेल्या चौकोनी मंडलांत पूर्वादि चार दिशेला क्ष हें अक्षर व या मंडलाच्या आंतल्या कोणीं क्षी हें लिहावें. याप्रमाणें काढलेल्या यंत्रावर घट्ट व झळझळींत दुपदरी पांढऱ्या सुतानें कलश सचित्रित गुंडाळून ठेवणें. याचप्रमाणें मध्यभागीं न्यास कळस ठेवणें पसरलेल्या भाताबाहेर पंचवर्ण घालणें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्वेतद्विगुणसूत्रेण वेष्ठितान् शोभनं यथा ।
फलपल्लवसद्दूर्वान् दर्भगुच्छाद्यलंकृतान् ॥ ६ ॥

द्रोणपानीयसंपूर्णान् पृथक्कुंभान् मनोहरान् ।
आढकाद्यंबुसंपूर्णान् छेदकालादिदूरगान् ॥ ७ ॥

एवं कुंभान् सुसंस्थाप्य शालिप्रस्तारबाह्यतः ।
पंचकं चतुरस्त्राणां मंडलानां मनोहरं ॥ ८ ॥

श्वेतपीतहरिद्रक्तकृष्णचूर्णैः प्रपूरयेत् ।
नानाविधमनोहारिफलवृंदैरलंकृतं ॥ ९ ॥

पूजां कृत्वा क्रमात्सम्यक् स्नापयेत्परमेश्वरम् ॥

॥ अथ कलशालंकारः ॥

शार्दूलः-रैरत्नाखिलगंधपुष्पकलितैस्तीर्थांबुभिः पूरितान् ।
भास्वत्पंकजबीजपूरवदनान् सच्छ्वेतसूत्रावृतान् ॥
चोचैश्चंदनपंकमग्नतनुभिः शाल्यक्षतैश्चर्चितान् ।
स्त्रग्भिर्मंगलपल्लवैश्च कलशान् संस्थापये भूषितान् ॥

इति [1]कलशालंकारं कुर्यात् ॥

॥ अथ पंचकुंभस्थापनविधिः ॥

शार्दूलः-संस्थाप्याढकवारिपूर्णकलशान् पद्मापिधानाननान् ॥
प्रायो मध्यघटान्वितानुपहितान् सद्गंधचूर्णादिभिः ॥

१ कलशालंकारासंबंधीचा खुलासा पुढील पानावर पहाणें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्रोणांभःपरिपूरितांश्चतुरशः कोणेषु यज्ञक्षितेः ।
कुंभान् न्यस्य समंगलेषु निदधे तेषु प्रसूनं वरं ॥ १ ॥

शालिस्वस्तिकदर्भगर्भितचतुःकोणेषु वेद्याः स्वयं ।
सत्तीर्थोदकसंभृतान् प्रविलसत्पुष्पोत्करैरर्चितान् ॥

श्रीमत्पल्लवसत्फलांश्च कमलान् सद्रत्नगर्भोज्वलान् ।
सत्कुंभांश्चतुरश्चतुष्कविधिमान् संस्थापये सन्मुदा ॥ २ ॥

ॐ ऱ्हीं स्वस्तये कलशस्थापनं करोमि स्वाहा । स्वस्तये कलशस्थापनं ॥ (या मंत्रानें ४ न्यासकलशावर अक्षता टाकणें) ॐ ऱ्हाँ ऱ्हीं ऱ्हूँ ऱ्हौं ऱ्हः नमोऽर्हते भगवते ।

अनु०ः—पद्मस्तथा महापद्मस्तिगिंच्छः केसरी तथा ।
पुंडरीको महापुंडरीकश्चैते महाऱ्हदाः ॥ १ ॥

गंगा सिंधुनदी रोहिद्रोहितास्या महानदी ।
हरिच्च हरिकांता च सीता सीतोदयान्विता ॥ २ ॥

नारी च नरकांता च सुवर्णकूला महानदी ।
रूप्यकूला तथा रक्ता रक्तोदा च महासरित् ॥ ३ ॥

क्षीरोदपद्मकासारपुण्यशैलोत्थनिर्झराः ।
उपनद्योऽपि कालिंदी कावेरीयमुनादयः ॥ ४ ॥

वापीकूपतटाकाद्यास्तत्रस्था अपि देवताः ।
तीर्थोदकप्रदानेन प्रसीदंतु जिनोत्सवे ॥ ५ ॥

---

१ सर्व कलशांत पाणी, रत्न. गंध, पुष्प, सुवर्ण घालून त्यांच्या तोंडास सुंदर ५ पानें लाऊन त्यावर कमळ ठेवणें. त्यावर म्हाळुंग अथवा नारळ ठेवणें. सर्व कलशांना फुलांची माळ घालणें. व दर्भकूर्च खोवणें. याचें प्रमाण ३।५।७।९।१२ अंगुल असणें. सर्व कलशास गंधांक्षत लाऊन अग्रभागीं फूल चढविणें कलश ११३.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं वचनात्मानं मंत्रमुद्घोष्य सामाजिकाः । हस्तप्रत्ययेन विशुद्धकुसुमांजलिपुण्याहकलशं संस्थाप्यानि । ॐ शुद्धजलसुवर्णघटं प्रक्षालितपरिपूरिततनवरत्नगंधपुष्पाक्षताद्यर्चितमामोदकं पवित्रं कुरु २ झ्रौं २ वं २ मं २ हं २ सं २ तं २ पं २ द्रां २ द्रीं २ द्रावय २ हं सः स्वाहा । कलशजलशुद्धिः ॥

[हा मंत्र म्हणत कलशावर पाणी धरणें.]

वसंतः–तीर्थांबुपूर्णकलशांस्त्रिगुणीकृतानां ।
स्रद्बीजपूरकुशदर्पणपल्लवास्यान् ॥
संस्थापयामि धवलाक्षतचर्चितानां ।
कोणेषु पीठनिकटेषु वरप्रदायान् ॥ १ ॥

ॐ ह्रीं चतुष्कोणेषु कुंभान् स्थापयामि स्वाहा । चतुष्कोणेषु कलशान् स्थापयेत् ।

इंद्र०:–नीलोत्पलं क्षीरसुपूर्णकुंभं । कर्पूरसंमिश्रिततीर्थवारं ।
जिनाभिषेकादिविधीवपक्षं । संस्थापयेऽहं जिनभक्तियुक्तः ॥ २ ॥

ॐ ह्रीं क्रों [१]नीलमणिविनिर्मितं अष्टयोजनगंभीरं सप्तक्रोशोच्छेदं चतुःक्रोशप्रमाणमुखं क्षीरोदधिजलपरिपूर्णानंतमहानंतगुड्डगुड्डगर्जितनिनादं नीलनामं ईशान्यां दिशि प्रथममंगलकुंभं स्थापयामि स्वाहा ॥ स्थापितेऽस्मिन् सोदकानि सचंदनानि साक्षतानि सपल्लवानि सहिरण्यानि समंतात् पुष्पाक्षतं क्षिपेत् ॥

अनु० अभ्यर्च्य कलशं तोयप्रवाहैश्चंदनैरहं ।
अक्षतैः कुसुमैरन्नैर्दीपधूपफलैरपि ॥

---

१ हा मंत्र म्हणत ईशान्य न्यासकलशावर अक्षता व फुलें टाकीत कलशस्थापन करणें. याप्रमाणें आग्नेय, नैऋत्य, वायव्य व मध्यकुंभ यांचेही स्थापन करणें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ऱ्हीं नेत्राय संवौषट् कलशार्चनं करोमि स्वाहा। कलशार्चनं ॥
[या मंत्रानें ईशान्य कलशाला अर्घ्य देणें व पुढील कलशांनाही जेथल्या तिथें देणें.]

उपेंद्र० अरूणवर्णैः कृतरत्नकुंभं। घृतप्रपूर्णं दिशमग्निभागं ॥
जिनेंद्रदेवाभिषवं जलाद्यैः। राराधयेऽहं जिनयज्ञभूमौ ॥ ३ ॥

ॐ ऱ्हीं क्रौं अरुणवर्णविनिर्मितं अष्टयोजनगंभीरं सप्तक्रोशोच्छेदं चतुःक्रोशप्रमाणमुखं क्षीरोदधिजलपरिपूर्णानंतमहानंतगुडगुडगार्जित-निनादं अरुणनामं आग्नेय्यां दिशि द्वितीयमंगलकुंभं स्थापयामि स्वाहा। स्थापितेऽस्मिन् सोदकानि सचंदनानि साक्षतानि सपल्लवानि सहिरण्यानि समंतात् पुष्पाक्षतं क्षिपेत् ॥

अनु०—अभ्यर्च्य कलशं तोयप्रवाहैश्चंदनैरहं।
अक्षतैः कुसुमैरन्नैर्दीपैर्धूपैः फलैरपि ॥

ॐ ऱ्हीं क्रौं नेत्राय संवौषट् कलशार्चनं करोमि स्वाहा। कलशार्चनं ॥

इंद्रवज्रा-श्रीकृष्णकुंभं पयसा सुपूर्णं। श्रीखंडकर्पूरसुमिश्रितेन।
जिनेंद्रदेवाभिषवं जलाद्यैः। संस्थापये नैर्ऋतिदिग्विदेशं ॥ ४ ॥

ॐ ऱ्हीं क्रौं कृष्णवर्णविनिर्मितं अष्टयोजनं० कृष्णनामं नैर्ऋत्यां दिशि तृतीयमंगलकुंभं स्थापयामि स्वाहा। स्थापितेऽस्मिन् सोदकानि० क्षिपेत् ॥ अभ्यर्च्य कलशं० कलशार्चनं ॥

उपेंद्र— शशिप्रभाकुंभदधिप्रपूर्णं। सद्द्रव्यगंधैः परिमिश्रितं तं।
सानंददानं जिनपाभिषेके। संस्थापयेऽहं दिशि वायुदेशे ॥५॥

---

१ ज्या शब्दापुढें किंवा श्लोकारंभ चरणाक्षरापुढें (०) सूचक चिन्ह आहे तें पाहून त्या शब्दापुढील शब्द लोकांचे पुढचे चरण तोंडपाठ नसल्यास वरील श्लोकाच्या मंत्रांत व मंत्रापुढील श्लोकांत पहावे.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ऱ्हीं क्रों श्वेतवर्णविनिर्मितं अष्टयोजन० श्वेतनामं वायव्यां दिशि चतुर्थमंगलकुंभं स्थापयामि स्वाहा । स्थापितेऽस्मिन् सोदकानि० क्षिपेत् । अभ्यर्च्य० । कलशार्चनं ॥

वसंत— सुवर्णपूर्णकलशं कृतरत्नकुंभं ।
शक्रं समुत्तरतरं शशिपूर्णनीरं ॥
श्रीखंडकर्पुरसुगंधसुपल्लवाद्यैः ।
संस्थाप्य पूर्णकलशं दिशि पूर्वभागे ॥ ६ ॥

ॐ ऱ्हीं क्रों सुवर्णवर्णविनिर्मितं अष्टयोजन० सुवर्णनामं मध्यपूर्णकुंभं पंचमकुंभं स्थापयामि स्वाहा । स्थापितेऽस्मिन् सोदकानि० क्षिपेत् ॥ अभ्यर्च्य० । कलशार्चनं ॥

शिख० जलैर्गंधक्षोदैः कलमसदकैः पुष्पनिवहैः ।
हविर्भिर्दीपौघैः स्फुरदगरुधूपैः फलशतैः ॥
यजामि प्रीत्याहं कलशनिकरं जैनस्नपनं ।
क्रियारंभे ऽमुष्मिन् निखिलजगदानंदजनने ॥ ७ ॥

ॐ ऱ्हीं नेत्राय संवौषट् स्वाहा । कलशार्चनं ॥ [या मंत्रानें बाकी सर्व १०८ कलशांना एक अर्घ्य देणें]

वसंत-- सत्पल्लवांचितमुखान् कलधौतरूप्य ।
ताम्रारकूटघटितान् पयसा सुपूर्णान् ॥
संवाह्यतामिवगतांश्चतुरस्त्रकुंभान् ।
संस्थापयामि कलशान् जिनवेदिकांते ॥ ८ ॥

ॐ ऱ्हीं चतुःकोणपूर्णकुंभान् स्थापयामि स्वाहा ॥
[या मंत्रानें चार कोणकुंभाची स्थापना करणें.]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनु० वज्रवैडुर्यमाणिक्यपुष्परागप्रवालयुक् ।
गोमेदकेंद्रनीलादिरत्नद्रव्यमितिष्यते ॥ ९ ॥

ॐ ऱ्हीं वज्रवैडूर्यादिनवरत्ननिक्षेपणं ॥ [या मंत्रानें नवरत्न घालणें. कानडीभाषेंत याला कळसगाणकी म्हणतात.]

अनु०--नारिकेलाम्रनारंगकदल्यामलकीफलं ।
अन्यच्छुभफलं सर्वमुच्यते छलकुंभकं ॥ १० ॥

ॐ ऱ्हीं नारिकेलादिफलस्थापनं करोमि स्वाहा ॥ फलस्थापनं ॥

(या मंत्रानें कलशावर ठेवलेल्या फलाची स्थापना करणें.)

माधवीमल्लिकाजातिकेतकीनवमल्लिका ।
पाटलीकरवीरादिसुमनःसुमनोघटी ॥ ११ ॥

ॐ ऱ्हीं माधवीमल्लिकादिपुष्पस्थापनं करोमि स्वाहा । पुष्पस्थापनं ॥

(या मंत्रानें कलशावरील फुलांची स्थापना करणें.)

॥ अथ पीठारोपणविधानम् ॥

स्रग्धरा—स्नानेच्छा पीततापश्रमरतिरजसां नैव भावार्हतां सा ।
श्रद्धालुः स्थापनायां विहितमतिरहं स्थापनार्हत्प्रभूणां ।
मोक्षं मंक्ष्वारुरुक्षोः प्रथममिव कृतं तस्य सोपानमुच्चै।
रारोहाम्युद्यदुद्धध्वनिपिहितदिशास्यानकं स्नानपीठं ॥ १ ॥

ॐ ऱ्हीं स्वस्तये पीठमारोपयामि स्वाहा । पीठमारोपणं ॥

(या मंत्रानें पीठारोपण करणें)

शार्दूल:—यन्मेरोर्गिरिशिखरस्य शिखरे धत्ते तिरीटश्रियं ।
यत्संपर्कमवाप्य पांडुकशिला पूतार्धचंद्रोपमा ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यत्तीर्थंकरजन्ममज्जनजलैः पीठं पवित्रीकृतं ।
तन्मत्वा जिनमज्जनोचितमिदं पीठं मया स्थाप्यते ॥ २ ॥
ॐ ऱ्हीं अर्हं क्ष्मं ठठ श्रीपीस्थापनं करोमि स्वाहा । श्रीपीठस्थापनं ॥
(या मंत्रानें पीठस्थापना करणें.)

॥ अथ मेरुपूजा ॥

[टीप:– सुरवातीची पंचमेरुपूजा पान ३८ प्रमाणें इथें करून घेणें.]

निरतीयसुगंधिद्रव्यसंभारसंश्रवबंधुरैः । सुरसिंधुसंभूतांभोभिरिव स्पर्धमानैः । निर्धूताखिलकल्मषैरभिनवांभोभिः संभृतैः । अनेकरत्नरचितस्फुटहाटकघनघटितगंभीरघटैः ॥

वसंत:--निष्टप्तकांचनमयं मुहुरात्मयोने ।
रध्यासनादतितरामुपलब्धशुद्धिं ॥
प्रक्षालयामि विधिरेष इतीह पीठ ।
मेतच्छलान्मम मनः परिमार्ष्टुकामः ॥ १ ॥

ॐ ऱ्हाँ ऱ्हीं ऱ्हूँ ऱ्हौं ऱ्हः नमोऽर्हते भगवते श्रीमते पवित्रतरजलेन श्रीपीठप्रक्षालनं करोमि स्वाहा । पीठप्रक्षालनं ॥
[या मंत्रानें पीठप्रक्षालन करणें]

इंद्र:—तीक्ष्णाग्रभागानभिषेकपीठे । हैरण्यगर्भे विदधामि दर्भान् ।
हिरण्मये प्रोज्वलरत्नजाल । प्रोद्यंचदर्चे रचितेंद्रचापे ॥ २ ॥

ॐ ऱ्हीं दर्पमथनाय नमः स्वाहा । पीठदर्भः ॥
[या मंत्रानें पीठावर दर्भ टाकणें.]

शार्दूल:-श्रीमद्भिर्विमलैर्जलैः सुरभिभिर्गंधैः शुभैस्तंडुलैः ।
प्रोत्फुल्लैः कुसुमैर्लसचरुवरैर्डिंडीरपिंडोपमैः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दीपैर्दीपितदिग्वधूवदनकैर्धूपैर्जगद्व्यापिभिः ।
सच्छायैः सुरसैः फलैश्च बहुभिः पीठं यजाम्यर्हतां ॥ ३ ॥

ॐ ऱ्हीं सम्यग्दर्शनज्ञानचारित्राय नमः श्रीपीठार्चनं करोमि स्वाहा । श्रीपीठार्चनं ॥ [या मंत्रानें पीठास अर्घ्य देणें.]

आर्या:–निस्तुपनिर्व्रणनिर्मलजलार्द्रशालेयधवलतंडूलैः ।
श्रीवर्णं विलिखामि श्रीपीठे त्रिलोकनाथस्य ॥ ४ ॥

ॐ ऱ्हीं अर्हं श्रीकारलेखनं करोमि स्वाहा । श्रीकारलेखनं ॥ (या मंत्रानें पीठांत श्री हें अक्षर पाण्यानीं ओलें केलेल्या तांदळांनीं लिहिणें.)

आर्या:–जलगंधाक्षतकुसुमैश्चरुप्रदीपधूपफलनिवहैः ।
जितकर्मरिपुं जिनपतिमंचामि प्रबलया भक्त्या ॥ ५ ॥

ॐ ऱ्हीं अर्हं श्रीं श्रीयंत्रार्चनं करोमि स्वाहा । श्रीयंत्रार्चनं ॥ [या मंत्रानें पीठांत काढलेल्या श्रीस अर्घ्य देणें.]

आर्या:–जिनराजप्रतिबिंबं सकलजगद्भव्यपुण्यपुंजावलंबं ।
भक्त्या स्पृशामि परया निर्भूषणमखिललोकभूषणममलं ॥ ६ ॥

ॐ ऱ्हीं धात्रे वषट् प्रतिमास्पर्शनं करोमि स्वाहा । प्रतिमास्पर्शनं ॥
(या मंत्रानें प्रतिमेस हातानें स्पर्श करणें.)

॥ अथ प्रतिमानिवेशनमंत्रः ॥

बसंत:–लिखाम्यतोर्हत्कृतबीजशब्दं । श्रीवर्णमुख्यं सदकेंद्रकाद्यैः ।
श्रीगंधकुट्याः स्नपनीयमर्हद्बिंबं मुदाऽऽनीय निवेशयेस्मिन् ॥ ७ ॥

अनु:–तथाद्यदेवमाप्तानां देवानामधिदैवतं ।
प्रक्षीणघातिकर्माणं प्राप्तानंतचतुष्टयं ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दूरमुत्सृज्य भूभागं नभःस्थलमधिष्ठितं ।
परमौदारिकस्वांगं प्रभातजिनभास्करं ॥ ९ ॥

चतुस्त्रिंशन्महाश्चर्यैः प्रातिहार्यैश्च भूषितं ।
मुनितिर्यग्नरस्वर्गीसभाभिस्तं निषेवितं ॥ १० ॥

जन्माभिषेकप्रमुखप्राप्तपूजातिशायिनं ॥
केवलज्ञाननिर्वर्तितविश्वतत्त्वोपदेशिनं ॥ ११ ॥

प्रशस्तलक्षणाकीर्णसंपूर्णोदयविग्रहं ।
आकाशस्फटिकानंतज्वलज्ज्वालानलोज्वलं ॥ १२ ॥

तेजसामुत्तमं तेजो ज्योतिषां ज्योतिरुत्तमं ।
परमात्मानमर्हंतं ध्यायेन्निःश्रेसाप्तये ॥ १३ ॥

वीतरागोऽथ यो देवः स्तूयमानो मुमुक्षुभिः ।
स्वर्गापवर्गफलदा शक्तिस्तस्य हि तादृशी ॥ १४ ॥

इंद्र० स्वर्गावतारेण हिरण्यवृष्टिः । शक्राज्ञया पण्णवमासयावत् ।
स्वमावलीढप्रमुखादवज्ञा । स्ते संतु कल्याणकरा जिना वः ॥१॥

ये स्नापिता जन्मनि मूर्ध्नि मेरोः । शक्रेण दुग्धैर्नववारिपूरैः ।
बाल्यंगता हेमघटैः सुराणां । ते संतु क० ॥ २ ॥

तपोवनं सन्निहिताः कृतौघात् । सोत्पाटिता कुंतलकं करेण ।
कर्माष्टकक्षालनहेतुभूता । स्ते संतु क० ॥ ३ ॥

जगत्त्रयोद्योतकरात्प्रयात । घातिक्षयात्केवलबोधलक्ष्म्यः ।
सत्प्रातिहार्याभरणांचितांगा । स्ते संतु क० ॥ ४ ॥

प्रदग्धरज्वाकृतिकर्मनाशा । त्तदंगपूजा मुकुटानलेन ।
कृता परैश्चंदनदेवदारैः । स्ते संतु क० ॥ ५ ॥

वसंत० सद्रत्नवृष्टिकुसुमांजलिगंधवारि ।
भेयारवास्त्रिदशजातजयेतिनादः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साश्चर्यपंचकमशेषगुणस्य राज्ञः ।
कल्याणपंचकमिदं विदधातु शांतिं ॥ ६ ॥

इंद्र०—यः श्रीमदैरावणवाहनेन । निवेशितोऽङ्के विधृतातपत्रः ।
ईशानशक्रेण सनत्कुमार । माहेंद्रसच्चामरवीज्यमानः ॥१॥

शच्यादिभिः श्र्यादिभिरप्युदार ।
देवीभिरात्तोज्यलमंगलाभिः ।
पुरस्सरं भेरिरवाप्सराभि ।
रग्रे नटंतीतिभिरुपास्यमानः ॥ २ ॥

शेषैस्तु शक्रैर्जय जीव नंद । प्रसीद शश्वत्प्रतिपक्षपातीन् ।
इत्यादिवागुल्वणितप्रमोदै । र्मुहुः प्रह्वैरुपहार्यमाणः ॥ ३ ॥

सुरैः स्फुटास्फोटितगीतनृत्य । वादित्रहास्योत्थतवाञ्छितानि ।
सुमंगलाशीर्धवलस्तुतीनि । स्वरं सृजद्भिः परिचार्यमाणः ॥४॥

अहो प्रभावस्तपसां सुदूर । मपि व्रजित्वा प्रतिमास्त्वपेक्ष्यः ।
यः शेषसाक्षाद्द्रमसमीक्षितोऽर्हं । न्भेदनादिष्वयमात्मबंधुः ॥५॥

सविस्मयानंदमिति ब्रुवाणैः । रालोक्यमाणोऽभिमुखागतैषी ।
देवर्षिभिः स्पर्धि तदेव युग्मं । न भोगयुग्मैरपि सेव्यमानः ॥६॥

प्रदक्षिणाद्व्रजजनेन नीत्वा । पूर्वोत्तरस्यां दिशि मेरुशृंगं ।
निवेश्य तत्रत्य शिलोद्घपीठे । क्षीरोदनीरैः स्नपितः सुरेंद्रैः ॥७॥

तं देवदेवं जिनमद्यजात । मप्यास्थितं लोकपितामह त्वं ।
इमं निवेश्योत्तरवेदिपीठे । प्राग्वत्क्रमेऽस्मिन् विधिनाभिषिंचे
॥ ८ ॥ कुलकं ॥

ॐ ह्रीं अर्हं श्रीं क्लीं धर्मतीर्थाधिनाथाय भगवन्निह पांडुकशिलापीठे तिष्ठ २ स्वाहा ॥ उत्तरवेदिकापीठे प्रतिमां निवेशयेत ॥ इति प्रतिमानिवेशनमंत्रः ॥ (या मंत्रानें प्रतिमा पीठावर ठेवणें.)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ प्रतिमास्थापनमंत्रः ॥

स्रग्धरा० द्वीपे नंदीश्वराख्ये स्वयममृतभुजः कृत्तिमं स्नापयेयु ।
र्भावे भावार्हतो वा भव भव भिद्या भाक्तिकाश्चैत्यगेहात् ॥
आनीयास्मिन् स्थवीयस्यतिविमलतमे कृत्तिमे स्नानपीठे ।
सद्भावे स्थापनार्हत्प्रतिकृतिविधिनायक्षयक्षीसमेतं ॥ १ ॥

आर्या०-प्रणमदखिलामरेश्वरमणिमकुटतटांशुखचितचरणाब्जं ।
श्रीक्रामं श्रीनाथं श्रीवर्णेऽप्रतिमं स्थापयामि जिनं ॥ २ ॥

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं जगतां सर्वशांतिं कुर्वंतु श्रीवर्णे प्रतिमास्थापनं करोम्यर्हद्भ्यः स्वाहा । श्रीवर्णे प्रतिमास्थापनं ।

(या मंत्रानें काढलेल्या श्रीवर प्रतिमा ठेवणें.)

वसंत० श्रीपादपद्मयुगलं सलिलैर्जिनस्य ।
प्रक्षाल्य तीर्थजलपूततमोत्तमार्गं ॥
आह्वानमंत्रकुसुमाक्षतचंदनाद्यैः ।
संस्थापनं च विदधेऽत्र च सन्निधानं ॥ ३ ॥

ॐ ऱ्हाँ ऱ्हीं ऱ्हूँ ऱ्हौं ऱ्हः नमोऽर्हते भगवते श्रीमते पवित्रतरजलेन श्रीपादप्रक्षालनं करोमि स्वाहा । श्रीपादप्रक्षालनं ।

[या मंत्राने प्रतिमेचे पादप्रक्षलन करणें]

॥ अथ आह्वाहनादिविधानम् ॥

शार्दूल०स्वांते भांतमपि स्फुटं श्रुतिबलादाह्वानयामि द्रुयात् ।
यच्छुद्धात्मनि सुप्रतिष्ठितमपि संस्थापयामीशयत् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कुर्वे सर्वगमप्युपांतगमपि त्यक्तं विकारैः सदा ।
पाद्याद्यैश्च पुनामि यद्विधिरसावित्येव तन्नौत्तरं ॥ १ ॥

ॐ ऱ्हीं प्रकृतिक्रमविध्यवधानाय प्रतिमाग्रे पुष्पांजलिं क्षिपेत् ॥

(या मंत्रानें प्रतिमेपुढें पुष्पांजलि करणें.)

आर्या— भगवन् प्रसीद सपरिवार इहैह्येहि परमकारुणिक ।
विष्टरमधितिष्ठाधितिष्ठ कुरु कुरु दृशादं मे ॥ १ ॥

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं पूर्वैरिहैह्येहि तिष्ठ तिष्ठ मम सन्निहितो भव भव संवौषट् ठठ वषडिति क्रौडैः ॥ २ ॥

मंत्रैर्नमोऽर्हते स्वाहांतांतैरर्हतो बुधैर्यथार्हैं ।
वार्गंधाक्षतपुष्पैर्विदधाम्यह्वाहनादिविधीन् ॥ ३ ॥

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं अर्हत्परमेमिष्ठन् अत्र एहि २ संवौषट् नमोऽर्हते स्वाहा आह्वानं ॥ ॐ ऱ्हीं० अत्र तिष्ठ २ ठठ नमोऽर्हते स्वाहा स्थापनं ॥ ॐ ऱ्हीं अत्र मम सन्निहितो भव भव वषट् नमोऽर्हते स्वाहा । सन्निधीकरणं ॥

निर्मुद्रभवसमुद्रद्वंद्वार्णवतरणपोतयोः पुरतः ।
जिनचरणसरोरुहयोः करोम्यहं पंचगुरुमुद्रां ॥ ४ ॥

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं असिआउसाय नमः स्वाहा । पंचगुरुमुद्रावतरणं ॥

(या मंत्रानें प्रतिमेच्या पाया समोर [1]पंचगुरुमुद्रा करणें)

ॐ उसहाय दिव्वदेहाय सज्जोजादाय महपण्णाय अणंतचउट्ठयाय परमसुहपइट्ठियाय णिम्मलाय सयंभुवे अजरामरपदपत्ताय चउमुहाय

---

१ दोनी हातांचे तळवटे बाहेर करून, त्यांचे पाठ एकमेकास चिकटून, बोटे एकमेकांत अडकविणें; व अंगठ्यांनीं किरंगळीबोटें व तर्जनीबोटांनीं मधली बोटें धरून, अनामिकबोटें जुळवून धरणें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परमेट्ठिणे अरहंताय तिलोयणाणाय तिलोयपुज्जाय अट्ठदिव्वदेहाय देवपरिपूजाय परमपदाय ममत्तहि सण्णिधाय स्वाहा । इदमुच्चारयन् प्रतिमां परामृषीत् ॥ [हा गाथामंत्र उच्चार करीत विनयपूर्वक प्रतिमेस हात जोडणें, अंजलि करणें व नमस्कार करणें, इत्यादिकांनीं प्रतिमचें परामर्ष करावें.]

॥ अथ अर्घ्यपाद्याचमनविधिः ॥

स्रग्धरा-सिद्धिर्वृद्धिर्जयश्रीधृतिरमृतिरभीर्भाग्यसौभाग्यरागाः ।
कांतिः शांतिः प्रसादः प्रथितगुणगणो मंगलं तुष्टिपुष्टी ॥
कीर्तिः क्षेमं सुभिक्षं सुखमखिलमयं स्वायुरारोग्यमैश्यं ।
सर्वं भद्रं भवद्भिभवतु भवभिदे स्थापितेऽस्मिन् जिनेशे ॥ १ ॥
इत्याशीर्वाद ॥

अनु० अनंतज्ञानदृग्वीर्यसुखरूपं जगत्पतेः ।
पाद्यमामर्चयाम्युद्भिर्निर्मलं पदपंकजं ॥ २ ॥

ॐ ऱ्हीं अर्हंत इदं पाद्यं गृण्हीध्वं २ नमोऽर्हद्भ्यः स्वाहा ॥

अनु०—कनत्कनकभृंगारनालाद्गालितवारिभिः ।
जगत्रितयनाथस्य करोम्याचमनाक्रियां ॥ ३॥

ॐ ३ ऱ्हीं झ्वीं २ क्ष्वीं वंमंहंसंतंपंद्रांद्रींहंसःस्वाहा । इति आचमनमंत्रः ।
[या मंत्रानें जलधारापूर्वक प्रतिमेस आचमन करणें.]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ पिंडावतरणम् ॥

अनु० गोमयैर्भस्मपिंडैश्च दर्भदीपांकुरैर्जलैः ।
शाल्यन्नैरक्षतैः पंचवर्धमानैः फलैरपि ॥ १ ॥

पृथ्वी० अखंडितमुखाभिनूतनासितार्द्रस ंडुल ।
स्फुटत्कमलचंपकप्रभृतिपुष्पपूर्णांजलिः ।
प्रदक्षिणिमहं त्रिधा पदसरोजमामस्तकं ।
पुरो भगवतोऽर्हतांऽवतरणं करोमि श्रियै ॥ २ ॥

ॐ ऱ्हीं क्रों बहुविधाक्षतपुष्पपरिपूर्णपाणिपात्रेण भगवतोऽर्हतोऽ—वतरणं करोमि सम्यग्दर्शनज्ञानचारित्राण्यस्माकमक्षतानि विद—धातु भगवान् स्वाहा । पुष्पाक्षतावतरणं ॥

(या मंत्रानें ओंजळभर फुलें व अक्षता घेऊन प्रतिमेच्या मस्तकापासून पायांपर्यंत प्रदक्षिणारूपानें तीनदां निवाळून ठेवणें.)

---

१ गोमयपिंडावतरण. २ भस्मापिंडावरतण. ३ शाल्यन्नपिंडाव—तरण. ४ धूपावल्यवतरण. ५ पंचवर्धमानावतरण. ६ दीपावल्यवतरण. ७ सलिलांजल्यवतरण. ८ फलावतरण. ९ मृत्पिंडावतरण. १० दर्भदी—पांकुरावतरण. अशीं अवतरणें दहा आहेत: १ अंतराळें धरलेल्या गायीच्या शेणाचें एक पिंड बनवून, त्यावर पांढऱ्या मोहऱ्या व अक्षता टाकून, त्याच्या माथ्यावर दूर्वा खोवून, प्रतिमेच्या मस्तका—पासून पायांपर्यंत तीनदा निवाळून ठेवणें, याला गोमयपिंडावतरण ह्मणतात. २ अंतराळें गायींचें शेण वाळवून भाजून राख करणें, ती राख सुगंध पाण्यांत कालवून एक पिंड करून पूर्ववत् निवाळून ठेवणें, याला शाल्यन्नपिंडावतरण ह्मणतात. ४ सुगंध धूप घाळून पूर्ववत् निवाळून ठेवणें, याला धूपावल्यवतरण ह्मणतात.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हरिन्मणिमयूखकोमलविलासदूर्वांकुरैः ।
निमग्नसितसर्षपैर्हरितगोमयैः पिंडकैः ।
जिनेशमवतारयाम्यथ महाभिषेकोद्यमे ।
मुदा सुरगिरौ स्वयं सुरवरैः पुरा पूजितं ॥ १ ॥

ॐ ऱ्हीं क्रौं दूर्वांकुराक्षतसितसर्षपयुक्तैर्हरितगोमयपिंडकैर्भगवतोऽर्हतोऽवतरणं करोमि दुरितमस्माकमपनयतु भगवान् स्वाहा । गोमयपिंडावतरणम् ॥ १ ॥

वसंतः-अस्पृष्टभूमितलगोमयभस्मपिंडै ॥
गंधांबुसेकलुलितैरवतारयामि ॥
देवं जिनं जितमनोजयजन्ममृत्युं ।

टीपः— मागील पानावरून पुढें चालूं

५ सोललेले एरंडे सुगंधपाण्यांत वाटून, त्यांचे चौकोनी पांच वडे बनवून, पंचरंगी करून पूर्ववत् निवाळून ठेवणें; याला पंचवर्धमानावतरण ह्मणतात. ६ एका तबकांत कापराचे पुष्कळ दिवे लावून पूर्ववत् निवाळून ठेवणें, याला दीपावल्यवतरण ह्मणतात. ७ सुगंध फुलांनीं व पाण्यानीं ओंजळ भरून पूर्ववत् निवाळून ठेवणें, याला सलिलांजल्यवतरण ह्मणतात. ८ डाळिंबादि उत्तम फळें एका तबकांत भरून पूर्ववत् निवाळून ठेवणें, याला फलावतरण ह्मणतात. ९ चांगल्या मातीचें एक पिंड बनवून, त्याजवर पांढऱ्या मोहऱ्या टाकून, त्याच्या माथ्यावर दूर्वा खोवून, पूर्ववत् निवाळून ठेवणें, याला मृत्पिंडावतरण ह्मणतात. १० दर्भाचे शेंडे दिव्यावर धरून पेटवून पूर्ववत् निवाळून ठेवणें, याला दर्भदीपांकुरावतरण ह्मणतात हीं दहा पिंडावतरणें पुढें सांगितलेल्या त्या त्या मंत्रानें प्रतिमेच्या सभोंवती पूर्व दिशा आदिकरून क्रमानें दाही दिशेस ठेवीत जाणें. हें चांगलें लक्षांत ठेवावें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेनास्तु भस्मितविधिद्विपता त्रिलोके ॥
ॐ ह्रीं क्रों भस्मपिंडकैर्भगवतोऽर्हतोऽवतरणं करोम्यस्माकमष्ट-विधकर्माणि भस्मीकरोतु भगवान् स्वाहा । भस्मपिंडावरतणम् ॥ २ ॥

इंद्रवज्राः-शाल्यन्नपिंडैः शरदिंदुरोचिःपुंजायमानैर्भगवंतमेभिः ।
निर्वर्तयामि त्रिजगच्छरण्यं । त्राणं विदक्षं जगतां त्रयस्य ॥
ॐ ह्रीं क्रों कुंदेंदुकुमुदधवलवर्तुलोदनापिंडकैर्भगवतोऽर्हतोऽवतरणं करोमि । क्षेमसुभिक्षमस्माकं करोतु भगवान् स्वाहा । शाल्यन्नपिंडावतरणम् ॥ ३ ॥

शार्दूल:-कक्कोलैंदुलवंगकुंकुमरजःखर्जूरसेव्यागरु ।
श्यामैलादलनागचंदनजटाजातीफलानां जिनं ॥
क्षोदैरेष निवर्तये दरदलत्फुल्लावलीलासितैः ।
प्रत्यग्रागरुचूर्णधूपपटलाव्यासंगसांद्रीकृतैः ॥
ॐ ह्रीं क्रों सुगंधीभूतदिग्वधूवदनकैरंध्रःकारितदिग्विवरैः कंकोलैलादिचूर्णमिश्रितकालागरुधूपकैर्भगवतोऽर्हतोऽवतरणं करोमि अस्माकमष्टविधकर्माणि चूर्णीकरोतु भगवान् स्वाहा । धूपावल्यवतरणम् ॥ ४ ॥

शार्दूल—कृष्णाभैर्हरितैः सितैररुणिमाक्रांतैर्वरैः पीतकै ।
रस्फीतैरतिकोमलैः शुभतमैर्गंधांबुसंमर्दितैः ।
सद्धारैश्चतुरस्रकैर्भगवतस्तस्यावतारं मुदा ।
कुर्मः शर्मनिबर्हणं जिनपतेस्तैर्वर्धमानैर्वयम् ॥
ॐ ह्रीं क्रों सितासितहरितपीतलोहितैर्वर्धमानकैर्भगवतोऽर्हतोऽवतरणं करोमि श्रियमस्माकं वर्धयतु भगवान् स्वाहा । पंचवर्धमानावतरणम् ॥ ५ ॥

आर्या:—बहुपद्मरागमणिभिर्दीपैरवतारये जिनार्कमहं ।
शुभज्ञानविभावसुध्वस्ताखिलदुरिततिमिरततिम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ह्रीं क्रों बहुपद्मरागमणिभिरिव दीप्यमानैः कर्पूरपारिदीपै-रिव उभयपार्श्वप्रज्वलितोत्कया भगवतोऽर्हतोऽवतरणं करोम्यस्माकं धर्ममुज्वलं करोतु भगवान् स्वाहा । दीपावल्यवतरणम् ॥ ६ ॥

इंद्रवज्रा:-प्रत्यग्रकर्पूरपरागभाजा । जिनस्य नानासुमनान्वितेन ।
भक्त्या वयं हस्तपुटस्थितेन । नीरेण नीराजनकर्म कुर्मः ॥

ॐ ह्रीं क्रों सुरभिशिशिरविमलपरिपूर्णनांजलिना भगवतोऽर्हतोऽवतरणं करोमि विमलशीतलध्यानमस्माकमुत्पादयतु भगवान् स्वाहा । सलिलांजल्यवतरणम् ॥ ७ ॥

शार्दूल:-धात्रीतिंदुकपूगचोचकरणद्राक्षाकपित्थालुकैः ।
कर्कंदुपनसाम्रतालकदलीखर्जूरसत्केशरैः ॥
जंबूदाडिमबीजपूरबदरीजंबीरपारावरैः ।
कुर्वेऽन्यैश्च फलैरभीष्टफलदैर्देवस्य नीराजनम् ॥

ॐ ह्रीं क्रों पवित्रतरसमुत्पन्नैः कंब्राम्रफलैर्भगवतोऽर्हतोऽवतरणं-करोमि अस्माकमाशाफलं संपादयतु भगवान् स्वाहा । फलावतरणम् ॥ ८ ॥

वियोगिनी० सितसर्षपतंडुलोज्वलैर्बहुदूर्वांकुरशोभितमूर्धभिः ।
जिननाथमिहावतारये शुभमृत्स्नाकृतवर्धमानकैः ॥

ॐ ह्रीं क्रों दूर्वांकुराक्षतासितसर्षपयुक्तैर्मृत्पिंडकैर्भगवतोऽर्हतोऽवत-रणं करोमि सर्वसस्यां वसुधां करोतु भगवान् स्वाहा। मृत्पिंडावतरणम् ॥ ९ ॥

आर्या:- अघविपिनदहनदक्षैरक्षूणैरग्रलग्नदहनशिखैः ।
अवतारयामि जिनमहमघवनदहनोद्यमी दर्भैः ॥

ॐ ह्रीं क्रों कनत्कनककपिशवर्णैरग्रावलग्नाग्निज्वालाज्वलिताखिल-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दिङ्मुखैः पापारातिकुलोन्मूलनदहनदक्षैर्निबिडनिबद्धदर्भपूलैर्भ—गवतोऽर्हतोऽवतरणं करोमि अघज्वलनमस्माकं करोतु भगवान् स्वाहा। दर्भदीपांकुरावतरणम् ॥ १० ॥

एतानि दशमंगलद्रव्याणि व्यस्तानि हस्ताभ्यामुध्दृत्य समस्तानि वा हेमपात्रे व्यवस्थाप्यावतारयेत्। महार्घ्यम् ॥ इति समस्त—नीराजनद्रव्यविधानम् ॥

पृथ्वी :—स्फुटद्वकुलयूथिकाकरुणमाधवीमल्लिका ।
स्फुरत्कुरबकाश्वमारशतपत्रपद्मोत्पलं ॥
दलद्दमनकं स्फुरन्मरुबकं लसद्वालकं ।
क्षिपामि पदपद्मयोर्जिनपतेः प्रसूनांजलिम् ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं अर्हंत इदं पुष्पांजलिप्रार्चनं गृण्हीध्वं २ नमोऽर्हद्भ्यः स्वाहा । अनेकविधकुसुमांजलिः ॥

॥ अथ अष्टकम् ॥

द्रुत० कपिशकांचनकुंभसमाश्रया। दिव सरोजरजःपरिपिंजरैः ।
शुभविशुद्धसरःप्रभवैः प्रभो। ऽभिनवांबुभिरर्चनमारभे ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं अर्हंत इदं जलार्चनं गृण्हीध्वं २ नमः परमेष्ठिभ्यो जलं निर्वपामि स्वाहा ॥ १ ॥

अनु० मदालिनादैः कर्णस्य वदतेव समुच्चकैः ।
घ्राणस्य सौरभेणेव गंधैराराध्यते जिनः ॥

ॐ ह्रीं श्रीं० अर्हंत इदं गंधार्चनं गृण्हीध्वं २ नमः परमात्मकेभ्यो-गंधं निर्वपामि स्वाहा ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उपगीति० शशिकांतविमलै रयांकुरैरिव निषिक्तभक्तिजनैः ।
खंडितमहन्नखंडैर्यजे जिनस्य तंडुलैश्चरणम् ॥

ॐ ह्रीं श्रीं० अर्हंत इदं अक्षतार्चनं गृण्हीध्वं २ नमोऽनादि-निधनेभ्योऽक्षतान् निर्वपामि स्वाहा ॥ ३ ॥

पृथ्वी० सिताभिनवसिंधुवारशतमल्लिकामालती ।
प्रभृत्यखिलमंगलप्रसववासिताशामुखं ।
चलच्चटुलचंचरीकमृदुपादपाताक्षमं ।
क्षिपामि जिनपादयोरुरधरित्रि पुष्पोत्करम् ।

ॐ ह्रीं श्रीं० अर्हंत इदं पुष्पार्चनं गृण्हीध्वं २ नमः सर्वनृसुरासुरपूजितेभ्यः पुष्पं निर्वपामि स्वाहा ॥ ४ ॥

अनु० अनंतसुखतृप्तस्य भुक्तिमुक्तिप्रदायिनः ।
प्रोत्क्षिपामि हविर्भक्त्या बुभुक्षुरमृताशनम् ॥

ॐ ह्रीं श्रीं० अर्हंत इदं नैवेद्यार्चनं गृण्हीध्वं २ नमोऽनंतानंतज्ञानेभ्यश्चरुं निर्वपामि स्वाहा ॥ ५ ॥

आर्या० कर्पूरोपलदीपेन विच्छलाद्वेष्टितांतस्तमःपटलैः ।
प्रत्यार्थिभिरिव दीपान् भक्त्या प्रद्योतयामि जिनभानोः ॥

ॐ ह्रीं श्रीं० अर्हंत इदं दीपार्चनं गृण्हीध्वं २ नमोऽनंतानंतदर्शनेभ्यो दीपं निर्वपामि स्वाहा ॥ ६ ॥

गीति० हिमहरिचंदनजोंगकतुरुष्कवरशर्करादिसंभूतैः।
धूपैर्धूपितकाष्ठैरायतदलिकुलकलैर्यजामि जिनम्॥

ॐ ह्रीं श्रीं० अर्हंत इदं धूपार्चनं गृण्हीध्वं २ नमोऽनंतानंतवीर्येभ्यो धूपं निर्वपामि स्वाहा ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आर्या० सुरभितरसुरससुरुचिरसुवर्णनारंगमातुलुंगाद्यैः ।
सद्योऽभिलषितफलदैः फलैः फलार्थी यजामि जिनम् ॥
ॐ ह्रीं श्रीं० अर्हंत इदं फलार्चनं गृण्हीध्वं २ नमोऽनंतानंतसौख्येभ्यः फलं निर्वपामि स्वाहा ॥ ८ ॥

शार्दूल—मेरौ प्रागमरैरिवात्र विधिना संस्थाप्य संपूजित ।
स्तेजोराशिरशेषवत्कल्मषमुपश्रीलक्षणैर्लक्षितः ।
लक्ष्मीधामभवाध्वगश्रमहरच्छायाद्रुमः शाश्वतीं ।
कृत्वा संदिशतु श्रियं सह महान् श्रीवर्धमानो जिनः ॥
ॐ ह्रीं श्रीं० अर्हंत इदं अर्घ्यार्चनं गृण्हीध्वं २ नमः परमब्रह्मभ्यो विनष्टाष्टकर्मभ्योऽर्घ्य निर्वपामि स्वाहा ॥ ९ ॥

बसंतः--जातीजपाबकुलचंपकपद्मवल्ली ।
कंकेलिकेतकिकुरंटकपाटलाद्यैः ।
कर्षन् महप्रमितिकां स्म ततोऽजसालीन् ।
पुष्पांजलिर्जिनपदोरुपधीक्रिये तु ॥
शांतिधारा । पुष्पांजलिः ॥ १० ॥

॥ अथ दिक्पालपूजा ॥

स्रग्धरा-विस्तीर्णे स्वर्णपात्रे सलिलमलयजैश्चारुपुष्पाक्षतान्नैः ।
पक्वान्नैः क्षीरसर्पिर्दधिफलनिकरैरर्घ्यमुद्धार्य वयं ॥
यज्ञांगैर्दीपधूपैः परमजिनपतेः पादयोस्त्रिः परीत्य ।
प्रत्येकं प्रार्थयेऽहं निखिलादिगाधिपान् यज्ञनिर्विघ्नसिध्यै ॥१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनु०—दिगीशाः शद्वये युष्मानायात सपरिच्छदाः ।
अत्रोपवेशतैत वो यजे प्रत्येकमादरात् ॥ २ ॥

दिक्पालकपूजाप्रतिज्ञापनाय समस्तहव्यद्रव्यपूर्णपात्रपरमपुरुषचरण--कमलयोरवतार्य पार्श्वतो निवेशयेत् ॥

(येथें दशदिक्पालकाच्या पूजेकरितां एका मोठ्या ताटांत जल-गंधादि पूजासामग्री घेऊन, प्रतिमेच्या चरणीं अवतरण करून एका बाजूस ठेवणें; व त्याच पूजासामग्रीनें पुढें सांगितलेल्या मंत्रानें दिक्पा-लकपूजा करणें, असें सांगितलें आहे)

आह्वानादिपुरःसरप्रत्येकपूजोपक्रमाय दिक्षु पुष्पाक्षतं क्षिपेत् ॥
[येथें पूर्वादि दाही दिशेस फुलें व अक्षता टाकणें.]

॥ पूर्वस्यां दिशि ॥

स्रग्धरा० द्वात्रिंशद्वक्त्रदंतन्हदनलिननटन्नाकयोषिन्निकायं ।
कांत्या कैलासशैलच्छविमलिनिकराक्रांतदानाग्रगंडं ।
आरुह्यैरावतं हि कुलिशधर इहैवागतः पूर्वकाष्ठा- ॥
मव्या शच्या सहायं वरकनकरुचिर्वासवोऽर्हन्मखोर्व्याः ॥ १ ॥

ॐ आँ क्रों न्हीं सुवर्णवर्णप्रशस्तसर्वलक्षणसंपूर्णस्वायुधवाह--नवधूचिन्हसपरिवार हे इंद्रदेव अत्रागच्छागच्छ संवौषद् स्वाहा । ॐ आँ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ आँ० अत्र मम सन्निहितो भव २ वषद् स्वाहा । आह्वानस्थापनसन्निधीकरणम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ बलिः ॥

ॐ इंद्राय स्वाहा । इंद्रपरिजनाय स्वाहा । इंद्रानुचराय स्वाहा । इंद्रमहत्तराय स्वाहा । अग्नये स्वाहा । अनिलाय स्वाहा । वरुणाय स्वाहा । प्रजापतये स्वाहा । ॐ स्वाहा । भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । ॐ भूर्भुवः स्वः स्वाहा । स्वधा स्वाहा ॥ हे इंद्रदेव स्वगुणपरिवारपरिवृत इदमर्घ्यं पाद्यं जलं गंधं अक्षतं पुष्पं दीपं धूपं चरुं बलिं फलं स्वस्तिकं यज्ञभागं च यजामहे प्रतिगृह्यतां २ स्वाहा ॥ यस्यार्थं० शांतिधारा ॥ इंद्राह्वानम् ॥ १ ॥

॥ पूर्वदक्षिणस्यां दिशि ॥

स्रग्धरा० शुंभज्जांबूनदाभं मणिगणविलसच्छृंगमूर्णायुमूढः ।
प्राप्ताह्वानो जपाभः करविधृतलसच्छक्तिरग्नींद्र एषः ॥
भास्वज्ज्वालाकलापः पुरयमककुभोरंतरालं प्रयांतो ।
भूयात् स्वाहाप्रियोऽस्मिन् जिनपतिसवने दीपधूपादिकाले ॥२॥

ॐ आँ क्रों ह्रीं रक्तवर्णप्रशस्तसर्वलक्षणसंपूर्णस्वायुधवाहनवधूचिन्हसपरिवार हे अग्निदेव अत्रागच्छागच्छ संवौषट् स्वाहा । ॐ आँ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ आँ० अत्र मम सन्निहितो भव २ वषट् स्वाहा । आह्वानस्थापनसन्निधीकरणम् ॥

॥ अथ बलिः ॥

ॐ अग्नींद्राय स्वाहा । अग्निपरिजनाय स्वाहा । अग्नींद्रानुचराय स्वाहा । अग्नींद्रमहत्तराय स्वाहा । अग्नये स्वाहा । अनिलाय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वाहा । वरुणाय स्वाहा प्रजापतये स्वाहा । ॐ स्वाहा । भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । ॐ भूर्भुवः स्वः स्वाहा । स्वधा स्वाहा ॥ हे अग्नींद्रदेव स्वगुणपरिवारपरिवृत इदमर्घ्यमित्यादि. ॥ यथार्थं शांतिधारा ॥ अग्न्याह्वानम् ॥ २ ॥

॥ दक्षिणस्यां दिशि ॥

स्रग्धरा० जीमूतश्यामलांगं कलुषितनयनं कासरं चाधिरूढः ।
छायाजायासहायः स्फुरदुरगमनोभूषणोमाषवर्णः ॥
अस्यामाहूयमानो मखभुवि यमराट् कुंतलोदंबुदालिः ।
सोऽयं दंडोद्घपाणिः प्रथयतु धरणीं दक्षिणाशावकाशाम् ॥३॥

ॐ आँ क्रों ह्रीं कृष्णवर्णप्रशस्तसर्वलक्षणसंपूर्णस्वायुधवाहन-वधूचिन्हसपरिवार हे यमदेव अत्रागच्छागच्छ संवौषट् स्वाहा । ॐ आँ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ आँ० अत्र मम सन्निहितो भव २ वषट् स्वाहा । आह्वानस्थापनसन्निधीकरणम् ॥

॥ अथ बलिः ॥

ॐ यमाय स्वाहा । यमपरिजनाय स्वाहा । यमानुचराय स्वाहा । यममहत्तराय स्वाहा । अग्नये स्वाहा । अनिलाय स्वाहा । वरुणाय स्वाहा । प्रजापतये स्वाहा । ॐ स्वाहा । भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । ॐ भूर्भुवःस्वःस्वाहा । स्वधा स्वाहा ॥ हे यमदेव इदमर्घ्यमित्यादि ॥ यस्यार्थं० ॥ शांतिधारा ॥ यमाह्वानम् ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ दक्षिणपश्चिमायां दिशि ॥

स्रग्धरा० धर्मध्यानार्कभीत्यांतकवरुणदिशोरंतरेऽप्यैक्यदेशे ।
पुंजीभूतांधकारांजनगिरिसदृशं श्यामरक्षोऽधिरूढः ॥
नीलांगो यज्ञभूम्याममतिनिशितमहामुद्गरव्याप्तमुष्टिः ।
सोऽस्यां पायादपायान्निजदिशि वसुधां यातुधानप्रधानः ॥४॥

ॐ आँ क्रों ह्रीं श्यामवर्ण प्रशस्तसर्वलक्षणसंपूर्णस्वायुधवाहनवधू-चिन्हसपरिवार हे नैऋतदेव अत्रागच्छागच्छ संवौषट् स्वाहा । ॐ आँ० २ ठठ स्वाहा । ॐ आँ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ आँ० अत्र मम सन्निहितो भव २ वषट् स्वाहा । आह्वानस्थापनसन्निधीकरणम् ॥

॥ अथ बलिः ॥

ॐ नैऋताय स्वाहा । नैऋतपरिजनाय स्वाहा । नैऋतमहत्तराय स्वाहा अग्नये स्वाहा । अनिलाय स्वाहा । वरुणाय स्वाहा । प्रजापतये स्वाहा । ॐ स्वाहा । भूः स्वाहा । भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । ॐ भूर्भुवःस्वःस्वाहा । स्वधा स्वाहा ॥ हे नैऋतदेव स्वगुणपरिवारपरिवृत्त इदमर्घ्यमित्यादि ॥ यस्यार्थं० ॥ शांतिधारा ॥ नैऋताह्वानम् ॥

॥ पश्चिमायां दिशि ॥

स्रग्धरा० तालस्थूलायतोऽथ धृतकरकरकांभोजनीनागहारो ।
ग्रैवेयाकल्परम्यं करिमकरमारुह्य कांतासमेतः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आयत्तो ह्यध्वरोर्वीमरुणमणिगणालंकृतोद्दामवेषः ।
प्रत्यक्काष्ठां प्र लद्युतिरवतु पतिर्यादसां पाशपाणिः

ॐ आँ क्रों ऱ्हीं सुवर्णवर्ण प्रशस्तसर्वलक्षणसंपूर्ण स्वायुधवाहन-वधूचिन्हसपरिवार हे वरुण अत्रागच्छागच्छ संवौषट् स्वाहा । ॐ आँ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ आँ० अत्र मम सन्निहितो भव २ वषट् स्वाहा । आह्वानस्थापनसन्निधीकरणम् ॥

॥ अथ बलिः ॥

ॐ वरुणाय स्वाहा वरुणपरिजनाय स्वाहा । वरुणानुचराय स्वाहा । वरुणमहत्तराय स्वाहा । अग्नये स्वाहा । अनिलाय स्वाहा । वरुणाय स्वाहा । प्रजापतये स्वाहा । ॐ स्वाहा । भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । ॐ भूर्भुवःस्वःस्वाहा । स्वधा स्वाहा । हे वरुणदेव स्वगुणपरिवारपरिवृत इदमर्घ्यमित्यादि शांतिधारां । वरुणाह्वानम् ॥

॥ पश्चिमोत्तरस्यां दिशि ॥

स्रग्धरा० चंचचंद्रावदातं तुरगमुरुजवं मुष्टिसंमेयमध्य ।
मारूढो वायुवेगी प्रिययुवतियुतः पादयास्त्रशस्तः ।
निष्टप्तस्वर्णवर्णोऽवतु वरुणधनाध्यक्षयोः श्रीगरिष्ठां ।
स्वां काष्ठां यागनिष्ठां परिमणितजगद्बंधुरो गंधवाहः ॥ ६ ॥

ॐ आँ क्रों ऱ्हीं सुवर्णवर्ण प्रशस्तसर्वलक्षणसंपूर्ण स्वायुधवाहनवधूचिन्हसपरिवार हे पवनदेव अत्रागच्छागच्छ संवौषट् स्वाहा । ॐ आँ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ आँ० अत्र मम सन्निहितो भव भव २ वषट् स्वाहा । आह्वानस्थापनसन्निधीकरणम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ बलिः ॥

ॐ पवनाय स्वाहा । पवनपरिजनाय स्वाहा । पवनानुचराय स्वाहा ।। पवनमहत्तराय स्वाहा । अग्नये स्वाहा । अनिलाय स्वाहा । वरुणाय स्वाहा । प्रजापतये स्वाहा । ॐ स्वाहा । भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । ॐ भूर्भुवः स्वः स्वाहा । स्वधा स्वाहा ॥ हे पवनदेव स्वगुणपरिवारपरिवृत इदमर्घ्यमित्यादि ॥ यस्यार्थं० ॥ शांतिधारा । पवनाह्वानम् ॥ ६ ॥

॥ उत्तरस्यां दिशि ॥

स्रग्धरा० कुंदेंदुद्योतितांशद्युतिपटललसद्राजहंसायमानं ।
सौरभ्यामोदितांतर्भुवमणिविलसत्पुष्पकाख्यं विमानं ॥
अध्यासीनः कुलस्त्रीनिवहपरिवृतो व्यावृतोऽयं नु यत्र ।
स्वामाशां पातु शश्वदितरितविभवस्तारकः कुक्कुबेरः ॥ ७ ॥

ॐ आँ क्रों ह्रीं सुवर्णवर्ण प्रशस्तसर्वलक्षणसंपूर्ण स्वायुधवाहनवधूचिन्हसपरिवार हे धनददेव अत्रागच्छागच्छ संवौषट् स्वाहा । ॐ आँ क्रों ह्रीं सुवर्णवर्ण प्रशस्तसर्वलक्षणसंपूर्ण स्वायुधवाहनवधूचिन्हसपरिवार हे धनददेव अत्र तिष्ठ २ ठठ स्वाहा । ॐ आँ० अत्र मम सन्निहितो भव २ वषट् स्वाहा । आह्वानस्थापनसन्निधीकरणम् ॥

॥ अथ बलिः ॥

ॐ धनदायस्वाहा । धनदपरिजनाय स्वाहा । धनदानुचराय स्वाहा । धनदमहत्तराय स्वाहा । अग्नये स्वाहा । अनिलाय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वाहा। वरुणाय स्वाहा। प्रजापतये स्वाहा। ॐ स्वाहा। भूः स्वाहा। भुवः स्वाहा। स्वः स्वाहा। ॐ भूर्भुवः स्वः स्वाहा। स्वधा स्वाहा॥ हे धनददेव स्वगुणपरिवारपरिवृत इदमर्घ्य-मित्यादि॥ शांतिधारा॥ धनदाह्वानम्॥ ७॥

॥ पूर्वोत्तरस्यां दिशि ॥

स्रग्धरा:-भांकारस्फारभेरीसमदलनिनदं पांडुरांगं गवींद्रं।
पार्वत्यामाधिरूढः शशिकरधवलः सर्वभूषाभिरामः॥
श्रीकंठः कालकंठो विमलविधुकलालोलमौली कपर्दी।
शूली व्याहूयतेऽसौ धनदसुरदिशोरंतरोर्वीं वनेतुं॥

ॐ आँ क्रों ऱ्हीं शुभ्रवर्ण प्रशस्तसर्वलक्षणसंपूर्ण स्वायुधवाहन-वधूचिन्हसपरिवार हे ईशानदेव अत्रागच्छागच्छ संवौषट् स्वाहा। ॐ आँ० अत्र तिष्ठ २ ठठ स्वाहा। ॐ आँ० अत्र मम सन्निहितो भव २ वषट् स्वाहा। आह्वानस्थापनसन्निधीकरणम्॥

॥ अथ बलिः ॥

ॐ ईशानाय स्वाहा। ईशानपरिजनाय स्वाहा। ईशानानुचराय स्वाहा। ईशानमहत्तराय स्वाहा। अग्नये स्वाहा। अनिलाय स्वाहा। वरुणाय स्वाहा। प्रजापतये स्वाहा। ॐ स्वाहा। भूः स्वाहा। भुवः स्वाहा। स्वः स्वाहा। ॐ भूर्भुवः स्वः स्वाहा। स्वधा स्वाहा॥ हे ईशानदेव स्वगुणपरिवारपरिवृत इदमर्घ्यमित्यादि॥ यस्यार्थं क्रियते०॥ शांतिधारा॥
ईशानाह्वानम्॥ ८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अधरस्यां दिशि

स्रग्धरा:-आशामातंगकुंभस्थलकठिनमहाकच्छपं धूपधूम्रं ।
पद्मावत्या सहोढो जलधरपटलश्यामलं कोमलांगं ॥
रक्षत्वक्षूणलक्ष्म्या हरिहरहरितोरंतराले मखोर्वीं।
भास्वत्सस्वस्तिकांको मुकुटतटमणिद्योतिताशः फणीशः ॥ ९ ॥

ॐ आँ क्रों ह्रीं धवलवर्ण प्रशस्तसर्वलक्षणसंपूर्ण स्वायुधवाहन-वधूचिन्हसपरिवार हे धरणींद्र अत्रागच्छागच्छ संवौषट् स्वाहा । ॐ आँ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ आँ० अत्र मम सन्निहितो भव २ वषट् स्वाहा आह्वानस्थापनसन्निधीकरणम् ॥

॥ अथ बलिः ॥

ॐ धरणींद्राय स्वाहा । धरणींद्रपरिजनाय स्वाहा । धरणींद्रानुचराय स्वाहा । धरणींद्रमहत्तराय स्वाहा। अग्नये स्वाहा॥ अनिलाय स्वाहा । वरुणाय स्वाहा । प्रजापतये स्वाहा । ॐ स्वाहा भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । ॐ भूर्भुवः स्वःस्वाहा । स्वधा स्वाहा ॥ हे धरणींद्रदेव स्वगुणपरिवारपरिवृत इदमर्घ्य-मित्यादि यस्यार्थं० शांतिधारा ॥ धरणींद्राह्वानम् ॥ ९ ॥

॥ ऊर्ध्वायां दिशि ॥

स्रग्धरा०उद्यत्तिग्मांशुभिः सुस्फुरितनिजजटाच्छादितस्कंधगौरं ।
बालेंदुस्पर्द्धिदंष्ट्रांकुरकलितमहाभीष्मवक्त्रं मृगेंद्रं ॥
रोहिण्यामाधिरूढं भगवदभिषवक्षीरगौरांशुभिश्च ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चाये लक्षांकितांगं निऋतवरुणयोरंतरे कुंतहस्तं ॥१०॥

ॐ आँ क्रों ह्रीं शुभ्रवर्ण प्रशस्तसर्वलक्षणसंपूर्ण स्वायुधवाहनवधूचिन्हसपरिवार हे सोमदेव अत्रागच्छागच्छ संवौषट् स्वाहा । ॐ आँ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ आँ० अत्र मम सन्निहितो भव २ वषट् स्वाहा । आह्वानस्थापनसन्निधीकरणम् ॥

॥ अथ बलिः ॥

ॐ सोमाय स्वाहा । सोमपरिजनाय स्वाहा । सोमानुचराय स्वाहा । सोममहत्तराय स्वाहा । अग्नये स्वाहा । अनिलाय स्वाहा । वरुणाय स्वाहा । प्रजापतये स्वाहा । ॐ स्वाहा । भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । ॐ भूर्भुवः स्वः स्वाहा । स्वधा स्वाहा ॥ हे सोमदेव स्वगुणपरिवारपरिवृत्त इदमर्घ्यमित्यादि ॥ यस्यार्थं० ॥ शांतिधारा ॥ सोमाह्वानम् ॥ १० ॥

॥ अथ दिक्कन्यकाह्वाहनम् ॥

मालिनी०स्फुरिततरतनुश्रीन्हीलसद्धृत्युपेताः ।
द्युतिमतिविजयासत्कीर्त्तिलक्ष्मीश्च पश्चात् ॥
विधृतविविधभूपाविद्युदुद्योतदेहा ।
जिनपतिसवनेऽस्मिन् व्याह्वये दिक्षुरंभ्रे ॥ १ ॥

ॐ न्हीं क्रों प्रशस्तवर्णसर्वलक्षणसंपूर्णयानायुधयुवतिजनपरिवृता हे श्रीन्हीधृतिद्युतिमतिविजयाकीर्त्तिबुद्धिलक्ष्म्यश्च पश्चाद्दिक्कन्यका अत्रागच्छतागच्छत संवौषट् स्वाहा । ॐ० अत्र तिष्ठत २ ठठ स्वाहा ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

5000

ॐ ० अत्र मम सन्निहिता भवत २ वषट् स्वाहा । आह्वानस्थापन सन्निधीकरणम् ॥

॥ अथ बलिः ॥

ॐ दिक्कन्यकाभ्यः स्वाहा । दिक्कन्यकापरिजनेभ्यः स्वाहा । दिक्कन्यकानुचरेभ्यः स्वाहा । दिक्कन्यकामहत्तरेभ्यः स्वाहा । अग्नये स्वाहा । अनिलाय स्वाहा । वरुणाय स्वाहा । प्रजापतये स्वाहा । ॐ स्वाहा । भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । ॐ भूर्भुवः स्वः स्वाहा ॥ हे दिक्कन्यकाः स्वगुणपरिवारपरिवृता इदमर्घ्यमित्यादि ॥ यस्यार्थं० ॥ शांतिधारा ॥ इति दिक्कन्यकाह्वानम् ॥

॥ अथ इंद्रादिसर्वदेवताह्वानम् ॥

स्रग्धरा० आयात यूयमेतेऽप्यमरपरिवृढाः प्राप्तसन्मानदानाः ।
स्थाने स्वामित् समाध्वं प्रमुदितमनसो लब्धलक्ष्माधिकाराः ॥
निघ्नंतो विघ्नवर्गं परजनसहिता यागभूमिं समंतात् ।
दिक्पालाः पालयध्वं विधिरभिषवणे वर्धतां वर्धमानाः ॥ १ ॥

ॐ ह्रीं क्रों. प्रशस्तवर्णसर्वलक्षणसंपूर्णस्वायुधवाहनवधुचिन्हसपरिवारा हे इंद्रादयः सर्वे देवता इदं जलादिकमर्चनं गृण्हीध्वं २ ॐ भूर्भुवः स्वः स्वाहा । स्वधा । इंद्रादिसर्वदेवताभ्यः पूर्णार्घ्यं ॥ इति इंद्रादि सर्वदेवताह्वानं ॥

अनु० इत्येवं लोकपाला ये समाहूता मयाऽधुना ।
सज्जासनेषु ते सर्वे सम्यक् तिष्ठंतु सादराः ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विघ्नान् निघ्नंतु निःशेषान् साह्यास्ते संतु ते मम ।
सप्तधान्यैः पयःकुंडे दधे पूर्णाहुतिं पुनः ॥ २ ॥

(येथें या मंत्रानें जलकुंडांत सप्तधान्यांनीं पूर्णाहुति करणें)

॥ अथ चतुर्णिकायामरेंद्राह्वानम् ॥[1]

स्रग्धरा—संतस्ते मे भवंतो भवनजविबुधा व्यंतराः स्वर्गवासा ।
ज्योतिष्काः स्वस्वदेवीपरिजनविभवाश्चिन्हवाहायुधाढ्याः ॥
संभूतायांतु सर्वे जिनपतिसवने भक्तितः कर्तुकामाः ॥
पुण्यं पुण्यानुबंधिप्रथितगुणगणालंकृताः सेव्यभव्याः ॥ १ ॥

ॐ आँ क्रों ह्रीं प्रशस्तवर्णसर्वलक्षणसंपूर्णस्वायुधवाहनवधूचिन्हसपरिवारा हे चतुर्णिकायामरेंद्राः अत्रागच्छतागच्छत संवौषट् स्वाहा । ॐ आँ० अत्र तिष्ठत २ ठठ स्वाहा । ॐ आँ० अत्र मम सन्निहिता भवत २ वषट् स्वाहा ॥ आह्वानस्थापनसन्निधीकरणम् ॥

॥ अथ बलिः ॥

ॐ चतुर्णिकायामरेंद्रेभ्यः स्वाहा ॥ तत्परिजनेभ्यः स्वाहा ॥ तदनुचरेभ्यः स्वाहा ॥ तन्महत्तरेभ्यः स्वाहा । अग्नये स्वाहा । अनिलाय स्वाहा । वरुणाय स्वाहा । प्रजापतये स्वाहा । ॐ स्वाहा भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । ॐ भूर्भुवः स्वः स्वाहा । स्वधा स्वाहा ॥ हे चतुर्णिकायामरेंद्राः स्वगुणपरिवारपरिवृता इदमर्घ्यमित्यादि ॥ यस्यार्थं० ॥ शांतिधारा ॥ इति चतुर्णिकायामरेंद्राह्वानम् ॥ इति महाभिषेकविधानं समाप्तं ॥

१ ही पूजा पान ९१ वरील दिक्कन्यकाह्वानानंतर ताबडतोब घ्यावी.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ अक्षरमालागद्यम् ॥

शार्दूल- प्रत्येकाक्षरभेदभिन्ननिरतीचारप्रमाणोदितं ।
स्याद्वादांबुधिचंद्रमा इति जिनेशानां चतुर्विंशतिं ॥
आनम्याक्षरमालिकाप्रतिमहाबंधुप्रबंधं सदा ।
बंधं बंधुरबंधवर्णनिकरैः प्रीत्यै करोमि क्रमात् ॥ १ ॥

राग रगळी-अमरनरपतिसमितिकृतपादपीठाय ।
आदित्यकोटिरुचिवृषभजिनराजाय ॥ १ ॥
इतिहासभासिबहुजयरत्नकोशाय ।
ईश्वरश्रीगणभृदाजितपरमेशाय ॥ २ ॥
उदधिसमधैर्याय बंधुरनिवासाय ।
ऊर्जितज्ञानपतिशंभवजिनेशाय ॥ ३ ॥
ऋद्धिडादिगणभरणनमितपदमहिताय ।
ॠविहितनुतिलसदभिनंदनजिनेशाय ॥ ४ ॥
ऌस्तुतिक्रमकरणपरमगुरुनाथाय ।
ॡपूजितप्रमदसुमतियतिनाथाय ॥ ५ ॥
एकांतवादिमदकुंजरमृगेशाय ।
ऐश्वर्यबोधनिधिपद्मप्रभेशाय ॥ ६ ॥
ओरच्चितचरणवरसुपार्श्वनाथाय ।
औचिकारविहितमहामतिसुपार्श्वाय ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अंरूपपरिपूर्णजगदैकनाथाय ।
अः श्ववत्यक्तमदश्रीचंद्रनाथाय ॥ ८ ॥

करुणारससारकृतमत्यनंताय ।
खलकर्मनिरुहपटुपुष्पदंताख्याय ॥ ९ ॥

गजवैरिविष्टराधिपभूतलेशाय ।
घद्विरदहरिराजसमशीतलेशाय ॥ १० ॥

ङप्रस्तुतत्रिकरणभद्राय ।
चरणप्रणीतात्मश्रेयोजिनेंद्राय ॥ ११ ॥

छत्रत्रयालंकृतश्रेयोराज्याय ।
जन्मादिभीतिविरहितवासुपूज्याय ॥ १२ ॥

झटितिनिश्चयितार्थसुज्ञानविमलाय ।
ञप्रक्षयीभूतकीर्तिधरविमलाय ॥ १३ ॥

टक्यादिकीर्तिपरिपूर्णजगदंताय ।
ठप्रमुखनरहितनुतिलसदनंताय ॥ १४ ॥

डमुरासनायोगजितकर्मधर्माय ।
ढक्कादिवाद्यरवमहिताजिनधर्माय ॥ १५ ॥

णहधातुवाच्यविरहितशांतिनाथाय ।
तत्वविद्यामृतोदाधिशांतिनाथाय ॥ १६ ॥

थत्यागनिर्मलीकृतकुंथुनाथाय ।
दर्शनादित्रयोर्जितकुंथुनाथाय ॥ १७ ॥

धनदविरचितसमवसरणत्ररनःथाय ।
नलिनरुचिपदविमलाऽरजिननाथाय ॥ १८ ॥

परमपदसुखमयमुदमल्लिनाथाय ।
फणिपतिकृतेज्याधिपंतिमल्लिनाथाय ॥ १९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ अक्षरमालागद्यम् ॥

शार्दूल- प्रत्येकाक्षरभेदाभिन्ननिरतीचारप्रमाणोदितं ।
स्याद्वादांबुधिचंद्रमा इति जिनेशानां चतुर्विंशतिं ॥
आनम्याक्षरमालिकाप्रतिमहाबंधुप्रबंधं सदा ।
बंधं बंधुरबंधवर्णनिकरैः प्रीत्यै करोमि क्रमात् ॥ १ ॥

राग रगळी-अमरनरपतिसमितिकृतपादपीठाय ।
आदित्यकोटिरुचिवृषभजिनराजाय ॥ १ ॥
इतिहासभासिबहुजयरत्नकोशाय ।
ईश्वरश्रीगणभृदाजितपरमेशाय ॥ २ ॥
उदधिसमधैर्याय बंधुरनिवासाय ।
ऊर्जितज्ञानपतिशंभवजिनेशाय ॥ ३ ॥
ऋद्धिडादिगणभरणनमितपदमहिताय ।
ॠविहितनुतिलसदभिनंदनजिनेशाय ॥ ४ ॥
ऌस्तुतिक्रमकरणपरमगुरुनाथाय ।
ॡपूजितप्रमदसुमतियतिनाथाय ॥ ५ ॥
एकांतवादिमदकुंजरमृगेशाय ।
ऐश्वर्यबोधनिधिपद्मप्रभेशाय ॥ ६ ॥
ओरचितचरणवरसुपार्श्वनाथाय ।
औविकारविहितमहामतिसुपार्श्वाय ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अंरूपपरिपूर्णजगदैकनाथाय ।
अः अवत्यक्तमदश्रीचंद्रनाथाय ॥ ८ ॥
करुणारससारकृतमत्यनंताय ।
खलकर्मनिरुहपटुपुष्पदंताख्याय ॥ ९ ॥
गजवैरिविष्टराधिपभूतलेशाय ।
घद्विरदहरिराजसमशीतलेशाय ॥ १० ॥
ङप्रस्तुतत्रिकरणभद्राय ।
चरणप्रणीतात्मश्रेयोजिनेंद्राय ॥ ११ ॥
छत्रत्रयालंकृतश्रेयोराज्याय ।
जन्मादिभीतिविरहितवासुपूज्याय ॥ १२ ॥
झटितिनिश्चयितार्थसुज्ञानविमलाय ।
ञप्रक्षयीभूतकीर्तिधरविमलाय ॥ १३ ॥
टक्यादिकीर्तिपरिपूर्णजगदंताय ।
ठप्रमुखनराहितनुतिलसदनंताय ॥ १४ ॥
डमुरासनायोगजितकर्मधर्माय ।
ढक्कादिवाद्यरवमाहिताजिनधर्माय ॥ १५ ॥
णहधातुवाच्यविराहितशांतिनाथाय ।
तत्वविद्यामृतोदाधिशांतिनाथाय ॥ १६ ॥
थत्यागनिर्मलीकृतकुंथुनाथाय ।
दर्शनादित्रयोर्जितकुंथुनाथाय ॥ १७ ॥
धनदविरचितसमवसरणवरनःथाय ।
नलिनरुचिपदविमलाऽरजिननाथाय ॥ १८ ॥
परमपदसुखमयमुदमल्लिनाथाय ।
फणिपतिकृतेज्याधिपतिमल्लिनाथाय ॥ १९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वस्वादिविशदमरकीर्तिपरमेशाय ।
भवभारभीतिहरमुनिसुव्रतेशाय ॥ २० ॥

महनीयगुणनिवहभूषनमिनाथाय ।
यमनियमपरिकलितहृदयनमिनाथाय ॥ २१ ॥

रजतगिरिहरहसीतासितकीर्तिनाथाय ।
ललितगुणगणजलधिविधिनेमिनाथाय ॥ २२ ॥

वसुधाधिपतिकोटिनुतपार्श्वनाथाय ॥
शतपत्रपीठरंजितपार्श्वनाथाय ॥ २३ ॥

षड्दर्शनस्तोत्रशतवर्धमानाय ।
सप्तभंगीमहोदयवर्धमानाय ॥ २४ ॥

हरिहराहिरण्यगर्भस्तोत्रपात्राय ।
दक्षिणाधिपतिविमलबोधवरनेत्राय ॥ २५ ॥

जातात्मने नमः । पूतात्मने नमः । शुद्धात्मने नमः । बुद्धात्मने नमः ॥

इत्यक्षरमालागद्यं समाप्तम् ॥

॥ अथ सकलीकरणम् ॥

अनु० स्वयंभुवं महादेवं ब्रह्माणं पुरुषोत्तमम् ।
जिनेंद्रचंद्रमानम्य वक्ष्ये देवार्चनक्रमम् ॥ १ ॥

इंद्रश्चैत्यालयं गत्वादीक्ष्य यज्ञांगसज्जनः ।
यागमंडलपूजार्थं परिकर्माचरेदिदम् ॥ २ ॥

स्नानानुस्नानभागंतधौतवस्त्रो रहः स्थितः ।
कृतेर्यापथसंशुद्धिः पर्यंकस्थोऽमृतोक्षितः ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दहनप्लावने कृत्वा दिव्यस्वांगेषु दीक्ष्य च।
न्यस्य पंचनमस्कारान्प्रयुक्तगुरुमुद्रिकः ॥ ३ ॥

व्युत्सृज्यांगं पूरकेण व्याप्ताशेषजगत्रयम्।
शुद्धस्फटिकसंकाशं प्रातिहार्यादिभूषितम् ॥ ४ ॥

पादांतननमाद्विश्वं स्फूर्जंतं ज्ञानतेजसा।
परमात्मानमात्मानं ध्यायं जप्त्वाऽपराजितं ॥ ५ ॥

परिणामविशुद्ध्यास्तपापौघः पुण्यपुंजभाक्।
ध्वस्तापायचयः कुर्याज्जिनयज्ञांगसंविधीन् ॥ ६ ॥



झं ठं स्वरावृतं तोयमंडलद्वयवेष्टितं।
तोये न्यस्याग्रतर्जन्या तेनानुस्नानमावहेत् ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्धचंद्रघटीरूपं पंचपत्रांबुजाननं ।
नांतलांतात्तदिक्कोणं धवलं जलमंडलं ॥ २ ॥

ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय २ सं २ क्लीं २ ब्लूं २ द्रां २ द्रीं २ द्रावय २ हं झं क्ष्वीं क्ष्वीं हं सः स्वाहा । इत्यमृतस्नानमंत्रः । अनुस्नानम् ॥

[येथें मागील पानावर काढलेलें यंत्र,एका तबकांत काढून पाण्यांत ठेऊन, तेंच पाणी तर्जनी बोटानें घेउन, हा वरील मंत्र म्हणत माथ्यावर शिंपून घेणें.]

अनु० पृथग्विद्धैकवाक्यांतमुक्तोच्छ्वासं जपेन्नव ।
वारान् गाथान् प्रतिक्रम्य निषिद्यालोचयेत्तथा ॥ १ ॥

पडिक्कमामि भंते ईरियावहियाए विराहणाए अणागुत्ते अइगमणे णिग्गमणे ठाणे गमणे चक्कमणे पाणुग्गमणे बीउग्गमणे हरिउग्गमणे उच्चारपस्सवणखेलसिंहाणयवियाडिपइट्ठावणियाए जे जीवा एइंदिया वा बीइंदिया वा तिइंदिया वा च उदरिंदिया वा पंचेंदिया वा णोल्लिदा वा पिल्लिदा वा संघट्टिदा वा संघादिदा वा उद्दाविदा वा परिदाविदा वा किरिंछिदा वा लेस्सिदा वा छिंदिदा वा भिंदिदा वा ठाणदो वा ठाणचक्कमणदो वा तस्स उत्तरगुणं तस्स पायछित्तकरणं तस्स विसोहीकरणं णमोकारं करेमि तावकायं पावकम्मं दुच्चरियं वोसरामि । ॐ णमो अरिहंताणं । णमो सिद्धाणं । णमो आइरियाणं । णमो उवज्झायाणं । णमो लोए सव्वसाहूणं ॥

(येथें या मंत्राचा नऊवेळां जप करणें.)

ॐ नमः परमात्मने नमोऽनेकांताय शांतये ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वसंत० ईर्यापथे प्रचलताद्य मया प्रमादा- ।
देकेंद्रियप्रमुखजीवनिकायबाधाः ॥
निर्वर्तिता यदि भवेदयुगांतरेक्षा ।
मिथ्या तदस्तु दुरितं गुरुभक्तितो मे ॥ १ ॥

इच्छामि भंते ॥ इरियावहियस्समालोचेउं पुव्वुत्तरदक्खिणपच्छिम-चउदिस विदिसासु विहरमाणेणं जुगंतरादिट्ठिणा भव्वेण दट्ठव्वा दवदव-चरियाए पमाददोसेण पाणभूदजीवसत्ताणं एदेसिं उवघादो कदो वा कारिदो वा किरंतो वा समणुमण्णिदो तस्स मिच्छा मे दुक्कडं ॥

शार्दूल--पापिष्ठेन दुरात्मना जडधिया मायाविना लोभिना ।
रागद्वेषमलीमसेन मनसा दुष्कर्म यन्निर्मितं ॥
त्रैलोक्याधिपते जिनेंद्र भवतः श्रीपादमूलेऽधुना ।
निंदापूर्वमहं जहामि सततं [1]निर्वर्तये कर्मणाम् ॥

ईर्यापथिशोधनम् गुरुमुद्राग्रे भूः झं वं ह्वः पोहोभ्योऽमृतैः स्वकीयप्रवहद्भिः सिच्यमानं स्वं ध्यायन्मंत्रमिमं पठेत् । ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय २ सं २ क्लीं २ ब्लूं २ द्रां २ द्रीं २ द्रावय २ हं झं झ्वीं क्ष्वीं हं सः स्वाहा ।

(हा मंत्र अमृतस्नानाचा आहे असें जाणावें.)

ततः परमेष्ठिमुद्राग्रे असिआउसायुतानि तदुपरि झं वं ह्वः पः हः इत्य-मृतबीजानि निक्षिप्य । तन्मुद्राग्रं शिरस्यधोमुखमुद्धृत्यामृतस्नानम् ॥
(येथें करंगळी आदिकरून पांची बोटावर अ सि आ उ सा या

१ वर्वर्तिषु सत्पथे ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अक्षरासह झं वं ह्वः पः हः ह्रीं बीजाक्षरें लिहून पंचगुरुमुद्रा करणें. व त्या मुद्रेचें तोंड माथ्यावर खालीं करून धरणें आणि वरील अमृतस्नान मं-त्राने अमृतस्नान करणें.)

अनु० अग्निमंडलमध्यस्थरेफैर्ज्वालाशतांकुरैः ।
सर्वांगदेशगैर्विश्वग्धूयमानैर्नभस्वता ॥

ॐ ह्रीं नमोऽर्हते भगवते जिनभास्करस्य बोधसहस्रकिरणैर्मम कर्मेंधनद्रव्यं शोषयामि घे २ स्वाहा । द्रव्यशोपणम् ॥

अनु० स्वास्तिकाग्रत्रिकोणांतर्गतरेफं शिखावृतं ।
अग्निमंडलमोंकारं गर्भरक्ताभमास्थितम् ॥ २ ॥

सप्तधातुमयं देहं देहेंद्रं प्रार्चिषां चयैः ।
सर्वांगदेशगैर्विश्वग्धूयमानैर्नभस्वता ॥ ३ ॥

ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः ॐ ४ रं ४ ह्म्ल्व्र्यूं जं २ सं २ दह २ विकर्ममलं दह २ दुःखं दह २ हूं फट् घे २ स्वाहा । इत्यु-च्चार्य कर्मेंधनानि स्मरेत् । दहनम् ॥

अनु० नाभिस्तु सुस्वरद्व्यष्टपत्राब्जांतरमर्हतः ।
दहेद्दीपौघरुद्यद्भिरष्टकर्ममयं वपुः ॥ ४ ॥

वृत्तात्सबिंदुदिकोणस्वायाद्व्योमूत्रिकाकृतेः ।
कृष्णाद्वायुपुराद्वातैः प्रेरयेद्भस्मवायुभिः ॥५॥
व्योमव्यापिघनासारैः स्वामाप्लाव्यामृतस्रुतं ।
स्वे स्वं ध्यायन्सृजेदेवममृतैरन्यादिंदुवत् ॥ ६ ॥

---

१ ज्जातैः इत्यपि पाठः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१ अग्निमंडल



२ अग्निमंडल

नाभिमंडल



ॐ ह्रीं अर्हं श्रीजिन प्रभंजनाय कर्मभस्मविधूननं कुरु २ स्वाहा। इत्युच्चार्य तस्मान्नित्यमात्मनि स्मरेत् ॥ प्लावनं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वायु मंडल



वरुण मंडल



आकाश मंडल

(ह्रीं अग्निमंडलादि पांच यंत्रे, फक्त स्मरणांत आणून कांहीं वेळ ध्यान करणें)

चंद्रप्रभाऽनाहतयंत्रम्

पद्मप्रभाऽनाहतयंत्रम्

अथ
हस्तसंघटनम्

अनु:०—करमध्ये लिखेद्यंत्रं
काश्मीरादिसुमिश्रितैः ।
र वि सो म स मु द्रा यं
तन्मध्ये च स्वनाहतं ॥
वेष्टयार्धं सस्वरादिकं ॥

[ह्या दोन्हीं यंत्रापैकीं चंद्र उजव्या हातांत व सूर्य डाव्या हातांत लिहणें]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनु०--हस्तद्वयकनीयस्याद्यंगुलीनां यथाक्रमम् ।
मूलरेखात्रयस्योर्ध्वमग्रे च युगपत्सुधीः ॥ १ ॥

न्यस्योंन्हामादिहोम्नाढ्यान् नमस्कारान् करौ मिथः ।
संयोज्यांगुष्ठयुग्मेन व्यस्तान् स्वांगेषु विन्यसेत् ॥ २ ॥

ॐ न्हीं अर्हं वं मं हं सं तं पं असिआउसा हस्तसंघटनं करोमि स्वाहा । [1]हस्तसंघटनम् ॥

(येथें यंत्र काढलेल्या दोनी हातांच्या किरंगळी आदिकरून पांच बोटांच्या मुळापासून तीन रेघेवर व शेंड्यावर क्रमानें ॐ न्हाँ णमो अरहंताणं स्वाहा, ॐ न्हीं णमो सिद्धाणं स्वाहा, ॐ न्हूं णमो आइरियाणं स्वाहा, ॐ न्हौं णमो उज्वझायाणं स्वाहा, ॐ न्हः णमो लोएसव्वसाहूणं स्वाहा, (हे नमस्कारमंत्र लिहून या वरील मंत्रानें हात जोडणें.)

॥ अथ करन्यासः ॥

अनुः०—हृदि न्यसेन्नमस्कारमोंन्हाँपूर्वकमर्हताम् ।
पूर्वे शिरसि सिद्धानामोंन्हीं पूर्वां नमस्कृतिम् ॥ १ ॥
ॐ न्हूँ पूर्वकमाचार्यस्तोत्रं शीर्षस्य दक्षिणे ।
ॐ न्हौं पूर्वमुपाध्यायस्तवं पश्चिमदेशतः ॥ २ ॥
ॐ न्हः पूर्वां ततो वामे सर्वसाधुनमस्कृतिं ।
न्यसेत्पंचाप्यमूनमंत्रान् शिरस्येवं पुनः सुधीः ॥ ३ ॥

[१ हात जोडणें.]

२ पुढील मंत्रानें सांगितलेल्या स्थानावर जोडलेले हात ठेवणें,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ऱ्हाँ णमो अरहताणं स्वाहा [3]हृदये ।
ॐ ऱ्हीं णमो सिद्धाणं स्वाहा [4]ललाटे ।
ॐ ऱ्हूँ णमो आइरियाणं स्वाहा [5]शिरसो दक्षिणे ।
ॐ ऱ्हौं णमो उवज्झायाणं स्वाहा [6]पश्चिमे ।
ॐ ऱ्हः णमो लोए सव्वसाहूणं स्वाहा [7]वामे ॥

पुनस्तानिमान्मंत्रान् शिरसः प्राग्भागे दक्षिणे पश्चिमे उत्तरे च क्रमेण विन्यसेत् । इति प्रथमांगन्यासः ।

अनु० प्राग्भागे शिरसोमध्ये दक्षिणे पश्चिमे तथा ।
वामे चैतेषु विन्यासक्रमो वारे द्वितीयके ॥ १ ॥

ॐ ऱ्हाँ णमो अरहंताणं स्वाहा [8]शिरमध्यें । ॐ ऱ्हीं णमो सिद्धाणं स्वाहा ललाटे । ॐ ऱ्हूँ आइरियाणं स्वाहा । शिरसो दक्षिणे । ॐ ऱ्हौं णमो उवज्झायाणं स्वाहा पश्चिमे । ॐ ऱ्हः णमो लोए सव्वसाहूणं स्वाहा वामे । पुनरप्यमूनेव मंत्रान् शिरमध्ये तत्पूर्वादिषु च विन्यसेत् ॥ इति द्वितीयांगन्यासः ॥

अनुष्टुभ्० भुजयुग्मे च नाभौ च पार्श्वयुग्मे तृतीयके ।
कवचास्त्रतनुन्यासं कुर्यान्मंत्रेण मंत्रवित् ॥ १ ॥

ॐ ऱ्हाँ णमो अरहंताणं स्वाहा [9]नाभौ । ॐ ऱ्हीं णमो सिद्धाणं स्वाहा [10]नाभेर्दक्षिणे । ॐ ऱ्हूं णमो आइरियाणं स्वाहा [11]नाभेर्वामे । ॐ ऱ्हौं णमो उवज्झायाणं स्वाहा कवचाय हूं [12]दक्षिणभागभुजे । ॐ ऱ्हः णमो लोए सव्वसाहूणं स्वाहा अस्त्राय फट् [13]वामभुजे ॥

---

३ छातीवर, ४ कपाळावर, ५ डोक्याच्या उजव्या बाजूवर, ६ डोक्याच्या मागे ७ डोक्याच्या डाव्या बाजूवर.

८ डोक्याच्या मध्यभागीं, ९ बेंबीवर १० बेंबीच्या उजव्या बाजूवर, ११ डाव्या बाजूवर, १२ उजव्या भुजावर, १३ डाव्या भुजावर.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ णमो अरहंताणं क्ष्म्ल्व्र्यूं मम हृदयं रक्ष २ ह्रां स्वाहा । ॐ णमो सिद्धाणं झ्ल्व्र्यूं मम शिरं रक्ष २ ह्रीं स्वाहा । ॐ णमो आइरियाणं छ्म्ल्व्र्यूं मम शिखां रक्ष रक्ष ह्रूं स्वाहा। ॐ णमो उव-ज्झायाणं म्म्ल्व्र्यूं मम वस्त्राणि वज्रकवचं रक्ष २ ह्रौं स्वाहा ॥ ॐ णमो लोए सव्वसाहूणं ह्म्ल्व्र्यूं मम दुष्टं निवारय २ अस्त्राय फट् ह्रः स्वाहा ॥ इति तृतीयांगन्यासः ॥

॥ अथ अंगन्यासभेदः ॥

अनु० तथा वामप्रदेशिन्यां न्यस्य पंचनमस्कृतिं ।
पूर्वादिदिक्षु रक्षार्थं दशस्वपि निवेशयेत् ॥ १ ॥

अ सि आ उ सा एतानी पंचाक्षराणि तर्जन्यंगुल्यां संस्थाप्य कूट-बीजानि ।

(अ सि आ उ सा हीं पांच बीजाक्षरें डाव्या हाताच्या तर्जनी बोटावर लिहून, तें बोट सरळ करून पुढें सांगितलेल्या मंत्रानें पूर्वादि दाही दिशेस क्रमानें दाखवीत जाणें)

आँ हाँ क्षाँ पूर्वे । ई [1]ह्रीं क्षीं अग्नौ । ऊँ हूँ क्षूँ यमे । ॠँ हें क्षें नैऋते । एँ हैं क्षैं वरुणे । ऐं हों क्षों वायव्ये । ओं हौं क्षौं कुबेरे । औं हं क्षं ईशाने । अं हः क्षः भूतले । अं हीं क्षीं आकाशे ॥ दिशाबंधनम् ॥

अनु०—वर्मितोऽनेन सकलीकरणे तु महामनाः ।
कुर्वन्निष्टानि कर्माणि केनाप्येतानि विन्यसेत् ॥ १ ॥

ॐ नमोऽर्हते सर्वं रक्ष २ हूं फट् स्वाहा । अनेन पुष्पाक्षतं सप्तवारान् प्रजाप्य परिचारकाणां शीर्षेषु क्षिपेत् ॥ इति परि-चारकरक्षः ॥ (येथें " ॐ नमोऽर्हते सर्वं रक्ष २ हूँ फट् स्वाहा "

१ ह्रीं इतियोग्यंभाति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ह्या मंत्रानें अक्षता व फुलें ७ वेळा मंत्रुन, परिचारकाच्या माथ्यावर टाकून परिचारक नेमणें) ॐ हूँ फट् किरीटं घातय २ परविघ्नान् स्फोटय २ सहस्रखंडान् कुरु २ परमुद्रां छिंद २ परमंत्रान् भिंद २ क्षं फट् स्वाहा ॥ अनेन सिद्धार्थानभिमंत्र्य सर्व-विघ्नोपशमनार्थं सर्वदिक्षु क्षिपेत् ॥ इति सकलीकरण विधानम् [येथें ॐ हूँ फट् किरीटं घातय २ इत्यादि मंत्रानें पांढऱ्या मोहऱ्या मंत्रुन सर्व विघ्नें दूर होण्याकरितां दाही दिशेस टाकणें.]

॥ अथ जिनयज्ञविधानम् ॥

आर्या० विदधामि सलिलमलयजकुसुमैः संपूर्णपाणिपात्रेण ।
आह्वाहनस्य करणं स्थितिकरणं सन्निधीकरणं ॥ १ ॥

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं अत्र स्वस्थाने एहि २ संवौषट् नमोऽर्हते स्वाहा । ॐ ऱ्हीं० अत्र स्वस्थाने तिष्ठ २ ठठ नमोऽर्हते स्वाहा । ॐ ऱ्हीं ममात्र सन्निहितो भव २ वषट् नमोऽर्हते स्वाहा ॥ आह्वाहनं स्थापनं सन्निधीकरणम् ॥

इंद्रवज्रा० व्योमापगाद्युत्तमतीर्थवारां । धारा वरांभोजपरागसारा ॥
तीर्थंकराणामियमंघ्रिपीठे । स्वैरं लुठित्वात्रिजगत्पुनातु ॥

ॐ ऱ्हीं श्रीं अर्हं परमब्रह्मणे अनंतानंतज्ञानशक्तये जलं निर्वपामि स्वाहा ॥ १ ॥

काश्मीरकृष्णागरुगंधसार । कर्पूर पौरस्त्यविलेपनेन ॥
निसर्गसौरभ्यगुणोल्वणेन । संचर्चयाम्यंघ्रियुगं जिनानां ॥

ॐ ऱ्हीं श्रीं अर्हं परमब्रम्हणे अनंतानंतज्ञानशक्तये गंधं निर्वपामि स्वाहा ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आमोदमाधुर्यनिदानकुंद । सौंदर्यशुंभत्कल माक्षतानाम् ॥
पुंजैः समक्षैरिव पुण्यपुंजै । र्विभूषयाम्यंघ्रिभुवं विभूनाम् ॥

ॐ ह्रीं० अक्षतान् ॥ ३ ॥

सुजातजातीकुमुदाब्जकुंद । मंदारमल्लीवकुलादिपुष्पैः ॥
मत्तालिमालामुखरैर्जिनेंद्र । पादारविंदद्वयमर्चयामि ॥

ॐ ह्रीं० ॥ पुष्पं ॥ ४ ॥

नानारसैर्व्यंजनदुग्धसर्पिः । पक्वान्नशाल्यन्नदधीक्षुभक्ष्यम् ॥
यथार्हहेमादिसुभाजनस्थं । जिनक्रमाग्रे चरुमर्चयामि ॥

ॐ ह्रीं० ॥ चरुं ॥ ५ ॥

शालिनी० लोकार्चानामर्हतां भूर्भुवःस्व- ।
र्लोकानेकी कुर्वतां ज्ञानधाम्नाम् ॥
दीपव्रातैः प्रोज्वलत्कीलजालैः ।
पादांभोजद्वंद्वमुद्योतयामि ॥

ॐ ह्रीं० ॥ दीपं ॥ ॥ ६ ॥

शालिनी० श्रीखंडादिद्रव्यसंदर्भगर्भै । रुद्यद्धूमामोदितस्वर्ग वर्गैः ।
धूपैः पापव्यापदुच्छेददप्त । मंघ्रीनर्हत्स्वामिनां धूपयामि ॥
ॐ ह्रीं० ॥ धूपं ॥ ७ ॥

इंद्रवज्रा० फलोत्तमैर्दाडिममातुलुंग । नारंगपूगाम्र कपित्थपूर्वैः ॥
हृद्घ्राणनेत्रोत्सवमुद्गिरद्भिः । फलैर्भजेऽर्हत्पदपद्मयुग्मं ॥

ॐ ह्रीं० ॥ फलं ॥ ८ ॥

शालिनी० वार्गंधादिद्रव्यसिद्धार्थदूर्वा । नंद्यावर्तस्वरितकाद्यैरनिंद्यैः ।
हेम्नः पात्रे प्रस्थितैर्विश्वनाथं । प्रत्यानंदादर्घ्यमुत्तारयामि ॥

ॐ ह्रीं० ॥ अर्घ्यं ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनु० ततो जिनेंद्रपादांते वारिधारां निपातये ।
भृंगारनालिकोद्धांतां विनमल्लोकशांतये ॥ शांतिधारा॥ १० ॥

॥ पुष्पांजलिः ॥ ११ ॥

वृषभो वृषलक्ष्मीवानजितो जितदुःकृतः ।
शंभवः संभवत्कीर्तिः साभिनंदोऽभिनंदनः ॥ १ ॥

सुमतिः सुमतिः पद्मप्रभः पद्मप्रभः प्रभुः ।
सुपार्श्वः पार्श्वरोचिष्णुश्चंद्रश्चंद्रप्रभासतः ॥ २ ॥

पुष्पदंतस्तु पुष्पेषुः शीतलः शीतलोदितः ।
श्रेयान् श्रेयासिनां श्रेयान् वासुपूज्यः सुपूजितः ॥ ३ ॥

विमलो विमलोऽनंतज्ञानशक्तिरनंतजित् ॥
धर्मो धर्मोदयो नित्यं शांतिः शांतिक्रियाग्रणिः ॥ ५ ॥

कुंथुः कुंथ्वादिसुदयः सुरप्रीतिररप्रभुः ॥
मल्लिर्मल्लजयो मल्लः सुव्रतो मुनिसुव्रतः ॥ ५ ॥

नमिर्नमत्सुरासारो नेमिर्नेमितपोरथी ।
पार्श्वः पार्श्वस्फुरद्रोचिः सन्मतिः सन्मतिप्रियः ॥ ६ ॥

ऐते तीर्थकृतोऽनंता भूतसद्भाविभिः समा ।
पुष्पांजलिप्रदानेन सत्कृताः संतु शांतये ॥ ७ ॥

पुष्पांजलिः । इति जिनयज्ञ विधानम् ।

॥ अथ अर्हद्भक्तिविधानम् ॥

शार्दूल० यद्गर्भावतरे गृहे जनयितुः प्रागेव शक्राज्ञया ।
षण्मासान्नवचारुरत्नकनकं वित्तेश्वरो वर्षति ।
भात्युर्वीमणिगर्भिणी सुरसरिन्नीरीक्षिता षोडश ।
स्वप्नेक्षामुदितां भजति जननीं श्रीदिक्कुमार्योऽपि तां ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रच्छन्नं जननीमुपास्य शयनादानीय शच्यार्पितं ।
यं नत्वा सचतुर्णिकायविबुधाः श्रीमत्करींद्राश्रितः ॥
सौधर्मोऽकनिवेशितं सुरगिरिं नीत्वाऽभिषिच्यांबुना ।
संयोज्योपचरत्यजस्रमसमैर्भोगैः सभासैः पुनः ॥ २ ॥
किंकुर्वाणसुरेंद्रवृंदविषयानंदाद्विरक्तः स्तुतो ।
यो लौकांतिकनाकिभिः शिबिकया निष्क्रम्य गेहान्महैः ॥
दिव्यैः सिद्धनतीद्धया वनतरुं पूत्वा परं दीक्षया ।
भुंक्ते शुद्धनिजात्मसंविदमृतं स त्वं स्फुरस्येष नः ॥ ३ ॥
सम्यग्दृष्टिकशाक्रशव्रतशुभोत्साहेषु तिष्ठन् क्वचित् ।
धर्मध्यानबलादयत्नगलिता आयुस्त्रयः सप्तमे ॥
दृष्टिघ्ना प्रकृतिः समातपचतुर्जातित्रिनिद्राद्विधा ।
श्वभ्रस्थावरसूक्ष्मतिर्यगुभयोद्योतं कषायाष्टकं ॥ ४ ॥
क्लैब्यं स्त्रैणमथादिमेन नवमे हास्यादिषट्कं वृतं ।
क्षिप्तोदीचपृथक्कृतादि दशमे लोभं कषायांतकं ॥
निद्रां सप्रचलामुपांत्यसमये दृग्विघ्नविघ्नं चतु- ।
र्द्वीपं च क्षिपते परेण चरमे शुक्लेन सोऽर्हन्नसि ॥ ५ ॥
द्रव्यं भावमथादिसूक्ष्ममधियन्नुक्ताविर्तकैः स्फुर- ।
न्नर्थव्यंजनमंगलैरपि पृथक्त्वेनापि संक्रामता ॥
कर्मांशाशनवस्थितेन मनसा प्रौढार्भकोत्साहकौ- ।
त्कंठेन द्रुमिवाणुशं परशुना छिंदन्यतीष्वध्यासि ॥ ६ ॥
क्षुण्णे मोहरिपौ भजन्नुरुयथाख्याताधिराज्यश्रियं ।
शुद्धस्वात्मनि निर्विचारविलसत् पूर्वोदितार्थश्रितः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वच्छंदोच्छलदुज्वलोज्वलचिदानंदैकभावोद्गल-- ।
च्छेषारित्रजवैभवस्फुटमसि त्वं नाथ निर्ग्रंथराट् ॥ ७ ॥

विश्वैश्वर्यविघातिघातिदितजोच्छेदोद्गतानंतदृक्-- ।
संविद्वीर्यसुखात्मिकस्त्रिजगताकीर्णे सदस्यास्थितः ॥

जीवन्मुक्तिमृषींद्रचक्रमहितस्तीर्थं चतुस्त्रिंशता ।
कुर्वाणोऽतिशयैः पुनास्यपि पशून् संप्रातिहार्याष्टकैः ॥ ८ ॥

देवाव्यक्तिविशेषसंव्यवहृते व्यक्तोल्लसल्लांच्छनम् ।
श्रीमत् त्वत्क्रमपद्मयुग्मसततोपास्तौ नियुंक्ते शुभैः ॥

यक्षद्वंद्वमवश्यमेतदुचितैः प्राच्यैरिदानींधनै- ।
र्देवेंद्रैरपिमान्यशैशवमुदोप्येष्यद्भिरीशिष्यासि ॥ ९ ॥

द्वौ गंधौ रसवर्णबंधनवपुः संघातकान् पंचशः ।
षट् षट् संहननाकृतीः सुरगती सस्वानुपूर्व्यामुखे ॥

खव्रज्ये परघातकागुरुलघूछ्वासोपघातायशोऽ- ।
नादेयःशुभसुस्वरस्थिरयुगं स्पर्शाष्टकं निर्मितं ॥ १० ॥

त्र्यंगोपांगमपूर्वदुर्भगयुते प्रत्येकनीचैः कुले ।
वेद्यं चान्यतमं द्विसप्ततिमुपांतेऽमूरयोगक्षणे ॥

आदेयं सनिजानुपूर्विंनृगती पंचाक्षजातिं यशः ।
पर्याप्तित्रसबादराणि सुभगं मर्त्यायुरुच्चैःकुलं ॥ ११ ॥

वेद्येनान्यतरेण तीर्थकृदिमास्त्र्यग्रादशाप्यंतिमे ।
निःकृत्य प्रकृतीरनुत्तमसमुच्छिन्नक्रिया ध्यानतः ॥

यः प्राप्तो जगदग्रमेकसमयेनोर्ध्वंगमात्माष्टभिः ।
सम्यक्त्वादिगुणैर्विभाति स भगवानत्रार्पितो व्याजगात् ॥ १२ ॥

मुक्तिश्रीपरिरंभनिर्भराचिदानंदेन येनोज्झितं ।
देहं द्राक् स्वयमस्थिसंहतिछटिद्दाम्भेव मायामयं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृत्वाग्नींद्रतिरीटपावकयुतैः श्रीचंदनाद्यैर्मुदा ।
संस्कृत्याभ्युपयांति भस्म भुवनाधीशाः स जीयात् प्रभुः ॥१३॥

इत्थं बाह्यमथांतरं जिनपते रूपं शिलादौ शुभे ।
साकारे यदि वा परत्र विधिवत् संस्थाप्य नित्यं महेत् ।
दीर्घं जीवितमुद्भवमर्थममितं संतानमुद्यत्सुखम् ।
व्याप्ताशाधरमश्नुतेऽत्र च यशो दिव्याः श्रियोऽमुत्रतः ॥१४॥

स्रग्धरा- श्रेयोमार्गानभिज्ञानिह भवगहने जाज्वलद्दुःखदाव- ।
स्कंधे चंक्रम्यमानानतिचकितमिमानुद्धरेयं वराकान् ॥
इत्येवार्हत्पदानुग्रहरसविलसद्भावनोपात्तपुण्यान् ।
प्रक्रांतैरेव वाक्यैःशिवपदमुचितैः शास्तियोऽर्हन् नोऽव्यात् ।१५।

॥ इत्यर्हद्भक्तिविधानम् ॥

॥ अथ सिद्धभक्तिविधानम् ॥

स्रग्धरा- प्रक्षीणे मलवर्मणि स्वमहसि स्वात्मप्रकाशात्मके ।
मज्जंतो निरुपाख्यमोहचिदचिन्मोक्षार्थतीर्थक्षिपां ॥
कृत्वानाद्यपि जन्म शांतममृतं साध्याप्यनंताश्रितान् ।
सद्दग्धीनयवृत्तसंयमतपान् सिद्धान् भजेऽर्घ्येण वा ॥ १ ॥

अनेनार्हत्प्रातिमाग्रे सिद्धनाम्ना अर्घ्यं दत्वा भक्त्या स्तुवीत ॥ तथाहि ॥ (येथें श्रीजिनप्रतिमेस एक अर्घ्य देऊन पुढें लिहिल्याप्रमाणें स्तुति करणें) अथार्हत्प्रतिष्ठारंभक्रियायां पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावंदनास्तवसमेतं श्रीमत्सिद्धभक्तिकायोत्सर्गं करोम्यहं । ॐ णमो अरिहंताणं । णमो सिद्धाणं । णमो आइरियाणं । णमो उवाज्झयाणं । णमो लोए सव्वसाहूणं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चत्तारि मंगलं । अरहंता मंगलं । सिध्दा मंगलं । साहू मंगलं । केवलिपण्णत्तं धम्मं मंगलं ॥ चत्तारिलोगुत्तमा । अरहंता लोगुत्तमा । सिध्दा लोगुत्तमा । साहू लोगुत्तमा । केवलिपण्णत्तो धम्मो लोगुत्तमा ॥ चतारि सरणं पव्वज्जामि । अरहंते सरणं पव्वज्जामि । सिध्दे सरणं पव्वज्जामि । साहू सरणं पव्वज्जामि । केवलिपण्णत्तं धम्मं सरणं पव्वज्जामि ॥ अड्ढाइज्जदीव-दोसमुद्देसु । पण्णरसकम्मभूमिसु । जाव अरहंताणं । भय-वंताणं । आदियराणं । तित्थयराणं । जिणाणं । जिणुत्तमाणं । केवलियाणं । सिद्धाणं । बुद्धाणं । परिणिव्वुदाणं । अंतयडाणं पारयडाणं । धम्माइरियाणं । धम्मदेसियाणं । धम्मणायगाणं । धम्मवरचाउरंगचक्कवट्टीणं । देवाहिदेवाणं । णाणाणं । दंसणाणं चरित्ताणं । सदा करेमि किरियम्मं करेमि भंते सामाइयं । सव्वसावज्जजोगं पच्चक्खामि । जावज्जीवं तिविहेण मणसा वयसा कायेण । ण करेमि । ण कारवेमि । अण्णं करंतंपि ण समणुमण्णामि । तस्स भंते अइचारं पडिक्कमामि । णिंदामि अप्पाणं । गरहामि अप्पाणं । जावअरहंताणं । भयवंताणं । पज्जुवासं करेमि तावकायं पावकम्मं दुच्चरियं दुच्चित्तं वोस्सरामि ॥ ॐ णमो अरहंताणं०

[येथें नमोकारमंत्राचा जप ९ । २७ । ५४ । १०८ सवडीनुसार करणें.]

॥ अथ थोस्सामि दंडकं ॥

आर्या:—थोस्सामि हं जिणवरे तित्थयरे केवलीअणंतजिणे ।
णरपवरलोयमहिए विहुयरयमले महप्पण्णे ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लोयसुज्जोययरे धम्म तित्थंकरे जिणे वंदे ।
अरहंते कित्तिस्से चउवीसं चेव केवलिणो ॥ २ ॥

उसहमजियं च वंदे संभवमभिणंदणं च सुमइं च ।
पउमप्पहं सुपासं जिणं च चंदप्पहं वंदे ॥ ३ ॥

सुविहिं च पुप्फयंतं सीयलसेयंसवासुपुज्जं च ।
विमलमणंतं भयवं धंम्मं संतिं च वंदामि ॥ ४ ॥

कुंथुं च जिणवरिंदं अरं मल्लिं मुणिसुव्वयं च णमिं ।
वंदामि अरिट्ठणेमिं तह पासं वड्ढमाणं च ॥ ५ ॥

एवं मए अभित्थुया विहुयरयमला पहीणजरमरणा ।
चउवीसं पि जिणवरा तित्थयरा मे पसीयंतु ॥ ६ ॥

कित्तियवंदियमहिया एदे लोगुत्तमा जिणा सिद्धा ।
आरोग्गणाणलाहं दिंतु समाहिं च मे बोहिं ॥ ७ ॥

चंदेहिं णिम्मलयरा आइच्चेहिं अहियप्पहा सत्ता ।
सायर इव गंभीरा सिद्धा सिद्धिं मम दिसंतु ॥ ८ ॥

णमो अरहंताणं० ॥ (येथें ही पूर्ववत् नमोकारमंत्राचा जप करणें)

स्रग्धरा—

सिद्धानुध्दूतकर्मप्रकृतिसमुदयान्साधितात्मस्वभावान्
वंदे सिद्धिप्रसिध्यै तदनुपमगुणप्रग्रहाकृष्टितुष्टः ।
सिद्धिःस्वात्मोपलाब्धिःप्रगुणगुणगणोच्छादिदोषापहारा- ।
द्योग्योपादानयुक्त्या दृषद इह यथा हेमभावोपलब्धिः ॥ १ ॥

नाभावः सिद्धीरिष्टा न निजगुणहातिस्तत्तपोभिर्न युक्ते-
रस्त्यात्मानादिबद्धः स्वकृतजफलभुक् तत्क्षयान्मोक्षभागी ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ज्ञाता द्रष्टा स्वदेहप्रमितिरुपशमाहारविस्तारधर्मो
ध्रौव्योत्पत्तिव्ययात्मा स्वगुणयुत इतो नान्यथा साध्यसिद्धिः ॥२॥

स त्वंतर्बाह्यहेतुप्रभवविमलसद्दर्शनज्ञानचर्या—
संपद्धेतिप्रघातक्षतदुरिततया व्यंजिताचिंत्यसारैः ।
कैवल्यज्ञानदृष्टिप्रवरसुखमहावीर्यसम्यक्त्वलब्धि—
ज्योतिर्वातायनाद्यैःस्थिरपरमगुणैरद्भुतैर्भासमानः ॥ ३ ॥

जानन्पश्यन्समस्तं सममनुपरतं सम्प्रतृप्यन्वितन्वन्
धुन्वन्ध्वान्तं नितांतं निचितमनुसभं प्रीणयन्नीशभावन् ।
कुर्वन्सर्वप्रजानामपरमभिभवन् ज्योतिरात्मानमात्मा
ह्यात्मन्येवात्मनासौ क्षणमुपजनयन्सत्स्वयम्भूः प्रवृत्तः ॥ ४ ॥

छिंदन्शेषानशेषान्निगलबलकलींस्तैरनंतस्वभावैः
सूक्ष्मत्वाग्र्यावगाहागुरुलघुकगुणैः क्षायिकैः शोभमानः ।
अन्यैश्चान्यव्यपोहप्रवणविषयसंप्राप्तिलब्धिप्रभावै—
रूर्ध्वंव्रज्यस्वभावात्समयमुपगतो धाम्नि संतिष्ठतेऽग्रे ॥ ५ ॥

अन्याकाराप्तिहेतुर्न च भवति परो येन तेनाल्पहीनः
प्रागात्मोपात्तदेहप्रतिकृतिरुचिराकार एव ह्यमूर्तिः ।
क्षुत्तृष्णाश्वासकासज्वरमरणजरानिष्टयोगप्रमोह—
व्यापत्त्याद्युग्रदुःखप्रभवभवहतेः कोऽस्य सौख्यस्य माता ॥ ६ ॥

आत्मोपादानसिद्धं स्वयमतिशयवद्वीतबाधं विशालं
वृद्धिह्रासव्यपेतं विषयविरहितं निष्प्रतिद्वंद्वभावम् ।
अन्यद्रव्यानपेक्षं निरुपममामितं शाश्वतं सर्वकालम्
उत्कृष्टानंतसारं परमसुखमतस्तस्य सिद्धस्य जातम् ॥ ७ ॥

नार्थः क्षुत्तृड्विनाशाद्विविधरसयुतैरन्नपानैरशुच्या--
नास्पृष्टैर्गंधमाल्यैर्न हि मृदुशयनैर्ग्लानिनिद्राद्यभावात् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आतंकार्त्तेरभावे तदुपशमनसद्भेषजानर्थतावद्
दीपानर्थक्यवद्वा व्यपगततिमिरे दृश्यमाने समस्ते ॥ ८ ॥
तादृक्संपत्समेता विविधनयतपःसंयमज्ञानदृष्टि—
चर्यासिद्धाः समंतात्प्रविततयशसो विश्वदेवाधिदेवाः ।
भूताः भव्या भवंतः सकलजगति ये स्तूयमाना विशिष्टै—
स्तान्सर्वान्नौम्यनंतान्निजगमिषुररं तत्स्वरूपं त्रिसंध्यं ॥ ९ ॥

इच्छामि भंते सिद्धभत्तिकाउसग्गो कओ । तस्स आलोचेउं सम्मणाण सम्मदंसण सम्मचरित्तजुत्ताणं अट्ठविहकम्मविप्पमुक्काणं अट्ठगुणसंपण्णाणं उड्ढलोयमत्थयम्मि पइट्ठियाणं तवसिद्धाणं णयसिद्धाणं संजमसिद्धाणं चरित्तसिद्धाणं अदीदाणागदवट्टमाणकालत्तयसिद्धाणं सव्वसिद्धाणं भत्तिए णिच्चकालमच्चेमि पूजेमि वंदामि णमंसामि दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहिमरणं जिणगुणसंपत्ति होउ मज्झं । इति सिद्धभक्तिविधानम् ॥

॥ अथ स्वस्त्ययनविधानम् ॥

शार्दूल- आकृष्टिं सुरसंपदां विदधते मुक्तिश्रियो वश्यता- ।
मुच्चाटं विपदां चतुर्गतिभवां विद्वेषमात्मैनसां ॥
स्तंभं दुर्गमनंप्रति प्रयततो मोहस्य सम्मोहनं ।
पायात्पंचनमस्क्रियाक्षरमयी साऽऽराधना देवता ॥
इत्याशीर्वादः ॥

श्रध्दानबोधनविशुध्दविवर्ध्दमान ।
वृत्तामृतानुभवसंभवसंपदौघाः ॥
स्फूर्जत्तपःस्फुरितलब्धिगणाधिपत्यः ।
स्वस्तीः क्रियासुरसकृत्परमर्षयो नः ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वसंत—

एकांतसंशयतमोऽभिनिवेशमूल । दृग्मोहनिग्रहविकस्वरचित्स्वरूपाः ।
स्याद्वादसंविदमृतप्लवमानभावाः । स्वस्तीः क्रि० ॥ २ ॥
उद्यद्दयारसलिहप्रियपथ्यवाचः । प्रीत्योपयोग्यवग्रहा हतमारदर्पाः ।
मूर्छाछिदो रजनिभोजनवर्जिनश्च । स्वस्तीः० ॥ ३ ॥
सूत्रानुसारिगमना लपनाशनात्म । धर्मांगसंग्रहविसर्गवपुर्मलाच्छाः ।
याथात्म्यदर्शनखलीनाजितेंद्रियाश्च । स्वस्तीः क्रि० ॥ ४ ॥
सामायिकस्तवनवंदनपापनाम । व्याजप्रतिक्रमणकायविसर्जनेषु ।
द्रव्यादिषट्कनिहतात्मसु जागरूकाः । स्वस्तीः क्रि० ॥ ५ ॥
अस्नानभूशयनलोचनचेलतैक । भुक्तिष्वदंतधवने स्थितिभोजनेच ।
शक्ताः परीषहसहाः सहितास्तपोभिः । स्वस्तीः क्रि० ॥ ६ ॥
क्षांत्यार्जवमृदुलसंयमसत्यशौच । त्यागैरकिंचनतया तपसाऽमलेन ।
ब्रह्मव्रतेन च दशात्मवृषेण भांतः । स्वस्तीः क्रि० ॥ ७ ॥
शुध्यष्टकेन विनयांगवचोहृदीर्या— । द्युत्सर्गभैक्षशयनासनगोचरेण ।
रोचिष्णवः सदुपयोगदृढाभियोगाः । स्वतीः क्रि० ॥ ८ ॥
स्वस्त्याः प्रदेशचलपुद्गलपाकदेह । नामोदयात्ततनुवाङ्मनसस्य वीर्य ।
कर्मागमांगमपवर्गाविया कशंतः । स्वतीः क्रि० ॥ ९ ॥
साम्यप्रतिक्रमपरीपरिहारशुद्धो । लोभानुकृष्टिकलुपेऽकलुषे च वृत्ते ।
नित्योद्यता मुहुरधिष्ठितधर्मशुक्लाः । स्वतीः क्रि० ॥ १० ॥
दृग्बोधसंवलितसंज्वलनाः कपाय । तीव्रेतरोदयसमापगमाक्रमांते ।
योगीत्वयोगविगमाश्च रुचिप्रकाराः । स्वतीः क्रि० ॥ ११ ॥
स्वाध्यायदिव्यदृगनित्यपुरःसरानु- । प्रेक्षासमीक्षणवशीकृतचित्तदैत्याः ।
एकत्वतत्वसुतपोधृतभावनेशाः । स्वतीः क्रि० ॥ १२ ॥
जाग्रज्जिनेंद्रसमयाः समशत्रुमित्राः । बुध्यादिलब्धिमहिमानुगृहीतविश्वाः ।
प्रीत्या रसाकुलिनसिंहगजाधिसेव्याः । स्वतीः क्रि० ॥ १३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सूत्रे पुलाकबकुशप्रथिताः कुशीला । निर्ग्रंथनामकलिताः सकलावबोधाः ।
ये स्नातकास्त इह पंचतयाऽप्यसंगाः । स्वतीः क्रि० ॥ १४ ।

येऽत्र क्वचिन्मनुजलोक इहोपसर्ग । संसर्गिणः स्थिरधियोऽनुपसर्गिणो वा ।
शुद्धात्मसंविदमुदारमुदो भजंतः । स्वतीः क्रि० ॥ १५ ॥

इंद्रवज्रा० एवंविधात् स्वस्त्ययनादपास्त । संक्लेशभावोदितशुद्धभावः ॥
जिनाभिषेकादिविधीन् विधत्ते ।यः सोऽश्नुते धर्मयशोऽथ शर्म ॥

स्वस्त्ययनमेतद्विस्तरेण मनःप्रसादेन विधानम् ॥ इति स्वस्त्ययन--विधानम् ॥

॥ अथातोमहर्षिस्तवनपर्युपासनविधानम् ॥

अनुष्टुभ्० वृषं वृषभसेनाद्याः सिंहसेनादयोऽजितम् ।
शंभवं चारुसेनाद्या वज्रनाभिपुरःसराः ॥ १ ॥
कपिध्वजं चामराद्याः सुमतिं पद्मलांछनम् ।
ये वज्रचमराः प्रष्ठाः सुपार्श्वं बलपूर्वकाः ॥ २ ॥
चंद्रप्रभं दत्तमुख्याः पुष्पदंतं समाश्रिताः ।
विदर्भाद्याः शीतलेशमनगाराः पुरोगमाः ॥ ३ ॥
कुंथुप्रधानाः श्रेयांसं धर्माद्या द्वादशं जिनं ।
विमलं मेरुपौरस्त्या जयार्याद्याश्चतुर्दश ॥ ४ ॥
धर्मं त्वरिष्टसेनाद्याः शांतिं चक्रायुधादयः ॥
स्वयंभूप्रमुखाः कुंथुं कुंभार्याद्यास्त्वरप्रभुं ॥ ५ ॥
मल्लिं विशाखप्रमुखाः माल्याद्या मुनिसुव्रतं ।
नमेशं सुप्रभासाद्या वरदत्ताग्रतःसराः ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नेमिं पार्श्वं स्वयंभ्वाद्या गौतमाद्याश्च सन्मतिं ।
तेभ्यो गणधरेशेभ्यो दत्तोऽर्घ्योऽयं पुनातु नः ॥ ७ ॥

ॐ ह्रीं चतुरशीतिलक्षगुणगणधरचरणेभ्योऽर्घ्यं निर्वपामि स्वाहा ॥

ये सन्मतिरिंद्रभूतिर्वायुभूत्यग्निभूतिकौ ।
सुधर्ममौर्यमौढ्याख्याः पुत्रमैत्रेयसंज्ञकाः ॥ ८ ॥

अकंपनो नंदिवेलाख्यः प्रभासश्च गणाधिपाः ।
एकादशधयोगीनां मुन्यादींस्तानुपास्महे ॥

तेभ्यो गणधरे० ॥ ॐ ह्रीं चतुर० अर्घ्यं ॥ ९ ॥

श्रीगौतमसुधर्माह्वजंब्वाख्यान् केवलेक्षणान् ।
श्रुतकेवलिनो विष्णुनंदिमित्रापराजितान् ॥ १० ॥

गोवर्धनं भद्रबाहुं दशपूर्वधरान् पुनः ।
विशाखं प्रौष्ठिलाचार्यं क्षत्रियं जयसाह्वयं ॥ ११ ॥

नागसेनं च सिद्धार्थं धृतिषेणसमाह्वयं ।
विजयं बुद्धिमद्गंगदेवाह्व धर्मसेनकं ॥ १२ ॥

एकादशांगनिष्णातान् नक्षत्रं जयपालकं ।
पांडुं च ध्रुवसेनं च कंसार्यं चाग्रिमांगिनः ॥ १३ ॥

सुभद्रं च यशोभद्रं भद्रबाहुमनुक्रमात् ।
लोहार्यं च यजामोऽत्र जिनसेनादिकानपि ॥ १४ ॥

तेभ्योगणध० ॥ ॐ ह्रीं चतुर० अर्घ्यं ॥

यजेऽर्हद्वलिमुक्तांगपूर्वांशं माघनंदिनम् ।
धरसेनगुरुं पुष्पदंतं भूतबलिं तथा ॥ १५ ॥

जिनचंद्रं कुंदकुंदाचार्योमाख्यातिवाचकौ ।
समंतभद्रस्वाम्यार्यं शिवकोटिं शिवायनं ॥ १६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पूज्यपादं चैलाचार्यं वीरसेनं श्रुतेक्षणं ।
जिनसेनं नेमिचंद्रं रामसेनं सुतार्किकान् ॥ १७ ॥
अकलंकानंतविद्यानंदमाणिक्यनंदिनः ।
प्रभाचंद्रं रामचंद्रं वासवेंदुमवासिनं ॥ १८ ॥
गुणभद्रादिकानन्यानपि श्रुततपःपरान् ।
वीरांगदांतानर्घ्येण सर्वान् संभावयाम्यहं ॥ तेभ्यो गण० ।
ॐ ह्रीं चतु० अर्घ्यं ॥ १९ ॥

स्रग्धरा-निर्ग्रंथाः शुद्धमूलोत्तरगुणमणिभिर्येऽनगारा इतीयुः ।
संज्ञां ब्रह्मादिधर्मैर्वृषयतिचये बुद्धिलब्ध्यादिसिध्यै ॥
श्रेण्योश्चारोहणैर्ये यतय इति समग्रेतराद्यक्षबोधै- ।
र्येमुन्याख्याश्च सर्वे प्रभव इह हि तानर्चयामो मुमुक्षून ॥२०॥

वसंतः-निर्वेगसौष्टवतपश्च पुरात्मबोधान् ।
संविद्धिकस्वरमुदोऽद्भुतदिव्यशक्तीन् ।
बुध्यौषधीन्बलतपोरसविक्रियर्द्धि ।
क्षेत्रक्रियर्द्धिकलितान् स्तुमहे महर्षीन् ॥ २१ ॥

आर्या:-ये केवलावधिमनःपर्ययिनो बीजकोष्ठबुद्धियुजः ।
संभिन्नश्रोतृतया भांतश्च पदानुसारयुताः ॥ २२ ॥
दूरस्पर्शनरसनघ्राणश्रवणावलोकनसमर्थाः ।
सदशचतुर्दशपूर्वाष्टांगमहानिमित्तज्ञाः ॥ २३ ॥
प्रत्येकबुद्धवादीन्प्रज्ञाश्रवणांश्च बुद्धिऋद्धिपतीन् ।
तीव्रतपोऽस्तविपक्षानष्टादशधापि तानीडे ॥ २४ ॥

शालिनी-रोगाः सर्वे विण्मलामर्षजल्ल ।
क्ष्वेलैः सर्वैर्नापि शाम्यंति येषाम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सिद्धा दृष्ट्या स्याद्विषत्वेन ये च ।
त्रायं तानर्चेऽष्टधाप्यौषधीशान् ॥ २५ ॥

शार्दूल:- अध्यायंत्यखिलं श्रुतार्थममलं येंऽतर्मुहूर्तेऽश्रमात् ।
तद्वत्कृत्स्नमधीयते श्रुतमविच्छिन्नं पठंतोऽपि च ।
उच्चैर्यांति न कंठहानिमखिलं लोकं क्षमंतोऽन्यतोऽ– ।
प्यंगुल्या न्यसितुं बलानि बलिनस्त्रेधापि ते संतु नः ॥ २६ ॥

इंद्र०-चरंति घोरं महदुग्रदीप्तं । तप्तं तपो घोरगुणं त्रिगुप्ताः ।
ब्रह्मापि ये घोरपराक्रमाश्च । ते सप्तधाप्युत्तमसा(?)तपंतु ॥ २७ ॥

शार्दूल:-वाग्दृष्टी कुरुतोंऽगिनां लघुविषावेषेण मृत्युं कृताम् ।
यैर्युक्तैर्घृतदुग्धमध्वमृतवद्यत्पाणिपात्रार्पितम् ।
स्याद्दुर्भोजनमप्युदश्विदुदिताद्वाचानुगृण्हंति ये ।
तद्वत्तान् कृपया सदग्निविषघृताद्याश्राविणः स्तौमि तान् ॥ २८ ॥

गीतिः–वंदेऽणिममहिमलघिमगरिमैश्याप्तिवशित्वाप्रतिघातः ।
प्राप्तिप्राकाम्यरूपित्वांतर्धानैश्च विक्रियर्द्धिगतान् ॥ २९ ॥

इंद्र०-न क्षीयते चक्रिबलेऽपि भुंजिते । यद्दत्तशेषं दहतः सुरादयः ।
वसंति ये धाम्नि चतुष्करेऽपि ते । भांतूभयक्षीणमहानुशालयः ॥ ३० ॥

गीतिः–जंघश्रेण्यग्निशिखाजलदलफलपुष्पबीजतंतुगतैः ।
चारणनाम्ना स्वैरं चरतश्च दिवा तु विक्रियर्द्धिगतान् ॥ ३१ ॥

वसंत- इत्यन्यदुद्भवतपोमहिमोदितर्द्धीं ।
नाचार्यपाठकयतीन् जगदेकभर्तॄन् ॥
वंदारुराश्रयति कामपि भावशुद्धिम् ।
क्षिप्रं यया दुरितपाकमपाकरोतु ॥ ३२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति महर्षिस्तवनम् ॥ सिध्दानुत्तरेण पुष्पांजलिं विकीर्य पंचांगप्रणामं कुर्यात् ॥ [येथें पुष्पांजलि करून सिद्धपरमेष्ठीना पंचांगानें नमस्कार करणें. दोन हात दोन गुडघे व मस्तक यांना पंचांग ह्मणतात.]

॥ अथ प्रारंभनिरूपणम् ॥

अनु– ततो गुरुं समाराध्य धर्माचार्यं दयानिधिम् ।
यजमानः सपत्नीकः पंचमौष्टिकमानमन् ॥ १ ॥
तदाशीर्वचनं गृण्हन्नुपविश्य समंततः ।
संबध्य हस्तयुगलं गुरुं विज्ञापयेदिदम् ॥ २ ॥
भगवन्नयमारब्धो जिनेज्याया महाविधिः ।
आयज्ञांतं विधातव्यं कर्तुमर्हसि मे प्रभो ॥ ३ ॥
बालिशोऽहं न जानामि किमत्रोचितमित्यपि ।
तथापि भगवत्साक्षात्प्रसादो मां प्रचोदते ॥ ४ ॥

---

१ पूजा करविणाऱ्या यजमानानें दंपतीसह धर्माचार्य गुरूची पूजा करून पंचांगानें नमोऽस्तु करणें. व त्यापुढें हात जोडून पुढें सांगितल्याप्रमाणें विनयपूर्वक प्रश्न करणें. भो धर्माचार्य, मी मतिमंद आहे. मला कांहींच कळत नाहीं. पण जिनावर भक्ति असल्यामुळें ही महापूजा करण्यास उद्युक्त झालों आहे. तेव्हां पूजा चालविणेस आपणच योग्य आहांत,[असें बोलून स्तब्ध राहणें.] नंतर धर्माचार्यानें त्याजवर कृपाळू होऊंन पुढें सांगितल्याप्रमाणें उपदेश करणें तें असें. भो भव्य, तूं या भवसमुद्रांतून निसटलास. कारण इंद्रसाध्य पूजा करण्यास उद्युक्त झाला आहेस ह्मणून आतां ही पूजा संपेपर्यंत ब्रह्मचर्य व एकभुक्त [एकच वेळ आहार पाणी घेणें] व्रत, घे, श्रावकांची व राजाची मर्यादा राख व त्यांची मदत घे, देव गुरु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति ब्रुवंतमाचार्यो विधेयं यष्टृपुंगवम् ।
अनुगृण्हन् हि कारुण्यवागिति वदतांवर ॥ ५ ॥

भो भव्य भववाराशितटस्ते निकटोऽभवत् ।
शक्रसाध्यो यदारब्धो भवताऽयं जिनक्रतुः ॥ ६ ॥

भद्रं भूयात् सदोदार भवतः शुभचेष्टितः ।
ब्रह्मचर्यं गृहाणेदं सैकभुक्तं प्रयत्नतः ॥ ७ ॥

सधार्मिणां च सन्मानं वशीकारं सधर्मिणां ।
सर्वबंधुषु सत्कारमन्नदानं यथोचितम् ॥ ८ ॥

राजानुमननं देवगुरुभक्तिमतंद्रतः ।
यथावकाशितं शास्त्रश्रवणं ध्यानमात्मनः ॥ ९ ॥

कालोचितविचारं च जिनपूजार्थवस्तुनि ।
परुषोक्तिपरित्यागं कालुष्यं परिवर्जनम् ॥ १० ॥

विधेहि सर्वमेतत्ते श्रेयस्करमथोत्तमम् ।
इत्युक्तसद्व्रतस्कृत्यै तस्य दक्षिणहस्तके ॥ ११ ॥

सौवर्णं राजतं सूत्रं पट्टसूत्रमथापि वा ।
बध्नीयात् [1]कंकणं नानावाद्यघोषे समुद्यते ॥ १२ ॥

शास्त्रावर भक्ति ठेव; शास्त्र ऐकत जा, बांधवांचा आदर कर, अन्नसंतर्पण करीत जा, कोणास कठोर भाषण करूं नकोस, मिळण्याजोगे असतील त्या जिनसा पूजेस आणीत, आणि आत्मध्यान करीत जा, याप्रमाणें अुपदेश करून त्यांच्या उजव्या हातांत कंकण बांधणें, व तसेंच त्यांच्या पत्नीच्या डाव्या हातांत कंकण बांधणें, नंतर त्याच्या मस्तकावर हात ठेवून घराकडे जाणेस सांगणें. यालाच प्रारंभनिरूपण ह्मणतात.

१ कंकण सुवर्णाचें किंवा चांदीचें अथवा सुताचें करणें. परंतु तें कंकण १२ अंगुल लांबीचें व २७ पदराचें असलें पाहिजे. याजविषयीं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तद्व्रतान्याददानाया धर्मपत्न्यास्तदास्य च ।
वामहस्ते दृढमुक्तयज्ञसूत्रं प्रबंधयेत् ॥ १३ ॥
ततोऽपि यजमानस्य प्रमोदवहतः परं ।
मस्तके हस्तमादाय विसृजेत्तं गृहंप्रति ॥ १४ ॥

॥ इति प्रारंभनिरूपणम् ॥

॥ अथ जिनयज्ञदिक्षाविधानम् ॥

अनुष्टुभ्० न्यस्यैवभगवत्पादपीठे दिव्यप्रसाधनं ।
कृत्वेदमादधेऽनादिसिद्धमंत्राभिमंत्रितं ॥ १ ॥

ॐ णमो अरिहंताणं । णमो सिद्धाणं । नमो आइरियाणं । णमो- उवज्झायाणं । णमो लोए सव्वसाहूणं ॥ चत्तारि मंगलं । अरहंता मंगलं । सिद्धा मंगलं । साहू मंगलं । केवलिपण्णत्तो धम्मो मंगलं ॥ चत्तारी लोगुत्तमा । अरहंता लोगुत्तमा ॥ सिद्धा लोगुत्तमा । साहू लोगुत्तमा । केवलीपण्णत्तो धम्मो लोगुत्तमा ॥ चत्तारि सरणं पव्वज्जामि । अरहंते सरणं पव्वज्जामि । सिध्दे सरणं पव्वज्जामि । साहू सरणं पव्वज्जामि ॥ ॐ ह्रौं शांतिं कुरु २ सर्वशांतिं कुरु २ वषट् स्वाहा ॥ अयमनादिसिद्धमंत्रः ॥

(हा अनादिसिध्दमंत्र होय)

असें सांगितलें आहे कीं, (द्वादशांगुलमात्रेण सप्तविंशतितंतुभिः । हरिद्राकल्कमाक्तिं कंकणं व्रतबंधनं ॥) याप्रमाणानें केलेल्या कंकणास हळद लावणें. अशा कंकणास व्रतबंधन कंकण ह्मणतात. हें कंकण वाचें वाजवीत बांधणें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीचंदनाद्यभिमंत्रितं ॥ [गंध, गळ्यांत घालणेची फुलाची माळ, अंतरीय उत्तरीय वस्त्रें, शेंडिच्या गांठीस बांधणेची लहान माळ, मुकुट, कुंडल, यज्ञोपवीत, बाजूबंद, (भुजांचे अलंकार) सुवर्ण कंकण, पोंचे, मुद्रिका, सुवर्णाचा कडादोरा, पैंझण, सुताचें कंकण व मौंजी (तीन पदरानें केलेली दर्भाची दोरी) ह्या सर्व जिनसा एका ताटांत घालून जिनचरणीं ठेवणें व वरील सिद्धमंत्रानें त्या जिनसा मंत्रणें आणि पुढील मंत्रानें त्या जिनसा क्रमानें धारण करीत जाणें]

अनु० **पूज्यपूजावशेषेण गोशीर्षेण हृतालिना ।**
देवाधिदेवसेवायै स्ववपुश्चर्चयेऽमुना ॥ १ ॥

ॐ ऱ्हीं अर्हं सः सर्वकर्मविलेपनरहिताय पवित्रांगाय श्रीचंदनानुलेपनं ॥



[सिद्धमंत्रानें मंत्रलेलें गंध हातांत किंवा एका पानावर घेऊन त्यांत तर्जनीबोटानें (अंगठया जवळच्या बोटानें) अथवा दर्भानें गंधयंत्र लिहून या मंत्रानें तो गंध अंगास लावणें]

अनु०- **जिनांघ्रिस्पर्शमात्रेण त्रैलोक्यानुग्रहक्षमाः ।**
इमाः स्वर्गरमादूतीर्धारयामि वरस्रजः ॥
स्रग्धारणं ॥ २ ॥

(येथें फुलांची माळ गळ्यांत घालणें)

शार्दुल० **शुंभत्पुष्पलतातते शुचिरुची भ्राजिष्णुमैत्रीभरें ।**
सच्छालापतिना गुणैर्नवविसोद्गीर्णैरिवास्यूत्रिते ॥
एकद्रव्यवराहर्दाग्भिरपिचोदृश्ये प्रवेश्ये नव ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

च्छिद्रे नेह महे प्रभोरहमिमे दिव्ये दधे वाससि ॥
देवांगवस्त्रपरिग्रहः ॥ ३ ॥

[येथें अंतरीय (नेसण्याचें वस्त्र) उत्तरीय (पांघरण्याचें वस्त्र) ही २ नवी वस्त्रें धारण करणें]

मुक्ताशेखरपङ्क्त्योनिजकरैराक्रम्य चूलालिकं ।
राज्ञोर्जित्वरवत् क्षमं व्यतिकरं रोध्दुं बलादप्यतोः ॥
स्फूर्जत्कुंडलकर्णपूरग्चितोपांतेंद्रचापश्रिया ।
मूर्ध्ना तन्मुकुटं जितार्यमजयत्त्वर्हत्प्रणामोद्धुरि ॥
शेखरादिविशिष्टमुकुटोपयोगः ॥ ४ ॥

(येथें शेंडीस माळ बांधणें अगर मस्तकावर किरीट घालणें.)

वसंतः--प्रालंबसूत्रजिनसूत्रविराजहारं ।
सद्दर्शनस्फुरितविस्फुरितात्मतेजः ॥
ग्रैवेयकं चरणचारुभजं जिनेज्या ।
सज्जं तनोम्यमलचिद्रुचि यज्ञसूत्रम् ।
प्रालंबसूत्राद्युपेतयज्ञोपवीतादिग्रहणम् ॥ ५ ॥

(येथें यज्ञोपवीत, मोत्याचा हार, कंठी, गोप वगैरे गळ्यांत घालणें.)

आर्या० केयूरांगदकटकैर्दोलास्तंभौ जिनेंद्रमुखलक्ष्म्याः ।
सत्कृत्य भुजौ तद्रसगुन्मुद्रयितुं करेऽर्पये मुद्राम् ॥
केयूरादिभिर्युक्तमुद्रिकास्वीकारः ॥ ६ ॥
(येथें बाजुबंद व मुद्रिका धारण करणें)

गीति० छुरिकाच्छात्रिविच्छुरितं नूपुररुचिचुंबनोत्कदाममुखम् ।
सारसनं बध्वांघ्रि सकनकमुद्रं जिनाध्वरे विदधे ॥
कटिसूत्रादिचरणोर्मिकाधारणं ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(येथें सुवर्णाचा कडदोरा, व कंबरपट्टा कंबरेत घालणें व तसेंच पायांत तोडे व आंगठ्या घालणें.)

मालिनी-इदममलिनसम्यग्दर्शनज्ञानदेश- ।
व्रतमग्रचरितात्मा कर्णिका ब्रम्हचर्यम् ॥
स्फुरदरमुपवासेनाद्यरत्नत्रयं मे- ।
भवतुभगवदर्हद्यज्ञदीक्षाविशिष्टं ॥
अर्हद्देवयज्ञदीक्षांगीकारः ॥ ८ ॥

(येथें पूजकानें पूजेच्या दिवशीं उपवासाचें व ब्रह्मचर्याचें व्रत घेणें.)

शार्दूल०तन्वन् हृद्युपवीतमज्जनरुचिप्रव्यक्तरत्नत्रयम् ।
ख्याताणुव्रतशक्तिपंचवसुवद्धिभ्रत्करे कंकणम् ।
मौंज्यश्रोणियुजा जिनक्रतुमिति ब्रम्हव्रतं द्योतयन् ।
यज्ञेऽस्मिन् खलु दीक्षितोऽहमधुना मान्योऽस्मिशक्रैरपि ॥
दीक्षाचिन्होद्वहनम् ॥ ९ ॥

[येथें कंबरेस दर्भाचा कडदोरा व उजव्या हातास सुताचें कंकण बांधणें.]

ॐ वज्राधिपतये आँ हाँ अः ऐं न्हौं न्हः श्रूं क्षः इंद्राय संवौषट् ॥
अनेनैकविंशतिवारात्मन्यधिवासयेत् ॥ १० ॥

[येथें वरील मंत्र २१ वेळां मनांतल्या मनांत ह्मणणें]

अनुष्टु-विघ्नौघाः प्रलयं यांतु व्याधयो नाशमाप्नुयुः ।
विषंनिर्विषतां यातु स्थावरं जंगमं तथा ॥ ११ ॥
दूरादेव प्रणश्यंतु शाकिनीभूतपन्नगाः ।
लोके हितं द्वये ध्यानादेतस्मादपरं परम् ॥ १२ ॥
ॐ न्हां णमो अरहंताणं अर्हद्भ्यो नमः ।
ॐ न्हीं णमो सिद्धाणं सिद्धेभ्यो नमः ॥
परमात्म ध्यानं ॥ येथें या मंत्रानें परमात्म्याचें ध्यान करणें.

इति यज्ञदीक्षाविधानम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ सहस्रनामपूजा ॥

अनुष्टुभ्० ॐ प्रसिद्धाष्टसहस्रेद्धलक्षणं त्वां गिरांपतिं ।
नाम्नामष्टसहस्रेण तोष्टुमोऽभीष्टसिद्धये ॥ १ ॥

श्रीमान् स्वयंभूर्वृषभः शंभवः शंभुरात्मभूः ।
स्वयंप्रभः प्रभुर्भोक्ता विश्वभूरपुनर्भवः ॥ २ ॥

विश्वात्मा विश्वलोकेशो विश्वतश्चक्षुरक्षरः ।
विश्वविद्विश्वविद्येशो विश्वयोनिरनश्वरः ॥ ३ ॥

विश्वदृश्वा विभुर्धाता विश्वेशो विश्वलोचनः ।
विश्वव्यापी विधिर्वेधाः शाश्वतो विश्वतोमुखः ॥ ४ ॥

विश्वकर्मा जगज्ज्येष्ठो विश्वमूर्तिर्जिनेश्वरः ।
विश्वदृग्विश्वभूतेशो विश्वज्योतिरनीश्वरः ॥ ५ ॥

जिनो जिष्णुरमेयात्मा विश्वरीशो जगत्पतिः ।
अनंतजिदचिंत्यात्मा भव्यबंधुरबंधनः ॥ ६ ॥

युगादि पुरुषोब्रम्हा पंचब्रह्ममयः शिवः ।
परः परतरः सूक्ष्मः परमेष्ठी सनातनः ॥ ७ ॥

स्वयंज्योतिरजोऽजन्मा ब्रम्हयोनिरयोनिजः ।
मोहारिविजयी जेता धर्मचक्री दयाध्वजः ॥ ८ ॥

प्रशांतारिरनंतात्मा योगी योगीश्वरार्चितः ।
ब्रह्मविद् ब्रह्मतत्वज्ञो ब्रह्मोद्याविद्यतीश्वरः ॥ ९ ॥

शुद्धो बुद्धः प्रबुद्धात्मा सिद्धार्थः सिद्धशासनः ।
सिद्धः सिध्दांतविद् ध्येयः सिद्धसाध्यो जगद्धितः ॥ १० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सहिष्णुरच्युतोऽनंतः प्रभविष्णुर्भवोद्भवः ।
प्रभूष्णुरजरोऽजर्यो भ्राजिष्णुर्धीश्वरोऽव्ययः ॥ ११ ॥

विभावसुरसंभूष्णुः स्वयंभूष्णुः पुरातनः ।
परमात्मा परंज्योतिस्त्रिजगत्परमेश्वरः ॥ १२ ॥

इति श्रीमदादिशतम् ॥ १ ॥

उपजाति० सुवारिगंधाक्षतचारुपुष्पैर्नैवेद्यसद्दीपसुधूपवर्गैः ।
फलैर्महार्घ्यैर्जिनपं तु भक्त्या श्रीमच्छतं तत्परिपूजयामि ।

श्रीमदादिशतार्घ्यं ॥ १ ॥

अनुष्टुभ्० दिव्यभाषापतिर्दिव्यः पूतवाक् पूतशासनः ।
पूतात्मा परमज्योतिर्धर्माध्यक्षो दमेश्वरः ॥ १ ॥
श्रीपतिर्भगवानर्हन्नरजा विरजाः शुचिः ।
तीर्थकृत्केवलीशानः पूजार्हः स्नातकोऽमलः ॥ २ ॥
अनंतदीप्तिर्ज्ञानात्मा स्वयंबुद्धः प्रजापतिः ।
मुक्तः शक्तो निराबाधो निष्कलो भुवनेश्वरः ॥ ३ ॥
निरंजनो जगज्ज्योतिर्निरुक्तोक्तिरनामयः
अचलस्थितिरक्षोभ्यः कूटस्थः स्थाणुरक्षयः ॥ ४ ॥
अग्रणीर्ग्रामणीर्नेता प्रणेता न्यायशास्त्रकृत् ।
शास्ता धर्मपतिर्धर्म्यो धर्मात्मा धर्मतीर्थकृत् ॥ ५ ॥
वृषध्वजो वृषाधीशो वृषकेतुर्वृषायुधः ।
वृषो वृषपतिर्भर्त्ता [1]वृषभांको वृषोद्भवः ॥ ६ ॥
हिरण्यनाभिर्भूतात्मा भूतभृद् भूतभावनः ।
प्रभवो विभवो भास्वान् भवो भावो भवांतकः ॥ ७ ॥

---

१ वृषभांको इत्यपि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हिरण्यगर्भः श्रीगर्भः प्रभूतविभवोऽभवः ।
स्वयंप्रभः प्रभूतात्मा भूतनाथो जगत्प्रभुः ॥ ८ ॥

सर्वादिः सर्वदृक् सार्वः सर्वज्ञः सर्वदर्शनः ।
सर्वात्मा सर्वलोकेशः सर्ववित् सर्वलोकजित् ॥ ९ ॥

सुगतिः सुश्रुतः सुश्रुक् सुवाक् सूरिर्बहुश्रुतः ।
विश्रुतो विश्वतःपादो विश्वशीर्षः शुचिश्रवाः ॥ १० ॥

सहस्रशीर्षः क्षेत्रज्ञः सहस्राक्षः सहस्रपात् ।
भूतभव्यभवद्भर्ता विश्वविद्यामहेश्वरः ॥ ११ ॥

इति दिव्यादिशतम् ॥

मालिनी-- विमलजलसुगंधैरक्षतैर्दिव्यपुष्पै- ।
र्वरसुचरुसुदीपैर्धूपनानाफलौघैः ।
विपुलकनकपात्रे स्थापितार्घ्यं यजामो ।
जिनपतिवरदिव्यभाषनाम्नां शतं तत् ॥

इति दिव्यादिशतार्घ्यं ॥२॥

स्थविष्ठः स्थविरो ज्येष्ठः प्रष्ठः प्रेष्ठो वरिष्ठधीः ।
स्थेष्ठो गरिष्ठो बंहिष्ठः श्रेष्ठोऽनिष्ठो गरिष्ठगीः ॥ १ ॥

[1]विश्वभृद् विश्वसृड् विश्वेड् विश्वभुग् विश्वनायकः ।
विश्वाशीर्विश्वरूपात्मा विश्वजिद् विजितांतकः ॥ २ ॥

विभवो विभयो वीरो विशोको विजरोऽजरन् ।
विरागो विरतोऽसंगो विविक्तो वीतमत्सरः ॥ ३ ॥

विनेयजनताबंधुर्विलीनाशेषकल्मषः ।
वियोगो योगविद् विद्वान् विधाता सुविधिः सुधीः ॥ ४ ॥

---

१ विश्वभुद् इत्यपि .

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षांतिभाक् पृथवीमूर्तिः शांतिभाक् सलिलात्मकः ।
वायुमूर्तिरसंगात्मा वन्हिमूर्तिरधर्मधक् ॥ ५ ॥

सुयज्वा यजमानात्मा सुत्वा सुत्रामपूजितः ।
ऋत्विग् यज्ञपतिर्यज्ञो यज्ञांगममृतं हविः ॥ ६ ॥

व्योममूर्तिरमूर्तात्मा निर्लेपो निर्मलोऽचलः ।
सोममूर्तिः सुसौम्यात्मा सूर्यमूर्तिर्महाप्रभः ॥ ७ ॥

मंत्रविन् मंत्रकृन् मंत्री मंत्रमूर्तिरनंतगः ।
स्वतंत्रस्तंत्रकृत् [2]स्वांतः कृतांतांतः कृतांतकृत् ॥ ८ ॥

कृती कृतार्थः सत्कृत्यः कृतकृत्यः कृतक्रतुः ।
नित्यो मृत्युंजयोऽमृत्युरमृतात्माऽमृतोद्भवः ॥ ९ ॥

ब्रह्मनिष्ठः परंब्रह्मा ब्रह्मात्मा ब्रह्मसंभवः ।
महाब्रह्मपतिब्रह्मेड् महाब्रह्मपदेश्वरः ॥ १० ॥

सुप्रसन्नः प्रसन्नात्मा ज्ञानधर्मदमप्रभुः ।
प्रशमात्मा प्रशांतात्मा पुराणपुरुषोत्तमः ॥ ११ ॥

इति स्थविष्ठादिशतम् ॥ ३ ॥

वसंतः—वार्गंधतंडुललतांतहविःप्रदीपै— ।
धूपैः फलैर्वरसदर्घ्यमिदं कृतं तत् ।
संपूजये वरस्थविष्ठशतं सुनाम ।
देवाधिदेवजिनपं त्वमरेंद्रवंद्यं ॥ स्थविष्ठादिशतार्घ्यम् ॥

अनु०ः—महाशोकध्वजोऽशोकः कः स्रष्टा पद्मविष्टरः ।
पद्मेशः पद्मसंभूतिः पद्मनाभिरनुत्तरः ॥ १ ॥

पद्मयोनिर्जगद्योनिरित्यः स्तुत्यः स्तुतीश्वरः ।
स्तवनार्हो हृषीकेशो जितजेयः कृतक्रियः ॥ २ ॥

---

२ स्वंतः इत्यपि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गणाधिपो गणज्येष्ठो गण्यः पुण्यो गणाग्रणीः ।
गुणाकरो गुणांभोधिर्गुणज्ञो गुणनायकः ॥ ३ ॥
गुणादरी गुणोच्छेदी निर्गुणः पुण्यगीर्गुणः ।
शरण्यः पुण्यवाक् पूतो वरेण्यः पुण्यनायकः ॥ ४ ॥
अगण्यः पुण्यधीर्गुण्यः पुण्यकृत् पुण्यशासनः ।
धर्मारामो गुणग्रामः पुण्यापुण्यनिरोधकः ॥ ५ ॥
पापापेतो विपापात्मा विपाप्मा वीतकल्मषः ।
निर्द्वंद्वो निर्मदः शांतो निर्मोहो निरुपद्रवः ॥ ६ ॥
निर्निमेषो निराहारो निष्क्रियो निरुपप्लवः ।
निष्कलंको निरस्तैना [1]निर्धूतांगो निराश्रवः ॥ ७ ॥
विशालो विपुलज्योतिरतुलोऽचिंत्यवैभवः ।
सुसंवृतः सुगुप्तात्मा [2]सुभुक् सुनयतत्त्ववित् ॥ ८ ॥
एकविद्यो महाविद्यो मुनिः परिवृढः पतिः ।
धीशो विद्यानिधिः साक्षी विनेता विहतांतकः ॥ ९ ॥
पिता पितामहः पाता पवित्रः पावनोऽगतिः ।
त्राता भिषग्वरो वर्यो वरदः परमः पुमान् ॥ १० ॥
कविः पुराणपुरुषो वर्षीयान् वृषभः पुरुः ।
प्रतिष्ठाप्रसवो हेतुर्भुवनैकपितामहः ॥ ११ ॥

इति महादिशतम् ॥ ४ ॥

मालिनी-वनमलयजसारैस्तंडुलैः फुल्लवृंदै- ।
विपुलचरुविभास्वद्दीपधूपैः फलौघैः ॥
जिनपतिवरमहाशातकं त्वाख्यनाम ।
नमितनरसुरेंद्रं पूजयेऽहं त्रिशुध्या ॥ महादिशतार्घ्यम् ॥

१ निर्धूतागा इत्यपि, २ सुभुत्.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनु०: श्रीवृक्षलक्षणः श्लक्ष्णो लक्षण्यः शुभलक्षणः ।
निरक्षः पुंडरीकाक्षः पुष्कलः पुष्करेक्षणः ॥ १ ॥
सिद्धिदः सिद्धसंकल्पः सिद्धात्मा सिद्धिसाधनः ।
बुद्धबोध्यो महाबोधिर्वर्धमानो महर्द्धिकः ॥ २ ॥
वेदांगो वेदविद् वेद्यो जातरूपो विदांवरः ।
वेदवेद्यः स्वसंवेद्यो विवेदो वदतांवरः ॥ ३ ॥
अनादिनिधनो व्यक्तो व्यक्तवाग् व्यक्तशासनः ।
युगादिकृद् युगाधारो युगादिर्जगदादिजः ॥ ४ ॥
अतींद्रोऽतींद्रियोऽधींद्रो महेंद्रोऽतींद्रियार्थदृक् ।
अनिंद्रियोऽहमिंद्राच्यों महेंद्रमहितो महान् ॥ ५ ॥
उद्भवः [1]कारणः कर्ता पारगो भवतारकः ।
अगाह्यो [2]गहनो गुह्यः परार्ध्यः परमेश्वरः ॥ ६ ॥
अनंतर्द्धिरमेयर्द्धिरचिंत्यर्द्धिः समग्रधीः ।
प्राग्र्यः प्राग्रहरोऽभ्यग्रः प्रत्यग्रोऽग्र्योऽग्रिमोऽग्रजः ॥ ७ ॥
महातपो महातेजो महोदर्को [3]महोदयः ।
महायशो महाधामो महासत्वो महाधृतिः ॥ ८ ॥
महाधैर्यो महावीर्यो महासंपन्महाबलः ।
महाशक्तिर्महाज्योतिर्महाभूतिर्महाद्युतिः ॥ ९ ॥
महामतिर्महानीतिर्महाक्षांतिर्महोदयः ।
महाप्रज्ञो महानंदो महाभागो महाकविः ॥ १० ॥
महामहा महाकीर्तिर्महाकांतिर्महावपुः ।
महादानो महाज्ञानो महायोगो महागुणः ॥ ११ ॥

---

१ कारणं, २ गहनं, ३ महादयः इत्यपि पाठः.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

महामहपतिः प्राप्तमहाकल्याणपंचकः ।
महाप्रभुर्महाप्रातिहार्याधीशो महेश्वरः ॥ १२ ॥
इति श्रीवृक्षादिशतम् ॥

चामर-- चारुनीरगंधशालितंडुलप्रफुल्लकैः ।
सच्चरुप्रदीपधूपसत्फलैर्महार्घ्यकैः ॥
देवदेववीतरागसंश्रीवृक्षकंशतं ।
अर्चयामि पापतापनाशनं सुखप्रदं ॥
इति श्रीवृक्षादिशतार्घ्यं ॥

अनु०—महामुनिर्महामौनी महाध्यानो [1]महोदयः ।
महाक्षमो महाशीलो महायज्ञो महामखः ॥१ ॥
महाव्रतपतिर्मह्यो महाकांतिर्धरोधिपः ।
महामैत्री महामेयो महोपायो महोमयः ॥ २ ॥
महाकारुणिको मंता महामंत्रो महायतिः ।
महानादो महाघोषो महेज्यो महसांपतिः ॥ ३ ॥
महाध्वरधरो धुर्यो महौदार्यो महिष्ठवाक् ।
महात्मा महसांधाम महर्षिर्महितोदयः ॥ ४ ॥
महाक्लेशांकुशः शूरो महाभूतपतिर्गुरुः ।
महापराक्रमोऽनंतो महाक्रोधरिपुर्वशी ॥ ५ ॥
महाभवाब्धिसंतारीमहामोहाद्रिसूदनः ।
महागुणाकरः क्षांतो महायोगीश्वरः शमी ॥ ६ ॥
महाध्यानपतिर्ध्याता महाधर्मो महाव्रतः ।
महाकर्मारिहाऽऽत्मज्ञो महादेवो महेशिता ॥ ७ ॥
सर्वक्लेशापहः साधुः सर्वदोषहरो हरः ।
असंख्येयो प्रमेयात्मा शमात्मा प्रशमाकरः ॥ ८ ॥

---

१ महादमः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सर्वयोगीश्वरोऽचिंत्यः श्रुतात्मा विष्टरश्रवाः ।
दांतात्मा धर्मतीर्थेशो योगात्मा ज्ञानसर्वगः ॥ ९ ॥

प्रधानमात्मा प्रकृतिः परमः परमोदयः ।
प्रक्षीणबंधः कामारिः क्षेमकृत् क्षेमशासनः ॥ १० ॥

प्रणवः प्रणतः प्राणाः प्राणदः प्रणतेश्वरः ।
प्रमाणं प्रणिधिर्दक्षो दक्षिणोऽध्वर्युरध्वरः ॥ ११ ॥

आनंदो नंदनो नंदो वंद्योऽनिंद्योऽभिनंदनः ।
कामहा कामदः काम्यः कामधेनुरारिंजयः ॥ १२ ॥

इति महामुन्यादिशतं ॥ ६ ॥

शार्दूल०नीरैर्नीरजवासितैः प्रविमलैर्गंधैः सुगंधैर्वरै— ।
रक्षुण्णैः कलमाक्षतैः परिमलैः पुष्पैः सुभक्ष्यामृतैः ।
दीपैर्धूपफलैर्महार्घ्यममलं देवं यजामो वयम् ॥
नाम्ना तत्सुखदं महामुनिशतं संसारदुःखापहम् ॥

इति महामुन्यादिशतार्घ्यं ॥ ६ ॥

अनु०—असंस्कृतः सुसंस्कारः प्राकृतो वैकृतांतकृत् ।
अंतकृत् कांतगुः कांतश्चिंतामणिरभीष्टदः ॥ १ ॥

अजितो जितकामारि रमितोऽमितशासनः ।
जितक्रोधो जितामित्रो जितक्लेशो जितांतकः ॥ २ ॥

जिनेंद्रः परमानंदो मुनींद्रो दुंदुभिस्वनः ।
महेंद्रवंद्यो योगींद्रो यतींद्रो नाभिनंदनः ॥ ३ ॥

नाभेयो नाभिजोऽजातः सुव्रतो मनुरुत्तमः ।
अभेद्योऽनत्ययोऽनाश्वानधिकोऽधिगुरुः सुगीः ॥ ४ ॥

सुमेधा विक्रमी स्वामी दुरादर्शो निरुत्सुकः ।
विशिष्टः शिष्टभुक् शिष्टः प्रत्ययः कमनोऽनघः ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षेमी क्षेमंकरोऽक्षय्यः क्षेमधर्मपतिः क्षमी ।
अग्राह्योऽज्ञाननिग्राह्यो ध्यानगम्यो निरुत्तरः ॥ ६ ॥

सुकृती धातुरिज्यार्हः सुनयश्चतुराननः ।
श्रीनिवासश्चतुर्वक्त्रश्चतुरास्यश्चतुर्मुखः ॥ ७ ॥

सत्यात्मा सत्यविज्ञानः सत्यवाक् सत्यशासनः ।
सत्याशीः सत्यसंधानः सत्यः सत्यपरायणः ॥ ८ ॥

स्थेयान् स्थवीयान् नेदीयान् दवीयान् दूरदर्शनः ।
अणोरणीयाननणुर्गुरुराद्यो गरीयसां ॥ ९ ॥

सदायोगः सदाभोगः सदातृप्तः सदाशिवः ।
सदागतिः सदासौख्यः सदाविद्यः सदोदयः ॥ १० ॥

सुघोषः सुमुखः सौम्यः सुखदः सुहितस्सुहृत् ।
सुगुप्तोगुप्तिभृद्गोप्ता लोकाध्यक्षो दमीश्वरः ॥ ११ ॥

इति असंस्कृतादिशतम् ॥ ७ ॥

गीति— वनमलयजशालीतडुंलफुल्लान्नदीपधूपफलनिवहैः ।
नमितनरामराधिपदेवमसंस्कृतनामशतं पूजये ॥

इति असंस्कृतादिशतार्घ्यम् ॥ ७ ॥

बृहन् बृहस्पतिर्वाग्मी वाचस्पतिरुदारधीः ।
मनीषी धिषणो धीमान् शेमुषीशो गिरांपतिः ॥ १ ॥

नैकरूपो नयोत्तुंगो नैकात्मा नैकधर्मकृत् ।
अविज्ञेयो प्रतर्क्यात्मा कृतज्ञः कृतलक्षणः ॥ २ ॥

ज्ञानगर्भो दयागर्भो रत्नगर्भः प्रभास्वरः ।
पद्मगर्भो जगद्गर्भो हेमगर्भः सुदर्शनः ॥ ३ ॥

लक्ष्मीवांस्त्रिदशाध्यक्षो द्रढीयानिन ईशिता ।
मनोहरो मनोज्ञांगो धीरो गंभीरशासनः ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धर्मयूपो दयायागो धर्मनेमिर्मुनीश्वरः ।
धर्मचक्रायुधो देवः कर्महा धर्मघोषणः ॥ ५ ॥

अमोघवागमोघाज्ञो निर्मलोऽमोघशासनः ।
सुरूपः सुभगस्त्यागी समयज्ञः समाहितः ॥ ६ ॥
सुस्थितः स्वास्थ्यभाक् स्वस्थो नीरजस्को निरुद्धवः ।
अलेपो निष्कलंकात्मा वीतरागो गतस्पृहः ॥ ७ ॥
वश्येंद्रियो विमुक्तात्मा निस्सपत्नो जितेंद्रियः ।
प्रशांतोऽनंतधामर्षिमंगलो[1] मलहाऽनघः ॥ ८ ॥
अनीदृगुपमाभूतो दृष्टिर्दैवमगोचरः ।
अमूर्तो मूर्तिमानैकोऽनैको नानैकतत्त्वदृक् ॥ ९ ॥
अध्यात्मगम्यो गम्यात्मा योगविद् योगिवंदितः ।
सर्वत्रगः सदाभावी त्रिकालविषयार्थदृक् ॥ १० ॥
शंकरः शंवदो दांतो दमी क्षांतिपरायणः ।
अधिपः परमानंदः परात्मज्ञः परात्परः ॥ ११ ॥
त्रिजगद्वल्लभोऽभ्यर्च्यस्त्रिजगन्मंगलोदयः ।
त्रिजगत्पतिपूज्यांघ्रिस्त्रिलोकाग्रशिखामणिः ॥ १२ ॥

इति ब्रहदादिशतं ॥ ८ ॥

इंद्रवज्रा-अंभःसुगंधैः सदकैर्मनोज्ञैः पुष्पैर्हविर्भिर्भक्ष्यविचित्रदीपैः ।
धूपैः सुधूम्रान्वितसत्फलौघैर्देवं ब्रहन्नामशतं यजेऽहं ॥

इति ब्रहदादिशतार्घ्यम् ॥ ८ ॥

त्रिकालदर्शी लोकेशो लोकधाता दृढव्रतः ।
सर्वलोकातिगः पूज्यः सर्वलोकैकसारथिः ॥ १ ॥
पुराणपुरुषः पूर्वः कृतपूर्वांगविस्तरः ।
आदिदेवः पुराणाद्यः पुरुदेवोऽधिदेवता ॥ २ ॥

---

1 मंगलं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

युगमुख्यो युगज्येष्ठो युगादिस्थितिदेशकः ।
कल्याणवर्णः कल्याणः कल्यः कल्याणलक्षणः ॥ ३ ॥
कल्याणप्रकृतिर्दीप्तः कल्याणात्मा विकल्मषः ।
विकलंकः कलातीतः कलिलघ्नः कलाधरः ॥ ४ ॥
देवदेवो जगन्नाथो जगद्बंधुर्जगद्विभुः ।
जगद्धितैषी लोकज्ञः सर्वगो जगदग्रजः ॥ ५ ॥
चराचरगुरुर्गोप्यो गूढात्मा गूढगोचरः ।
सद्योजातः प्रकाशात्मा ज्वलज्ज्वलनसप्रभः ॥ ६ ॥
आदित्यवर्णो भर्माभः सुप्रभः कनकप्रभः ।
सुवर्णवर्णो रुक्माभः सूर्यकोटिसमप्रभः ॥ ७ ॥
तपनीयनिभस्तुंगो बालार्काभोऽनलप्रभः ।
संध्याभ्रबभ्रुर्हेमाभस्तप्तचामीकरच्छविः ॥ ८ ॥
निष्टप्तकनकच्छायः कनत्कांचनसन्निभः ।
हिरण्यवर्णः स्वर्णाभः शातकुंभनिभप्रभः ॥ ९ ॥
द्युम्नभा जातरूपाभो [1]दीप्तजांबूनदद्युतिः ।
सुधौतकलधौतश्रीः प्रदीप्तो हाटकद्युतिः ॥ १० ॥
शिष्टेष्टः पुष्टिदः पुष्टः स्पष्टः स्पष्टाक्षरः क्षमः ।
शत्रुघ्नोऽप्रतिघोऽमोघः प्रशास्ता शासिता स्वभूः ॥ ११ ॥
शांतिनिष्ठो मुनिज्येष्ठः शिवतातिः शिवप्रदः ।
शांतिदः शांतिकृत् शांतिः कांतिमान् कामितप्रदः ॥ १२ ॥
श्रेयोनिधिरधिष्ठानमप्रतिष्ठः प्रतिष्ठितः ।
[2]सुस्थिरः स्थावरः स्थास्नुः प्रथीयान् प्राथितः पृथुः ॥ १३ ॥
इति त्रिकालादिशतम् ॥ ९ ॥

---

१ तप्त, २ सुस्थितः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इंद्रवज्रा-नीरैः सुगंधैः कलमाक्षतौघैः पुष्पैर्वरैश्चारुहविःप्रदीपैः ।
धूपैर्दशांगैः सुफलैर्मनोज्ञैर्यजे शतं नाम त्रिकालदर्शं ॥

त्रिकालादिशतार्घ्यम् ॥ ९ ॥

दिग्वासा वातरसनो निर्ग्रंथेशो निरंबरः ।
निष्किंचनो निराशंसो ज्ञानचक्षुरमोमुहः ॥ १ ॥
तेजोराशिरनंतौजा ज्ञानाब्धिः शीलसागरः ।
तेजोमयोऽमितज्योतिर्ज्योतिर्मूर्तिस्तमोऽपहः ॥ २ ॥
जगच्चूडामणिर्दीप्तः शंवान् विघ्नविनायकः ।
कलिघ्नः कर्मशत्रुघ्नो लोकालोकप्रकाशकः ॥ ३ ॥
अनिद्रालुरतंद्रालुर्जागरूकः प्रमामयः ।
लक्ष्मीपतिर्जगज्ज्योतिर्धर्मराजः प्रजाहितः ॥ ४ ॥
मुमुक्षुर्बंधमोक्षज्ञो जिताक्षो जितमन्मथः ।
प्रशांतरसशैलूषो भव्यपेटकनायकः ॥ ५ ॥
मूलकर्ताखिलज्योतिर्मलघ्नो मूलकारणः ।
आप्तो वागीश्वरः श्रेयान् श्रायसोक्तिर्निरुक्तवाक् ॥ ६ ॥
प्रवक्ता वचसामीशो मारजिद् विश्वभाववित् ।
सुतनुस्तनुनिर्मुक्तः सुगतो हतदुर्नयः ॥ ७ ॥
श्रीशः श्रीश्रितपादाब्जो वीतभीरभयंकरः ।
उत्सन्नदोषो निर्विघ्नो निश्चलो लोकवत्सलः ॥ ८ ॥
लोकोत्तरो लोकपतिर्लोकचक्षुरपारधीः ।
धीरधीर्बुद्धसन्मार्गः शुद्धः सूनृतपूतवाक् ॥ ९ ॥
प्रज्ञापारमितः प्राज्ञो यतिर्नियमितेंद्रियः ।
भदंतो भद्रकृद् भद्रः कल्पवृक्षो वरप्रदः ॥ १० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समुन्मूलितकर्मारिः कर्मकाष्ठाशुशुक्षणिः ।
कर्मण्यः कर्मठः प्रांशुर्हेयादेयविचक्षणः ॥ ११॥

अनंतशक्तिरच्छेद्यस्त्रिपुरारिस्त्रिलोचनः ।
त्रिनेत्रस्त्र्यंबकस्त्र्यक्षः केवलज्ञानवक्षिणः ॥ १२ ॥

समंतभद्रः शांतारिधर्माचार्यो दयानिधिः
सूक्ष्मदर्शी जितानंगः कृपालुर्धर्मदेशकः ॥ १३ ॥

शुभंयुः सुखसाद्भूतः पुण्यराशिरनामयः ।
धर्मपालो जगत्पालो धर्मसाम्राज्यनायकः ॥ १४ ॥

इति दिग्वासादिशतं ॥ १० ॥

मालिनी-विमलजलसुगंधैरक्षतैः पुष्पजालै- ।
र्वरचरुसुविदीपैर्धूपनानाफलैश्च ।
जिनपतिवरदिग्वासःशतं पूजयेऽहं ।
प्रणुतनरसुरेंद्रं सौख्यदं तच्च भक्त्या ॥ दिग्वासादिशतार्घ्यं ॥१०॥

धाम्नांपते तवामूनि नामान्यागमकोविदैः ।
समुच्चितान्यनुध्यायन् पुमान् पूतस्मृतिर्भवेत् ॥ १ ॥

गोचरोऽपि गिरामासां त्वमवाग्गोचरो मतः ।
स्तोता तथाऽप्यसंदिग्धं त्वत्तोऽभीष्टफलं [1]लभेत् ॥ २ ॥

त्वमतोऽसि जगद्बंधुस्त्वमतोऽसि जगद्भिषक् ।
त्वमतोऽसि जगद्धाता त्वमतोऽसि जगद्धितः ॥ ३ ॥

त्वमेकं जगतां ज्योतिस्त्वंद्विरूपोपयोगभाक् ।
त्वं त्रिरूपैकमुक्त्यंगः स्वोत्थानंतचतुष्टयः ॥ ४ ॥

त्वं पंचब्रह्मतत्वात्मा पंचकल्याणनायकः ।
षड्भेदभावतत्वज्ञस्त्वं सप्तनयसंग्रहः ॥ ५ ॥

---

१ भजेत् इत्यपि,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दिव्याष्टगुणमूर्तिस्त्वं नवकेवललब्धिकः ।
दशावतारनिर्धार्यो मां पाहि परमेश्वर ॥ ६ ॥

युष्मन्नामावलिदृब्धविलसत्स्तोत्रमालया ।
भवंतं वरिवस्यामः प्रसीदानुगृहाण नः ॥ ७ ॥

जयेश जय निर्दग्धकर्मेंधन जया जर ।
जय लोकगुरो सार्व जगतां जय जित्वर ॥ ८ ॥

इदं स्तोत्रमनुस्मृत्य पूतो भवति भाक्तिकः ।
यः संपाठं पठत्येनं स स्यात् कल्याणभाजनं ॥ ९ ॥

ततः सदेदं पुण्यार्थी पुमान् [1]पठतु पुण्यधीः ।
पौरुहूतीं श्रियं प्राप्तुं परमामभिलाषुकः ॥ १० ॥

स्तुतिः पुण्यगुणोत्कीर्तिः स्तोता भव्यः प्रसन्नधीः ।
निष्ठितार्थो भवान् स्तुत्यः फलं [2]निश्रेयसं सुखं ॥ ११ ॥

इति धाम्नादि शतं ॥ ११ ॥

वसंत०-पानीयचंदनसदक्षचारुपुष्पै ।
नैवेद्यदीपवरधूपफलैर्विचित्रैः ॥
संस्थापितैःकनकनिर्मितचारुपात्रे ।
धाम्नांशतंसुखकरं परिपूजयामि ॥

धाम्नादिशतार्घ्यं ॥ ११ ॥

शार्दूल० यः स्तुत्यो जगतां त्रयस्य न पुनः स्तोता स्वयं कस्यचित् ।
ध्येयो योगिजनस्य यस्तु नितरां ध्याता स्वयं कस्यचित् ।
[3]यो नम्रानपि नेतुमुन्नतिमलं नंतव्यपक्षे स्थितः ।
स श्रीमान् जगतां त्रयस्य च गुरुर्देवः पुरुः पातु नः ॥ १ ॥

---

१ पठति इत्यपि २ नैश्रेयसं इत्यपि. ३ यो नेतन् नयते नमस्कृतिमलं नंतव्यपक्षेक्षणः । इत्यपिपाठः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तं देवं त्रिदशाधिपार्चितपदं घातिक्षयानंतरम् ।
प्रोत्थानंतचतुष्टयं [1]जिनवरं भव्याब्जिनीनामिनम् ॥
मानस्तंभविलोकनानतजगन्मान्यं त्रिलोकीपतिं ।
प्राप्ताचिंत्यबहिर्विभूतिमनघं भक्त्या प्रवंदामहे ॥ २ ॥

इति श्रीजिनसेनाचार्यविरचितसहस्रनामस्तोत्रं संपूर्णं ॥

वसंत अष्टाधिकोत्तरसहस्रसुनाममाज-- ।
स्तीर्थेशिनः शतमखैः शतसेव्यमानान् ।
इत्यर्चितस्य वसुद्रव्ययुतार्घ्यदानैः ।
संघस्य संतु सततं वरमंगलानि ॥ पूर्णार्घ्यं ॥

॥ अथ नित्यपूजाक्रमः ॥

अनु० ॐ मंगलं भगवानर्हन् मंगलं भगवाञ्जिनः ।
मंगलं प्रथमाचार्यो मंगलं वृषभेश्वरः ॥ १ ॥

ॐ परमब्रह्मणे नमो नमः स्वस्ति २ जीव २ नंद २ वर्धस्व २ विजयस्व २ अनुशाधि २ पुनिहि २ पुण्याहं २ मांगल्यं २ पुष्पांजलिः ॥

घंटाटंकारवीणाक्वणितमुरजधांधांक्रियां काहलार्चि- ।
झींकारोदारभेरीपटहदलदलंकारसंभूतघोषैः ।
आक्रम्याशेषकाष्ठातटमवघटितं प्रोद्घटंदभ्राटिभ्र-- ।
मिष्टाधिष्ठार्हदिष्टिप्रमुखमिह लतांतांजलिं प्रोत्क्षिपामि ॥ २ ॥

ॐ ह्रीं वाद्यमुद्घोषयामि स्वाहा । वाद्यमुद्घोषणं ॥

इंद्रवज्रा:-श्रीमत्त्रिलोकीतिलकं जिनेंद्रं । स्वात्मप्रतिष्ठं सकलप्रतिष्ठं ।
नत्वा प्रतिष्ठातिलकं प्रवक्ष्ये । संगृह्य सारं जिनसंहितानां ॥३॥

1 मिमं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जलस्थलशिलावालुकापर्यंतरभूमिशोधनपुरःसरपरिपूरितशुद्धवालुकेष्ट—कोमलमृत्स्नाधिष्ठिताधिष्ठाने । पंचविधरत्नरमणीयपंचालंकारोपेत—शातकुंभमयस्तंभसंभृते । सततशैत्यमाद्यसौरभसंसक्तमंदानिलांदोलित—पताकापंक्तिविलसिते । सुवर्णशिखरनिकरविन्यस्तमाणिक्यमयूखमाला—म्लेडितश्रीविराजमाने । चतुर्दिक्षु गोपुरद्वारतोरणोभयपार्श्वप्रदेशवि—निहितमणिमयमंगलकलशे । विविधविमलांबरविरचितवितानालंबितमु—क्तादामाद्यलंकृते । मुक्तिवधूस्वयंवरश्रीविवाहविभवानिवासभासुरे । समु—चितसमस्तसपर्यद्रव्यसंदोहसमन्वितविपुलतरचैत्यायतने । जिनेंद्र—कल्याणाभ्युदयमहामहोत्सवाभिरामेषु । यागमंडपाभ्यंतरेषु मंडपपु—ष्पाक्षतं क्षिपेत् ॥ [येथें मंडपांत फुलें व अक्षता टाकणें.] ॐ मणि—मयमहोत्तंभसंभृतत्र्यादित्रिवर्धिष्णुचतुर्विंशतिकरान्यतमायामसमुत्तुंग—चतुरस्रचतुर्द्वारोत्तंभितघंटादर्पणाद्यलंकृतं । तोरणोपांतरमणीयकं । धव—लदुकूलवसनकन्याकदंबकृतकपिलाविशुद्धगोमयपयोद्रुमत्वकपायसमार्ज-नसहितं । महीतलविहितविरचितविचित्ररंगावलिविराजितं । समयसमु—त्पन्नसुस्वापशतशंकावहाचित्रवितानसंपादितचित्तचमत्कारसौरभासक्त—मधुकरमालाकरंबितकमनीयकं । सुमनमालाकलापनिरंतरितांतरालं । दशविधानेकध्वजदंडकोटिविघट्यमानघनाघनगलन्मुक्तासारसंकाशं । मुक्ताफललंबूषतारकादिविभूषणविभूषितं । विविधाकारकलिता—कल्पकेतुनवमालालंबनधवलकलशाष्टकदर्भमालावरणविभ्राजितं । धूप-घटपटलनिर्धूमरेखासौरभप्रसरसुरभीकृतसकलदिङ्मुखं । दर्शनविशु—द्ध्यादिषोडशभावनीयभाववजियवासिद्धार्थादिद्रव्यबीजकृतपुंजनिकुरुंबरं-जकं । भवद्रव्यरत्नफलपल्लवदूर्वादिपूजोपकरणपरिपूर्णं । घोषवि—शुद्धप्रवचनपारस्तवघनाशीर्वादवाद्यप्रमुखनिनादमुखरीकृतदिगंतरविवि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धविनयजनपरिपूरितं । जन्माभिषवणसमयपांडुकशिलातटघटितमहा-मंडपफललक्ष्मीमात्मशोभातिशयभव्यजनसंकल्प्याभ्यासमात्मसात्कु--र्वाणं । निर्वाणकारणदयायागसाधतनया महनीयमखिल--मंडितं महामंडपमिमं बहुमानयामहे ॥

शार्दूलः-प्लक्षोदुंबरपिप्पलद्रुमवटाश्रीतोरणालंकृतै- ।
द्वारैर्वारितपापकर्मनिकरैर्द्वारैश्चतुर्भिर्युतं ।
निर्गच्छन्वरधूपधूमपटलाभांतालिमालाकुलं ।
घंटादर्पणवस्त्रदर्भसुमनोमालावलीसंभृतम् ॥ १ ॥

शार्दूलः-आगच्छन्परिपूर्णपुण्यफलदैर्धान्यैः फलैरावृतं ।
मुक्तालंबकदंबसंभृततटं दीपप्रभाभासुरं ।
भर्तुर्मुक्तिवधूस्वयंवरविधावुद्भूतसन्मंडपं ।
प्रख्यं वीक्षणसौख्यदं जिनसवायामंडितं मंडपं ॥ २ ॥

स्रग्धराः-सद्वृत्तानुत्तमांगान् कलितसुमनसांश्छास्त्रसंस्कारयुक्ता-- ।
नन्योन्याबाधमानान् फलभरितमुखान् संगतानंदसांद्रान् ।
उत्फुल्लांभोजवक्त्रान् विमलगुणयुताञ्जैनपूजासमेतान् ।
विद्वत्संघातदोषादमृतभृतघटान् स्थापयित्वाऽर्चयामि ॥ ३ ।

इंद्रवज्राः-श्रीमंडपाभं मिलितं त्रिलोकी-- ।
श्रीमंडितं पंडितपुंडरीकं ॥
श्रीमंडपं खंडितपापतापं ।
क्रमेण ह्यर्घ्येण च मंडयामः ॥ ४ ॥

ॐ ह्रीं मंडपांतरर्घ्योद्धरणं ॥ (येथें या मंत्रानें मंडपास अर्घ्य देणें.)

॥ अथ पंचकुमारपूजा ॥

शार्दूलः-श्रीमज्जैनमहामहोत्सवविधिव्यापारसंसिद्धये ।
भव्यानामपि तन्नियोगनिचयश्रद्धापरीतात्मनां ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षेमार्थं क्रियमाणवास्तुविधिवत्संघातसंपूजन-- ।
प्रस्तावे प्रविकीर्यते जयजयारावेण पुष्पांजलिः ॥ १ ॥

ॐ ऱ्हीं श्रीं क्षीं भूः स्वाहा वास्तुपुष्पांजलिः ॥

शार्दूलः-आलिंप्याखिलमंडपादिजगता मृत्पंचगव्यैर्मरु-- ।
न्मेघाग्नीनमरान् समर्च्य वसुधामर्त्यैर्विंशोध्य त्रिधा ॥
संतर्प्याथ ततोऽप्यहीन् कुशततिं निक्षिप्य दिक्षुक्रमा-- ।
द्वार्दर्भादिभिरर्चयामि महितां सर्वज्ञयज्ञक्षितिं ॥ २ ॥

ॐ ऱ्हीं प्रकृतिक्रमविध्यवधानाय वेद्यां जातिकुंकमलुलितदर्भदूर्वा-दिक्रमेण वास्तुपुष्पांजलिः ॥

अनुष्टुभ्ः-श्रीवास्तुदेव वास्तूनामधिष्ठानकृतानिश ।
कुर्वन्ननुग्रहं कस्य मान्योनासीति मान्यसे ॥ ३ ॥

ॐ ऱ्हीं वास्तुकुमारदेव अत्र आगच्छागच्छ संवौषट् स्वाहा । ॐ ऱ्हीं वा० अत्र स्वस्थाने तिष्ठ २ ठठ स्वाहा । आह्वा--नस्थापनं ॥

वसंतः-सर्वेषु वास्तुषु सदा निवसंतमेनं ।
श्रीवास्तुदेवमखिलस्य कृतोपकारं ॥
प्रागेव वास्तुविधिकल्पितयज्ञभाग-- ।
मीशानकोणदिशि पूजनयाधिनौमि ॥ ४ ॥

ॐ ऱ्हीं वास्तुकुमारदेव इदमर्घ्यं पाद्यं जलं गंधं अक्षतान् पुष्पं चरुं दीपं धूपं फलं बलिं स्वस्तिकं यज्ञभागं च यजामहे प्रतिगृह्यतां २ स्वाहा ॥ यस्यार्थं० ॥ शांतिधारा ॥

वंसत० इंद्राज्ञया धनदनिर्मितवेदिकायां ।
रत्नावलीरचितमंगलरंगवल्ल्यां ॥
संशोधयामि मृदुपावनदर्भपूलै ।
र्यत्कल्मषं सकलकिल्बिषनिर्जरार्थं ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ह्रीं वायुकुमार सर्वविघ्नविनाशनाय महीं पूतां कुरु २ हूं फट् स्वाहा । पट्दर्भपूलैर्भूमिं सम्मार्जयेत् ॥ ॐ ह्रीं वायुकुमार अत्र आगच्छागच्छ संवौषडित्यादि । आह्वानस्थापनं ॥

मालिनी० मृदुसुरभिवहंतः प्रीणयंतो विनेयान् ।
कुमुदतृणलवादीन् मार्जयंतो मखोर्व्यां ॥
इह पवनकुमाराः सर्वदाऽऽगत्य शांत्यै ।
विरचितमिदमुच्चैः साधु गृण्हीध्वमर्घ्यं ॥
ॐ ह्रीं वायुकुमार इदमर्घ्यमित्यादि ॥ ६ यस्यार्थं० ॥

वसंत० श्रीतीर्थकृत्सवनमंडपमंडिताया- ।
स्तोयैः कुशाग्रकलितैरिह वेदिकायाः ॥
पातुं सुवर्णकरकोन्नतनालमुक्तैः ।
संप्लावयामि रजसामपि संवराय ॥ ७ ॥

ॐ ह्रीं मेघकुमार धरां प्रक्षालय २ अं हं झं ठं क्षः फट् स्वाहा । पड्दर्भपूलोपात्तजलेन भूमिं सिंचेत् । ॐ ह्रीं मेघकुमार अत्र आगच्छागच्छ संवौषडित्यादि आह्वानस्थापनं ॥

मालिनी० परिमलजलवृष्ट्या भव्यसस्याभिवृध्यै ।
क्षपितदुरितमाल्याः प्लावयंतोऽध्वरोर्वीं ।
स्तनितकुलकुमारा विद्युदुद्योतितांगा ।
विनहितममुमुच्चैरर्घ्यमुद्धारयामि ॥ ८ ॥

ॐ ह्रीं मेघकुमार इदमर्घ्यमित्यादि। यस्यार्थं० शांतिधारा ॥

इन्द्रवज्रा० दर्भाग्निना प्रोन्निषदर्चिपात्र ।
निःशेषदग्धाघमयेंधनेन ॥
श्रीवेदिकोपांतभुवं पुनाति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रागुत्तराशांतरसंगतेन ॥ ९ ॥

ॐ ह्रीं वन्हिकुमार ह्म्ल्व्र्यूं ज्वल २ प्रज्वल २ तेजपते अमिततेजसे स्वाहा षड्दर्भपूलानलेन भूमिं ज्वालयेत् ॥

मालिनी० जिनविभुयजनार्थं दीपधूपोपहारै— ।
स्त्वमसि यदिह नित्यं साधुवं साधुसिध्यै ।
तदिह वरमखेऽस्मिन्नर्घ्यपाद्यादिभिस्त्वा— ।
महमनलकुमारं स्थापयाम्यादरेण ॥

ॐ ह्रीं वन्हिकुमार इदमर्घ्यमित्यादि यस्यार्थं० ॥ १० ॥

इन्द्रवज्रा स्वस्त्यस्तु पातालमधिष्ठितेभ्यः । सत्षष्टिसंख्यातसहस्रकेभ्यः ।
अत्रामृतानंदितपन्नगेभ्यः । पूर्वोत्तरस्यां दिशि संस्थितेभ्यः ।११।

ॐ ह्रीं श्रीं क्ष्रीं भूषष्टिसहस्रसंखेभ्यो नागेभ्योऽमृतांजलिं प्रसिं-चयामि स्वाहा । क्षीरसेचनमैशान्यां दिशि नागसंतर्पणं ॥ ॐ ह्रीं नागकुमार अत्र आगच्छागच्छ संवौषट् स्वाहा । ॐ ना० अत्र स्वस्थाने तिष्ठ २ ठठ २ स्वाहा । आह्वानस्थापनं ॥

मालिनी० मधुरतरसुधाभिः शर्कराभिर्हविर्भि— ।
र्विपुलकनकपात्रेष्वर्घ्यमुद्धारिताभिः ।
जिनमखभुवि तुष्टान् षष्टिसंख्यासहस्र ।
प्रकटितनिजभोगान् पन्नगान् प्रीणयामि ॥

ॐ ह्रीं नागकुमार इदमर्घ्यमित्यादि ॥ यस्यार्थं० ॥ १२ ॥

॥ अथ क्षेत्रपालपूजा ॥

अनु० प्रणम्य श्रीजिनेशानां वर्धमानं जिनेश्वरं ।
पूजां श्रीक्षेत्रपालानां वक्ष्ये विघ्नविघातये ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रथमो माणिभद्रश्च द्वितीयो भैरवस्ततः ।
तृतीयो वीरभद्रश्च चतुर्थो जयसंज्ञकः ॥ २ ॥
पंचमो विजयश्चैवं क्षेत्रपाला अमी सुराः ।
याक्षे कुले भवाः ख्याता विश्वविघ्नविघातकाः ॥ ३ ॥

इन्द्रवज्रा० भो क्षेत्रपालाः परिवारयुक्ताः । संशब्दयेऽहं भवतो गुणाढ्याः
आयात चात्रैव जिनेंद्रभक्ता- । स्तिष्ठंतु मे सन्निहिता भवंतु ॥

॥ अथ अष्टकं ॥

ह्रीपूजा पान ४४--४५--४६ मध्ये आहे ती येथे करून घेणे,

॥ अथ प्रत्येकपूजा ॥

इंद्रवज्रा-श्रीमाणिभद्राख्यसुक्षेत्रपालं । जिनेंद्रसेवारतमुग्रमूर्तिं ।
सुसौख्यनिर्दोषवरं सुरेशं । सद्दृष्टिनं सुप्रयजे जलाद्यैः ॥ १ ॥

ॐ आँ क्रों ह्रीं माणिभद्रक्षेत्रपालाय इदमर्घ्यं पाद्यं जलं गंधं अक्षतान् पुष्पं चरुं दिपं धूपं फलं बलिं स्वस्तिकं यज्ञभागं च यजामहे प्रतिगृह्यतां २ स्वाहा । शांतिधारा ॥ १ ॥

उप० श्रीभैरवाख्यं वरयक्षराजं । केयूरहारांगदभूषणांगं ।
सुदिव्यदेहं वरकृष्णवर्णं । यजे महार्घ्यैर्वरकालरूपं ॥ २ ॥

ॐ आँ क्रों ह्रीं भैरवक्षेत्रपालाय इदमर्घ्यमित्यादि ॥ २ ॥

यज्ञोपवीतान्वितमुग्रतेजं सुखड्गहस्तं कृतनामभूपं ।
सदूर्ध्वकेशं कृतमौलिचंद्रं । समर्चये श्रीसुरवीरभद्रं ॥ ३ ॥

ॐ आँ ह्रीं वीरभद्रक्षेत्रपालाय इदमर्घ्यमित्यादि ॥ ३ ॥

उपेंद्र०-जिनेंद्रपादद्वयसेव्यमान । माताम्रनेत्रं कररत्नदंडं ।
सुधौतवस्त्रं शुभश्वाधिरूढं । संपूजये श्रीजयक्षेत्रपालं ॥ ४ ॥

ॐ आँ क्रों ह्रीं जयक्षेत्रपालाय इदमर्घ्यमित्यादि ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षेत्राधिनाथो विजयः सुरार्च्यः सुहास्यमानो भुवि रम्यमानः ।
सुपद्मवक्त्रः सकलत्ररूपः संपूज्यते श्रीजिनपादभक्तः ॥ ५ ॥

ॐ आँ क्रों ह्रीं विजयक्षेत्रपालाय इदमर्घ्यमित्यादि

अनु०- क्षेत्रपाला भुवि ख्याता कुर्वंतु भव्यमंगलं ।
पूर्णार्घ्यप्रीपतः सर्वे शांतिदासेन वर्णिताः ॥ पूर्णार्घ्यम् ॥

॥ अथ स्तोत्रं ॥

स्रग्धरा—यं यं यं यंत्रराजं दशदिशि धगितं भूमिकंपायमानं ।
सं सं संहारमूर्तिं शिरमुकुटजटाशेखरं चंद्रबिंबं ।
दं दं दं दीर्घकायं विकृतनखमुखं सूर्धरोमं करालं ।
पं पं पं पापनाशं प्रणमतु सततं भैरवं क्षेत्रपालं ॥ १ ॥

रं रं रं रत्नवर्णं करकृतजटिलं तीक्ष्णदंष्ट्राकरालं ।
घं घं घं घोषघोषं घवघवघटितं घूर्घरारावघोषं ॥
कं कं कं कालरूपं दिगि दिगि दिगितं ज्वालितं उग्रतेजं ।
तं तं तं दिव्यदेहं प्रणमतु० ॥ २ ॥

लं लं लं लंबलंबं लललल ललितं दीर्घजिव्हाकरालं ।
धूं धूं धूं धूम्रवर्णं स्फुटविकृतमुखं भासुरं भीमरूपं ।
रुं रुं रुं रुंडमालं रुदितमयमयं ताम्रनेत्रं विशालं ।
नं नं नं नग्नरूपं प्रणमतु० ॥ ३ ॥

वं वं वं वायुवेगं प्रलयपरिवृतं ब्रह्मरूपं स्वरूपं ।
खं खं खं खड्गहस्तं त्रिभुवननिलयं कालरूपं प्रशस्तं ।
चं चं चं चंचलत्वं चलचल चलितंचालितं भूतवृंदं ।
मं मं मं मायरूपं प्रणमतु० ॥ ४ ॥

शं शं शं शंखहस्तं शशिकरधवलं यक्षसंपूर्णतेजं ।
मं मं मं मायमायं कुलचकुलकुलं मंत्रमूर्तिं सुतत्वं ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

घे घे घे भूतनाथं किलिकिलितवचोगृण्हगृण्हालुलंतं ।
अं अं अं अंतरिक्षं प्रणमतु० ॥ ५ ॥

पुं पुं पुं खड्गभेदं विषममृतकरं कालकालांधकारं ।
क्षीं क्षीं क्षीं क्षिप्रवेगं दहदहदहनं नेत्रसंदीप्यमानं ।
हूं हूं हूंकारनादं हरिहरहसितं एहि एहि प्रचंडं ।
मं मं मं सिद्धनाथं प्रणमतु सततं भैरवं क्षेत्रपालं ॥ ६ ॥
सं सं सं सिद्धयोगं सकलगुणमयं देवदेवं प्रसन्नं ।
यं यं मं यज्ञनाथं हरिहरवदनं चंद्रसूर्याग्निनेत्रं ।
जं जं जं जक्षनाथं वसुवरुणसुरासिद्धगंधर्वनागं ।
रुं रुं रुं रुद्ररूपं प्रणमतु० ॥ ७ ॥
हं हं हं हंसघोपं हसितकुहकुहारावरौद्राट्टहासं ।
यं यं यं यक्षसंशि रक्तनकमहाबद्धखङ्गांगपाशं ।
रं रं रं रंगरंगं प्रहसितवदनं पिंगकस्मस्मशानं ।
सं सं सं सिद्धनाथं प्रणमतु० ॥ ८ ॥
इत्येवं भावयुक्तः पठति च नियतं भैरवस्याष्टकं यो ।
निर्विघ्नं दुःखनाशं त्वसुरभयहरं शाकिनीडाकिनीनां ॥
त्रासो नो व्याघ्रसर्पध्रुतिवहति सदा राजशत्रोस्तथाऽज्ञात् ।
सर्वे नश्यंति दूरा ग्रहगणविषमाश्चितिताऽभीष्टसिद्धिः ॥

॥ अथ जयमाला ॥

(येथे जयमाला मागील ४८ पानावरची वाचून घेणे.)

॥ अथ पुण्याहवाचनम् ॥

[१]श्रीनिर्जरेशाधिपचक्रपूर्वमित्यादि कृत्वा भण्या संकल्पपूर्विकांत्यंपठेत्

१. श्रीनिर्जरेशाधिपचक्रपूर्व हें आदिकरून, भण्या संकल्पपूर्विका पर्यंत पुण्याहवाचन सांगणें. पृष्ठ ५० पहा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ दर्भस्थापनम् ॥

अनु०:—परमब्रह्मभूमाप्तं परमाप्तं जिनकृतौ ।
ब्रह्मस्थाने स्थितं कुर्वे दर्भं विघ्नोपशांतये ॥ १ ॥

यद्ध्रुवं ब्रह्मसद्ब्रह्मचर्यं व्रतविधौ यतन् ।
केवलज्ञानहेतुश्च तत्र दर्भं न्यसाम्यहं ॥

ॐ ह्रीं दर्पमथनाय नमः ब्रह्मदर्भः ॥ १ ॥

इंद्रस्थानमिदं यस्मादिंद्रादीनेति सौम्यतां ।
तत्र दर्भं न्यसाम्येष शक्रासनविशुद्धये ॥

ॐ ह्रीं द० इंद्रदर्भः ॥ २ ॥

रुक्कदावाग्निसंतप्तचित्तसंतापशांतये ।
आग्नेय्यां दिशि दर्भेण वन्हेरर्चनमादधे ॥

ॐ ह्रीं द० अग्निदर्भः ॥ ३ ॥

दुष्कर्मदंडितानेकप्राणिनां सुखहेतवे ।
यमासनपदे दर्भं विदधे दाक्षिणां दिशं ॥

ॐ ह्रीं द० यमदर्भः ॥ ४ ॥

रोगराक्षससमुत्क्षिप्तं जगद्रक्षाविचक्षणं ।
आसनं तु प्रयच्छामि रक्षोराजाय तद्दिशं ॥

ॐ ह्रीं द० नैऋतदर्भः ॥ ५ ॥

संसारार्णवमग्नानां तदुद्धरणकारणं ।
वरुणस्यासनं दर्भं तद्दिशि प्रतनोम्यहं ॥

ॐ ह्रीं द० वरुणदर्भः ॥ ६ ॥

मनःपवनपूतेन क्षालनार्थं मनोमलं ।
दर्भेणासनमारोप्य वायुं तद्दिशमानये ॥

ॐ ह्रीं द० वायव्यदर्भः ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लसल्लक्ष्मीपतेर्लक्ष्मीसत्प्रयोगाव्ययाय वै ।
उत्तराशापतिं दर्भं तत्र संकल्पयाम्यहं ॥
ॐ ह्रीं द० कुबेरदर्भः ॥ ८ ॥

ईशत्वादिलसत्सिद्धेः सिद्धये दर्भमंजसा ।
ईशान्यासनमारोप्यालंकार एष तद्दिशं ॥
ॐ ह्रीं द० ईशान्यदर्भः ॥ ९ ॥

अधोभुवननाथस्य धरणेंद्रस्य तद्दिशं ।
दर्भासनं पुरस्कृत्य तं तथैव प्रसादये ॥
ॐ ह्रीं द० धरणेंद्रदर्भः ॥ १० ॥

पुष्यत्पीयूषनिस्यंदप्रीणितेलामयूखिनः ।
शीतांशोरासनं दर्भमूर्ध्वायां दिशि संदधे ॥
ॐ ह्रीं द० सोमदर्भः ॥ ११ ॥

॥ अथ भूम्यर्चनम् ॥

शार्दूलः-श्रीमत्कुंकुमपंकलिप्तनवरत्नस्फाररंगावली- ।
शोभालंकरणादिसाररचितां स्फूर्जत्प्रभासंचितां ॥
वार्गंधाक्षतपुष्पदामचरुभिर्दीपैश्च धूपैः फलैः ।
श्रीमन्नागदलैरलं भुवमलं कुर्वे जिनेंद्रोत्सवे ॥ १ ॥

ॐ ह्रीं भूर्भूमिदेवते अत्र आगच्छागच्छ संवौषट् स्वाहा । ॐ ह्रीं भूर्भू० अत्र तिष्ठ २ ठठ स्वाहा । ॐ ह्रीं भूर्भू० अत्र मम सन्निहिता भव २ वषट् स्वाहा ॥ आह्वानस्थापन-सन्निधीकरणं ॥

इंद्रवज्रा:-वार्दर्भगंधैः सुमनोऽक्षतौघैर्दीपैः सुधूपैरमृतोपमान्नैः ।
क्रमान्महामो महितां महाभि । र्मही महादेवमहामहस्य ॥ २ ॥

ॐ ह्रीं नीरजसे नमः । ॐ ह्रीं शीलगंधाय नमः ॐ ह्रीं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अक्षताय नमः । ॐ ऱ्हीं विमलाय नमः । ॐ ऱ्हीं परमसिद्धाय नमः । ॐ ऱ्हीं ज्ञानोद्योताय नमः । ॐ ऱ्हीं श्रुतधूपाय नमः । ॐ ऱ्हीं अभीष्टफलदाय नमः । ॐ भूर्भूमि--देवतायै भूम्यर्चनं करोमि स्वाहा । भूम्यर्चनं ॥

(येथें या मंत्रानें यज्ञभूमीस अर्घ्य देणें)

॥ अथ होतुरुपवेशनम् ॥

अनु:—दर्भं प्रस्तीर्य वस्त्रं वा वेत्रासनमथोऽपि वा ।
अत्रोपवेशनं कुर्वे वामे पल्यंकयोगतः ॥ १ ॥
यंत्रमंडपाग्रे होतुरुपवेशनं ॥

(येथें पूजकानें (दळ) काढलेल्या मंडपापुढें दर्भ नवें वस्त्र अथवा वेताचें आसन करून त्यावर पल्यंकासनानें बसणें.)

॥ अथ मंडपप्रतिष्ठाविधानम् ॥

शार्दूल- साष्टारत्निशतेंद्रवेदिरुचिरं शक्रः कुबेरेण यं ।
ज्यायांसं मणिमंडपं विरचयत्यर्हत्प्रतिष्ठाकृते ॥
अंतर्निर्मितदिव्यवेदिविलसल्लक्ष्मीकटाक्षोद्भवः ।
सोऽयं मंगलमंडपो विजयते जैनप्रतिष्ठोत्सवे ॥ १ ॥

मंडपांतः समंतात् कुंकुमाक्तपुष्पाक्षतं क्षिपेत् ॥ [येथें यज्ञमंडपाच्या आंतल्या चोहोंबाजूस केशरानें रंगविलेले तांदूळ व फुलें टाकणें]

स्रग्धरा- पुण्या एतेऽत्र भूषाः प्रवचनपठतः स्तंभयज्ञांगपात्रा ।
दर्भा वा द्रव्यबीजध्वजकलशदलस्रग्वितानादिभावाः ॥
स्तोत्राशीर्गीतवाद्यध्वानिनिचितादिशोभाक्तिकाः पूर्णथैते ।
स्त्रीसूत्रैः पंचवर्णैर्बहिरपि नवसूत्रेण वाध्र्येण युंजेत् ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भूषणादिवस्तु पृथक् पुष्पाक्षतं प्रक्षिप्य बहिः पंचवर्णसूत्रेण त्रीन्वारान् वेष्टयित्वाऽर्घ्यं दद्यात् [येथें पवित्र सुशोभित व शास्त्रोक्त यज्ञमंडपांत असलेल्या खांब, पूजापात्र, दर्भ, द्रव्यबीज, [यव, पांढऱ्या मोहऱ्या इत्यादिक धान्यें] ध्वज, कलश, तोरणमाला, पुष्पमाला, मौक्तिकमाला, ह्या प्रत्येक पदार्थावर तांदूळ व फुलें टाकून, भव्यजनानीं स्तोत्र, आशीर्वाद व पदें पद्यें ह्मणत व नानावाद्यें वाजवीत यज्ञमंडपाच्या बाहेरल्या बाजूस ज्या प्रत्येकवर्णाचे तीन पदर आहेत अशा पंचवर्णसूत्रांनीं अथवा नव्या पांढऱ्या सुतांनीं गुंडाळून अर्घ्य देणे.)

॥ अथ कुमुदादि द्वारपालानुकूलनम् ॥

स्रग्धरा- पूर्वद्वारप्रदेशे प्रणिहितकुमुदाद्युद्घदौवारकेंद्रै-।
दक्षैः संरक्षमाणो निखिलमुनिजनोदीरिताशीर्निनादः ॥
विद्वत्सामाजिकाद्युच्चरितजयजयारावसंपूर्णमाणो ।
विभ्राजत्वेष यज्ञे सकलजनहिते मंडपो मंडिताशः ॥ ३ ॥

एतत् त्रयं पठित्वा मंडपांतः समंतात् पुष्पाक्षत् विकीर्येत ॥ (येथें हा समुदायमंत्र उच्चारून मंडपाच्या आंतल्या बाजूस चोहोंकडे अक्षता व फुलें टाकणें.)

स्रग्धरा- पूर्वद्वारप्रदेशे प्रविलिखितलसत्स्वस्तिकं न्यस्तकुंभं ।
पंचास्यं सर्वधान्यांकुररुचिरतरं पांडुरं प्रेक्षमाणं ॥
हैमं दंडं प्रकांडं मरकतखचितं भ्रायमन् मुद्गरं तं ।
स्फूर्जद्भूषासमेतं कुमुद इह महाद्वाःस्थितोऽभ्यर्च्यनीयः ॥ १ ॥

ॐ ऱ्हीं कुमुदप्रतीहार पूर्वद्वारे तिष्ठ २ ठठ स्वाहा । स्थापनं ॥
ॐ ऱ्हीं कुमुदप्रतीहार इदमर्घ्यं पाद्यं जल गंधं अक्षतान् पुष्पं चरुं दीपं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धूपं फलं बलिं स्वस्तिकं यज्ञभागं च यजामहे प्रतिगृह्यतां २ स्वाहा ॥ शांतिधारा ॥ १ ॥

स्रग्धरा- प्राग्वा प्रद्योतमानामलकलशमहाद्वारदेशे प्रतिष्ठन् ।
पश्यन्नुद्दंडदंडायुधमपि च तथा बिभ्रयन् भीमरूपं ॥
क्षुद्रप्राणिप्रवेशे निगदितकरहूंकारपूर्वं निरुंधन् ।
अभ्यर्च्येतांजनाभो जिनयजनविधावंजनद्वारपालः ॥ २ ॥

ॐ ह्रीं अंजनप्रतीहार दक्षिणद्वारे तिष्ठ २ ठठ स्वाहा । स्थापनं ॥
ॐ ह्रीं अंजनप्रतीहार इदमर्घ्यमित्यादि ॥ २ ॥

स्रग्धरा- प्रत्यग्द्वारे विराजत्कलशमपि तथाभीक्ष्णमुद्वीक्षमाणो ।
बिभ्राजच्चंडदंडं चकचकितरुचं तद्वदुद्दाममेएन् ॥
सभ्यानां संप्रवेशे विदधदनुमतिं कुंदचंद्रावदातः ।
प्रीतः संपूजनेन प्रभवतु यजने वामनद्वारपालः ॥ ३ ॥

ॐ ह्रीं वामनप्रतीहार पश्चिमद्वारे तिष्ठ २ ठठ स्वाहा । स्थापनं ॥ ॐ ह्रीं वामनतीहार इदमर्घ्यमित्यादि ॥ ३ ॥

स्रग्धरा- शस्तायामुत्तरास्यां ककुभिविरचितद्वारदेशे तथैव ।
प्रभ्राजत्कुंभवक्त्रे विनिहितविमलापांगरम्यावलोकान् ॥
शुंभद्रत्नस्फुरद्भूषणरुचिरकरेणोद्धरद्दिव्यदंडं ।
पुष्पस्रग्भूषितांगः सुजनजनहितं पुष्पदंतस्तनोतु ॥ ४ ॥

ॐ ह्रीं पुष्पदंतप्रतीहार उत्तरद्वारे तिष्ठ २ ठठ स्वाहा । स्थापनं ॥ ॐ ह्रीं पुष्पदंतप्रतीहार इदमर्घ्यमित्यादि ॥ ४ ॥

॥ अथातो वेदिकाप्रतिष्ठाविधानम् ॥

उपेंद्रवज्रा यवादिजैर्मंगलदानतृप्तै । र्यवारकै कांतजिनस्य गर्भे ।
जगत्पतेः सिद्धवधूविवाह । वेदीमिमां भूमिमलंकरोमि ॥
यवारकस्थापनं ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(गहू, भात, जंवस, वेगुफल, मोहऱ्या, सावे, वरे, जोंधळें व राळें या नउ धान्यास " यवारक " ह्मणतात या धान्याचे पुंज वेदिकेस [कट्यास] शोभा येईल असें वेदिकेवर घालणें, याला यवारकस्थापन ह्मणतात.)

शार्दूल० आदेशावहितान्यवासवपरीवारोपनिर्माप्यया ।
दृकूशुद्धिंप्रति वृद्धये प्रयजते सौधर्मसोऽर्हत्प्रभुं ॥
सोऽयं वेदिमतल्लिकापरिकरश्चंद्रोपकाद्योऽप्ययं ॥
सोऽत्र स्फूर्जति मंगलादिवदिमे ते भांति भांडोच्चयाः ॥ २ ॥

वेद्यां चंद्रोपकादिषु कुंकुमाक्तपुष्पाक्षतं क्षिपेत् ॥ (येथें वेदीवर बांधलेला चंद्रोपक ह्म० (चांदवा) व भांडोच्चय ह्म० (वेदीच्या चारी कोपऱ्यास रचिलेल्या पांच पांच रंगविलेल्या ओल्या मडक्याची उतरंडी) यावर केशरानें रंगविलेले तांदूळ व फुलें टाकणें.)

शार्दूल० प्रोक्षत्प्रोक्षणमंत्रपूतपयसा वेदीं वराद्यैः समा ।
लभ्याभ्यर्च्य चरुस्रगादिभिरिमां नीराजयामोऽजसा ।
लावण्योद्गतयाऽवतार्य लवणस्तोमं पवित्रार्णसा ।
संपूर्णानवतारयामि कलशानस्यां महामेचकान् ॥ ३ ॥

प्रोक्षणविधिः ॥

[येथें वेदीवर प्रोक्षणमंत्रानें ह्म० [ॐ अमृतेऽमृतोद्भवे इत्यादिमंत्रानें] पवित्र झालेल्या पाण्याचा शिंतोडा देणें, व त्या वेदीस कुंकू लावणें, अर्घ्य देणें, फुलाची माळ चढविणें, व नीराजनावतरण करणें; त्यानंतर वेदिकेवर मिठाची रास शोभेकरितां घालून, पूर्वादि आठ दिसेस स्वच्छ पाण्यानें भरलेले झळझळीत कळश ठेवणें. याला प्रोक्षणविधि ह्मणतात.]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथातो यागमंडलवर्त्तनाविधानम् ॥

स्रग्धरा० श्वेताः पीता हरीता लोहितरुचिरुचः शामलाश्चापि देवाः ।
श्वेताद्यै रत्नचूर्णैर्जिनमहसमये भक्तितो वेदिकायां ॥
अष्टार्धाष्टद्विरष्टत्रिचतुरभिहतास्तच्छदाब्जचतुर्द्धाः ।
कोणान्यल्पानि पंचैवक्रमनियबृहन्मंडलान्यालिखंतु ॥

ॐ ह्रीं श्वेतपीतहरितारुणकृष्णमणिचूर्णं स्थापयामि स्वाहा ।
पंचचूर्णस्थापनम् ॥

इंद्रवज्रा-श्रीनागराजः सितदेहदीप्तिः सद्वर्णवस्त्राभरणाद्युपेतः ।
यज्ञोचितां वेदिमलंकरोतु । पाणिस्फुरत्पांडुररत्नचूर्णैः ॥ २ ॥

ॐ ह्रीं नागराजाय अमिततेजसे स्वाहा । श्वेतचूर्णस्थापनम् ॥
सुवर्णवर्णाभरणांगरागो । विमानमाल्यादिमनोज्ञवेशः ।
सुवर्णवर्णो धनदो वितर्दीं । भक्त्या लिखेदुद्धसुवर्णचूर्णैः ॥३॥

ॐ ह्रीं हेमप्रभाय धनदाय ठठ स्वाहा । पीतचूर्णस्थापनम् ॥
लसत्प्रियंगूदलकायकांति- । स्तादृक्प्रभाकल्पसमीक्षणीयः ।
लिखाद्वितर्दीं लिखिताद्भितानीं । मंत्राश्मगर्भोत्तमरत्नचूर्णैः ॥४॥

ॐ ह्रीं हरितप्रभाय शत्रुमथनाय स्वाहा । हरितचूर्णस्थापनम् ॥
पद्मप्रभाभासुरदिव्यमूर्तिः । पद्माभदिव्यांबरभूषणो यः ।
वेद्यां सपर्या रचनां तनोतु । स पद्मरागोज्वलरत्नचूर्णैः ॥ ५ ॥

ॐ ह्रीं रक्तप्रभाय सर्ववशंकराय वषट् स्वाहा । अरुणचूर्णस्थापनम् ॥
श्वेतेतरच्छायशरीररश्मि । स्तद्वत्प्रभाकल्पयुतो दिवौकाः ।
करोतु वेद्यां रचनाविशेषं । तदिंद्रनीलोत्तमरत्नचूर्णैः ॥ ६ ॥

ॐ ह्रीं कृष्णप्रभाय मम शत्रुविनाशाय फट् घे २ स्वाहा ।
कृष्णचूर्णस्थापनम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथामरेंद्रः समुपेत्य भक्त्या । सुचित्रकायो वरवेदिकायाः ॥
विदिक्षु वज्राणि लिखेदमुष्य । करांबुजस्वीकृतरत्नचूर्णैः ॥ ७॥

वेदिकोणेषु प्रत्येकं वज्रद्वयमवस्थापयामि स्वाहा । वज्रस्थापनं ॥
इति यागमंडलवर्तनविधानं ॥

॥ अथ पंचपूजा ॥

अनु० आह्वयाम्यहमर्हंतं स्थापयामि जिनेश्वरं ।
सन्निधीकरणं कुर्वे पंचमुद्रान्वितं महे ॥ १ ॥

ॐ ह्रा अर्हत्परमेष्ठिन् अत्र अवतरावतर संवौषट् स्वाहा । ॐ ह्रीं अर्ह० अत्र तिष्ठ २ ठ २ स्वाहा, ॐ ह्रीं अर्ह० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ आह्वानस्थापनसन्निधिकिरणं ॥

द्रुतविलंबितः-कनककुंभभृतैर्जलपूरितै- । र्मलहरैर्वरसौरभपूरितैः ॥
परियजे जिनपादपयोजकं । सकलप्राणिभृतां सुखयोजकं ॥

ॐ ह्रीं अर्हन्नमः जन्मजरामृत्युविनाशनायजलंनिर्वपामि स्वाहा ॥१॥

मलयपर्वतजैः शुभनंदनैः । परिमलागतषट्पदचंदनैः ॥ परि० ॥

ॐ ह्रीं अर्हन्नमः सुगंधशरीरसंप्राप्तकाय ॥ गंधं ॥ २॥

अतिमनोहरशालिसुपुंजकैः । शशिकरैरिव दीर्घशरीरकैः । परि०॥

ॐ ह्रीं अर्हन्नमः अक्षयसुखसंप्राप्तकाय ॥ अक्षतान् ॥ ३ ॥

कमलचंपकजातिसुकेतकी । बकुलपाटलपुष्पसमूहकैः ॥ परि० ॥

ॐ ह्रीं अर्हन्नमः सुमनःसुखप्रदाय ॥ पुष्पं ॥ ४ ॥

घृतसुमोदकमंडलसंयुतै- । श्चरुवरैर्मणिभाजनसंस्थितैः ॥ परि० ॥

ॐ ह्रीं अर्हन्नमः क्षुद्रोगनिवारणाय ॥ चरुं ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुघनसारविशोभितदीपकैः। सुजनशोकविदाहनदक्षकैः। परि०॥
ॐ ह्रीं अर्हन्नमः केवलज्ञानप्रयाशकाय ॥ दीपं ॥ ६ ॥

अगरुचंदनचंद्रविमिश्रितै--। विविधवस्तुभृतैर्घनधूपकैः। परि०॥
ॐ ह्रीं अर्हन्नमः अष्टकर्मदहनाय ॥ धूपं ॥ ७ ॥

फलभरैः कनकाम्रसुदाडिमैः। सुरसगंधरसेन मनोहरैः॥ परि०॥
ॐ ह्रीं अर्हन्नमः अभीष्टफलदाय ॥ फलं ॥ ८ ॥

इंद्रवज्राः-तीर्थंकरणां कृतमष्टकाव्यं। श्रीराजपालेन कलाक्षतौघं।
जलादियुक्तं कविनाऽऽदिनोक्तं। मोक्षं तु सौख्यदि भणंतु भव्याः।
॥ अर्घ्यं ॥ ९ ॥

ततो जिनेंद्र० ॥ शांतिधारा। पुष्पांजलिः ॥ १० ॥
ॐ ह्रीं अर्हत्सिद्धाचार्योपाध्यायसर्वसाधुभ्यो नमः।
१०८ जाप्यं दद्यात् ॥

॥ अथ जयमाला ॥

गीतिः-जय जय जगत्रयाधिप जय जय मोहांधकारनीरजबंधो।
जय जय पुरुपरमेश्वर जय जय निःप्रतिविमलकेवलबोध॥१॥

पादाकुलकः-पुरुपरमेश्वर सुरनुत जय जय।
परमानंदसुखास्पद जय जय॥
अजितजिनाधिप अचलित जय जय।
विजितमनोभवभुजबल जय जय ॥ १ ॥

शंभव गंभीरांबुधे जय जय।
चुंबिततनुकीर्तीश्वर जय जय॥
अभिनंदन जिनवल्लभ जय जय।
इभरिपुपीठाधिष्ठित जय जय ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुमतिजिनाधिप सुरनुत जय जय ।
कुमतांबुधिवडवानल जय जय ॥
पद्मप्रभ परमेश्वर जय जय ।
पद्मासनपदपंकज जय जय ॥ ३ ॥

[1]वरसुपार्श्व जिनाधिप जय जय ।
निरुपमगुणगणनिलय भो जय जय ॥
चंद्रप्रभ परमेश्वर जय जय ।
रुद्रमुनीश्वरनुतपद जय जय ॥ ४ ॥

पुष्पदंत जिनपुंगव जय जय ।
पुष्पापुष्पसमीरण जय जय ॥
शीतलजिन परमेश्वर जय जय ॥
भूतलपतिनुतवंजित जय जय ॥ ५ ॥

[2]श्रेयांस परमेश्वर जय जय ।
आयतमुक्तिश्रीयुत जय जय ॥
वासुपूज्य [3]जिनवल्लभ जय जय ।
भासुरभव्यनिवासन जय जय ॥ ६ ॥

विमल श्रीरमणीपते जय जय ।
द्युमणिसहस्रद्युतियुत जय जय ॥
अनघानंत जिनेश्वर जय जय ।
घनकर्माटवीपावक जय जय ॥ ७ ॥

धर्मजिनेश्वर निर्मल जय जय ।
धर्माचलनिभनिश्चल जय जय ॥
शांतिजिनेश्वर शाश्वत जय जय ।
संततबोधनिवास भो जय जय ॥ ८ ॥

१ श्रीमत्सुपार्श्व २ श्रेयोजिन ३ पुंगव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुललित कुंथुजिनेश्वर जय जय ।
जलजनाभसुतजित जिन जय जय ॥
अर जिन सुव्रतधारक जय जय ।
परमश्रीकुचकुंकुम जय जय ॥ ९ ॥

मल्लिजिनेश्वर वल्लभ जय जय ।
सल्ललितोन्नत वंदित जय जय ॥
मुनिसुव्रत जिनकुंजर जय जय ।
मुनिवृंदारकवंदित जय जय ॥ १० ॥

नमितसुरेश्वर नमिजिन जय जय ।
क्रमकल्याणसुपंचक जय जय ॥
सुरपूजित नेमीश्वर जय जय ।
हरिवंशांबुधिहिमकर जय जय ॥ ११ ॥

श्रीमत् पार्श्व जिनाधिप जय जय ।
काममदेभमदभंजन जय जय ॥
वर्धमान जिनवल्लभ जय जय ।
सद्धर्मप्रतिपालक जय जय ॥ १२ ॥

आर्यागीतिः-जय नाथ जय जिनेश्वर जय जय कंदर्पदर्परिपुकुलमथन ।
जय नष्टघातिकर्मक जय जय देवेंद्रवृंदवंदितचरण ॥ अर्घ्यं ॥

॥ अथ सिद्धपूजा ॥

शार्दूलः-ऊर्ध्वाधोरयुतं सबिंदु सपरं ब्रह्मस्वरावेष्टितं ।
वर्गापूरितदिग्गतांबुजदलं तत्संधितत्वान्वितं ॥
अंतःपत्रतटेष्वनाहतयुतं ह्रींकारसंवेष्टितं ।
देवं ध्यायति यः स मुक्तिसुभगो वैरीभकंठीरवः ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ह्रीं सिद्धपरमेष्ठिन् अत्र अवतरावतर संवौषट् स्वाहा । ॐ ह्रीं सिद्ध० अत्र तिष्ठ २ ठठ स्वाहा । ॐ ह्रीं सिद्ध० अत्र मम सन्निहितो भव २ वषट् स्वाहा आह्वानस्थापनसन्निधीकरणं ॥

अनु० शुद्धैः शुद्धापगानीतैस्तोयैस्तापहरैर्वरैः ।
सिद्धचक्रमहं भक्त्या पूजयाम्यमृतश्रियै ॥

ॐ ह्रीं अर्हं अनाहतविद्याय अमिआउसा श्रीसिद्धाधिपतये नमः ॥
जलं निर्वपामि स्वाहा ॥ १ ॥

काश्मीरागरुसंजातैर्गंधैरिंदुमनोहरैः । सिद्धच० ॥
ॐ ह्रीं० ॥ गंधं ॥ २ ॥

कुंदेंदुवरसंकाशैरक्षतैः कलमाक्षतैः । सिद्धच० ॥
ॐ ह्रीं० ॥ अक्षतान् ॥ ३ ॥

मालतीवरपद्मानां पुष्पैरलिकुलावृतैः । सिद्धच० ॥
ॐ ह्रीं० ॥ पुष्पं ॥ ४ ॥

चरुभिर्दधिस्वच्छाच्छक्षीरभक्ष्यादिसंयुतैः । सिद्धच० ॥
ॐ ह्रीं० ॥ चरुं ॥ ५ ॥

रत्नदीपसमाकारैर्दीपैः कर्पूरकल्पितैः । सिद्धच० ॥
ॐ ह्रीं० ॥ दीपं ॥ ६ ॥

लोहेंदुवरसंकाशैर्धूपैः स्वर्गिमनोहरैः । सिद्धच० ॥
ॐ ह्रीं० ॥ धूपं ॥ ७ ॥

रुचकक्रमुकादीनां फलैः पक्वैर्मनोहरैः । सिद्धच० ॥
ॐ ह्रीं० ॥ फलं ॥ ८ ॥

इन्द्रवज्रा० शीतैर्जलैः कुंकुमयुक्तगंधैः । श्वेताक्षतौघैः प्रसवैर्नवेद्यैः ।
दीपैः सुधूपैः कदलीफलौघैः श्रीसिद्धचक्रं परिपूजयामि ॥ अर्घ्यं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनु० इत्येवं सिद्धचक्रस्य पूजामष्टगुणान्वितां।
सुगंधद्रव्ययुक्तेन शांतिधारां करोम्यहं ॥
शांतिधारा पुष्पांजलिः ॥

ॐ ह्रीं अनाहत विद्यायै असिआउसा ह्रीं नमः स्वाहा।
१०८ जाप्यं दद्यात्।

॥ अथ जयमाला ॥

शार्दूल० त्रैलोक्येश्वरवंदनीयचरणान् प्रापुः श्रियं शाश्वतीं।
यानाराध्य निरुद्धचंडमनसः संतोऽपि तीर्थंकरान्।
सत्सम्यक्त्वविबोधवीर्यविशदाव्याबाधिताद्यैर्गुणै- ।
र्युक्तांस्तानिह तोष्टवीमि सततं सिद्धान् विशुद्धोदयान् ॥ १ ॥

विराग सनातन शांत निरंस।
निरामय निर्भय निर्मल हंस ॥
सुधाम विबोधनिदान विमोह
प्रसीद विशुद्ध सुसिद्धसमूह ॥ १ ॥

विदूरितसंसृतिभाव निरंग। सदामृतपूरित देव विसंग ॥
अबंध कषायविहीन विमोह। प्रसीद० ॥ २ ॥

निवारितदुष्करकर्मविपाश। सदामलकेवलकेलिनिवास ॥
भवोदधिपारग शांत विमोह। प्रसीद० ॥ ३ ॥

अनंतसुखामृतसागर धीर। कलंकरजोभरभूरिसमीर ॥
विखंडितकाम विराम विमोहं। प्रसीद० ॥ ४ ॥

विकारविवर्जित तर्जितशोक। विबोधसुनेत्रविलोकितलोक ॥
विहार विरंग विराग विमोह। प्रसीद० ॥ ५ ॥

---

१ मल

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रजोमलखेदविमुक्त विगात्र । निरंतरनित्यसुखामृतपात्र ॥
सुदर्शनराजित नाथ विमोह । प्रसीद० ॥ ६ ॥

नरामरवंदित निर्मलभाव । अनंतमुनीश्वरपूजितपाद ॥
सदोदय विश्वमहेश विमोह । प्रसीद० ॥ ७ ॥

विडंब वितृष्ण विदोष विनिद्र । परापरशंकर सार वितंद्र ॥
विकोप विरूप विशंक विमोह । प्रसीद० ॥ ८ ॥

जरामरणोज्झित वीतविहार । विचिंतित निर्मल निरहंकार ॥
अचिंत्यचरित्र विदर्प विमोह । प्रसीद विशुद्ध सुसिद्धसमूह ॥ ९ ॥

विवर्ण विगंध विमान विलोभ । विमाय विकाय विशब्द विशोभ ॥
अनाकुल केवलसर्वविमोह । प्रसीद० ॥ १० ॥ ॥

घत्ता मालिनीः- असमसमयसारं चारुचैतन्यचिन्हं ।
परपरिणतिमुक्तं पद्मनंदींद्रवंद्यं ॥
निखिलगुणनिकेतं सिद्धचक्रं विशुद्धं ।
स्मरति नमति यो वा स्तौति सोऽभ्येति मुक्तिं ॥ अर्घ्यं ॥

॥ अथ कलिकुंडपूजा ॥

इन्द्रवज्रा० सिद्धं विशुद्धं महिमानवेशं दुष्टा । रिमारीग्रहदोषनाशं ।
सर्वेषु योगेषु परं प्रधानं । संस्थापये श्रीकलिकुंडयंत्रं ॥ १ ॥

ॐ ऱ्हीं कलिकुंडदंडचंडोग्रपार्श्वनाथ अत्र अवतरावतर संवैषट् स्वाहा । ॐ ऱ्हीं कलि० अत्र तिष्ठ २ ठठ स्वाहा । ॐ ऱ्हीं कलि० अत्र मम सन्निहितो भव वषट् स्वाहा । आह्वानस्थापनसन्निधीकरणं ॥

गंगापगातीर्थसुनीरपूरैः । शीतैः सुगंधैर्घनसारमिश्रैः ॥
दुष्टोपसर्गैकविनाशहेतु । समर्चये श्रीकलिकुंडयंत्रं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ऱ्हीं कलिकुंडदंडचंडोग्रपार्श्वनाथाय नम :।

जलं निर्वपामि स्वाहा ॥ १ ॥

श्रीचंदनैर्गंधविलुब्धभृंगैः। सर्वोत्तमैर्गंधविलासयुक्तैः। दुष्टोप०॥

ॐ ऱ्हीं क० ॥ गंधं ॥ २ ॥

चंद्रावदातैः सरलैः सुगंधै रनिंद्यपात्रैर्वरशालिपुंजैः। दुष्टोप०

ॐ ऱ्हीं क० ॥ अक्षतान् ॥ ३ ॥

मंदारजातीबकुलादिकुंदैः। सौरभ्यरम्यैः शतपत्रपुष्पैः। दुष्टोप०

ॐ ऱ्हीं क० ॥ पुष्पं ॥ ४ ॥

बाष्पायमानैर्घृतपूरपूरैर्नानाविधैः पात्रगतैरमाद्यैः। दुष्टोप० ॥

ॐ ऱ्हीं क० ॥ चरुं ॥ ५ ॥

विश्वावकाशैः कनकावदातैर्दीपैश्च कर्पूरमयैर्विलासैः। दुष्टोप०॥

ॐ ऱ्हीं क० ॥ दीपं ॥ ६ ॥

कर्पूरकृष्णागरुचंदनाद्यैर्धूपैः सुधूम्रैर्वरद्रव्ययुक्तैः। दुष्टोप० ॥

ॐ ऱ्हीं क० ॥ धूपं ॥ ७ ॥

खर्जूरराजादननालिकेरैराम्रैः फलैर्मोक्षफलाभिलाषैः। दुष्टोप०॥

ॐ ऱ्हीं क० ॥ फलं ॥ ८ ॥

आर्या:—जलचंदनविशदाक्षतलतांतचरुदीपधूपफलनिचहैः।
श्रीकलिकुंडाय वरं ददे पुष्पांजलिं विमलं ॥ अर्घ्यं

॥ शांतिधारा पुष्पांजलिः ॥

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं कलिकुंड दंड श्रीपार्श्वनाथाय अतुलबल वीर्यपयक्रमाय आत्मविद्यां रक्षरक्ष परविद्यां छिंद २ भिंद २ स्फ्रां स्फ्रीं स्फ्रं स्फ्रौं स्फ्रः हूं फट् स्वाहा ॥ १०८ जाप्यंदद्यात् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ जयमाला ॥

शार्दूलः-प्रोद्यत्सन्मणिनागनायकफणाटोपोल्लसन्मंडपं ।
सद्भक्त्या नमदिंद्रमौलिमणिभिर्भास्वत्पदांभोरुहं ॥
प्रोन्नीलं नवनीरदालिपटलीशंकासमुत्पादकं ।
ध्याये श्रीकलिकुंडदंडविलसच्चंडोग्रपार्श्वप्रभुं ॥ १ ॥

सुसिद्ध विशुद्ध विबोधनिदान । विकासितविश्वविवेकनिदान ॥
विडंबितकाम जगज्जयचंड । सदा सदयोदय जय कलिकुंड ॥१॥

पयोधिपयोधरधीरनिनाद । निराकृतनिर्मितदुर्मतवाद ॥
असत्यपथैकपतत्पविदंड । सदा स० ॥ २ ॥

निराकुल निर्मल शील निरीश । निराश निंजंरन जिनवरसिंह ।
विपाटितदुष्टमदद्विपगंड । सदा स० ॥ ३ ॥

कषायचतुष्टयकाष्ठकुठार । निरामय नित्य निरामयसार ॥
विदीर्णघनाघनविघ्नकरंड । सदा सदयोदय जय कलिकुंड ॥४॥

अनल्पविकल्प विनीलविकल्प । विशल्य विशूल्य विदर्प विसर्प ॥
विराग विभोग विखंड विमुंड । सदा स० ॥ ५ ।

फणेश नरेश सुरेश महेश । दिनेश शुभेश गुणेश गणेश ॥
चिदर्कविकासितशतदलतुंड । सदा स० ॥ ६ ॥

विशोक विशंक विमुक्तकलंक । विकासित विश्वविदूरितपंक ॥
कलाकुल केवलचिन्मयपिंड । सदा स० ॥ ७ ॥

विखंडितमोहमहीरुहखंड । वरप्रद संपद संपदमुंड ॥
त्रिदंडविखंडितमाय विखंड । सदा स० ॥ ८ ॥

घत्ताः—मालिनी-कलिलमथनदक्षं योगियोगोपदक्षं ।
ह्यविकलकलिकुंडं दंडपार्श्वप्रचंडं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शिवसुखशुभसंपद्वासवल्लीविसंतं ।
प्रतिदिनमहमीडेवर्धमानर्द्धिसिद्ध्यै ॥ जयमालार्घ्यं ॥

॥ अथ रत्नत्रयपूजा ॥

इंद्रवज्रा-भक्त्यांजसा वा व्यवहारतो वा युक्तो निजात्माऽपिच येन वार्तः ।
सद्दर्शनज्ञानचरित्ररूपं रत्नत्रयं तत्प्रति कल्पयेऽर्घ्यं ॥ १ ॥

ॐ ह्रीं व्यवहारनिश्चयरत्नत्रय अत्र अवतरावतर संवौषट् स्वाहा । ॐ ह्रीं व्य० अत्र तिष्ठ २ ठठ स्वाहा । ॐ ह्रीं व्य० अत्र तिष्ठ २ ठ २ स्वाहा । ॐ ह्रीं व्य० अत्र मम सन्निहितं भव २ वषट् स्वाहा । आह्वानस्थापनसन्निधीकरणं ॥

अनु०- स्वर्धुनीनीरधाराभिर्गंधसाराभिरादरात् ।
द्विधासद्दर्शनज्ञानचारित्राण्यर्चयाम्यहं ॥

ॐ ह्रीं व्यवहारनिश्चयरत्नत्रयाय जलं निर्वपामि स्वाहा ॥ १ ॥

हरिचंदननिर्यासैर्दिग्वासैः कासहारिभिः । द्विधा० ॥
ॐ ह्रीं व्य० गंधं ॥ २ ॥

तंडुलैः पांडुराखंडैः पुंजितै रलिगुंजितैः । द्विधा० ॥
ॐ ह्रीं व्य० ॥ अक्षतान् ॥ ३ ॥

प्रसूनैः सौरभानूनैरनूनैर्दूनदुर्लभैः । द्विधा० ॥
ॐ ह्रीं व्य० ॥ पुष्पं ॥ ४ ॥

सान्नायैस्तर्जितान्नायैर्निकायैर्गुणसंपदां । द्विधा० ॥
ॐ ह्रीं व्य० ॥ चरुं ॥ ५ ॥

प्रदीपैर्दीपिकाशेषदिक्चक्रनयनप्रियैः । द्विधा० ॥
ॐ ह्रीं व्य० ॥ दीपं ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धूपनैर्धूमधूताभ्रविभ्रमैर्भ्रमरभ्रमैः । द्विधा० ॥
ॐ ह्रीं व्य० ॥ धूपं ॥ ७ ॥

फलभेदैरसस्पर्शगंधवर्णादिसंभवैः । द्विधा० ॥
ॐ ह्रीं व्य० ॥ फलं ॥ ८ ॥

अर्घ्येणाऽर्घ्याबुदूर्वादिद्रव्यसर्वस्वहारिणा द्विधा० ॥
ॐ ह्रीं व्य० ॥ अर्घ्यं ॥ ९ ॥

इत्यर्चयंति ये भेदाभेदरत्नत्रयं सदा ।
ते शिवाः सादरं मुक्तिश्रियो विंदंति निर्वृतिम् ॥
शांतिधारा । पुष्पांजलिः ॥ १० ॥

ॐ ह्रीं व्यवहारनिश्चय रत्नत्रयाय नमः स्वाहा ॥ ३ जाप्यंदद्यात् ।

॥ अथ जयमाला ॥

इह चरित्त पवित्तउ बहुगुणजुउ । अग्घउत्तरणिय वरकरउ ॥
तिवपयाहि णादिविणुभावधरिंपिणु । वरचणहु अग्गयिट्ठाणहु ॥
णिच्चयदंसणबोधचरित्तं । मोक्खपहेकसुदंसिदमग्गं ॥
भव्वजणीविरचय्यमहग्घं । संपग्गजे परमोस्सवजुत्तं ॥ १ ॥

महग्ध करे विधरेवि महंतु । सुकाहलातूरहभेरिय हतुं ॥
सुरचर मंगल चारु भणंति । सुणारय तुंबर गीय कुणंति ॥ २ ॥

तिलोत्तम उव्वसी रंभ णडंति । सुरिंद णरिंद फणिंद थुवंति ।
सुमालयिकुंदकयंबसुमिंदु । लवंगणिवालियचंपयरिंदु ॥ ३ ॥

सुकेयूरकंकणयारुमयारु । रुहेडीयपाडलजूयीयसारु ॥
आसोहीयवंतीय पारीयजाय । सुवेलासेवंतिखुज्जयणाय ॥
सुपोहुमाहंसिरिपदजा सुमणेहि । सुउच्चलियउ अग्घ बुहेहि घणेहि ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

घत्ता ॥ इह कुसुमसमिंदउ वरचउरिंदउ । कणयथालु सुरवर धरियो ॥
पलुपिंपयासिउ अलियणभासिउ । विवहरासिद्धिहि परियरिउ ॥ अर्घ्यं ॥

॥ अथ श्रुतपूजा ॥

वसंतः--स्याद्वादकल्पतरुमूलविराजमानां ।
रत्नत्रयांबुजसरोवरराजहंसीं ॥
अंगप्रकीर्णकचतुर्दशपूर्वकाय ।
मार्हत्यसद्गुणमयीं गिरमाह्वयामि ॥ १ ॥

ॐ ऱ्हीं अर्हन्मुखोत्पन्न शारदादेवि अत्र अवतरावतर संवौषट् स्वाहा । ॐ ऱ्हीं शा० अत्र तिष्ठ २ ठठ स्वाहा । ॐ ऱ्हीं शा० अत्र मम सन्निहिता भव २ वषट् स्वाहा ॥ आह्वानस्थापनसन्निधीकरणं ॥

आर्याः—श्रीमदपुनर्भवश्रीकरतलधारापुरःसरैर्नीरैः ।
परिमलितदिक्तटांतैः परमागमभारतीं चाये ॥
ॐ ऱ्हीं शब्दब्रह्ममुखोत्पन्नश्रुतशारदादेव्यैजलंनिर्वपामि स्वाहा ॥१॥
श्रीमन्निवृतिरमणीतिलकीभूतैश्चंदनक्षोदैः । परि० ॥
ॐ ऱ्हीं शब्द० ॥ गंधं ॥ २ ॥
श्रीमन्मुक्तेरमूढाकरतलधारार्पितैः सदकैः । परि० ॥
ॐ ऱ्हीं शब्द० ॥ अक्षतान् ॥ ३ ॥
श्रीमदपवर्गलक्ष्म्या जिनवरितैः प्रकल्पितैर्माल्यैः । परि० ॥
ॐ ऱ्हीं शब्द० ॥ पुष्पं ॥ ४ ॥
श्रीमदमृतांगनाया हृद्यैरमृतोपमैर्हव्यैः । परि० ॥
ॐ ऱ्हीं शब्द० ॥ चरुं ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीमत्सिद्धरमायाः कल्याणविबोधितैर्दीपैः । परि० ॥
ॐ ऱ्हीं शब्द० ॥ दीपं ॥ ६ ॥
श्रीमदजरामरश्रीवाससंवासितैर्धूपैः । परि० ॥
ॐ ऱ्हीं शब्द० ॥ धूपं ॥ ७ ॥
श्रीमदनंतचतुष्टयफलैः फलैः स्वर्णपरिपाकैः । परि० ॥
ॐ ऱ्हीं शब्द० ॥ फलं ॥ ८ ॥

इंद्रवज्रा-नीरादिवस्तूत्करनिर्मितेन । चार्घ्येण भक्त्याऽऽगम तेऽभिसिध्यै ।
वाग्वादिनीं जैनमुखप्रजातां । प्रार्चामि लोकत्रयसेव्यमानां । अर्घ्यं ।

अनुः–इत्यमीभिः समाराध्य पूजाद्रव्यैः श्रुतं वरं ।
भवसंतापविच्छेदं शांतिधारां करोम्यहं ॥ शांतिधारा ॥ पुष्पांजलिः ॥
ॐ ऱ्हीं श्रीं क्लीं वाग्वादिनी वद २ नमः स्वाहा ॥ ४ ॥

॥ अथ जयमाला ॥

श्रीजिनवरवाणी अभियसुवाणी । गंभीरमधुरसुवाणीया ॥
समदुखविरहिता वहुगुणसहिता । मनोहररळिया वाणीया ॥१॥
सुकंठविओष्ठविरहितसुचंगा । सुअंगविपूर्वकसहितविभंगा ॥
सुसुमतिपूर्वकसुज्ञानविशाळा । ते पूजो जिनवाणी गुणमाळा ॥१॥
सुएक अनेक प्रदेशसुखाणी । सुदूरयि सम सम सुनयसुजाणी ॥
सुशीतळपण ससिकळ सुविशाळा । ते पू० ॥ २ ॥
सुतत्वप्रकाशनदीपहतेजा । सुपढता भवियण उपदेशहेजा ॥
सुमिथ्यात्वतिमिर फेडनसुविशाळा । ते पू० ॥ ३ ॥
सुपरब्रह्ममुखकमळायोत्पन्ना । सुबारह अंगसहितसुचंगा ॥
सुसरस्वती वाग्देवी सुवीयशाळा । ते पू० ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुपहिलो आचारंग विजाणी । सुदूजो सूत्रकृत बखाणी ॥
सुतीजो स्थानंग सुवीयशाळा । ते पू० ॥ ५ ॥
सुचवथो समवायंग सुचंगा । सुपंचमो व्याख्याप्रज्ञाप्तियभंगा ।
सुछट्टोज्ञातृकथा सुविशाळा । ते पू० ॥ ६ ॥
सुसातमो उपवासक गुणवंता । सुआठमो अंतकृत जयवंता ॥
सुनवमो अनुत्रयअंग विशाला । ते पू० ॥ ७ ॥
सुदशमो प्रश्नव्याकरणविचंगा । सुग्यारमो विपाकसूत्र उत्तुंगा ॥
सुबारमो दृष्टिवाद सुविशाळा । ते पू० ॥ ८ ॥
सुजिनवरमुखकमळायोत्पन्ना । सुद्वादशअंगश्रुत निःपन्ना ॥
सुगणधरग्रंथित ज्ञानविशाळा । ते पू० ॥ ९ ॥
सुमुनिवरविस्तारित गुणवंता । सुत्रिभुवनमहिमाजित जयवंता ॥
सुभारती सारद गुणहाविशाळा । ते पू० ॥ १० ॥
सुभवियणवंदित त्रिभुवनतारा । सुजिनशासनशोभित सिनगारा ॥
सुरेंद्रनरेंद्रसेवित सुविशाळा । ते पू० ॥ ११ ॥

घत्ता ॥ अज्ञानतिमिरहरो सुज्ञानदिवाकरो ।पढी गणी जे भावधरी ॥
ब्रह्मजिनदास भाषे विबुधप्रकासे । मनवांछितफलबुद्धि घणी ॥ अर्घ्यं ॥

॥ अथ गुरुपूजा ॥

अनु० समनःपर्ययज्ञानश्रुतसागरपारगान् ।
आचार्यवर्यस्वामीनां पंचाचारपरायणान् ॥

ॐ ह्रीं नमः सार्द्धद्वयद्वीपवर्तिसर्वसाधुसमूह अत्र अवतरतावतरत संवौषट् । ॐ ह्रीं नमः सा० अत्र तिष्ठत २ ठठ स्वाहा । ॐ ह्रीं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नमः सा० अत्र मम सन्निहिता भवत २ वषट् स्वाहा । आह्वान–स्थापनसन्निधीकरणं ॥

इंद्रवज्रा-श्रीशातकुंभोत्तमकुंभपूर्णै- । रंभोभिरुच्चैः सुमनः सुगंधैः ।
वर्तस्यमानानिह वर्तमानान् । वृत्तान् यजे श्रीनवकोटिसाधून् ॥
ॐ ह्रीं नमः सार्द्धद्वयद्वीवर्तिसर्वसाधुसमूहाय जलं निर्वपामि स्वाहा ॥१॥
श्रीगंधसारैरिव साधुवर्गै- । राशांबरामोदिभिरिंदुमिश्रैः ॥वर्त्त०॥
ॐ ह्रीं नमः सा० गंधं ॥ २ ॥
रत्नत्रयेणेव सतां सितेन । पुंजत्रयेणाक्षतसत्तमेन । वर्त० ॥
ॐ ह्रीं नमः सार्द्धद्वयद्वीपवर्तिसर्वसाधुसमूहाय अक्षतान् ॥ ३ ॥
इंद्विंदिराऽऽलिंगितनव्यपुष्पैः संस्तूयमानैरिव साधुवर्गैः । वर्त० ॥
ॐ ह्रीं नमः सा० ॥ पुष्पं ॥ ४ ॥
आत्मानमाल्हादयितेन शुक्ल । ध्यानेन तेषां चरुणा वरेण । वर्त० ॥
ॐ ह्रीं नमः सा० ॥ चरुं ॥ ५ ॥
ज्ञानप्रदीपैरिव सन्मुनीनां । मनोहरद्भिर्मणिदीपवृंदैः । वर्त० ॥
ॐ ह्रीं नमः सा० ॥ दीपं ॥
आमोदिताशैरिव संयतानां । गुणैः सुकालागरुधूपधूमैः ॥ वर्त० ॥
ॐ ह्रीं नमः सा० ॥ धूपं ॥ ७ ॥
फलैरुदकैरिव साम्ययाऽक्षै । रानंदनैश्चोचरसालमुख्यैः ॥ वर्त० ॥
ॐ ह्रीं नमः सा० ॥ फलं ॥ ८ ॥
श्रीहेमपात्रे निहितेन भास्व । दर्घ्येण वारादिकस्वस्तिकेन । वर्त० ॥
ॐ ह्रीं नमः सा० अर्घ्यं ॥ ९ ॥

अनु० गुरुभक्त्या वयं सार्धद्वीपद्वितयवर्तिनः ।
वंदामहे त्रिसंख्योननवकोटिमुनीश्वरान् ॥
शांतिधारा । पुष्पांजलिः ॥ १० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ऱ्हीं आचार्यादिपंचपरमेष्ठिभ्यो नमः
या मंत्रानें ३ जाप करणें.

॥ अथ जयमाला ॥

सकल मुनीश्वर नमितसुरासुर । अनुदिन चरणकमल नमो ॥
तुह्म परसादे मन आल्हादे । स्तवन करी बहुदुःख गमो ॥१॥
खुएक आतमध्यानसहित नमो । दुइ रागद्वेष परिहरित नमो ॥
तीनि रयणमंडितवरकाय नमो । चउकषायरहित वरपाय नमो ॥२॥
पंचाचारविचार नमो पंचाश्रवआश्रवरहित नमो ॥
पंचेंद्रियशोषितगात्र नमो ॥ पंचमगतिसाधित तात नमो ॥ ३ ॥
षट्कायदयाकर वीर नमो । षड्द्रव्यप्रकाशन धीर नमो ॥
षट्षड्मनचिंतित देव नमो । षट्काल बखाणित सेव नमो ॥ ४ ॥
भय सात रहित गुणवंत नमो । गुणस्थान सात जयवंत नमो ॥
आठ ध्यानसहित मुनिकाय नमो । आठ मदरहित यतिपाय नमो ॥५॥
नव नयकलित गंभीर नमो । नवविध शील पालीत नमो ॥
दशलक्षणधर्म प्रकाश नमो । दशधर्मध्यान आवास नमो ॥ ६ ॥
दहएक पडिम उपदेश नमो । दहदूविध तपस्वी ईश नमो ॥
दहतीनि चरण पालीत नमो । दहचारी मल टाळीत नमो ॥ ७ ॥
दह पंच प्रमाद विरहित नमो । दहषट् परिभावनसहित नमो ॥
दहसात संयम गुणवंत नमो । दह आठ दोष दुरिकरण नमो ॥ ८ ॥
दहआठ सहस्र शील चरण नमो । दह नव मासक जीव हरण नमो ॥
दहदह वर मार्गण कथित नमो । दह दह एक चतुर्गुणलक्ष नमो ॥९॥
दहदह दू परीसह सहन नमो । दह दह तीनि स्थानकलीत नमो ॥
दह दह चतुर्जिनवरपाय नमो । दह दह पण भावन भावीत नमो ॥१०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इह गुण अधिगुणवंत नमो । निर्ग्रंथ मुनी जयवंत नमो ॥
गणधर यतिवरपाय नमो । मन वचन सफल करु काय नमो ॥ ११ ॥

तिहुयणजनपूजीत चरण नमो । तिहुयण भवियण उद्धरण नमो ॥
तं तरण तारण भवतरंड नमो । करुणारससमकरंड नमो ॥ १२ ॥

धर्म शुक्लध्यान धरण नमो । गुणस्थानश्रेणिआरूढ नमो ॥
श्रीकेवलज्ञान उद्योत नमो । श्रीमुक्तिरमणिवरकांत नमो ॥ १३ ॥

घत्ता—श्रीमुनीश्वर स्वामी नमू शिर नामी ।
दोई कर जोडी विनय करू ॥
दीक्षा अति निर्मली देउ मज उज्वळी ।
ब्रह्मजिनदास भणे कृपा करी ॥ १४ ॥
इति जयमाला अर्घ्यं । इति पंचपूजा समाप्ता ॥

॥ अथ नवदेवताविधानम् ॥

अनु० अथाधिवास्य चिद्रूपमित्यादि विधिना परं ।
ब्रह्मार्हदादिधर्मं च मध्यमंडलमर्चये ॥ १ ॥
इति पठित्वा यंत्रोपरि पुष्पांजलिं क्षिपेत् ॥

स्रग्धरा० निर्ग्रंथार्याः प्रसादं कुरुत पदमिहादत्त सद्धर्मदीप्त्यै ।
देवाः सर्वेऽच्युतांता विकुरुत सुतनोः क्ष्मामिमामेव शांत्यै ॥
क्षिप्त्वा कर्मारिचक्रं किमपि तदशमं स्फूर्जदावर्जतेजाः
सो ध्यायं शासदीशस्त्रिजगदिह परं स्थाप्यतेऽनुग्रहे तु ॥
प्रभावकसिंहसान्निध्यविधानाय समंतात्पुष्पाक्षतं क्षिपेत् ॥ २ ॥

स्रग्धरा० एते वर्षंत्विहाशीरमृतमृषिगणाः साधु हुत्वाऽभिराध्या ।
विश्वे देवाश्च शास्त्रं वृजिनपरिजनान् घ्नंतु विघ्नानि ह्येते ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थानस्था एव चैनं सहसुरमुनयस्तेऽहमिंद्राः स्तुवंतः ।
श्रद्धत्वार्यो महाऽयं जिनयजनविधौ प्रस्तुवे दिव्यसिद्धान् ॥ ३ ॥
त्रिभुवनसाधर्मिकाद्येषणाय समंतात् कुंकुमाक्तपुष्पाक्षतं क्षिपेत् ॥

शार्दूल:—दृक्शुध्यादिसामिद्धशक्तिपरमब्रह्मप्रकाशोध्दुरं ।
शब्दब्रह्मशरीरमीरितपदं तन्मूलमंत्रादिभिः ॥
इंद्राद्यैरभिराध्यते तदभितो दीप्ताग्निसूक्ष्मासने ।
न्यस्याऽर्चामि सुभक्तिमुक्तिदमहं ब्रह्मार्हमित्यक्षरं ॥ ४ ॥

शब्दब्रह्मार्चनाय कर्णिकामध्ये पुष्पांजलिं क्षिपेत् ॥

स्रग्धरा- चिद्रूपं विश्वरूपं व्यतिकलितमनाद्यंतमानंदसांद्रं ।
यत्प्राप्तैस्तैर्विवृत्तैर्व्यहरदधिपतेर्दुःखसौख्याभिमानैः ॥
कर्मोद्रेकात्तदात्मप्रत्ययमलभिदोद्भिन्ननिःसीमतेजः ।
प्रत्यासीदत्परौजः स्फुरदिह परमब्रह्मयज्ञार्हमर्हं ॥ ५ ॥

ॐ ह्रीं परमब्रह्मयज्ञप्रतिज्ञापनाय कर्णिकांतः कुसुमांजलिं क्षिपेत् ॥

शालिनी-स्वामिन्संवौषट्कृताह्वाहनस्य ॥ द्विष्ठांतेनोट्टंकितस्थापनस्य ॥
स्वाहानिर्विंष्टे वषट्कारजाग्रे । सान्निध्यस्य प्रारभे ह्यष्टधेष्टिं ॥ ६ ॥

आर्या—मलयरुहललिततंडुलपुष्पैरधिवासनं जिनेंद्रस्य ।
संवौषट् ठठ वषडिति पल्लवमंत्रैस्त्रिकरणैः कुर्वे ॥ ७ ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं अर्हत्सिद्धाचार्योपाध्यायसर्वसाधुजिनधर्मजिनागमजिनचैत्यचैत्यालयाश्च नवदेवता अत्र अवतरतावतरत संवौषट् स्वाहा । आह्वानं ॥ ॐ० अर्ह० अत्र तिष्ठत२ ठठ स्वाहा ॥ स्थापनं ॥ ॐ० अर्ह० अत्र मम सन्निहिता भवत २ वषट् स्वाहा ॥सन्निधीकरणम्॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ सामुदायिक अष्टकम् ॥

शार्दूल० गांगेयोज्वलमंगलात्मकमहाभृंगारनालोद्गतै-।
गंगाद्युत्तमतीर्थसारसलिलैर्गंधात्तभृंगव्रजैः ॥
चायेऽहं जिनसिद्धसूरिविमलान् सत्पाठकं साधवं ।
जैनेंद्रोक्तसुधर्ममागममथो चैत्यं च चैत्यालयं ॥
ॐ ह्रीं अर्हत्सिद्धाचार्योपाध्यायसर्वसाधुजिनधर्मजिनागमजिनचैत्यजिनचैत्यालयनवदेवतेभ्यो जलं निर्वपामि स्वाहा ॥ १ ॥

श्रीगंधैर्वरगंधसिंधुरमदोन्मत्तालिभिः स्नापकैः ।
पूतैः शीतलरश्मिधूलिकलितैः काश्मीरसंमिश्रितैः ॥
चायेऽहं० ॥ ॐ ह्रीं० अर्ह० ॥ गंधं ॥ २ ॥

श्रीमत्पार्वणशार्वरीशशिकरज्वालोरुलीलाधरैः ।
पूतैः शीतलरश्मिगंधमधुरैः शाल्यक्षतैश्चर्चितैः ॥
चायेऽहं० ॥ ॐ ह्रीं० अर्ह० ॥ अक्षतान् ॥ ३ ॥

फुल्लैर्मल्लिमतल्लिकाकुवलयश्रीकेतकीजातिका- ।
सत्सौगंधकबंधुजीववकुलैर्माल्यैरलिश्लाघ्यकैः ।
चायेऽहं० ॥ ॐ ह्रीं० अर्ह० ॥ पुष्पं ॥ ४ ॥

हव्यैर्नव्यघृतान्वितैर्जनमनःसंव्यंजनैर्व्यंजनै- ।
र्भक्ष्यै रक्षसुखप्रदैर्वरसुधामाधुर्यधौर्यायकैः ।
चायेऽहं० ॥ ॐ ह्रीं० अर्ह० ॥ चरुं ॥ ५ ॥

चंद्रार्कद्युतिहार्यतीर्यदुरितध्वांतौघविध्वंसकैः ।
सद्दिव्योत्तमभावशुद्धिसदृशैरुद्यत्प्रदीपव्रजैः ।
चायेऽहं० ॥ ॐ ह्रीं० अर्ह० ॥ दीपं ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भद्रश्रीहिमवालुकालविहितैर्धूपै रसैः कर्णिका।
नासत्काम्यकटाक्षसौम्यसुरभिश्राम्यैः सुधूम्याभरैः ।
चायेऽहं० ॥ ॐ ह्रीं० अर्हं० ॥ धूपं ॥ ७ ॥
सद्योऽभीष्टफलप्रदानमधुरै रद्यानद्योत्तम— ।
द्राक्षादाडिमजंबुजंभरुचकादीत्येवचोच्चैः फलैः ।
चायेऽहं० ॥ ॐ ह्रीं० अर्हं० ॥ फलं ॥ ८ ॥
अर्घ्येणार्घ्यमहामहारजततत्पात्रादिसंरंजितं ।
सिद्धार्थादिसुमंगलार्थवरवर्गापाद्यनर्घ्यश्रियै ।
चायेऽहं० ॥ ॐ ह्रीं० अर्हं० ॥ अर्घ्यं ॥९॥ ततो जिनें०शांतिधारा

वसंतः—देवेंद्रवृंदमणिमौलिसमार्चितांघ्रि— ।
देवाधिदेवपरमेश्वरकीर्तिभाजः ॥
पुष्पायुधप्रमथनस्य जिनेश्वरस्य ।
पुष्पांजलिं विरचितोऽस्तु विनेयशांत्यै ॥ १० ॥ पुष्पांजलिः ॥

॥ अथ प्रत्येकपूजा ॥

अनुः—सिंध्वादिनादिसत्तीर्थादानीतैर्विमलैर्जलैः ।
श्रीजिनेंद्रांघ्रिपंकेजद्वंद्वमंचेऽघमुक्तये ॥ १ ॥
ॐ ह्रीं अर्हं नमः परमेष्ठिने ॥ जलं निर्वपामि स्वाहा ॥ १ ॥
चंद्रचंदनकालादिगंधद्रव्योत्थगंधकैः ।
श्रीजिनें० ॥ ॐ ह्रीं० ॥ गंधं ॥ २ ॥
अक्षतैरक्षतैरोघैर्लक्ष्मीलक्षणलक्षितैः ।
श्रीजिनें० ॥ ॐ ह्रीं० ॥ अक्षतान् ॥ ३ ॥
गंधलुब्धादिसंगीतैस्तुंगपद्मादिपुष्पकैः ।
श्रीजिनें० ॥ ॐ ह्रीं० ॥ पुष्पं ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हव्यैर्नव्यांशुभक्षेयसारदुग्धादिसंयुतैः ।
श्रीजिनें० ॥ ॐ ह्रीं० ॥ चरुं ॥ ५ ॥

सत्सोमदीपसंदोहै रपवर्गसुखप्रदैः ।
श्रीजिनें० ॥ ॐ ह्रीं० ॥ दीपं ॥ ६ ॥

धूपैः श्रीखंडकर्पूरकाश्मीरागरुमुख्यकैः ।
श्रीजिनें० ॥ ॐ ह्रीं० ॥ धूपं ॥ ७ ॥

जंबूजंबीरकाम्राम्रचोचमोचादिसत्फलैः ।
श्रीजिनें० ॥ ॐ ह्रीं० ॥ फलं ॥ ८ ॥

अर्घ्यैरनर्घ्यपात्रस्थैर्नारिगंधादिनिर्मितैः ।
श्रीजिनें० ॥ ॐ ह्रीं० ॥ अर्घ्यं ॥

एवं जिनेंद्रमभ्यर्च्य सुरसंदोहपूजितं ।
वार्धारा तु जगच्छांत्यै श्रीपीठाग्रे कृताऽर्हतः ॥
शांतिधारा ॥ देवेंद्रवृंदमित्यादि ॥ पुष्पांजलिः ॥

॥ अथ सिद्धार्चनम् ॥

स्वागता-स्वाहृतैः परमपावनतीर्थवारिभिर्विधुरजःपरिमिश्रैः ।
सिद्धमष्टगुणयुक्तमनंतं पूजयामि वरनिर्वृतिसिध्यै ॥

ॐ ह्रीं सिद्धपरमेष्ठिने जलं निर्वपामि स्वाहा ॥

जोंगकेंदुहरिचंदनधीरद्रव्यजैः श्रमहरैर्वरगंधैः ।
सिद्ध० ॥ ॐ ह्रीं सि० ॥ गंधं ॥

इंदुकुंदवरमुक्तिसुहारैः श्वेतकैः कलमतंडुलपुंजैः ।
सिद्ध० ॥ ॐ ह्रीं सि० ॥ अक्षतान् ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चंपकाब्जबकुलोत्पलजातीमल्लिकाकुरवकादिलतांतैः ।
सिद्ध० ॥ ॐ ह्रीं सि० ॥ पुष्पं ॥ ४ ॥

भक्ष्यभक्तघृतपायसपूर्वैर्हेमभाजनगतैश्चरुभिश्च ।
सिद्ध० ॥ ॐ ह्रीं सि० ॥ चरुं ॥ ५ ॥

भव्यकिल्बिषतमश्चयनाशैरंगिमोक्षसुखदैर्विधुदीपैः ।
सिद्ध० ॥ ॐ ह्रीं सि० ॥ दीपं ॥ ६ ॥

लोहपीतनसिताभ्रसुरम्यैश्चंदनादिजदशांगसुधूपैः ।
सिद्ध० ॥ ॐ ह्रीं सि० ॥ धूपं ॥ ७ ॥

नालिकेरकदलीफलपूराम्रादिजैः फलकुलैः परिपक्वैः ।
सिद्ध० ॥ ॐ ह्रीं सि० ॥ फलं ॥ ८ ॥

वसंतः—वार्गंधतंडुलसमुद्गमहव्यदीप— ।
धूपप्रकृष्टफलनिर्मितमेतदर्घ्यं ॥
संप्रस्तुतं रुचिरकांचनजातपात्रे ।
सिद्धाय सिद्धसुखदाय मुदा ददेऽहं ॥ अर्घ्यं ॥ ९ ॥

इंद्रवज्रा:—श्रीखंडसोमांघ्रिविभूतिधूली । संवासितैस्तीर्थजलैः प्रकुर्वे ।
सच्छांतिधारात्रयमग्रतोऽस्य । श्रीसिद्धलोकत्रयसर्वशांत्यै ॥
शांतिधारा ॥ १० ॥

मालिनीः—परिमलमयकुंदेंदूवरांभोजमुख्यै— ।
रलिकुलनिनदैः पुष्पांजलिं सत्प्रसूनैः ॥
निखिलसुजनतापव्यापसंहारिणोऽग्रे ।
निरुपमगुणवार्द्धेः सिद्धनाथस्य कुर्वे ॥ पुष्पांजलिः ॥ ११ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ आचार्यार्चनम् ॥

इंद्रवज्रा० सन्नासिकामोदकृतेंदु मिश्रै-। स्तोयैरघश्यामहरैः पवित्रैः।
चाये मनःपर्ययबोधयुक्तं। श्रीधर्मसूरिं श्रुतपारगं तं॥
ॐ ह्रूँ आचार्यपरमेष्ठिने जलं निर्वपामि स्वाहा॥ १॥
श्रीखंडकर्पूरसुजोंगकादि। द्रव्योत्थगंधैर्विधुभानुशीतैः।
चाये०॥ ॐ ह्रूँ आ०॥ गंधं॥ २॥
सद्धर्मपुंजैरिव सौख्यदानै। रजस्रगौरैर्वरतंडुलौघैः।
चाये०॥ ॐ ह्रूँ आ०॥ अक्षतान्॥ ३॥
बंदूकमंदारमहोत्पलादि। पुष्पोत्करैर्भृंगसमूहनादैः।
चाये०॥ ॐ ह्रूँ आ०॥ पुष्पं॥ ४॥
सामोदबाष्पान्वितशालिभक्ता। पूपाज्यदुग्धादियुतैः सुहव्यैः।
चाये०॥ ॐ ह्रूँ आ०॥ चरुं॥ ५॥
दीपैर्जगत्पापतमोविनाशैः। सत्कांचनारित्रसमादिरूपैः॥
चाये०॥ ॐ ह्रूँ आ० दीपं॥ ६॥
सद्योवनेंदूत्तमभीरलोह। श्रीचंदनाद्युद्भवसारधूपैः॥
चाये०॥ ॐ ह्रूँ आ०॥ धूपं॥ ७॥
जंबीरजंबूफलपूरधात्री। रंभाम्रघोंटाम्लफलैः सदिष्टैः।
चाये०॥ ॐ ह्रूँ आ०॥ फलं॥ ८॥
अर्घ्येण सद्भाजनमध्यगेन। वार्गंधकाद्यै रचितेन पूतैः।
चाये० ॐ ह्रूँ आचार्यपरमेष्ठिने॥ अर्घ्यं॥ ९॥
संवासितैर्मंजुसुगंधचूर्णै-। र्लोकप्रकृष्टामलदिव्यतोयैः।
सच्छांतिधारात्रयमातनोमि। श्रीधर्मसूर्यंघ्रिमहोत्पलाग्रे॥
शांतिधारा॥ १०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इंद्रवज्रा० सच्चंचरीकावृतमल्लिकाब्ज । श्रीमालतीकेतकिमुख्यपुष्पैः ।
पुष्पांजलिं तं प्रकरोमि भक्त्या । सूरेः पदाग्रे यतिवंदितांघ्रेः ॥
पुष्पांजलिः ॥ ११ ॥

॥ अथ पाठकार्चनम् ॥

अनुः—सुगंधचूर्णवासितैर्विधुश्रितैः सुसज्जलैः ।
सुपाठकेंद्रमष्टतः प्रपूजयामि सिद्धये ॥
ॐ ह्रौं उपाध्यायपरमेष्ठिने जलं निर्वपामि स्वाहा ॥ १ ॥

वरेंदुचंदनादिजैः सुरेंद्रवंद्यगंधकैः ।
सुपा० ॥ ॐ ह्रौं उ० ॥ गंधं ॥ २ ॥

मृगांकभानुपांडुरैर्गतस्तुषैः सदक्षतैः ।
सुपा० ॥ ॐ ह्रौं उ० ॥ अक्षतान् ॥ ३ ॥

लतांबुजोत्पलादिकैर्लतांतकैः सुसंरसैः ।
सुपा० ॥ ॐ ह्रौं उ० ॥ पुष्पं ॥ ४ ॥

अपूपभक्तकादिकैर्मनोहरैः सुहव्यकैः ।
सुपा० ॥ ॐ ह्रौं उ० ॥ चरुं ॥ ५ ॥

हिमसुधेशसंचयैः क्षतैरघतमश्चयं ।
सुपा० ॥ ॐ ह्रौं उ० ॥ दीपं ॥ ६ ॥

सुरेंदुलोहकादिकैः सुधूपकैः सुधूमकैः ।
सुपा० ॥ ॐ ह्रौं उ० ॥ धूपं ॥ ७ ॥

मनोऽक्षनासिकाहरै रसालकादिसत्फलैः ॥
सुपा० ॥ ॐ ह्रौं उ० ॥ फलं ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जलगंधादिभिर्द्रव्यैः कृतेनार्घ्येण पावनैः ।
अंचामि तमुपाध्यायपरमेष्ठिनमिष्टितं ॥ अर्घ्यं ॥ ९॥

शांतिं कुर्वंतु जगतां शांतये शांतिधारिणां ।
उपाध्यायपदस्याग्रे कुर्वे पुष्पांजलिं मुदा ॥
शांतिधारा । पुष्पांजलिः ॥ १० ॥

॥ अथ सर्वसाध्वर्चनम् ॥

वसंततिलका-श्रीपुण्यतीर्थसलिलैरमृतांशुधूली ।
संमिश्रितैर्मुनिमनोभिरिवातिपूतैः ॥
सध्यानमौनयुतमस्तमनोजमानं ।
श्रीसर्वसाधुपरमेष्ठिनमर्चयामि ॥
ॐ ह्रः सर्वसाधुपरमेष्ठिने जलं निर्वपामि स्वाहा ॥ १ ॥
सद्बंधुरागरुसुपीतनकुंकुमेंदु । श्रीचंदनप्रभृतिगंधवसत्थगंधैः ॥
सध्या० ॥ ॐ ह्रः सर्व० ॥ गंधं ॥ २ ॥
मुक्ताफलेंदुकरकैरवकुंदशुभ्रै- । रक्षीणमोक्षसुखदैरुचिताक्षतौघैः ।
सध्या० ॥ ॐ ह्रः सर्व० ॥ अक्षतान् ॥ ३ ॥
जातीकुरंटकसदुत्पलचंपकाद्यैः । पुष्पैर्द्विरेफवरपूरितदिक्समूहैः ।
सध्या० ॥ ॐ ह्रः सर्व० ॥ पुष्पं ॥ ४ ॥
शाल्यन्नपायसघृतप्रमुखैः सुपक्वै- । र्हव्यैः सुवर्णकृतमंजुलभाजनस्थैः ।
सध्या० ॥ ॐ ह्रः सर्व० ॥ चरुं ॥
कर्पूरदीपविसरैर्जगदक्षरम्यै- । र्भव्येष्टनाकशिवसौख्यसुदानदक्षैः ।
सध्या० ॥ ॐ ह्रः सर्व० ॥ दीपं ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धीरासिताग्ररुसिताभ्रसुचंदनादि । सद्गंधवस्तुजनितै रमणीयधूपैः ।
सध्या० ॥ ॐ न्हः सर्व० ॥ धूपं ॥ ७ ॥

सद्वोस्तनीपनसदाडिमपूगरंभा । सन्नालिकेररुचकादिफलैः सुदानैः ।
सध्या० ॥ ॐ न्हः सर्व० ॥ फलं ॥ ८ ॥

पानीयगंधसदकोद्गमहव्यदीप ।
धूपादिभिर्वसुभि रर्घ्यमिदं कृतं तैः ॥
संस्थापितं कनकनिर्मितचारुपात्रे
श्रीसाधवेऽमरनताय ददामि तस्मै ॥ अर्घ्यं ॥ ९ ॥

अनु०—स्वभावनिर्मलजलैः शीतलैश्चंद्रमिश्रितैः ।
शांतिधारामिमां कुर्वे साधोरग्रे महादरात् ॥ शांतिधारा ।१०॥

वसंत०सन्मालतीकुरवकांबुरुहादिपुष्पैः ।
सद्गंधलुब्धमधुपावलिरम्यशब्दैः ॥
भक्त्या करोमि कुसुमांजलिमिंद्रवंद्य— ।
श्रीसर्वसाधुपरमेष्ठिपदांबुजाग्रे ॥ पुष्पांजलिः ॥

॥ अथ जिनधर्मार्चनम् ॥

वसंतः—तोयैरशेषतनुभृद्भवतापनाशै- ।
स्तीर्थोदकैः सरसिजैः कलितैः सुराच्यैः ॥
दृग्बोधवृत्तमयमंगिदयोरुमूलं । श्रीजैनधर्ममनघं महयामि भक्त्या ॥
ॐ न्हीं जिनधर्माय नमः जलं निर्वपामि स्वाहा ॥ १ ॥

सद्गंधसारवरवंशिकजातगंधैः । सद्गंधभावितसमस्तदिगंतरौघैः ।
दृग्बो० ॥ ॐ न्हीं जि० ॥ गंधं ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संजातमल्लिकालिकाब्जकरावदातैः । शाल्यक्षतैः सुकृतपुंजवदिष्टानैः
द्रव्यो० ॥ ॐ ह्रीं जि० ॥ अक्षतान् ॥ ३ ॥

श्रीबंधुजीवकलतांबुजकुंदनील- । सन्मल्लिकासुमनसादिलतांतमाल्यैः ।
द्रव्यो० ॥ ॐ ह्रीं जि० ॥ पुष्पं ॥ ४ ॥

सद्व्यंजनाज्यपरमान्नसदन्नभक्ष्यैः । क्षीरादिकैरुचिकरैश्चरुकैर्मनोज्ञैः ॥
द्रव्यो० ॐ ह्रीं जि० ॥ चरुं ॥ ५ ॥

कर्मांधकारभवहारिभिरिंदुदीप- । व्रातैर्विनेयजनतामलबोधबीजैः ।
द्रव्यो० ॥ ॐ ह्रीं जि० ॥ दीपं ॥ ६ ॥

सत्पिंडकागरुरजादिभरैः सुधूपैः । सर्वामराभिमतगंधसुदानदक्षैः ।
द्रव्यो० ॥ ॐ ह्रीं जि ॥ धूपं ॥ ७ ॥

चोंटाम्रकादिकदलीफलपूरधात्री-- । नारंगतिंदुकसुदानफलप्रदक्षैः ।
द्रव्यो० ॥ ॐ ह्रीं जि० ॥ फलं ॥ ८ ॥

सन्नीरगंधकलमाक्षतचारुपुष्प - । हव्यादिपूजनसुवस्तुकृतैः सदर्घ्यैः ।
द्रव्यो० ॥ ॐ ह्रीं जि० ॥ अर्घ्यं ॥ ९ ॥

यस्मात्सुरेंद्रनरपाधिपराज्यलक्ष्मी- । र्यत्सर्वयोगिनुतबोधजिनेंद्रपद्मा
यस्मात्सुसिद्धिकमला हि भवेन्नराणां । तं जैनधर्ममहमादरतः प्रवंदे ॥

शांतिधारा । पुष्पांजलिः ॥

॥ अथ आगमार्चनम् ॥

पंचचामर- सरोजनामकैरवप्रभृतिपृष्पवासितैः ।
पवित्रपात्रवारिभिः कनककुंभपूरितैः ।
जिनाननाद्धिनिर्गतां गणधरादिसेवितां ।
यजे परमभारतीं सकललोकपूजितां ॥

ॐ ह्रीं जिनागमाय नमः जलं निर्वपामि स्वाहा ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मनोजचंद्रचंदनागरुतरूणां रसैः । सुगंधपरिषक्तषट्पदसुरारम्यकैः ।
जिनान० ॥ ॐ ह्रीं जिनाग० ॥ गंधं ॥ २ ॥
निशापतिमयूखसमपांडुरैः सदक्षतै । र्मनोज्ञसद्गंधिभिर्ललितकायशोभितैः ।
जिनान० ॥ ॐ ह्रीं जिनाग० ॥ अक्षतान् ॥ ३ ॥
लतावकूलनीपकुंदसुरभूजपुन्नाग । प्रसूननिवहैर्जपाकमलजातिचंपकैः ।
जिनान० ॥ ॐ ह्रीं जिनाग० ॥ पुष्पं ॥ ४ ॥
सदाज्यदुग्धदधिभक्ष्यवरशालिभक्ता- ।
दिकैः सुवर्णमणिभाजनाश्रितपवित्रनैवेद्यकैः ।
जिनान० ॥ ॐ ह्रीं जिनाग० ॥ चरुं ॥ ५ ॥
कर्पूरभरहारिभिः सिताभ्रदीपव्रजै रशेषजनलोचनाप्रियैरखंडप्रभैः ।
जिनान० ॥ ॐ ह्रीं जिनाग० ॥ दीपं ॥ ६ ॥
सुधीरहिमवालुकामलयजादि धूपकैः । सुरासुरनरोरगप्रमोददैः सुमोहिभिः ।
जिनान० ॥ ॐ ह्रीं जिनागमाय नमः ॥ धूपं निर्वपामि स्वाहा ।
गुडफलपूगदाडिमरसालमोचादिभिः । सुरूपसद्गंधयुक्फलकुलैर्मनोहारिभिः ।
जिनान० ॥ ॐ ह्रीं जिनाग० ॥ फलं ॥ ८ ॥
महाधवलदुकूलनेत्रदिविजांगचित्रादिकैः ।
सुशिल्पिपरिनिर्मितैर्धवलगौरशोणसंज्ञकैः ।
जिनान० ॥ ॐ ह्रीं जिनाग० ॥ वस्त्रं ॥ ९ ॥
किरीटसान्नगकैर्वलयनूपुरांजनैः सुवर्णमणिमुद्रिकाविविधकुंडलैर्मंडलैः ।
जिनान० ॥ ॐ ह्रीं जिनाग० ॥ षोडशाभरणं ॥ १ ॥
स्रग्धरा० पूतांभोभिः सुगंधैरगरुमलयजाद्युद्भवैर्गंधलेपैः ।
सद्भौरैरक्षतौघै रुचिरपरिमलैश्चंपकादिप्रसूनैः ।
नैवेद्यैर्दीपकौघैरगरुसुरभिदार्वादिधूपैः प्रशस्तैः ।
सद्यैः संसत्फलौघै रचितमिदमहं शारदायै ददेऽर्घ्यं ॥ अर्घ्यं ॥ ११ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वसंत-श्रीवीतरागमुखसारविनिर्गतं य-। च्छ्रीमद्गणेंद्रकथितं वरसिद्धसारं।
तद्द्वादशांगममलं बहुलार्थयुक्तं । वंदे श्रुतं परमहं सततं पवित्रं ॥

शांतिधारा । पुष्पांजलिः ॥ १२ ॥

॥ अथ जिनबिंबार्चनम् ॥

अनु– आनीतैर्वारिभिस्तीर्थैरिंदुक्षोदप्रवाहकैः ।
जिनबिंबान् यजे रत्नस्वर्णरूप्यादिनिर्मितान् ॥
ॐ ह्रीं जिनचैत्येभ्यो नमः । जलं निर्वपामि स्वाहा ॥ १ ॥
गंधैः कर्पूरभद्रश्रीकाश्मीरादिसमुद्भवैः ॥
जिनबिं० ॥ ॐ ह्रीं जिनचै० ॥ गंधं ॥ २ ॥
तंडुलैर्गंधशालीनां कुंदजालकपांडुरैः ।
जिनबिं० ॥ ॐ ह्रीं जिनचै० ॥ अक्षतान् ॥ ३ ॥
पुष्पैर्बाणाब्जसंमल्लीतुंगाद्यैरलिझंकृतैः ।
जिनबिं ॐ ह्रीं जिनचै० ॥ पुष्पं ॥ ४ ॥
नैवेद्यैरन्नदुग्धाज्यपूपाद्यैर्घ्राणतर्पणैः ।
जिनबिं० ॥ ॐ ह्रीं जिनचै० ॥ चरुं ॥ ५ ॥
दीपैः सचंद्रसंजातैर्ध्वस्ताघतिमिरव्रजैः ।
जिनबिं० ॥ ॐ ह्रीं जिनचै० ॥ दीपं ॥ ६ ॥
धूपैराजाहणादेश्च घ्राणादेश्च समुद्भवैः ।
जिनबिं० ॥ ॐ ह्रीं जिनचै० ॥ धूपं ॥ ७ ॥
फलैः सद्गंधसद्वर्णसद्रसैर्दाडिमादिकैः ।
जिनबिं० ॐ ह्रीं जिनचै० । फलं ॥ ८ ॥
पावनैर्वारिगंधाद्यैः कृतैरर्घ्यैर्महाजनैः ।
जिनबिं० ॥ ॐ ह्रीं जिनचै० ॥ अर्घ्यं ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चतुर्णिकायदेवौघप्रार्चितश्रीजिनेशिनः ।
स्मरामि भावतस्तेषां बिंबानां कर्महानये ॥

शांतिधारा । पुष्पांजलिः ॥ १० ॥

॥ अथ जिनालयार्चनं ॥

अनु०— जैनधर्मैरिव स्वच्छैरंभोभिः शशिशीतलैः ।
कृत्रिमाकृत्रिमानंचे जिनानामालयान् मुदा ॥
ॐ ह्रीं जिनालयेभ्यो नमः जलं निर्वपामि स्वाहा ॥ १ ॥
बहिस्तापहरैर्गंधैर्गंधसारादिसंभवैः ॥
कृत्रि० ॥ ॐ ह्रीं जिनाल० ॥ गंधं ॥ २ ॥
लक्ष्मीनेत्रांतविशदैः सुगंधिकलमाक्षतैः । ॥
कृत्रि० ॥ ॐ ह्रीं जिनाल० ॥ अक्षतान् ॥
केतकीमालतीजातीसदिंदीवरपुष्पकैः । ॥
कृत्रि० ॥ ॐ ह्रीं जिनाल० ॥ पुष्पं ॥ ४ ॥
घृतक्षीराज्यभक्ष्याद्यैश्चरुकैः स्वर्णपात्रगैः
कृत्रि० ॥ ॐ ह्रीं जिनालयेभ्यो नमः ॥ चरुं ॥ ५ ॥
चारुकर्पूरदीपौघैरघध्वांतविनाशकैः ।
कृत्रि० ॥ ॐ ह्रीं जिनाल० ॥ दीपं ॥ ६ ॥
दशांगधूपकैर्लेखघ्राणमोदप्रदायकैः ।
कृत्रि० ॥ ॐ ह्रीं जिनाल० ॥ धूपं ॥ ७ ॥
नानाविधफलैस्तोषप्रदैर्नासाक्षिचेतसां ।
कृत्रि० ॥ ॐ ह्रीं जिनाल० ॥ फलं ॥ ८ ॥
कृतेनार्घ्येण पानीयश्रीखंडसदकादिकैः ।
कृत्रि० ॥ ॐ ह्रीं जिनाल० ॥ अर्घ्यं ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्येतैरष्टभिर्द्रव्यैर्जिनालयसमर्चितं ।
शांतिं करोतु सर्वेभ्यः पुष्पांजलिपुरःसरं ॥
शांतिधारा पुष्पांजलिः ॥ १० ॥

एवमर्हदादीनभ्यर्च्य शरश्चंद्रमरीचिरोचिषोऽतश्चेतसि चिंत्यैवमनादि-सिद्धमंत्राभिमंत्रितकर्पूरहरिचंदनद्रवलुलितसुरभिशुभ्रपुष्पांजलिभिरेकविंशतिवारानधिवास्य पूर्णार्घ्यदानेन बहुमानयेत् ॥

॥ अथ अनादिसिद्धमंत्रः ॥

ॐ णमो अरहंताणं । णमो सिद्धाणं । णमो आइरियाणं । णमो उवज्झायाणं णमो लोए सव्वसाहूणं ॥ चत्तारि मंगलं । अरहंता मंगलं । सिद्धा मंगलं । साहू मंगलं । केवलिपण्णत्तो धम्मो मंगलं ॥ चत्तारि लोगुत्तमा । अरहंता लोगुत्तमा । सिद्धा लोगुत्तमा । साहू लोगुत्तमा । केवलिपण्णत्तो धम्मो लोगुत्तमा ॥ चत्तारि सरणं पव्वज्जामि ॥ अरहंते सरणं पव्वज्जामि । सिद्धे सरणं पव्वज्जामि । साहू सरणं पव्वज्जामि । केवलिपण्णत्तो धम्मो सरणं पव्वज्जामि ॥ ॐ ऱ्हौं शांतिं कुरु कुरु सर्वशांतिं कुरु कुरु वषट् स्वाहा ॥ अयमनादिसिद्धमंत्रः ॥ (येथें या मंत्रानें कर्पूर व चंदन यांच्या गंधानें मिश्रित सुगंधित शुभ्र अशा फुलांनीं २१ वेळा पुष्पांजलि करणें.)

गीति— जिनसिद्धसूरिदेशकसाधुवरानखिलभव्यजनमहितान् ।
धर्मागमचैत्यचैत्यालयसमन्वितान् पूजयामि नवदेवान् ॥ पूर्णार्घ्यं ॥

॥ अथ जयमाला ॥

मणुय-णाइंद-सुरधरियछत्तत्तया, पंचकल्लाणसोक्खावलीपत्तया ।
दंसणं णाण झाणं अणंतं बलं, ते जिणा दिंतु अम्हं वरं मंगलं ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जेहिं झाणग्गिबाणेहिं अइथद्दयं, जम्म-जर-मरणनयरत्तयं दड्ढयं ।
जेहिं पत्तं सिवं सासयं ठाणयं, ते महं दिंतु सिद्धा वरं णाणयं ॥ २ ॥

पंचहाचार-पंचग्गिसंसाहया, वारसंगाइंसुअ-जलहिअवगाहया ।
मोक्खलच्छी महंती महं ते सया, सूरिणो दिंतु मोक्खं गयासं गया ॥ ३ ॥

घोरसंसारभीमाडवीकाणणे, तिक्खवियराल णहपावपंचाणणे ।
णट्ठमग्गाण जीवाण पहदेसिया, वंदिमो ते उवज्झाय अम्हे सया ॥४॥

उग्गतवचरणकरणेहिं झीणंगया, धम्मवरझाण- सुक्केक्कझाणं गया ।
णिब्भरं तवसिरीए समालिंगया, साहवो ते महं मोक्खपथमग्गया ॥५॥

जस्स लोए पसायेण भविया जणा, अक्खयं सोक्खयं जंति णिच्चं वरं ।
मंगलं लोगुत्तमोय सरणं तहा, सो मम देउ धम्मो वरं मंगलं ॥६॥

सव्वसंसारजीवाण हिद देसया, सव्वदोसेहिंमुक्कं परं णिम्मलं ॥
सव्वभासप्पगं सव्वमणरंजणं, सव्वसोक्खं मम देउ जिणभासियं ॥ ७ ॥

रुप्प कंचणविविह मणिमयाणोवमाकट्टिमाकट्टिमा सुहलक्खणंणिण्णिदा[1]
भवियजणसम्मत्तबाहिरं कारणं, दिंतु सोक्खं मम जिणवरा चावरं ॥८॥

कट्टिमाकाट्टिमा दिट्ठिमणरंजया, पट्टसालाहि संमोहिया सव्वदा ॥
अट्टालयालजुगुदुणउरुसोहिया, दिंतु मे तिलोक्खजिणघरा मंगलं ।९।

येण थोत्तेण णवदेवदा वंदए, गुरुयसंसारघणवल्लि सोछिंदए ॥
लहइसोसिद्धिसोक्खाइं बहुमाणणं, कुणइ कम्मिंधणं पुंजपज्जालणं ॥१०॥

घत्ता—स्रग्धरा-शुद्धार्हत्सिद्धसूरीन् सततमखिलशास्त्रोपदेशप्रवीणान् ।
साधुश्रीजैनधर्मश्रुतिनिकरसुधाचैत्यचैत्यालयार्घ्यान् ॥
अर्हद्देवान् प्रवंदे स्वगुणमणिगणापूर्णसिंधून् नवैतान् ।
स्वात्मोत्थानंतबोधातुलबलपरमानंददृग्वृत्तचेतान् ॥ पूर्णार्घ्यं ॥

इति नवदेवताविधानं संपूर्णं ॥

---

१ णिम्मिदा, दशलक्षणादि विधानास तत्वार्थ लागते ते येथें वाचून घेणें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ भूतकालतीर्थंकरपूजा ॥

इन्द्रवज्रा० भूतादिकालेोदितभव्यपुण्या-। दाराधिता येऽत्र सुरेंद्रवृंदैः ।
तान् पंचकल्याणविभूतिभाज-। स्तीर्थंकरान् सांप्रतमर्चयामि ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं निर्वाणाद्यतीतचतुर्विंशतितीर्थंकरात्रावतरतावतरत संवौषट् स्वाहा । ॐ० अत्र तिष्ठत २ ठठ स्वाहा । ॐ० अत्र मम सन्निहिता भवत २ वषट् स्वाहा॥ ॐ ह्रीं निर्वाणाद्यतीतकालचतुर्विंशतितीर्थंकरेभ्यो जलं । गंधं । अक्षतान् । पुष्पं । चरुं । दीपं । धूपं । फलं । अर्घ्यं निर्वपामि स्वाहा । शांतिधारा । पुष्पांजलिः ॥ १ ॥

॥ अथ वर्तमानकालतीर्थंकरपूजा ॥

शार्दूल—येऽमी संप्रतिकालभव्यजनताधिष्ठामरेंद्रैर्मुदा ।
कल्याणैर्वृषभादयो जिनवराः संपूजितास्तानिह ॥
त्रैलोक्याधिपतीन् यजाम्यतिशयोपेतांश्चतुर्विंशतीन् ।
शांत्यर्थं जगतां चराचरगुरून् तीर्थंकरान् संप्रति ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं वृषभादिवर्धमानांत्यवर्तमानचतुर्विंशतितीर्थंकरात्रावतरतावतरत संवौषट् स्वाहा । ॐ० अत्र तिष्ठत २ ठठ स्वाहा । ॐ० अत्र मम सन्निहिता भवत २ वषट् स्वाहा ॥ ॐ ह्रीं वृषभादिवर्धमानांत्यवर्तमानचतुर्विंशतितीर्थंकरेभ्यो जलमित्यादि ॥ २॥

॥ अथ अनागतकालतीर्थंकरपूजा ॥

वसंत० ये भाविभव्यजनतासुकृतोदयेन ।
कल्याणपंचकविभूतिमिहाश्रयंतः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेभ्योऽर्घ्यपाद्यविधिनाऽखिलतीर्थकृद्भ्यः ।
शांत्यै समस्तजगतां यजनं करोमि ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं महापद्माद्यनागतचतुर्विंशतितीर्थंकरा अत्रा वतरतावतरत संवौषट् स्वाहा । ॐ ह्रीं० अत्र तिष्ठत २ ठठ स्वाहा । ॐ ह्रीं० अत्र मम सन्निहिता भवत २ वषट् स्वाहा ॥ ॐ ह्रीं महापद्माद्यनागतचतुर्विंशतितीर्थंकरेभ्यो जलमित्यादि ॥ ३ ॥

अथ अनंतचतुर्दशी व्रतविधान प्रारंभः ॥

॥ अथ अनंतद्वारप्राणप्रतिष्ठाक्रमः ॥

अनु० अपवित्रः पवित्रो वा सुस्थितो दुस्थितोऽपि वा ।
ध्यायेत् पंचनमस्कारं सर्वपापैः प्रमुच्यते ॥ १ ॥
अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपि वा
यः स्मरेत् परमात्मानं स बाह्याभ्यंतरे शुचिः ॥ २ ॥

ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः असिआउसा मम सर्वांगशुद्धिं करोमि स्वाहा । सर्वांगशोधनं ॥

वसंत० देवेंद्रवंद्यमभिवंद्य विशोध्य हस्ता- ।
वीर्यापथस्य परिशुद्धिविधिं विधाय ॥
सद्वज्रपंजरगतकृतसिद्धभक्ति- ।
र्देवं समर्च्य सकलीकरणं करोमि ॥ ३ ॥

ॐ ह्रीं असुजर सुजर भव २ हस्तशुद्धिं करोमि स्वाहा ॥ हस्तप्रक्षालनं ॥ ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः नमोऽर्हते भगवते श्रीमते समस्तगंगासिंध्वादिनदीनदतीर्थजलं भवतु स्वाहा ॥ ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं श्रावय २ सं २ क्लीं २ ब्लूं २ द्रां २ द्रीं २ द्रावय २ हंझंझ्वींक्ष्वीं हं सः स्वाहा ॥ इत्यमृतस्नानमंत्रः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वसंत० अद्याऽभवत् सफलता नयनद्वयस्य
देव त्वदीयचरणांबुजवीक्षणेन ॥
अद्य त्रिलोकतिलक प्रतिभासते मे ।
संसारवारिधिरयं चुलकप्रमाणं ॥

अनु० अद्य मे क्षालितं गात्रं नेत्रे च विमलीकृते ।
स्नातोऽहं धर्मतीर्थेषु जिनेंद्र तव दर्शनात् ॥ ५ ॥
अपराजितमंत्रोऽयं सर्वविघ्नविनाशनः ।
मंगलेषु च सर्वेषु प्रथमं मंगलं भवेत् ॥ ६ ॥
एसो पंच णमोयारो सव्वपावप्पणासणो ।
मगलाणं च सव्वेसिं पढमं होइ मंगलं ॥ ७ ॥

ॐ चत्तारिमंगलं अरहंता मंगलं । सिद्धा मंगलं । साहू मंगलं । केवलीपण्णत्तो धम्मो मंगलं ॥ चत्तारिलोगुत्तमा । अरहंतालोगुत्तमा । सिद्धालोगुत्तमा । साहूलोगुत्तमा । केवलिपण्णत्तोधम्मोलोगुत्तमा । चत्तारिसरणंपव्वज्जामि । अरहंते सरणं पव्वज्जामि । सिद्धे सरणं पव्वज्जामि । साहूसरणंपव्वज्जामि । केविलिपण्णत्तोधम्मोसरणंपव्वज्जामि ॥ ॐ नमोऽर्हते स्वाहा ॥

पडिक्कमामि भंते ईरियावहियाए विराहणाए अणागुत्ते अइगमणे णिग्गमणे ठाणे गमणे चक्कमणे पाणुग्गमणे बीउग्गमणे हरिउग्गमणे उच्चारपस्सवणखेलसिंहाणयवियडिपइट्ठावणियाए जे जीवा एइंदिया वा बीइंदिया वा तिइंदिया वा चउरिंदिया वा पंचेंदिया वा णोल्लिदा वा पिल्लिदा वा संघट्टिदा वा संघादिदा वा उद्दाविदा वा परिदाविदा वा किरिंछिदा वा लेस्सिदा वा छिंदिदा वा भिंदिदा वा ठाणदो वा ठाणचक्कमणदो वा तस्स उत्तरगुणं तस्स पायच्छित्तकरणं तस्स विसोहीकरणं णमोयारं करेमि तावक्कायं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पूर्वकम्मं दुच्चरियं वोसरामि। ॐ णमोअरिहंताणं। णमो सिद्धाणं। णमो आइरियाणं। णमो उवज्झायाणं। णमो लोए सव्वसाहूणं॥
ॐ नमः परमात्मने नमोऽनेकांताय शांतये॥

वसंत:—ईर्यापथे प्रचलताद्य मया प्रमादा–।
देकेंद्रियप्रमुखजीवनिकायबाधाः॥
निर्वर्तिता यदि भवेदयुगांतरेक्षा।
मिथ्या तदस्तु दुरितं गुरुभक्तितो मे ॥ ८ ॥

इच्छामि भंते॥ इरियावहियस्समालोचेउं पुव्वुत्तरदक्खिणपच्छिम–चउदिसविदिसासुविहरमाणेणजुगंतरदिट्ठिणा भव्वेण दट्ठव्वा दवदव-चरियाए पमाददोसेण पाणभूदजीवसत्ताणं एदेसिं उवघादो कदो वा कारिदो वा कीरंतो वा समणुमण्णिदो तस्स मिच्छा मे दुक्कडं॥

शार्दूल:—पापिष्ठेन दुरात्मना जडधिया मायाविना लोभिना।
रागद्वेषमलीमसेन मनसा दुष्कर्म यन्निर्मितं॥
त्रैलोक्याधिपते जिनेंद्र भवतः श्रीपादमूलेऽधुना।
निंदापूर्वमहं जहामि सततं निर्वर्तये कर्मणाम्॥ ९ ॥

ईर्यापथिशोधनम्॥

आर्या:—अतिनिर्मलमुक्ताफलललितं यज्ञोपवीतमतिपूतं।
रत्नत्रयमिति मत्वा करोमि कलुषापहरणमाभरणं॥
ॐ न्हीं सम्यग्दर्शनज्ञानचारित्राय नमः स्वाहा।

यज्ञोपवीतसंधारणं॥ १० ॥

वसंत:—रत्नत्रयांगमुपवीतमुरस्यथांगे।
देशव्रतस्य वसुकंकणमत्र हस्ते॥
ब्रह्मव्रतांगमधुना स्वकटौ च मौंजीं।
धृत्वाऽऽरभे जिनमखं मम दीक्षितोऽर्हन्॥ ११ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दीक्षाचिन्होद्वाहनाय कंकणबंधनं ॥ ११ ॥ (या मंत्रानें कंकण बांधणें.)

उपेंद्रवज्रा० अणुव्रतं पंच गुणव्रतं त्रयं । शिक्षाव्रतं चेति चतुर्विधं मतं ॥
गुरूपदिष्टं विमलं सदाऽहं । दृढं दधे पंचगुरून् प्रणम्य ॥१२॥

अणुव्रतपंचकं गुणव्रतत्रयं शिक्षाव्रतचतुष्टयं अर्हत्सिद्धाचार्योपाध्यायसर्वसाधून् साक्षीकृत्य सम्यक्त्वपूर्वकं सुव्रतं दृढव्रतं समारूढं मे भवतु मे भवतु मे भवतु स्वाहा ॥

वसंतः—यज्ञोचितं व्रतविशेषमपोह्य तिष्ठन् ।
यष्टा व्रतींद्रसहितः स्वयमेष रावात् ॥
एतानि तानि भगवन् जिनयज्ञदीक्षा— ॥
चिन्हान्यथेश विसृजामि गुरोः पदाग्रे ॥१३॥

एतत्पठित्वा यज्ञोपवीतादियज्ञदीक्षाचिन्हानि गुरुपादमूले विन्यस्य नमस्येत् ॥ इति यज्ञदीक्षाविसर्जनं (या मंत्रानें गुरुपदीं यज्ञदीक्षा विसर्जन करणें.) ॐ ऱ्हीं नमः सर्वदोषविनिर्मुक्तेभ्यः स्वाहा । कौतुकसूत्रं यजमानादिर्निक्षिपेत् ॥ (या मंत्रानें कंकण सोडणें.) ततो गुरोरनुज्ञया शांतिभक्तिं निष्ठापयेत् ॥ [कंकण सोडल्यानंतर गुरूच्या आज्ञेनें शांतिभक्ति करणें.] ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं श्रावय २ अर्हं झं झ्वीं क्ष्वीं हं सः स्वाहा । असिआउसा इदमनंतद्वारग्रंथिर्जलेन समस्तदोषपरिहारार्थं कुरु २ स्वाहा । द्वारप्रक्षालनं ॥ (या मंत्रानें पाण्यानें द्वार धुणें.) ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं नमोऽर्हते भगवते त्रैलोक्यनाथाय सर्वनृसुरासुरपूजिताय अनंतदर्शनाय अनंतवीर्याय अनंतज्ञानाय अनंतसुखाय अनंततीर्थकराय नमः स्वाहा ॥ (या मंत्रानें दूधानें द्वार धुणें व त्यास सुगंध गंधाचा लेप करणें.) ॐ ऱ्हीं अनंतचतुष्टयात्मकाय अनंततीर्थकराय नमः स्वाहा ॥ (या मंत्रानें देवापुढें ठेवलेल्या यंत्रावर तें द्वार ठेवणें.)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ वृषभ अजित शंभव अभिनंदन सुमति पद्मप्रभ सुपार्श्व चंद्रप्रभ पुष्पदंत शीतल श्रेयांस वासुपूज्य विमल अनंता इति ॥ [याप्रमाणें १४ तीर्थंकरांचीं नावें घेऊन त्या द्वाराच्या गांठीस हात लावणें.] या रीतीनें अनंतद्वाराची स्थापना करणें.

॥ अथ प्राणप्रतिष्ठामंत्रः ॥

ॐ आँ क्रों ऱ्हीं असिआउसा यरलवशषसह हं सः त्वगश्रमांसमेदोऽस्थिमज्जाशुक्रादिधातवः देवदत्तानां प्राणा देवदत्तानां जीवा इह स्थितसर्वेंद्रियाणि कायवाङ्मनचक्षुःश्रोत्रमुखजिव्हाः । स्थापय २ इदमनंतद्वारग्रंथि वारिपूर्णघटं शब्दस्पर्शरूपरसगंधवर्णप्राणापानव्यानोदानसमाननागकूर्मकृतयः कालसंप्राणाः सर्वप्राणा इहैव आशु आगच्छ २ संवौषट् स्वाहा । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ ॐ नमोऽनंतनाथाय सर्वसुखसौख्याय चिरकालं नंदंतु वर्धंतु वज्रमयं करोमि कुर्वंतु स्वाहा ॥ (येथें या मंत्रानें २७ पांढरीं फुलें घालून २७ वेळां जप करणें.) ॐ नमोऽर्हते भगवते अणंतो अणंतासिज्झदु मे भगवदो महाविज्जा महाविज्जा अणंते अणंतकेवलिए अणंतकेवलणाणे अणंतकेवलदंसणे [1]अणुपुज्जवासणे अणंतें अणंतागमकेवलि स्वाहा ॥ (येथें या मंत्रानें १०८ पांढरीं फुलें घालून तितक्याच वेळां जप करणें.) ॐ नमोऽर्हते भगवते अनंततीर्थंकराय ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं नमः सर्वशांतिं कुरु २ तुष्टिं पुष्टिं सौभाग्यमायुरारोग्यमिष्टिं कुरु २ वषट् स्वाहा ॥ (या मंत्रानें नवें द्वार बांधणें.) ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं नमः सर्वबंधनविनिर्मुक्ताय अनंतसुखप्रदाय नमः स्वाहा ॥ (या मंत्रानें जुनें द्वार सोडणें.) ॐ निःश्रेयसेऽस्मै दत्तादानं फलं भवेदायुष्मान् भवेन्नित्यं (या मंत्रानें वान देणें.) याप्रमाणें अनंतद्वाराची प्राणप्रतिष्ठा करणें.

---

१ अणुपज्युवासणे.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ अनंतत्रयोदशीपूजा ॥

अनु०:--अनंततीर्थकर्तारं [२]हरिषेणसुतोत्तमम् ।
स्थापये विधिना भक्त्या जंतूनां सुखदायकं ॥ १ ॥

ॐ ऱ्हीं अनंततीर्थंकर अत्र एहि २ संवौषट् स्वाहा । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ आह्वानस्थापनसन्निधीकरणं ॥

वसंत:--गंगादितीर्थभवनिर्मलवारिपूरै- ।
भृंगारनालगलितैः शिशिरैर्मनोज्ञैः ॥
संसारघोरपरितापनिवारणार्थं ।
अर्चाम्यनंतजिनराजमहं त्रिशुद्धया ॥

ॐ ऱ्हीं नमोऽर्हते भगवते श्रीमते श्रीमदनंततीर्थंकराय अनंत-अनंतदर्शनाय ज्ञानाय अनंतवीर्याय अनंतसुखात्मकाय नमः जलं निर्वपामि स्वाहा ॥ १ ॥

श्रीखंडकुंकुमहिमादिसुगंधवर्गै- । रंधीकृतालिनिकरैः सुरभीकृताशैः ।
संसा० ॥ ॐ ऱ्हीं नमोर्हते० ॥ गंधं ॥ २ ॥

शुभ्रैरिवेंदुकिरणैरिवपुण्यपुंजैः । कांतैरखंडकलमाक्षतपुण्यपुंजैः
संसा० ॥ ॐ ऱ्हीं नमो० ॥ अक्षतान् ॥ ३ ॥

जातीजपावकुलकेतकिमल्लिकाद्यैः । पुष्पैर्भ्रमद्भ्रमरसंकुलशोभमानैः ।
संसा० ॥ ॐ ऱ्हीं नमो० ॥ पुष्पं ॥ ४ ॥

क्षीराज्यचारुसितसंयुतपूरिकाद्यैः । सौवर्णपात्ररचितैश्चरुकैः समग्रैः ।
संसा० ॥ ॐ ऱ्हीं नमो० ॥ चरुं ॥ ५ ॥

---

१ सकलीकरण, यज्ञदीक्षा, पंचकुमार, क्षेत्रपाल, पुण्याहवाचन, दशदर्स, भूम्यर्चन, पंचचूर्ण, द्वारपाल, दशदिक्पालक, सहस्रनाम, पंचपूजा व नवदेवता या सर्वपूजा प्रथम करून घेऊन नंतर अनंततीर्थकरपूजा करणें.

२ सिंहसेन-इतियोग्यं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कर्पूरतैलपरिकल्पितदीप्तदीपै– । ध्वस्तांधकारनिकरैरिव भानुपादैः ।
संसा० ॥ ॐ ह्रीं नमो० ॥ दीपं ॥ ६ ॥

कृष्णागरुप्रभृतिसंभवधूपधूम्रै– र्व्याप्ताखिलप्रविदिशावलयैर्विशुद्धैः ।
संसा० ॥ ॐ ह्रीं नमो० ॥ धूपं ॥ ७ ॥

द्राक्षाकपित्थपनसादिफलैः प्रशस्तै– । रिष्टप्रदैर्जनमनोनयनाभिरामैः ।
संसा० ॥ ॐ ह्रीं नमो० ॥ फलं ॥

शार्दूल-वार्गंधाक्षतमुख्यवस्तुभिरलं सिद्धार्थदूर्वादिभि- ।
द्रंव्यैश्चोद्घसुवर्णपात्ररचितंकांतं महार्घ्यं मुदा ।
गीर्वाणाधिपपूजितप्रतिमहाबोधप्रभाभासुरं ।
मुक्तिश्रीमदनंतनाथममलं प्रोत्तारयामि स्तुतं ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं श्रीमदनंततीर्थकराय ॐ ह्राँ ह्रीँ ह्रूँ ह्रौं ह्रः असिआउसा मम सर्वशांतिं कांतिं तुष्टिं पुष्टिं सौभाग्यमायुरारोग्यमिष्टसिद्धिं कुरु २ सर्वविघ्नविनाशनं कुरु २ समस्तरोगापमृत्युपरिहारं कुरु २ स्वाहा ॥ अर्घ्यं ॥ ९ ॥ शांतिधारा । पुष्पांजलिः ॥

॥ अथ जयमाला ॥

शार्दूल–जीवस्थानचतुर्दशप्रकृतयः पूर्वाणि रत्नानि वै ।
प्रत्येकं च चतुर्दशप्रगुणिता ग्रंथौः शुभेऽनंतके ॥
भूता मार्गणका अजीवसहिता ग्रंथा गुणस्थानके ।
नद्यो रज्जुगुणप्रकीर्णकशुभाः कुर्वंतु मे मंगलं ॥ १ ॥

विराग विरोग विभोग विरोह । वियोग विदेह विगेह विमोह ॥
विमान वियान विगाय विदंत । प्रसीद भदंत सदात्मननंत ॥ २ ॥
विमाय विकाय विजाय विदोष । विलेप विशेष विरोष विघोष ॥
निराश विपाश विताश विक्रांत ॥ प्रसी० ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विखंडितकाम कलंकविदूर । कषायचतुष्टयभंजनशूर ॥
भवांबुधितारणपोत निरंत प्रसी० ॥ ४ ॥
विबोध विरोध विशोक विलोक । विशुद्ध सुसिद्ध विबोधितलोक ॥
विदार विहार विपाटिताचिंत । प्रसी० ॥ ५ ॥
विशस्त्र विपात्र वितंत्र वियंत्र । निराकृतदुर्मतदुष्टकुतंत्र ॥
विकोप विरूप विताप विदंत । प्रसी० ॥ ६ ॥
असंख्यगुणार्णवव्रातितनाद । विदाटितदुःखदकुत्सितवाद ॥
विदारितसेवकपाश सुशांत । प्रसी० ॥ ७ ॥
चतुर्दशलोकितजीवसमास । नदीमलरत्नविचारधराश ॥
हृषीकमृगप्रविदंडकृतांत । प्रसी० ॥ ८ ॥
जलाग्निविशस्त्रकुविघ्नविनाश । नरामरनागसुपूजितवास ॥
अनंतभवोद्भवदुःखजरांत । प्रसी० ॥ ९ ॥
गजेंद्रमृगेंद्रफणेंद्रानिकार-विकारनिवारणपुष्टविचार ॥
प्रकासितजीवनिकायवितांत । प्रसी० ॥ १० ॥

घत्ता० शार्दूल–यस्माद्राज्यसुखं धनं सुरपदं पुत्रः सुकीर्तिर्गुणः ।
शत्रूणां विजयः सुकांचनचयो मुक्ताफलं रत्नकं ॥
मित्राणां वनितागणस्य सुखदः स्यात्संगमस्तत्रस- ।
द्भव्यानां भवहानये प्रभवताच्चानंतसंज्ञाव्रतं ॥ अर्घ्यं ॥ ११ ॥
विप्रोऽभूदिह सोमशर्मसुभगः श्रीसिंहनादंश्रुते ।
मार्गे तेन विलोकितो गुणनिधिः श्रीसिंहसेनोद्वहः ॥
तस्मात्प्राप्तविधिश्च तेन तु दिनं तुर्यंगतः सौख्यभाक् ।
योऽसौ श्रीविजयो मलेन रहितः कुर्यात्स वो मंगलं ॥
इत्याशीर्वादः ॥ इति अनंतत्रयोदशीपूजा समाप्ता ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ अनंतचतुर्दशी पूजा ॥

शार्दूल—वंदित्वा विदुषां वरं जिनवरं शेषं तमर्हत्परं ।
प्रात्यै दिव्यधियोऽस्य सिद्धमहिमां श्रीशारदां सारदां ॥
कार्यस्यार्यवरस्य धैर्यजितभूध्रेशः पदाब्जद्वयं ।
कृत्वा तीर्थकृतामसाववितथः पूजाक्रमः कथ्यते ॥ १ ॥

शार्दूलः-कृत्वा पुण्यपयोभिरंगममलं धृत्वा वरीवाससा-- ।
मग्रीमाधिकृतां सुभूषणयुतः संपूज्यवस्यामला ॥
मत्यैरर्थपगैः सुभाजनसतां मांगल्यमुख्यामसौ ।
वाक्कायाशयशुद्धितो हितकरः संपूज्यतां श्रीजिनः ॥ २ ॥

प्रकृतक्रमविधिविधानार्थमर्चनापीठाग्रतः पुष्पांजलिं क्षिपेत् ॥ (येथें अर्चनापीठापुढें पुष्पांजलि करणें.)

शार्दूलः— श्रीमद्ध्यानविधानमांनसकलस्याद्वासना संन्यधात् ॥
पाशान्मुक्तसदात्मकान् भवभवसंतोपसंपोषितान् ।!
चर्चातोज्वलजान् समंत्रदरसास्वादानभिस्थाप्य तान् ।
श्रेयोहंस्यधिपान् यजेऽत्र जिनराड्ढसानहिंसानहं ॥ ३ ॥

श्रीवृपभादितीर्थकरसमुदायपूजाप्रतिज्ञापनाय श्रीजिनप्रतिमोपरि पुष्पांजलिमावर्षेत् ॥ (येथें श्रीजिनप्रतिमेवर पुष्पांजलि करणें.)

मलयरुहलुलिततंडुलपुष्पैरधिवासनं जिनेंद्रस्य ।
संवौषट् ठठ वषडिति पल्लवमंत्रैः त्रिकरणैः कुर्वे ॥ ४ ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं वृषभादिचतुर्विंशतिर्थकरा अत्र एतैत संवौषट् स्वाहा। ॐ० अत्र तिष्ठत २ ठठ स्वाहा । ॐ० अत्र मम सन्निहिता भवत २ वषट् स्वाहा

इन्द्रवज्रा० श्रीमज्जिनेंद्रामलकीर्तिगौरै- । मंदाकिनीनिर्झरवारिपूरैः ।
अंभोजकिंजल्करजःपिशंगै- । यंजे चतुर्विंशतितीर्थनाथान् ॥
ॐ ह्रीं वृषभादिचतुर्विंशतितीर्थकरेभ्यो जलं निर्वपामि स्वाहा ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तुषारशीतांशुमरीचिशुभ्र । श्रीचंदनैः कुंकुमयुक्तमिश्रैः ।
संतोषपीयूषशरीरभाजो । यजे० ॥ ॐ ह्रीं वृ० ॥ गंधं ॥ २ ॥

अक्षुण्णसौख्यामलबीजरूपैः । शाल्यक्षतैरिंदुकलावलक्षैः ।
अनन्यसाधारणकीर्तिकांतान् । यजे० ॥ ॐ ह्रीं वृ० ॥अक्षतान् ॥३॥

जातीजपापाटलिभिर्विराजी- । मंदारमालाबकुलादिपुष्पैः ।
श्रेयःश्रियो मंगलहारभूतान् । यजे० ॥ ॐ ह्रीं वृं० ॥ पुष्पं ॥ ४ ॥

प्राज्याज्यसिद्धामृतपिंडभक्ष्यैः । शाकैरनेकैः सुरभिप्रपूतैः ।
अनंतसौख्यामृतपानतृप्तान् । यजे० ॥ ॐ ह्रीं वृ० ॥ चरुं ॥ ५ ॥

दृष्टिप्रियैरुज्वलरत्नदीपैः । सुरत्नसिद्धैर्मणिभाजनस्थैः ।
स्वकीयदिव्यांगमरीचिमग्नान् । यजे० ॥ ॐ ह्रीं वृ० ॥ दीपं ॥ ६ ॥

कालाहिदेहाकृतिखांतराले । व्यापत्सुधूपैः सुरभीकृताशैः ।
इष्टार्थसिद्ध्यै शिवतातिभक्त्या । जये० ॥ ॐ ह्रीं वृ० ॥ धूपं ॥ ७ ॥

जंबीरजंबूवरबीजपूर- । द्राक्षाम्रपूगीफलनारिकेलैः ।
सुरेंद्रचूडांशुविलग्नपादान् । यजे० ॥ॐ ह्रीं वृ० ॥ फलं ॥ ८ ॥

जलादिसद्द्रव्यकृतैरनर्घ्यै- । र्बलाहकैर्मंगलमंगलार्घ्यैः ।
रजो रहस्यं रहसः सुधान्यैः ॥ यजे० ॥ अर्घ्यं ॥ ९ ॥

शालिनी० जंबूद्वीपे भारतक्षेत्रमुख्य- । श्रीतीर्थेशामंघ्रिपीठोपकंठे ॥
देवेंद्रार्च्यश्रीपदां संतनोमि । संसारार्तेः शांतये शांतिधारां ॥
शांतिधारा ॥ १० ॥

अनु० आदिनाथोऽस्तु नः स्वस्ति स्वस्ति स्यादजितश्वरः ।
शंभवो भवतु स्वस्ति भूयात् स्वस्त्यभिनंदनः ॥ १ ॥
अस्तु वः सुमतिः स्वस्ति पद्मभः स्वस्ति जायतां ॥
सुपार्श्वः स्वस्ति भवतां स्वस्ति स्याच्चंद्रलांछनः ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सतां स्वस्त्यस्तु सुविधिर्भवतु स्वस्ति शीतलः ।
श्रेयान् संपद्यतां स्वस्ति स्वस्त्यस्तु वसुपुज्यजः ॥ ३ ॥
राज्ञोऽस्तु विमलः स्वस्ति स्वस्ति भूयादनंतजित् ॥
भूयाद्धर्मजिनः स्वस्ति शांतेशः स्वस्ति जायतां ॥ ४ ॥
संघस्य कुंथुः स्वस्त्यस्तु भवतु स्वस्त्यरप्रभुः ।
स्वस्ति मल्लिजिनेंद्रोऽस्तु स्वस्त्यस्तु मुनिसुव्रतः ॥ ५ ॥
जगत्यस्तु नमिः स्वस्ति स्वस्ति स्यान्नेमिनायकः ।
स्वस्ति पार्श्वजिनो भूयात् स्वस्ति सन्मति रस्तु मे ॥ ६ ॥
अस्मिन्निमं स्वस्त्ययनमेकभक्तिभराद्दधे ।
स्वस्तिमंतः स्वयं शश्वत् संतु स्वस्त्ययनं जिनाः ॥

पुष्पांजलिः ॥ ७ ॥

॥ अथ जयमाला ॥

शार्दूलः-वंदे तानमरेश्वराः परिणमन्मौलीद्रुमौलिस्थिताः ।
स्रव्यास्तन्मकरंदरेणुभिरतो गौरं गरिष्ठं सदा ॥
रेखां तत्र ध्वजांकुशप्रविलसच्चीनं वरं चक्रिरे ।
येषां भक्तिभरेण पादविमलं लोकत्रयाधीशिनां ॥ १ ॥

पादाकुलकः-वृषभं वृषभासुरवृषपूज्यं । विवृजिनमजितं जिनवरराजं ।
शंभवमाभिनवचनभादृष्टिं । नंदितजनमभिनंदनमिष्टिं ॥ १ ॥
सुमतिं सुमतिदयापरकांतं । पद्मप्रभमभयं विगतांतं ॥
श्रीसुपार्श्वमपपाशमहेशं । चंद्रप्रभमभिहतभवपाशं ॥ २ ॥
सुविधिं विधुविभुमभिवंदेऽहं । शीतलमपमलगुणगणगेहं ॥
श्रेयोजिनमनुदिनमपदोषं । वसुपूज्यजमजमजरारोषं ॥ ३ ॥
विमलं विमलकमलदलनेत्रं । श्रीमदनंतजिनं सुचरित्रं ॥
धर्मं धर्मोन्नतिशर्माप्तं । शांतं शांतिजिनेश्वरमाप्तं ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कुंथुं कुंथुदयाप्रतिपालं । अरजिनवरमजरं शशिभालं ॥
मल्लिं शल्यहरं जिनराजं । सुव्रतपं मुनिसुव्रतराजं ॥ ६ ॥
नमिजिनममिताक्लकलगात्रं । नेमिं नौमि सुकरुणापात्रं ॥
फण धरनुतमिह पार्श्वजिनेशं । वीरं मारकरींद्रमृगेंद्रं ॥ ७ ॥
संसारोद्भवदुःखविनाशं । संसारार्तिभिदं विविनाशं ॥
वसुगुणमपमलबोधनिधीनं । लोकत्रयशिरसि कृतवासं ॥ ८ ॥

घत्ता० ॥ मालिनीः-अमितगुणगरिष्ठं धारयेत् सज्जनेष्टं ।
विगतकलिमलौघं वर्णमुक्ताफलौघं ॥
सुहृदविबुधदेवेंद्रार्च्यतीर्थेशिनां यो ।
विरचितनुतिमालो मुक्तिकांताप्रियः स्यात् ॥ अर्घ्यं ॥ ९ ॥

अनु०--इत्थं तीर्थाधिनाथा ये वृषभाद्या यदाऽऽदरात् ।
पुष्पांजलिप्रदानेन पूजिताः संतु शांतये ॥ १० ॥
इष्टप्रार्थनायै पुष्पांजलिः ॥ इति समुदायपूजा ॥

॥ अथ प्रत्येकपूजा ॥

शार्दूलः–साकेताधिपनाभिराजमरुदेव्योः पुत्रकः कांचन--।
च्छायः पंचशतप्रमाणधनुरुच्छेदो जिनेंद्राग्रजः ॥
यक्षास्यप्रियकामिनीपरिलसच्चक्रेश्वरीशोभितः ।
शक्राधीश्वरचक्रचक्रिविनुतः संप्राच्यर्ते प्राग्जिनः ॥ १ ॥
ॐ ह्रीं श्रीं क्लीं ऐं अर्हं वृषभजिनदेव अत्र अवतरावतर संवौषट् स्वाहा । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ आह्वानस्थापनसन्निधीकरणं ॥

द्रुतविलंबित विमलगंधसुवासितसारया । परिमलोदधिनीरसुधारया ॥
सकलदोषहरं वृषभेश्वरं । प्रवियजे नतनाकिनरेश्वरं ॥
ॐ ह्रीं वृषभतीर्थकराय जलं निर्वपामि स्वाहा ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सकलतापहरैः सुखदायकै- । र्मसृणकुंकुममिश्रितचंदनैः ॥
सकल० ॥ ॐ ह्रीं० ॥ गंधं ॥
कमलवाससुमिश्रिततंदुलै- । र्धवलमौक्तिकराशि समानकैः ।
सकल० ॥ ॐ ह्रीं० ॥ अक्षतं ॥ ३ ॥
स्फुरितमालतिजातिसुचंपकै- । र्वकुलपाटलिपुष्पसरोरुहैः ।
सकल० ॥ ॐ ह्रीं० ॥ पुष्पं ॥ ४ ॥
घृतसुमिश्रितपायसभक्ष्यकैः । सकललोकसुखैकनिकेतनैः ।
सकल० ॥ ॐ ह्रीं० ॥ चरुं ॥ ५ ॥
कनककांतिसुभासितदीपकै- । र्मणिमयैरिव विश्वसुदीपकैः ।
सकल० ॥ ॐ ह्रीं० ॥ दीपं ॥ ६ ॥
अगरुचंदनमिश्रितधूपकैः । सकलकर्मविदाहकदक्षकैः ।
सकल० । ॐ ह्रीं० ॥ धूपं ॥ ७ ॥
रुचिरदाडिमसत्फलमोचकैः । क्रमुकचोचकनिंबुकसत्फलैः ।
सकल० ॥ ॐ ह्रीं० ॥ फलं ॥ ८ ॥

उपेंद्रवज्रा० सुगंधपुष्पाक्षततोयधूपै- । र्नैवेद्यदीपैर्वरसत्फलौघैः ।
श्रीशांतिदासेन सुशर्मवृद्ध्यै । संपूज्यते श्रीजिनपादपद्मं ॥
ॐ ह्रीं० ॥ अर्घ्यं ॥ शांतिधारा ॥ ९ ॥

अनु०— त्रिदशराजपूजितं वृषभनाथमूर्जितं ।
कनककेतकैर्यजे भवविनाशकं जिनं ॥ पुष्पांजलिः ॥

॥ स्तोत्रम् ॥

अनु० नताखंडलमौलीनां यत्पादनखमंडलं ।
खंडेंदुशेखरीभूतं नमस्तस्मै स्वयंभुवे ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वंशस्थ-स्वयंभुवा भूतहितेन भूतले । समंजसज्ञानविभूतिचक्षुषा ।
विराजितं येन विधुन्वता तमः । क्षपाकरेणेव गुणोत्करैः करैः॥२॥
प्रजापतिर्यः प्रथमं जिजीविषुः । शशास कृष्यादिषु कर्मसु प्रजाः।
प्रबुद्धतत्वः पुनरद्भुतोदयो। ममत्वतो निर्विविदे विदांवरः॥३॥
विहाय यः सागरवारिवाससं । वधूमिवेमां वसुधावधूं सतीं ।
मुमुक्षुरिक्ष्वाकुकुलादिरात्मवान् । प्रभुः प्रवव्राज सहिष्णुरच्युतः ॥४॥
स्वदोषमूलं स्वसमाधितेजसा । निनाय यो निर्दयभस्मसात्क्रियां ।
जगाद तत्वं जगतेऽर्थिनेंऽजसा । बभूव च ब्रह्मपदामृतेश्वरः ॥५॥
सविश्वचक्षुर्वृषभोऽर्चितः सतां । समग्रविद्यात्मवपुर्निरंजनः ।
पुनातु चेतो मम नाभिनंदनो । जिनो जितक्षुल्लकवादिशासनः ॥६॥
इति स्तोत्रार्घ्यं ॥

॥ जयमाला ॥

जय प्रथमजिनेश्वर महिपरमेश्वर ॥
जय ईश्वर गुणगणमहितसदन जय ॥
जय नमितसुरासुर सकलसुखाकर ।
जय जय जनतामरण हरण जय ॥ १ ॥
जय आदिजिनेंद्र विशालरूप जय ।
जय पूजितचंद्रसुरेंद्रभूप जय ॥
जय नाभिनरेश्वर पुत्रसार जय ।
जय मरुदेवीसुत धर्माकार जय ॥ २ ॥
जय प्रथमधर्मप्रकाश वीर जय ।
जय प्रथमयोगीश्वर प्रथमधीर जय ॥
जय सेवितव्यंतरनागराज जय ।
जय नमितसुरासुरभानुराज जय ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जय ज्ञानरूप जय शर्मरूप जय ।
जय चंद्रवदन अकलंकरूप जय ॥
जय भव्यदयाकर भव्यहंस जय ।
जय प्रकटितशुभकरचारुवंश जय ॥ ४ ॥
जय प्रथमप्रजापते प्रथम ईश जय ।
जय प्रथमयतीश्वर प्रथमाधीश जय ॥
जय गणधरयतिपतिसेव्यपाद जय ।
जय शारदनीरददिव्यनाद जय ॥ ५ ॥
जय पापतिमिरहरपूर्णचंद्र जय ।
जय दोषनिवारक नाभितनूज जय ॥
जय प्रथम तीर्थंकर प्रथमदेव जय ।
जय प्रथमपुरुष प्रविनष्टक्रोध जय ॥ ६ ॥

घत्ताः— पुरुजिनसारं दर्शनसारं । सारं केवलबोधमयं ॥
वंदे तं भवतारं रहितविमारं, शांतिदास ब्रह्मकृतसुदयं ॥ ७ ॥
अर्घ्यं ॥

शार्दूल० सम्यग्धीरगुणै रनंतगुणितैर्युक्ताःसुमाया धवाः ।
ये सिद्धा मलनाशका वसुगुणाः काव्योद्भवैः सप्तभिः ॥
सार्धं श्रीविजयादिभिः सुखकरैः सेव्यैस्तरां निर्मला ।
जाताः श्रीगजपंथके च गुरवः कुर्वंतु ते मंगलं ॥ ८ ॥

इत्याशीर्वादः ॥ भवावलिः साकेतापुरे नाभिराजमरुदेव्योर्जाताय कनकवर्णाय पंचशतधनुरुच्छेदाय वृषभलांछनाय गोमुखचक्रेश्वरी-यक्षयक्षीसमेताय चतुरशीतिलक्षपूर्वायुष्काय कैलासपर्वते कर्मक्षयंगताय श्रीवृषभतीर्थकराय नमस्कारं कुर्वे ॥

द्रुतविलंबित० उदकचंदनतंडुलपुष्पकै- । श्चरुसुदीपसुधूपफलार्घ्यकैः ।
धवलमंगलगानरवाकुलै, र्जिनगृहे जिननाथमहं यजे ॥ ९ ॥
अर्घ्यं ॥ शांतिधारा । पुष्पांजलिः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ अजिततीर्थंकरपूजा ॥

उपेंद्रवज्राः-गजध्वजः कांचनकांतिकायो । जितारिकांताविजयातनूजः ।
इक्ष्वाकुवंशांबुधिशीतभानुः । संप्रार्च्यतेऽस्मिन्नजितो जिनेशः ॥ १॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं अजिततीर्थंकर अत्र अवतरावतर संवौषट् स्वाहा, आह्वानं । ॐ० अत्र तिष्ठ २ ठठ स्वाहा, स्थापनं । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा, सन्निधीकरणं ॥

॥ अष्टकम् ॥

द्रुतविलंवितः—त्रिदशलोकनदीजलधारया । सरसकेसरपिंजरसारया ।
अजितदेवपतिं जिननायकं । प्रवियजे जिनपं सुखदायकं
ॐ ह्रीं अजिततीर्थंकराय जलं निर्वपामि स्वाहा ॥ १ ॥
मलयभूधरसंभवचंदनै- । र्बहुलकेशरपंकविमिश्रितैः ।
अजित० ॥ ॐ० ह्रीं अजित० ॥ गंधं ॥ २ ॥
कुमुदबांधवहारवदुज्वलैः । कलमजैर्वरकोटिसमाश्रितैः ।
अजित० ॥ ॐ० ह्रीं अजित० ॥ अक्षतं ॥ ३ ॥
सरसिजोत्पलचंपकमल्लिका । बकुलकुंदसुकेतकिपुष्पकैः ।
अजित० ॥ ॐ ह्रीं अजित० ॥ पुष्पं ॥ ४ ॥
प्रचुरगव्यसमन्वितशर्करा । मिलितपायसहव्यवरौदनैः ।
अजित० ॥ ॐ० ह्रीं अजित० ॥ चरुं ॥ ५ ॥
तरणिधामसमानमयूखकैः । परिसुसंस्कृतरत्नसुदीपकैः ।
अजित० ॥ ॐ० ह्रीं अजित० ॥ दीपं ॥ ६ ॥
अनलसादसितागरुधूमकैः । सजलनीरदसंहतिसन्निभैः ।
अजित० ॥ ॐ० ह्रीं अजित० ॥ धूपं ॥ ७ ॥
नयनतोषकराम्रसुमोचक-- । प्रमुखयोग्यसुपक्वफलोत्करैः ।
अजित० ॥ ॐ० ह्रीं अजित० ॥ फलं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शार्दूल:—नीरामोदसुधामयाक्षतलसन्मंदारपुष्पोत्करैः ।
प्रोद्यच्चारुचरुप्रदीपविलसद्धूपैः फलैश्चर्चये ॥
श्रीमद्वीतभयं जिनेंद्रमहितं श्रीचंद्रकीर्तिस्तुतं ।
कैवल्यात्मककामिनीकुचलताशय्याधिरूढं श्रिये ॥ अर्घ्यं ॥९॥

अनु० एवं जिनेंद्रमभ्यर्च्य सुरसंदोहपूजितं ।
वार्धारां तु जगच्छांत्यै श्रीपीठाग्रे करोम्यहं ॥१०॥
शांतिधारा ॥ पुष्पांजलिः ॥

॥ स्तोत्रम् ॥

उपेंद्रवज्रा:-यस्य प्रभावात्त्रिदिवच्युतस्य । क्रीडास्वपि क्षीबमुखारविंदः ।
अजेयशक्तिर्भुवि बंधुवर्ग-- । श्चकार नामाऽजित इत्यवंध्यं ॥ १॥
अद्यापि यस्याजितशासनस्य । सतां प्रणेतुः प्रतिमंगलार्थं ।
प्रगृह्यते नाम परं पवित्रं । स्वसिद्धिकामेन जनेन लोके ॥ २॥
यः प्रादुरासीत् प्रभुशक्तिभूम्ना-- । भव्याशयालीनकलंकशांत्यै ।
महामुनिर्मुक्तघनोपदेहो । यथाऽरविंदाभ्युदयाय भास्वान् ॥३॥
येन प्रणीतं पृथु धर्मतीर्थं । ज्येष्ठं जनाः प्राप्य जयंति दुःखं ।
गांगं न्हदं चंदनपंकशीतं । गजप्रवेका इव घर्मतप्ताः ॥ ४ ॥
स ब्रह्मनिष्ठः सममित्रशत्रु- । र्विद्याविनिर्वांतकषायदोषः ॥
लब्धात्मलक्ष्मीरजितो जितात्मा । जिनः श्रियं मे भगवान्विधत्तां ॥
इति स्तोत्रार्घ्यम् ॥

॥ अथ जयमाला ॥

जय अजितजिनेश्वर सकलदुरितहर ।
जय प्रतिबोधितत्रिभुवनविलय जय ॥
जय ज्ञानदिवाकर सकलसुखाकर ।
जय धर्ममयीकृतभूवलय जय ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0. In Public Domain. Digitized by Sarayu Trust/eGangotri

जय अजितजिनेश्वर अजितनाथ जय ।
जय प्रतिबोधितबहुभव्यसार्थ जय ॥
जय जितशत्रुनृपसुत धीरधीर जय ।
जय विजयसेनासुत वीरवीर जय ॥ २ ॥

जय हेमवर्ण वरसाराकार जय ।
जय चतुरशतपंचाशत्कायमान जय ॥
जय द्वासप्ततिलक्ष पूर्वायुष्य जय ।
जय सेवितसुरनरचंद्रसूर जय ॥ ३ ॥

तव सेवाघातित प्रत्यवाय जयं ।
तव सेवासाधित देवकाय जय ॥
तव नाम्ना जीवसुमोक्षोपाय जय ।
तव नाम्ना विनाशितविघ्नव्यूह जय ॥ ४ ॥

जय सकल त्रिदशपतिवंद्यपाद जय ।
जय जलधरनिभगंभीरनाद जय ॥
तव नाम्ना प्राप्तसुसकलसिद्धे जय ।
तव नाम्ना प्राप्तसुराज्यसिद्धे जय ॥ ५ ॥

तव नाम्ना मणिरिव हृदयहार जय ।
तव नाम्ना रत्नसुत्रितयसिद्धे जय ॥
तव नाम्ना नवनिधिसिद्धिवृद्धे जय ।
तव नामैव सागर तरणपोत जय ॥ ६ ॥

तव नामैव शिवसुख आदिहेतु जय ।
तव नामैव दिव्यसुवाणिहेतु जय ॥
तव नामैव हस्तिदिव्यवाजि जय ।
तव नामैव सुंदरगेहराजि जय ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

घत्ता— जयत्वजितजिनेंद्रइन्द्रसुवंद्यो । नंदो जगदानंन्द करः ॥
वरद्वितीयजिनेन्द्रोमदनविकंदः चंद्रोनयनानंदकरः ॥८॥ अर्घ्यं ।

शार्दूल- ज्ञानाद्यै रघघातकैर्गुणगणैः संख्यातिगैर्भूषिता ।
रागद्वेषविमोहदोषनिचयैर्मुक्ताः पवित्रोद्यताः ॥
संयुक्तास्त्वभयेन निश्चलगता मारस्य संमारिता ।
जाताः श्रीगजपंथके च गुरवः कुर्वंतु ते मंगलं ॥ ९ ॥

इत्याशीर्वादः ॥ भवावलिः- साकेतपत्तने जितारिनृपविजयादेव्योर्जाताय सुवर्णवर्णाय गजलांछनाय पंचाशदधिकशतचतुष्टयधनुरुच्छेदाय महायक्षरोहिणीयक्षयक्षीसमेताय द्वासप्ततिलक्षपूर्वायुष्काय संमेदेसिद्धवरकुटे कर्मक्षयंगताय श्रीमदजिततीर्थंकराय नमस्कारं कुर्वे ॥ उदकचंदन इ० ॥ अर्घ्यं ॥ शांतिधारा । पुष्पांजलिः ॥

॥ अथ शंभवतीर्थंकर पूजा ॥

इंद्रवज्रा-सावंतिनाथो दृढराजसूनुः । प्रज्ञाप्तियक्षीत्रिमुखाधिनाथः ॥
वाजिध्वजश्चारुसुवर्णवर्णः । संप्रार्च्यते शंभवतीर्थनाथः ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं शंभवतीर्थंकर अत्र अवतरावतर संवौषट् स्वाहा ॥ आह्वानं ॥ ॐ० अत्र तिष्ठ २ ठठ स्वाहा ॥ स्थापनं । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ सन्निधीकरणं ॥

॥ अष्टकम् ॥

विबुधप्रियाः-रत्नकुंभसुवारिपूरितगंधमिश्रितसारकै- ।
र्जन्ममृत्युजरामरणभयवारणाय त्रिधामुदा ॥
पापतापहरं परं वरदोषकर्दमशोषणं ।
शंभवस्य सुपूज्यकं वरपादपद्मयुगं यजे ॥
ॐ ह्रीं शंभवतीर्थंकराय जलं निर्वपामि स्वाहा ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कुंकुमागरुचंदनैर्वरमलयजोद्गतशीतलैः ।
सुगंधद्रव्यविमिश्रितोदितनंदनैर्गुणनिर्मलैः ॥
पाप० ॥ ॐ ह्रीं शं० ॥ गंधं ॥ २ ॥

तुषारपिंडसमानशुभ्रसुशालितंडुलपुंजकैः ।
सूर्यकांतिविखंडिदीर्घवराक्षतौघगुणाकरैः ॥
पाप० ॥ ॐ ह्रीं शं० ॥ अक्षतं ॥ ३ ॥

सुमल्लिकोद्भवसरोजकुंदलवंगमालतिचंपकैः ।
पारिजातकदंबकेतकिपुष्पवृष्टिसुमोहितैः ॥
पाप० ॥ ॐ ह्रीं शं० ॥ पुष्पं ॥ ४ ॥

सद्यजातसुहेमभाजनसंस्थितैश्चचरूत्तमैः ।
षड्रसान्वितमोदकाश्रितदुग्धपायससेवकैः ॥
पाप० ॥ ॐ ह्रीं शं० ॥ चरुं ॥ ५ ॥

सुरेंद्रनिर्मितदिव्यरत्नप्रदीपकैश्च मनोहरै- ।
र्भव्यकेवलबोधनोपमसूर्यदीप्त्यधिकैर्वरैः ॥
पाप० ॥ ॐ ह्रीं शं० ॥ दीपं ॥ ६ ॥

अगरुसारसमन्वितेरितदिङ्मुखैर्वरधूपकैः ।
कर्मकर्दमभेदनाय महाम्यहं दशधोद्भवैः ॥
पाप० ॥ ॐ ह्रीं शंभवतीर्थकराय ॥ धूपं ॥ ७ ॥

दिव्यपक्वफलै रसान्वितकंटकीफलदाडिमै- ।
श्चोचमोचकपित्थजंबुसुनागवल्लिसमुद्भवैः ।
पाप० ॥ ॐ ह्रीं शं० ॥ फलं ॥ ८ ॥

उपेंद्रवज्रा:-अनादिसद्वस्तुचयैर्मनोज्ञैः । सत्तूयनादैः कलगीतनृत्यैः ।
संपूजये शंभवतीर्थनाथ- । पदाब्जमूलेऽर्घ्यवरैर्मुदाऽहं ॥ ९ ॥
अर्घ्यं ॥ शांतिधारा । पुष्पांजलिः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ स्तोत्रम् ॥

इंद्र०ः–त्वं शंभवः संभवतर्षरोगैः । संतप्यमानस्य जनस्य लोके ।
आसीरिहाकस्मिक एव वैद्यो । वैद्यो यथा नाथ रुजां प्रशांत्यै॥ १ ॥

अनित्यमत्राणमहंक्रियाभिः । प्रसक्तमिथ्याध्यवसायदोषं ।
इदं जगज्जन्मजरांतकार्तं । निरंजनां शांतिमजीगमस्त्वं ॥ २ ॥

शतह्रदोन्मेषचलं हि सौख्यं । तृष्णामयाप्यायनमात्रहेतुः ।
तृष्णाभिवृद्धिश्च तपत्यजस्रं । तापस्तदायासयतीत्यवादिः ॥ ३ ॥

बंधश्च मोक्षश्च तयोश्च हेतू– । बद्धश्च मुक्तश्च फलं च मुक्तेः ।
स्याद्वादिनो नाथ तवैव युक्तं । नैकांतदृष्टिस्त्वमतोऽसि शास्ता ॥४॥

शक्रोऽप्यशक्तस्तव पुण्यकीर्तेः । स्तुत्यां प्रवृत्तः किमु मादृशोऽज्ञः ।
तथापि भक्त्या स्तुतपादपद्मो । ममार्य देयाः शिवतातिमुच्चैः ॥ ५ ॥

इति स्तोत्रार्घ्यं ॥

॥ जयमाला ॥

जय धर्मप्रकाशक देवदेव जय ।
जय अमरनाथकृतचरणसेव जय ॥
जय कामविभंजनपरमशूर जय ।
जय मोहविदारण चंद्रसूर जय ॥ १ ॥

जय जितारिदृढरथपुत्रसार जय ।
जय मातृसुषेणापुत्रवीर जय ॥
जय चतुःशतचापोत्तुंग देह जय ।
जय वज्रवृषभनाराच देह जय ॥ २ ॥

जय हेमवर्ण धरदिव्य काय जय ।
जय षष्ठिलक्ष सुपूर्वायुष्य जय ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जय केवलबोधस्वरूप रूप जय ।
जय सेवित चंद्र सुरेंद्र भूप जय ॥ ३ ॥
जय परमपुरुषतुङ्ग परमज्योति जय ।
जय जगदानन्दक विश्वज्योति जय ॥
जय सकलतत्त्वविचार सार जय ।
जय सकलद्रव्यविचार सार जय ॥ ४ ॥
जय कर्मरहित विशुद्ध शुद्ध जय ।
जय ज्ञानपयोनिधि बुद्धबुद्ध जय ॥
जय शाकिनिडाकिनाशदक्ष जय ।
जय निर्मलबोध हतारिपक्ष जय ॥ ५ ॥

घत्ता— जय बोधनिदान सुरकृतगान, । ध्यानात्सकल कुमतिहर ॥
जय गतभवमान मुनिजनस्थान, । देवराज नुतवरचरण ॥ ६ ॥ अर्घ्यं ॥

शार्दूल—श्रीमद्दर्शनराजिता वृषकराः संसारविच्छेदका ।
मुक्तिश्रीवनिताविलाससुभगा दुर्दोषनिर्नाशकाः ॥
भक्तानां सुखदायका हरिनुताः संगैः प्रमुक्ताश्च ये ।
जाता श्रीगजपंथके च गुरवः कुर्वंतु ते मंगलं ॥ १ ॥

इत्याशीर्वादः । भवावलिः । सावंतीपत्तने दृढरथभूपतिसुषेणादेव्योर्जाताय सुवर्णवर्णायचतुःशतधनुरुच्छेदायश्रीमुखप्रज्ञप्तीयक्षयक्षीसमेताय अश्व-लांछनाय षष्ठिलक्षपूर्वायुष्काय संमेदगिरौ दत्तधवलकूटे परिनिर्वृताय श्रीशंभवतीर्थकराय नमस्कारं कुर्वे ॥ उदकचं० ॥अर्घ्यं॥

॥ अथ अभिनंदनतीर्थंकरपूजा ॥

अनु० संवरसिद्धार्थाभ्यां जातः कांचनसन्निभः ।
साकेतपुरपः पूज्यो वानरांकोऽभिनंदनः ॥

Ganesh Varṇi Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं अभिनंदनतीर्थंकर अत्र अवतरावतर संवौषट् स्वाहा। आह्वानं ॐ० अत्र तिष्ठ २ ठठ स्वाहा स्थापनं। ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ सन्निधीकरणं ॥

॥ अष्टकम् ॥

द्रुतविलंबित। परमसिद्धसमीश्वरमुत्तमं। परमहोदयमुख्यनिकेतनं।
प्रवियजे जिनपं त्वभिनंदनं। सकलपंकहरं क्षितिवंदितं ॥
ॐ ऱ्हीं अभिनंदनतीर्थंकराय जलं निर्वपामि स्वाहा ॥ १ ॥

सुरभिवस्तुसमृद्धशरीरकं। सुरभिदुग्धसमुज्वलशोणितं।
प्रविय० ॥ ॐ ऱ्हीं अ० ॥ गंधं ॥ २ ॥

कमलया परिमंडितविग्रहं। कमलतुल्यसुदीर्घकरांबुजं।
प्रविय० ॥ ॐ ऱ्हीं अ० ॥ अक्षतं ॥ ३ ॥

कुसुमबाणकरींद्रमृगाधिपं। सकलभव्यचकोरसुधाकरं।
प्रविय० ॥ ॐ ऱ्हीं अ० ॥ पुष्पं ॥ ४ ॥

धरणिपूज्यसुधारसनिःस्वनं। विशदनिर्मलनूत्नवधूज्वलं।
प्रविय० ॥ ॐ ऱ्हीं अ० ॥ चरुं ॥ ५ ॥

विमलकेवलबोधसुभास्करं। विकसदकीवधूज्वलेदहर्कं।
प्रविय० ॥ ॐ ऱ्हीं अ० ॥ दीपं ॥ ६ ॥

निखिलकर्मकुकाननपावकं। सुभगभव्यमनोजविकासिनं।
प्रविय० ॥ ॐ ऱ्हीं अ० ॥ धूपं ॥ ७ ॥

भजकसाधुजनेष्टफलप्रदं। विदितसप्तसुतत्वपदार्थकं।
प्रविय० ॥ ॐ ऱ्हीं अ० ॥ फलं ॥ ८ ॥

पृथ्वी– परं सलिलधारया प्रबलगंधपुष्पाक्षतै–
र्हविर्भिरथ दीपकैः सुरभिधूपकैः सत्फलैः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुकामितसुखप्रदं सदभिनंदनं तं जिनं ।
महामिमहिमान्वितं सकललोकवंद्यं मुदा ।९।

अर्घ्यं ॥ शांतिधारा ॥ पुष्पांजलिः

॥ स्तोत्रम् ॥

वंशस्थ-गुणाभिनंदादभिनंदनो भवान् । दयावधूं क्षांतिसखीमशिश्रयत् ।
समाधितंत्रस्तदुपोपपत्तये । द्वयेन नैर्ग्रंथ्यगुणेन चायुजत् ॥ १ ॥

अचेतने तत्कृतबंधजेऽपिच । ममेदमित्याभिनिवेशकग्रहात् ।
प्रभंगुरे स्थावरनिश्चयेनच । क्षतं जगत्तत्वमजीग्रहद्भवान् ॥ २ ॥

क्षुधादिदुःखप्रतिकारतः स्थिति- । र्न चेंद्रियार्थप्रभवाल्पसौख्यतः ।
ततो गुणो नास्ति च देहदेहिनो- । रितीदमित्थं भगवान्व्यजिज्ञपत्॥३॥

जनोऽतिलोलोऽप्यनुबंधदोषतो । भयादकार्येष्विह न प्रवर्तते ।
इहाऽप्यमुत्राऽप्यनुबंधदोषवित् । कथं सुखे संसजतीति चाऽब्रवीत्॥४॥

स चाऽनुबंधोऽस्य जनस्य तापिकृत् । तृषाभिवृद्धिःसुखतो न च स्थितिः॥
इति प्रभो लोकहितं यतो मतं । ततो भवानेव गतिः सतां मताः॥५॥

इति स्तोत्रार्घ्यं ॥

॥ अथ जयमाला ॥

जय अभिनंदनजिन मोक्षसुसदन ।
जय शारदचंद्र सुवदन नमो जय ॥
जय त्रिभुवपतिनुत दिव्यपाद जय ।
जय सकलघनाघन दिव्यनाद जय ॥ १ ॥

जय धर्म महीरुहमूलभूत जय ।
जय सकलचराचर लोकतात जय ॥
जय स्वयंवर भूपतिपूत पुत्र जय ।
जय भव्यपयोरुह व्यूहमित्र जय ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जय मासिवैशाखे शुक्लपक्षे जय ।
जय षष्ठी दिवसे विहित सुयक्षे ॥
सिद्धार्थाबागर्भावतरण ।
माघशुद्धकृत जन्मकल्याण ॥ ३ ॥

चामीकर वरादिव्य काय जय ।
समूलनिर्मूलित मानमाय जय ॥
जय दूरविनिर्जित प्रत्यवाय जय ।
जय बोधित भव्यसुमोक्षोपाय ॥ ४ ॥

अर्धचतुश्शत चापदेह जय ।
माघशुद्ध धृतपरमधर्म जय ॥
पुष्यसुमासे शुक्लसुपक्षे ।
प्रकटित केवलज्ञाननमो जय ॥ ५ ॥

जय आयुः पंचाशत्पूर्वलक्ष जय ।
जय भव्याभीष्ठद कल्पवृक्ष जय ॥
जय समवसरण हरिपीठवास जय ।
जय गणधरयतिकृत दिव्योपास जय ॥ ६ ॥

जय शुक्लेपक्षे वैशाखमासे । षष्ठीदिवसे कर्मविनाशे ॥
ज्ञानप्रकाशे मोक्षावकाशे । चकाशेभद्रः परमजिनेंद्रः ॥ ७ ॥

घत्ता— जय जय जिनवरप्रवर सुखाकर ।
जन्मजरामय मरणहर ॥
जय अभिनंदन जिनपापविनाशन ।
सुरसूरियतिसेवित चरण ॥ ८ ॥ ॐ अर्घ्यं ॥

शार्दूल:-सूक्ष्मेणातिमनोहरेण महिताः स्त्रस्थादघच्छेदका ।
भक्तानां सुखदायका हरिनुताः संगैः प्रमुक्ताश्च ये ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीरामेण सुदर्शनेन कलिता मुक्त्यंगनावल्लभा ॥

जाताः श्रीगजपंथके च गुरवः कुर्वंतु ते मंगलं॥ इत्याशीर्वादः ॥

भवावलिः-कौशलदेशे आयोध्यापत्तने संवरनृपसिद्धार्थामहादेव्योर्जाताय सुवर्णवर्णाय पंचाशदधिकत्रिशतधनुरुच्छेदाय पंचाशल्लक्षपूर्वायुष्काय कपिलांछनाययक्षेश्वरवज्रश्रृंखलायक्षयक्षीसमेतायसंमेदगिरौ आनंदकूटे कर्मक्षयंगताय श्रीमदभिनंदनतीर्थेश्वराय नमस्कारंकुर्वे उदकचं० अर्घ्यं ॥

॥ अथ सुमतितीर्थंकरपूजा ॥

उपेन्द्रवज्रा०सुमंगलामेघरथात्मजातो । नाभेयवंशांबुधिपूर्णचंद्रः ।

कोकध्वजोऽष्टापदकांतिकायः। संप्राचर्यतेऽस्मिन् सुमतिर्जिनेंद्रः॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं सुमतितीर्थंकर अत्र अवतरावतर संवौषट् स्वाहा। आह्वानं ॥ ॐ० अत्र तिष्ठ २ ठठ स्वाहा । स्थापनं ॥ ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ सन्निधीकरणं ॥

॥ अष्टकम् ॥

विबुधप्रिया० रत्नरंजितहेमकुंभभृदुद्घतीर्थजलैर्वरै- ।

विश्वजीवसुशीतलप्रददुःखशोकविनाशकैः ॥

श्रीसुरोरगपूजितातुलसौख्यसंततिकारणं ।

सुमतिनाथमहं यजे वरचक्रवाकसुलांछनं ॥

ॐ ह्रीं सुमतिजिनाय जलं निर्वपामि स्वाहा ॥ १ ॥

मलयपर्वतवासवासितामिश्रिताष्टसुगंधकैः ।

प्रथममंगलभाग्यकारणदिव्यपूज्यसुचंदनैः ॥

श्रीसु० ॥ ॐ ह्रीं सु० ॥ गंधं ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतिसुगंधसुशुभ्रसंयुततंडुलैरतिसुंदरै— ।
श्चंद्रकांतितुषारमौक्तिकसन्निभैर्वरपुंजकैः ।
श्रीसु० ॥ ॐ ह्रीं सु० ॥ अक्षतं ॥ ३ ॥

हेमचंपकजातिपंकजमालतीवरपुष्पकै— ।
र्मंददुर्गतगंधशीतलक्लेशतापविनाशकैः ॥
श्रीसु० ॥ ॐ ह्रीं सुमतिजिनाय ॥ पुष्पं ॥ ४ ॥

शर्कराघृतमिश्रलड्डुकगारिकेड्डलिकाहवी ।
सद्रसान्वितपूरिकादिसुभक्ष्यकैश्च मनोहरैः ।
श्रीसु० ॥ ॐ ह्रीं सु० ॥ चरुं ॥ ५ ॥

पंचरत्नसुदीपकै रविकांतिसन्निभभान्वितै ।
श्चंद्रिकादिसकाशसद्दशदिङ्मुखाभिसमुज्वलैः ॥
श्रीसु० ॥ ॐ ह्रीं सु० ॥ दीपं ॥ ६ ॥

अगरुचंदनसिल्हकादिकदशविधोद्भवधूपकैः ।
परिमलागतभृंगसंकुलशोभितैर्वृतादिङ्मुखैः ।
श्रीसु० ॥ ॐ ह्रीं सु० ॥ धूपं ॥ ७ ॥

पनसदाडिमचारुकर्कटिसत्फलाम्रसुमोचकै— ।
र्नारिकेलसुनागवल्लिफलर्वरैरतिपक्वकैः ।
श्रीसु० ॥ ॐ ह्रीं सु० ॥ फलं ॥ ८ ॥

शार्दूल- नीरैर्गंधविशालतंडुलकुलैः पुष्पोत्करैः श्रीजिनो ।
नैवेद्यैर्विविधैः सुदीपनिचयैर्धूपैः फलैर्दूर्वकैः ॥
सिद्धार्थैर्वरमंगलैरभिमतैः श्रीहेमपात्रार्पितै— ।
र्देवेंद्रैरभिपूजितः सुमतिरप्यर्घ्येण संपूज्यते ॥ ९ ॥
शांतिधारा । पुष्पांजलिः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ स्तोत्रम् ॥

उपजाति—अन्वर्थसंज्ञः सुमतिर्मुनिस्त्वं । स्वयं मतं येन सुयुक्तिनीतं ॥
यतश्च शेषेषु मतेषु नास्ति । सर्वक्रियाकारकतत्वसिद्धिः ॥१॥
अनेकमेकं च तदेव तत्वं । भेदान्वयज्ञानमिदं हि सत्यं ॥
मृषोपचारोऽन्यतरस्य लोपे । तच्छेपलोपोऽपि ततोऽनुपाख्यं ॥२॥
सतः कथंचित्तदसत्वशक्तिः । खे नास्ति पुष्पं तरुषु प्रसिद्धं ॥
सर्वस्वभावच्युतमप्रमाणं । स्ववाग्विरुद्धं तव दृष्टितोऽन्यत् ॥३॥
न सर्वथा नित्यमुदेत्युपैति । न च क्रियाकारकमत्र युक्तं ॥
नैवाऽसतो जन्म सतो न नाशो । दीपस्तमःपुद्गलभावतोऽस्ति ॥४॥
विधिर्निषेधश्च कथंचिदिष्टौ । विवक्षया मुख्यगुणव्यवस्था ॥
इति प्रणीतिः सुमतेस्तवेयं । मतेः प्रवेकाः स्तुवतोऽस्तु नाथ ॥५॥
इति स्तोत्रार्घ्यं ॥

॥ अथ जयमाला ॥

जय सुमतिजिनेंद्रं परमपवित्रम् । जय वंदे त्रिभुवनशांतकरं जय ॥
जय उच्चैर्गोत्रं तारणपोतं । जय स्थिरवाचित्तंमुनिनुत चरणम् ॥ १ ॥
त्रिलोकैकवेत्ता महाशोकभेत्ता । महाकामछेत्ता कषायप्रछेत्ता ॥
अनंतानुभेत्ता महाज्ञाननेता । महाक्रोधहर्ता महाभव्यत्राता ॥ २ ॥
महामेरुशीर्षे गतस्नानसारम् । परंदेवदेवैः कृतंमानगानम् ॥
परंनाकलोकाधिपैः सेव्यमानम् । परंजातवैराग्यजं शुक्लयोगम् ॥ ३ ॥
परंकर्मनाशोद्भवा दिव्यबोधम् । परंबोधरूपंसदा बुद्धिशुद्धम् ॥
सदाबुद्धिदाता सदासिद्धिनेता । सदालोकपाता सदासिद्धिभर्ता ॥ ४ ॥
परं हेमवर्णोद्भवकाय स्वरूपम् । नमद्देवनागेंद्रदेवेंद्र भूपम् ॥
ज्वलज्ज्योतिरूपं महानिर्विकल्पम् । हतंमल्लमल्लेश कंदर्पदर्पम् ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुनींद्रादिसेव्यं जगद्वंद्यपादम् । विशोकंविमोहं महादिव्यनादम् ॥
महावज्रनाराच बंधप्रदेहम् । यजे देवदेवंमहावीर वीरम् ॥ ६ ॥
घत्ता- जयवंदे देवंसुरकृतसेवम् । सुमतिजिनं यतिपतिमहितम् ॥
नुतगणधरदेवं चरणसुसेवम् । शांतिदायसतिपति महितम् ॥ ७ ॥
ॐ ऱ्हीं अर्हं श्री सुमति जिनेंद्राय अर्घ्यं ॥

शार्दूल० इंद्रैश्चंद्रवरैः फणींद्रनरपैः सारावगाहेन ये ।
सूर्यैः खेचरनाथभव्यनिवहैर्मान्या मुनींद्रैरजाः ॥
दुःखक्लेशजरारुजादिविगता स्तेऽनादिनामान्विता ।
जाताः श्रीगजपंथके च गुरवः कुर्वंतु ते मंगलं ॥

इत्याशीर्वादः ॥ भवावलिः आयोध्यापुरे मेघरथनृपसुमंगलादेव्योर्जाताय सुवर्णवर्णाय त्रिशतधनुरुच्छेदाय चक्रवाकलांछनाय चत्वारिंशल्लक्षपूर्वा-युष्काय तुंबुरपुरुषदत्तायक्षयक्षीसमेताय संमेदेअविचलकूटे कर्मक्षयंगताय श्रीसुमतितीर्थेश्वराय नमस्कारं कुर्वे ॥ उदकचं० ॥ अर्घ्यं ॥

॥ अथ पद्मप्रभतीर्थंकरपूजा ॥

अनु० धरणिसुषीमादेवीपुत्रं पद्मप्रभं यजे ।
पद्मांकं च मनोवेगाकुसुमेशं जगत्प्रभुं ॥

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं पद्मप्रभतीर्थंकर अत्र अवतरावतर संवौषट् स्वाहा ॥ आह्वान । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । स्थापनं । ॐ अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ सन्निधीकरणं ॥

अष्टकम्

वसंत० व्योमापगाविमलतीर्थजवारिधारां ।
सौरभ्यवर्यवरवस्तुचयेन युक्तां ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीपद्मनाभचरणाब्जयुगं यजामि ।
भक्त्या प्रणम्य सरसीरुहचिन्हशोभं ॥

ॐ ह्रीं पद्मप्रभजिनाय जलं निर्वपामि स्वाहा ॥ १ ॥

श्रीमन्महामलयचंदनसद्रसेन । काश्मीरजागरुसुचंद्ररसाश्रितेन ॥
श्रीप० ॥ ॐ ह्रीं प० ॥ गंधं ॥ २ ॥

क्षीरोदवारिगतफेनसमुज्वलेन । शालीयतंडुलभरेण सदुज्वलेन ।
श्रीप० ॥ ॐ ह्रीं प० ॥ अक्षतं ॥ ३ ॥

मंदारकैरवनवांबुजहेमपुष्पैः । संतानजातिसुरवृक्षकदंबपुष्पैः ॥
श्रीप० ॥ ॐ ह्रीं प० पुष्पं ॥ ४ ॥

क्षीराज्यमिश्रपरमान्नसुभक्ष्यवृंदै- । र्नानारसौघपरिमिश्रितशुभ्ररूपैः ॥
श्रीप० ॥ ॐ ह्रीं प० ॥ चरुं ॥ ५ ॥

दीपैर्निरस्ततिमिरैः परिभासमानैः । कर्पूरवर्तिसुभगैर्वररत्नभाभिः ॥
श्रीप० ॥ ॐ ह्रीं प० ॥ दीपं ॥ ६ ॥

कृष्णागरुप्रमुखसौरभयुक्तधूपैः । संव्याप्तधूमनिकैररिव मेघरूपैः ॥
श्रीप० ॥ ॐ ह्रीं प० ॥ धूपं ॥ ७ ॥

राजादनाम्रपनसोत्तमदाडिमौघै- । र्जंबीरजंबुकदलीफलसत्फलौघैः ।
श्रीप० ॥ ॐ ह्रीं प० ॥ फलं ॥ ८ ॥

सन्नीरगंधवरपुष्पचरूत्करैश्च । दीपैः सुधूपवरपक्वफलैश्च भक्त्या ।
देवेंद्रवृंदपरिपूजितपादपद्मं । पद्मप्रभं परियजे जिननाथमर्घ्यैः ॥ अर्घ्यं ॥
शांतिधारा पुष्पांजलिः ॥

॥ स्तोत्रम् ॥

इंद्रवज्राः-पद्मप्रभः पद्मपलाशलेश्यः । पद्मालयालिंगितचारुमूर्तिः ।
बभौ भवान् भव्यपयोरुहाणां । पद्माकराणामिव पद्मबंधुः ॥१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उपजाति-बभार पद्मां च सरस्वतीं च। भवान् पुरस्तात् प्रतिमुक्तिलक्ष्म्याः।
सरस्वतीमेव समग्रशोभां। सर्वज्ञलक्ष्मीं ज्वलितां विमुक्तः ॥२॥
शरीररश्मिप्रसरः प्रभोस्ते। बालार्करश्मिच्छविरालिलेप ।
नरामराकीर्णसभां प्रभाव-। च्छैलस्य पद्माभमणेः स्वसानुं ॥३॥
नभस्तलं पल्लवयन्निव त्वं। सहस्रपत्रांबुजगर्भचारैः ।
पादांबुजैः पातितमारदर्पो। भूमौ प्रजानां विजहर्थ भूत्यै ॥ ४ ॥
गुणांबुधेर्विप्रुषमप्यजस्रं। नाऽखंडलः स्तोतुमलं तवर्षेः ।
प्रागेव मादृक् किमुताऽतिभक्ति-। र्मां बाल मालापयतीदमित्थं॥५॥
इति स्तोत्रार्घ्यं ॥

॥ जयमाला ॥

जय परमतहरणं मुनिवरशरणं।
जय मुनिमनहरणं मदहरणं ॥
जय भवभयहरणं भवजलतरणं ।
पद्मप्रभवरजिनं सुखकरणं ॥ १ ॥

जय समवसरणसुसहित नमो जय ।
जय कर्मकलंकरहित नमो जय ॥
जय कमलवदन जिनदेव नमो जय ।
कमलसुलोचन देव नमो जय ॥ २ ॥

जय कमलप्रभ जिननाथ नमो जय ।
जय मददावानलपाथ नमो जय ॥
जय धरणमहीपति तनुज नमो जय ।
जय सुषीमादेवीपुत्र नमो जय ॥ ३ ॥
जय कमलवर्णवरगात्र नमो जय ।
जय परमपवित्रसुपात्र नमो जय ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जय हेमकमलसंचार नमो जय ।
जय भवजलनिधिलघुपार नमो जय ॥ ४ ॥

जय सकलसुखाकर वीर नमो जय ।
जय निश्चलध्यानसुधीर नमो जय ॥
जय यतिवरसेवितपाद नमो जय ।
जय जलधरध्वनिसमनाद नमो जय ॥ ५ ॥

जय ज्ञानपयोनिधिचंद्र नमो जय ।
जय रहितकलुषवितंद्र नमो जय ॥
जय भवभयसंततिहरण नमो जय ।
जय परमपवित्राचरण नमो जय ॥ ६ ॥

घत्ताः—जय जगदानंदन मारविभंजन । यतिपतिरंजन कमलजिन ॥
जय परमनिवास श्रीजिनपाहि । शांतिदास ब्रह्मनुतचरण ॥ ७ ॥ अर्घ्यं ॥

शार्दूलः-चैतन्याः प्रबलाः सदाऽगुरुलघूपेता गुणैर्भूषिताः ।
साधूनां भुवि ये वरा गतभया दूरीकृताघद्विषः ॥
श्रीधीकीर्तिभिरंचिता मुनिवराः संसेविताः साधुभि-- ।
र्जाताः श्रीगजपंथके च गुरवः कुर्वंतु ते मंगलं ॥ १ ॥

इत्याशीर्वादः ॥ भवावलिः- कौशंबीपत्तने धरणनृपसुषीमादेव्योर्जाताय लोहितवर्णाय कमललांछनाय त्रिंशल्लक्षपूर्वायुष्काय पंचाशदधिक-द्विशतधनुरुच्छेदाय पुष्पमनोवेगायक्षयक्षीसमेताय संमेदगिरौ मोहनकूटे कर्मक्षयंगताय श्रीपद्मप्रभतीर्थेश्वराय नमस्कारं कुर्वे ॥ उदकचंदन० ॥ अर्घ्यं ॥

॥ अथ सुपार्श्वतीर्थकरपूजा ॥

शालिनीः-पृथ्वीषेणासुप्रतिष्ठाग्रसूनुं । काशीनाथं पूजयामः सुपार्श्वं ।
कालीयक्षीनंदियक्षाधिनाथं । भक्त्या नित्यमश्मगर्भाभदेहं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं सुपार्श्वतीर्थंकर अत्र अवतरावतर संवौषट् स्वाहा। आह्वानं। ॐ० अत्र तिष्ठ २ ठठ स्वाहा। स्थापनं। ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा॥ सान्निधिकिरणं॥

॥ अष्टकम् ॥

विबुधप्रिया० स्वर्धुनीप्रमुखादितीर्थसुनीतसज्जलधारया।
चारुचंदनयक्षकर्दममिश्रसौरभसारया॥
सर्वसौख्यसुकारणं जनपापकर्दमशोषणं।
सुपार्श्वनाथमहं यजे वरस्वस्तिलांछनभूषणं॥
ॐ ह्रीं सुपार्श्वतीर्थंकाराय जलं निर्वपामि स्वाहा॥ १॥

मलयपर्वतसंभवै रतिरुचिरगंधसमुद्भवैः।
कुंकुमादिसमन्वितैरसभृत्सुचंदनसद्द्रवैः॥
सर्व०॥ ॐ ह्रीं सुपार्श्व०॥ गंधं॥ २॥

अतिमनोहरमधुरसौरभकलमतंडुलपुंजकै-।
ररुणखंडनवर्जितैर्जनरंजनै रतिसोज्वलैः॥
सर्व०॥ ॐ ह्रीं सुपार्श्व०॥ अक्षतान्॥ ३॥

कमलकुमुदसुकुंदचंपकजातिबकुलसुपुष्पकैः।
सकलसुभगजजनमनोहरपरिमलागतभृंगकैः॥
सर्व०॥ ॐ ह्रीं सुपार्श्व०॥ पुष्पं॥ ४॥

शर्कराघृतजातमंजुलभक्ष्यकैरतिशुभ्रकैः।
पायसैश्च सुपूरिकेड्डलिकादिसद्रससंयुतैः॥
सर्व०॥ ॐ ह्रीं सुपार्श्व०॥ चरुं॥ ५॥

रत्ननिर्मितदीपसन्निभसद्घृतोत्थसुदीपकैः।
सर्वदिग्विवरेषु दीपितकांतिकैरतिसोज्वलैः॥
सर्व०॥ ॐ ह्रीं सुपार्श्व०॥ दीपं॥ ६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सिल्हिकागरुजोंगकादिसमुद्भवैर्वरधूपकैः ।
पूरिताखिलदिङ्मुखैर्गणवासितैर्घनसन्निभैः ॥
सर्व० ॥ ॐ ह्रीं सुपार्श्व० ॥ धूपं ॥ ७ ॥

आम्रजंबुकपित्थदाडिमपूगमोचकसत्फलै- ।
नारिकेलसुजंबिरादिसुपक्वजैरमृतोपमैः ॥
सर्व० ॥ ॐ ह्रीं सुपार्श्व० ॥ फलं ॥ ८ ॥

द्रुतविलंबित० जलसुगंधसदक्षतपुष्पकै । श्चरुसुदीपसुधूपफलैर्वरैः ।
विविधतूर्यनिनादजयारवैर्वरसुपार्श्वमथार्घ्यतैरर्यजे ॥
अर्घ्यं ॥ शांतिधारा । पुष्पांजलिः ॥ ९ ॥

॥ स्तोत्रम् ॥

उपजाति- स्वास्थ्यं यदात्यंतिकमेषपुसां । स्वार्थो न भोगः परिभंगुरात्मा ।
तृषोनुषंगान्न च तापशांति- । रितीदमाख्यद्भगवान् सुपार्श्वः ॥१॥
अजंगमं जंगमनेययंत्रं । यथा तथा जीवधृतं शरीरं ।
बीभत्सु पूति क्षयि तापकं च । स्नेहो वृथाऽत्रेति हितं त्वमाख्यः॥२॥
अलंघ्यशक्तिर्भवितव्यतेयं । हेतुद्वयात्रिष्कृतकार्यलिंगा ।
अनीश्वरो जंतुरहंक्रियार्त्तः । संहत्य कार्येष्विति साध्ववादीः ॥३॥
बिभेति मृत्यो र्न ततोऽस्ति मोक्षो । नित्यं शिवं वांछति नाऽस्य लाभः।
तथाऽपि बालो भयकामवश्यो । वृथा स्वयं तप्यत इत्यवादीः॥ ४॥
सर्वस्य तत्वस्य भवान् प्रमाता । मातेव बालस्य हितानुशास्ता ।
गुणावलोकस्य जनस्य नेता । मयाऽपि भक्त्या परिणूयसेऽद्य ॥ ५ ॥
इति स्तोत्रार्घ्यं ॥

॥ जयमाला ॥

सुपार्श्वजिनेश्वर महिपरमेश्वर । जय परमध्यान निश्चलधरण ॥
जय मदनविखंडन पापविभंजन । जय रंजनशल्यत्रयहरण ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जय धर्मप्रकाशन देव नमो जय। जय गणधरनिर्मितसेव नमो जय ॥
जय परमतखंडनवीर नमो जय ॥ जय ज्ञानसुधारणवीर नमो जय ॥२॥
जय धर्मसरोरुहसूरनमो जय। जय निर्मलकर्मविदूर नमो जय ॥
जय नुतसुरव्यंतरराज नमो जय। जय चंद्रदिवाकरराज नमो जय ॥३॥
जय गणधरमुनिवरईश नमो जय। जय नरवरयतिवरईश नमो जय ॥
जय नाशितमोहप्रशूरनमो जय। जययापतिमिरहरसूर नमो जय ॥ ४ ॥
जय निर्भय निर्मल हंस नमो जय। जय प्रकटितनिजवरवंश नमो जय ॥
जय सुप्रातिष्ठपतितात नमो जय। जय पृथ्वीषेणापुत्र नमो जय ॥५॥
जय क्रोधरहितजिनराज नमो जय। जय मानरहितप्रतिभास नमो जय ॥
जय केवलचिन्मयपिंड नमो जय। जय मदनविमर्दनदंड नमो जय ॥६॥

घत्ता— जय केवलबोधं शुद्धविशुद्धं । वंदेसुखद सुपार्श्व जिनं ॥
जयमुक्तिनिवासं ललितसुभासं । शांतिदास यतिपतिमहितं ॥
॥ अर्घ्यं ॥ ७ ।

शार्दूल:-सश्रीमान् विजयस्ततोऽप्यचलको धर्म स्ततः सुप्रभः ।
सम्यग्ध्यानिसुदर्शनो गतमलो नंदी च नंदीसुहृत् ॥
अव्याबाधयुता इमे तु हलिनः सप्ताघबंधच्युता ।
जाताः श्रीगजपंथके च गुरवः कुर्वंतु ते मंगलं ॥ इत्याशीर्वादः ॥

भवावलि:— वाराणसीपत्तने सुप्रतिष्ठनृपपृथ्वीमहादेव्योर्जाताय स्वस्तिकलांछनाय हरितवर्णाय द्विशतधनुरुच्छेदाय चतुर्विंशतिलक्षपूर्वायुष्काय वरनंदिकालीयक्षयक्षीसमेताय संमेदप्रभासकूटे कर्मक्षयंगताय श्रीसुपार्श्वतीर्थेश्वराय नमस्कारं कुर्वे ॥उदकचंदन॥ अर्घ्यं ॥

॥ अथ चंद्रप्रभतीर्थंकरपूजा ॥

गीतिः--चंद्रपुरांबुधिचंद्रं चंद्रांकं चंद्रकांतसंकाशं ।
चंद्रप्रभजिनमंचे कुंदेंदुस्फारकीर्तिमन्तंतम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं चंद्रप्रभजिन देव अत्र अवतरावतर संवौषट् स्वाहा। आह्वानं। ॐ० अत्र तिष्ठ २ ठठ स्वाहा। स्थापनं। ॐ०अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ सन्निधीकरणं ॥

॥ अष्टकम् ॥

चामरः--स्वर्गसिंधुवारिणा सुगौरनीरधारिणा ।
मुक्तिसौख्यकारिणा जरापमृत्युहारिणा ॥
निर्जराहिमर्त्यनाथसेवितांघ्रिमांष्टकं ।
चंद्रभासमर्चयामि तीर्थनाथमीश्वरं ॥

ॐ ह्रीं चंद्रप्रभजिनाय जलं निर्वपामि स्वाहा ॥ १ ॥

शीतलेन चंदनादिकेशरादिवासिना ।
गंधलुब्धषट्पदेन पापतापनाशिना ॥
निर्जं० ॥ ॐ ह्रीं चंद्रप्रभजि० ॥ गंधं ॥ २ ॥

पुण्यशालिबीजकैरिवाऽभ्रहारपांडुरै-- ।
र्वन्यशालिसंभवैरखंडकोटितंडुलैः ॥
निर्जं० ॥ ॐ ह्रीं द्रप्रभजि० ॥ अक्षतान् ॥ ३ ॥

सिंधुवारमालतीसुपुंडरीकमल्लिका ।
पारिजातकेतकीकदंबकुंदचंपकैः ।
निर्जं० ॥ ॐ ह्रीं चंद्रप्रभजि० ॥ पुष्पं ॥ ४ ॥

नव्यगव्यपाकयुक्तभक्तभक्ष्यपायसै-- ।
र्व्यंजनाढ्यपूरिकासुमोदकैश्चरूत्तमैः ॥
निर्जं० ॥ ॐ ह्रीं चंद्रप्रभजि० ॥ चरुं ॥ ५ ॥

दीपकैश्चतैलवार्तिसंयुतैः शिखोज्वलै-- ।
र्वातघातवर्जितै रनर्घ्यपात्रसंस्थितैः ॥
निर्जं० ॥ ॐ ह्रीं चंद्रप्रभजिनाय ॥ दीपं ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्योममार्गसंगतैरनर्घ्यधूपधूमकै— ।
नीरदालिसन्निभैः कुकर्ममर्मदाहकैः ।
निर्ज० ॥ ॐ ह्रीं चंद्रप्रभजि० ॥ धूपं ॥ ७ ॥

आम्रकाम्रनारिकेलबीजपूरकर्कटी ।
कंटकीकपित्थपूगराजभक्ष्यदाडिमैः ॥
निर्ज० ॥ ॐ ह्रीं चंद्रप्रभजि० ॥ फलं ॥

नीरगंधतंडुलैर्लतांतहव्यदीपकै— ।
धूपपक्वसत्फलैर्मुदाऽर्घ्यकैर्मनोहरैः ॥
निर्ज० ॥ ॐ ह्रीं चं० ॥ अर्घ्यं ॥ शांतिधारा । पुष्पांजलिः ॥

॥ स्तोत्रम् ॥

उपजाति० चंद्रप्रभं चंद्रमरीचिगौरं । चंद्रं द्वितीयं जगतीवकांतं ।
वंदेऽभिवंद्यं महतामृषींद्रं । जिनं जितस्वांतकषायबंधं ॥ १ ॥
यस्यांऽगलक्ष्मीपरिवेषभिन्नं । तमस्तमोऽरेरिव रश्मिभिन्नं ।
ननाश बाह्यं बहु मानसं च । ध्यानप्रदीपातिशयेन भिन्नं ॥२॥
स्वपक्षसौस्थित्यमदावलिप्ता । वाक्सिंहनादैर्विमदा बभूवुः ।
प्रवादिनो यस्य मदार्द्रगंडा । गजा यथा केसरिणो निनादैः ॥ ३॥
यः सर्वलोके परमेष्ठितायाः । पदं बभूवाऽद्भुतकर्मतेजाः ।
अनंतधामाक्षरविश्वचक्षुः । समंतदुःखक्षयशासनश्च ॥ ४ ॥
स चंद्रमा भव्यकुमुद्वतीनां । विपन्नदोषाभ्रकलंकलेपः ।
व्याकोशयाङ्न्यायमयूखमालः । पूयात् पवित्रो भगवान् मनो मे ॥
इति स्तोत्रार्घ्यं ॥

॥ जयमाला ॥

गतकर्मकलंकं रहितकलंकं विद्यानंदं चंद्रांकं ।
भजचंद्रप्रभेशं नमितनरेशं जगदानंदं शुभ्रांगं ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जय सकलसुरासुरनमितपाद जय ।
जय सकलभुवनपतिवंद्यपाद जय ॥
जय सकलयतिपतिसेव्यपाद जय ।
जय सकलविद्याधरपूज्यपाद जय ॥ २ ॥

जय चंद्रसुलांछन चंद्रनाथ जय ।
जय चंद्रदिवाकरसेव्यनाथ जय ॥
जय चंद्रशरीर सुयोगिनाथ जय ।
जय चंद्रवदन सुभोगिनाथ जय ॥ ३ ॥

जय मुनिजनभूषण रहितदोष जय ।
जय परमत भंजन रहित भोग जय ॥
जय नरपतिरंजन रहितरोप जय ।
जय त्रिभुवन मोहन रहितमार जय ॥ ४ ॥

जय त्रिभुवन सुज्योतीरूप जय ।
जय परमनिरंजन ज्ञानरूप जय ॥
जय मानरहित प्रतिसेव्मान जय ।
जय प्रातिहार्य सुशोभमान जय ॥ ५ ॥

जय चंद्रपुरीश्वर परमईश जय ।
जय त्रिभुवनलोचन सकलधीश जय ॥
जय परमपुरुषप्रविनष्टक्रोध जय ।
जय सकलप्रकाशन सकसबोध जय ।

घत्ता– परमपवित्रं त्रिभुवननेत्रं । सकलविभास ज्ञानमयं ॥
जय चंद्रजिनेशं नमितसुरेशं शांतिदासवरसेव्यपदं ॥ ७ ॥
॥ अर्घ्यं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शार्दूल० त्रैलोकेंद्रभवाः समुज्वलगुणाः श्रीसिद्धनाथोपमाः ।
अंतातीतगुणार्णवाः क्षितितले जाताश्च सर्वेऽपि ते ॥
विद्यानंदगुरुः कृपावशमतिः श्रीमल्लिसेनप्रभु-- ।
स्तच्छिष्यो वरसिंहनंदिमुनिपो भव्योद्घतत्सन्निभः ॥

इत्याशीर्वादः ॥ भवावलिः चंद्रपुरीपत्तने महासेनमहाराजलक्ष्मीमती-देव्योर्जाताय चंद्रलांछनाय शुभ्रवर्णाय पंचाशदधिकैकशतधनुरुच्छेदाय दशलक्षपूर्वायुष्काय शामज्वालिनीयक्षयक्षीसमेताय संमेदेललितघनकूटे कर्मक्षयंगताय श्रीचंद्रप्रभतीर्थेश्वराय नमस्कारं कुर्वे ॥

उदकचंदन० ॥ अर्घ्यं ॥

॥ अथ पुष्पदंततीर्थंकरपूजा ॥

अनु० जयरामारमण्याश्च सुग्रीवस्य च सूनुकं ।
पुष्पदंतं यजे यज्ञे पुष्पदंतसमप्रभं ॥

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं पुष्पदंततीर्थंकर अत्र अवतरावतर संवौषट् स्वाहा । आह्वानं । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । स्थापनं । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ सन्निधिकरणं ॥

॥ अष्टकम् ॥

उपजातिः-क्षीरोदधेः सारसुपूरितांबु- । भृंगारनालाद्गलितोद्घधारया ।
समानया सत्कथया जिनानां । श्रीपुष्पदंतं जिनपं यजेऽहं ॥

ॐ ऱ्हीं पुष्पदंतजिनवराय जलं निर्वपामि स्वाहा ॥ १ ॥

इंद्रवज्राः—सत्कुंकुमश्रीघृसृणादिमिश्रितैः । सद्गंधदिग्वासितचंदनद्रवैः ॥
कर्पूरशुभ्रांशुवदुद्घशीतलैः । श्रीपु० ॥ ॐ पु० ॥ गंधं ॥ २ ॥

उपजातिः—सुलक्षणैश्चंद्रसमानकांतिभिः । सुनिर्मलैर्दीर्घतरैर्मनोज्ञैः ॥
शाल्यक्षतैर्वज्रवदुज्वलैश्च । श्रीपु० ॥ ॐ पु० ॥ अक्षतं ॥३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुचंपकैः कुंदकदंबजाती- । सुश्वेतमंदारसुगंधपुष्पैः ॥
स्वर्गेंद्रदेवैः कृतपुष्पवृष्टिं । श्रीपु० ॥ ॐ पु० ॥ पुष्पं ॥४॥
सुहेमरत्नोत्थसुभाजनस्थै- । र्हृद्यैः सुसारैश्चरुभक्ष्यकैश्च ॥
नानाविधव्यंजनसूपयुक्तैः । श्रीपु० ॥ ॐ पु० ॥ चरुं ॥ ५ ॥
सद्वर्तिकर्पूरविनिर्मितैश्च । दीपोत्करै रत्नवदुज्वलैश्च ॥
मिथ्यांधकारापहसूर्यसन्निभैः । श्रीपु० ॥ ॐ पु० ॥ दीपं ॥६॥
सदुत्तमैर्धूपचयैर्घनाभै- । र्दशप्रकारोद्भवसुगंधसंभवैः ॥
दिगंतरिक्षावृतधूपसंकुलैः । श्रीपु० ॥ ॐ पु० ॥ धूपं ॥ ७ ॥
सुनारिकेलाम्रकपित्थचोच- । जंबीरपूगोद्भवफलैः सुपक्वैः ॥
सुमुक्तिलक्ष्मीसुखकृत्फलाभैः । श्रीपु० ॥ ॐ पु० ॥ फलं ॥८॥

वंशस्थः-सुनीरसंतापहचंदनद्रवैः । प्रदीर्घसल्लक्षणिकाक्षतैर्वरैः ॥
सुपुष्पनैवेद्यसुदीपधूपकैः । फलान्विताद्यैर्महयामि तं जिनं ॥९॥
अर्घ्यं ॥ शांतिधारा पुष्पांजलिः ॥

॥ स्तोत्रम् ॥

उपजातिः-एकांतदृष्टिप्रतिषेधि तत्वं । प्रमाणसिद्धं तदतत्स्वभावं ॥
त्वया प्रणीतं सुविधे स्वधाम्ना । नैतत्समालीढपदं त्वदन्यैः ॥ १ ॥
तदेव च स्यान्न तदेव च स्या- । त्तथा प्रतीतेस्तव तत् कथंचित् ॥
नात्यंतमन्यत्वमनन्यता च । विधेर्निषेधस्य च शून्यदोषात् ॥ २ ॥
नित्यं तदेवेदमिति प्रतीते- । र्न नित्यमन्यत्प्रतिपत्तिसिद्धेः ॥
न तद्विरुद्धं बहिरंतरंगं । निमित्तनैमित्तकयोगतस्ते ॥ ३ ॥
अनेकमेकं च पदस्य वाच्यं । वृक्षा इति प्रत्ययवत्प्रकृत्या ॥
आकांक्षिणः स्यादिति वै निपातो । गुणानपेक्षेऽनियमेऽपवादः ॥४॥
गुणप्रधानार्थमिदं हि वाक्यं । जिनस्य ते तद्विषतामपथ्यं ॥
ततोऽभिवंद्यं जगदीश्वराणां । ममाऽपि साधो स्तव पादपद्मं ॥ ५ ॥

इति स्तोत्रार्घ्यं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ जयमाला ॥

जय भवभयहरणं शिवसुखकरणं ।
पुष्पदंतजिनपतिचरणं जय ॥
जय शुभमतिकरणं यतिपतिशरणं ।
जय संस्तवीमि भवजलतरणं जय ॥ १ ॥

विकामदं ददत्पदं हतामयं सुखास्पदं ।
सुभावदं कृतामयं निरासदं हतद्वंदं ॥
सुशर्मदं सुस्वर्गदं सुमोक्षदं चिदास्पदं ।
भजामि तं सुखान्वितं सुपुष्पदंतदेवकं ॥ २ ॥

शिवंकरं शुचंहरं निरंतरं शुभंकरं ।
सुखंकरं निरंबरं जिनेश्वरं दमाकरं ॥
वराननं कजासनं शुभासनं रमाननं । भजामि तं ॥ ३ ॥

सुभुक्तिदं सुमुक्तिदं प्ररूपकं सुरूपकं ।
विरामकं निरामकं निरोगकं विभोगकं ॥
सुदीपकं सुचापकं सुभूपकं निरूपकं ।
भजामि तं सुखान्वितं सुपुष्पदंतदेवकं ॥ ४ ॥

सुराकिनी सुशाकिनी विडाकिनी सुहाकिनी ।
विपाकिनी पिशाचिनी मलाविनी विलासिनी ॥
प्रदेशताप्रकोपता विमान्यता क्षयंगता ।
भजामि तं सुखान्वितं सुपुष्पदंतदेवकं ॥ ५ ॥

निरामयं वरालयं हतादयं कलामयं ।
स्फुरन्नयं गतादयं निरालयं पराशयं ॥
महाबलंसदाबलं चिदामलं निराकुलं ।
भजामि तं सुखान्वितं सुपुष्पदंतदेवकं ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

घत्ताः–यजशर्म सुसहितं दोषातीतं ।
वितत्तं भासुर श्रीजिनपं ॥
भज पुण्यपवित्रं सहितसुगोत्रं ।
पुष्पदंतयतिपतिगणपं ॥ अर्घ्यं ॥ ७ ॥

शार्दूलः-एवं षोडशलाभयुक्तमनघं दृष्टाऽऽशु तं विस्मितो ।
राजा चेतसि कालसंवरवरश्चार्च्यंकृतो भाग्यवान् ॥
प्राग्जन्मांतर पुण्यतोऽपि सकलं संप्राप्तमेतत्फलं ।
तस्माज्जैनमतस्य दास्यमनिशं कुर्वीत सिद्धाप्तये ॥इत्याशीर्वादः॥

भवावलिः-काकंदीपत्तने सुग्रीवमहाराजरामादेव्योर्जाताय शुभ्रवर्णाय शतधनुरुच्छेदाय द्विलक्षपूर्वायुष्काय कर्कटलांछनाय अजितमहाकाली-यक्षयक्षीसमेताय संमेदगिरौ सुप्रभकूटे कर्मक्षयंगताय श्रीपुष्पदंततर्थिश्वराय नमस्कारं कुर्वे ॥ उदक० ॥ अर्घ्यं ॥

॥ अथ शीतलतीर्थंकरपूजा ॥

गीति– श्रीराजभद्रपरिवृढदृढराजप्रिपासुनंदायाः ।
सूनुं शीतलनाथं यजामहे शातकुंभसंकाशं ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं शीतलतीर्थंकर अत्र अवतरावतर संवौषट् स्वाहा। आह्वनं। ॐ० अत्र तिष्ठ २ ठठ स्वाहा। स्थापनं। ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ सन्निधीकरणं ॥

॥ अष्टकम् ॥

– चामर –

क्षीरपूरगौरसारभूरिवारिधारया । मंदगंधचंदनादिसौरभातिसारया ॥
प्राणिदीनकारमारदर्पसर्पशांतिदं । नाकिनायकैरुपासितं यजामिशीतलं ॥
ॐ ह्रीं शीतलजिनदेवाय जलं निर्वपामि स्वाहा ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्कतर्कवर्जनेंदुशीतलैः सुचंदनैः। कुंकुमादिमिश्रितैः सुगंधलुब्धषट्पदैः॥
प्राणि० ॥ ॐ ह्रीं शीतल० ॥ गंधं ॥ २ ॥

ओषधेन सिंधुफेनहारभासपांडुरै-। रक्षतैः सुलक्षणै रजोभिखंडवर्जितैः॥
प्राणि० ॥ ॐ ह्रीं शीतल० ॥ अक्षतान् ॥ ३ ॥

पारिजातवारिजोद्घकुंदहेमकेतकी। मालतीसुचंपकादिसारपुष्पदामभिः।
प्राणि० ॥ ॐ ह्रीं शीतल० ॥ पुष्पं ॥ ४ ॥

व्यंजनाज्यपायसादिसद्रसैश्वरोश्चयैः। मोदकौदनादिभिःसुवर्णभाजनस्थितैः
प्राणि० ॥ ॐ ह्रीं शीतल० ॥ चरुं ॥ ५ ॥

रत्नभाससर्पिरुत्थदीपकैः समुज्वलैः। वातघातनोपगोपकंपरूपवर्जितैः॥
प्राणि० ॥ ॐ ह्रीं शीतल० ॥ दीपं ॥ ६ ॥

सिल्हिकासितागरुप्रधूपकैर्दशोद्धवैः। वर्णमानवेशमानसाक्षिसंभ्रमोद्धवैः॥
प्राणि०॥ ॐ ह्रीं शीतल० ॥ धूपं ॥ ७ ॥

श्रीफलाम्रकर्कटीसुदाडिमादिभिःफल। वर्णमृष्टसौरभादिसत्स्वरूपसंयुतैः।
प्राणि० ॥ ॐ ह्रीं शीतल० ॥ फलं ॥ ८ ॥

जीवनेद्धचंदनाक्षतप्रसूनकैर्वरैः-। श्चारुभक्ष्यदीपधूपपक्वसत्फलैर्मुदा ॥
स्वर्णभाजनस्थितैः सुमंगलांगकार्घ्यकैः। शीतलेश्वरं त्वहं महामहे-
जिनेशिनं ॥ अर्घ्यं ॥ शांतिधारा। पुष्पांजलिः ॥ ९ ॥

॥ स्तोत्रम् ॥

वंशस्थ- न शीतलाश्चंदनचंद्ररश्मयो। न गांगमंभो न च हारयष्टयः॥
यथा मुनेस्तेऽनघवाक्यरश्मयः। शमांबुगर्भाः शिशिरा विपश्चितां ॥१॥
सुखाभिलाषानलदाहमूर्छितं। मनो निजं ज्ञानमयामृतांबुभिः॥
व्यदिध्यपस्त्वं विपदाहमोहितं। यथा भिषग्मंत्रगुणैः स्वविग्रहं ॥२॥
स्वजीविते कामसुखे च तृष्णया। दिवा श्रमार्ता निशि शेरते प्रजाः
त्वमार्य नक्तं दिवमप्रमत्तवा-। न जागरेवात्मविशुद्धवर्त्मनि ॥३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अपत्यवित्तोत्तरलोकतृष्णया । तपस्विनः केचन कर्म कुर्वते ।।
भवान् पुनर्जन्मजराजिहासया । त्रयीं प्रवृत्तिं शमधीरवारुणत् ।।४।।

त्वमुत्तमज्योतिरजः क्व निर्वृतः । क्व तेऽपरे बुद्धिलवोद्धवक्षताः ।।
ततः स्वनिश्रेयसभावनापरै- । बुंधप्रवेकैर्जिनशीतलेड्यसे ।।५।।
इति स्तोत्रार्घ्यं ।।

।। जयमाला ।।

जय शीतलदेवं सुरकृतसेव, जयभव्यौघार्चितपादकंज जय ।
जय गतपरभाव केवलभाव, जयभावजविजय भवहरण जय ।।१।।

निरामय निर्भय निर्मल हंस, सदामलकेवलचिन्मयहंस ।
सुरौघकृतानघदिव्यसुसेव, पालयभव्यान् शीतलदेव ।। २ ।।

न मानं न माया न भूषा न कोपः । न रोगो न भीतिर्न चिंता न मोहः ।।
न लोभो न क्षोभो न सेवा न हेयः । पालय भव्यान् शीतलदेव ।। ३ ।।

न देशो न वेषो न रागो न खेदो । न रोदो न मोदो न मित्रं न शत्रुः ।।
न क्रीडा न खेलो न कामो न सेवा । पालयभव्यान् शीतलदेव ।। ४ ।।
न पत्तन खर्वड खेडो न ग्रामो । न पुत्रो न बंधुर्न माया न रामा ।।
न गेहो न वित्तं न क्षेत्रं न क्षेमं । पालय भव्यान् शीतलदेव ।। ५ ।।
न दासो न खड्गो दिगंबररूप । न भोगो न रोगस्सुज्ञानरूप ।।
न जन्मजरामय कालविषादः । पालय भव्यान् शीतलदेव ।। ६ ।।
घत्ता- भज शीतलचंद्रंज्ञानसुचंद्र । चंद्रंचंद्रार्चित चरणं ।।
भज त्रिभुवननाथं योगिसुनाथं । देवनागनरपूजितचरणं ।। अर्घ्यं ।।७।।
शार्दूल-श्रीक्षोणीपतिवाटकृध्दृढथोद्भूतोऽमरैः पूजितः ।
कर्मारातिसमाजसुष्टुदलनो धर्मार्थमोक्षप्रदः ।।
संसारोत्तमसाधुधर्मकथकः संसारविच्छेदकः ।
श्रीमच्छीतलदेवको गुणानिधिः कुर्यात् स मे मंगलं ।।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्याशीर्वादः ॥ भवावलिः- भद्रपुरेदृढरथमहाराजसुनंदादेव्योर्जाताय श्रीवृक्षलांछनाय इक्ष्वाकुवंशाय सुवर्णवर्णाय नवतिधनुरुच्छेदाय एकलक्ष-पूर्वायुष्काय ब्रह्मकालीयक्षयक्षीसमेताय सम्मेदगिरौ विद्युद्वरकूटे कर्मक्षयंगताय श्रीशीतलतीर्थेश्वराय नमस्कारं कुर्वे ॥ उदकं० ॥ अर्घ्यं ॥

॥ अथ श्रेयांसतीर्थंकरपूजा ॥

अनु० भूपविष्णूद्भवं देवं श्रीश्रेयांसजिनाधिपं ।
विधिना स्थापयाम्यत्र जितमन्मथशत्रुकं ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं श्रेयांसतीर्थंकर अत्र अवतरावतर संवौषट् स्वाहा। आह्वानं। ॐ० अत्र तिष्ठ २ ठठ स्वाहा। स्थापनं। ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा। सन्निधीकरणं ॥

॥ अष्टकम् ॥

द्रुतवि- विमलचंद्रावीमिश्रितधारया। कमलवासितसज्जलसारया ॥
सकललोकविलोकनचंद्रभं। प्रथितगंडसुलांछनमीश्वरम् ॥

ॐ ह्रीं श्रेयांसतीर्थंकराय जलं निर्वपामि स्वाहा ॥ १ ॥

मलयजैर्वरकुंकुमामिश्रितैः। परिमलागतषट्पदसंश्रितैः ॥
भवकुतापहरं कमलाकरं। प्रथि० ॥ ॐ ह्रीं श्रे० ॥ गंधं ॥ २ ॥

सकलतंडुलपुण्यसुपुंजकैः। सरसमानशशिप्रतिदक्षकैः ॥
प्रबलघातिकुकर्मनिवारकं। प्रथि० ॥ ॐ ह्रीं श्रे०॥ अक्षतान्॥३॥

विकचचंपककेतकिमालती। कमलकुंदवसंतसुपुष्पकैः।
मुनिमनोजविकासविरोचनं। प्रथि० ॥ ॐ ह्रीं श्रे० ॥पुष्पं ॥४॥

वटकखज्जकमोदकशर्करैः। प्रचुरदुग्धदधीक्षुसुभक्ष्यकैः ॥
नमितनागनरासुरनायकं। प्रथि ॥ ॐ ह्रीं श्रे० ॥ चरुं ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तुहिनरत्नघृतादिकसंभवै । विबुधबोधसुधर्मविभूषणैः ।
विकटकाममदेभविदारणं ॥ प्रथि० ॐ ह्रीं श्रे० ॥ दीपं ॥ ६॥
अगरुचंदनचंद्रसमुद्भवैः । परिमलाकलितामरसंचयैः ।
प्रबलपंचमबोधप्रदायकं । प्रथि० ॥ ॐ ह्रीं श्रे० ॥ धूपं ॥ ७॥
पनसदाडिममोचसुचोचकैः । क्रमुककाम्रकपित्थफलोत्तमैः ।
सुगतिसत्फलदं गतभूषणं । प्रथि० ॥ ॐ ह्रीं श्रे० ॥ फलं ॥ ८ ॥
आर्याः--जलगंधाक्षतपुष्पैर्नैवेद्यसुदीपधूपफलनिकरैः ।
यजेऽहं भक्त्या जिनपं सुरासुरनमितपदयुगलं ॥ अर्घ्यं ॥
शांतिधारा । पुष्पांजलिः ॥ ९ ॥

॥ श्रेयांसजिन स्तोत्रम् ॥

उपजातिः—

श्रेयान् जिनः श्रेयसि वर्त्मनीमाः । श्रेयःप्रजाः शासदजेयवाक्यः ॥
भवांश्चकाशे भुवनत्रयेऽस्मि— । न्नेको यथा वीतघनो विवस्वान् ॥ १ ॥
विधिर्विषक्तः प्रतिषेधरूपः । प्रमाणमत्रान्यतरत्प्रधानं ॥
गुणोऽपरो मुख्यनियामहेतु— । र्नयःसदृष्टांतसमर्थनस्ते ॥ २ ॥
विवक्षितो मुख्य इतीष्यतेऽन्यो । गुणो विवक्षो न निरात्मकस्ते ।
तथाऽरिमित्रानुभयादिशक्ति— । र्द्वयावधेः कार्यकरं हि वस्तु ॥ ३ ॥
दृष्टांतसिद्धावुभयोर्विवादे । साध्यं प्रसिद्धयेन्नतु तादृगस्ति ॥
यत्सर्वथैकांतनियाम दृष्टं । त्वदीयदृष्टिर्विभवत्यशेषे ॥ ४ ॥
एकांतदृष्टिप्रतिषेधसिद्धि-- । न्यायेषुभिर्मोहरिपुं निरस्य ॥
असिस्म कैवल्यविभूतिसम्राट् । ततस्त्वमर्हन्नसि मे स्तवार्हः ॥ ५ ॥
इति स्तोत्रार्घ्यं ॥

॥ अथ जयमाला ॥

शार्दूलः–वंदे मुक्तिपतिं जिनेंद्रविपुलं देवेंद्रवृंदस्तुतं ।
श्रेयांसं जिनदेवबोधसुवरं संसारतारं तरं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मिथ्याकंदविनाशनैकचतुरं नंदाधिदेव्या भवं ।
वक्ष्ये बोधकरं सुचारुचतुरं श्रेयांसजयमालकं ॥ १ ॥

जयभवभयहरणं भवजलतरणं तरणं यतिवरसुखकरणं ।
जयदूरविगानं मानविदहनं शमनं शमतामयधरणं ॥ २ ॥
जयपरमपवित्रं त्रिभुवननेत्रं चित्रं चारित्राचरणं ।
जयत्रिभुवनदासं देवसुभासं भावं धर्ममहीकरणं ॥ ३ ॥
जयत्रिभुवनचंद्रं चर्चितचंद्रं चंद्रं धर्मपयोधीनां ।
जयज्ञानसुभानुं सुरकृतगानं धानं ज्ञानपयोधीनां ॥ ४ ॥

जयजगदीशं त्रयभुवनेशं ईशं योगिसमूहानां ।
जय शुद्धस्वरूपं ज्ञानस्वरूपं रूपं त्रिभुवनभव्यानां ॥ ५ ॥

जयमदनविदंडं हिमकरतुंडं खंडं मोहप्रचंडानां ।
गतकर्मकलंकं रहितकलंकं अकलंकं जिनश्रेयांसं ॥ ६ ॥

घत्ताः— सकलगुणसमुद्रं केवलज्ञानचंद्रं ।
कृतसकलसुभव्यं देवदेवेंद्रसेव्यं ॥
सकलगुणगणेंद्रं मोहकुष्टं जिनेंद्रं ॥
नमति भजति नित्यं शांतिदासो यतींद्रः ॥ अर्घ्यं ॥ ७ ॥

शार्दूलः—शुक्लध्यानपरायणोगुणनिधिर्ज्ञानैकरत्नाकरः ।
अष्टान्वीतसहस्रलक्षणयुतः पूर्णेंदुतुल्याननः ॥
कंदर्पद्विपतुंगदर्पशिखरोद्धेदैकानिर्घातकः ।
श्रीश्रेयांसजिनो दयामयतनुः कुर्यात् स मे मंगलं ॥ इत्याशीर्वादः ॥

भयावलिः- राजाभून्नलिनप्रभः प्रभुतमः प्रध्वस्तपापव्रजः ।
कल्पांतः सकलामराधिपतिराट्र संकल्पसौख्याकरः ॥
यस्तीर्थाधिपतिस्त्रिलोकमहितः श्रीमान्श्रियै श्रायसं ।
स्याद्वादंप्रतिपद्य सिद्धिमगमच्छ्रेयान् जिनः सोस्तुनः ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सिंहपुराधीश्वर विष्णुनृपतिवेणु (नंदा) देव्योर्जाताय सुवर्णवर्णाय इक्ष्वाकुवंशाय गंडलांछनाय अशीतिधनुरुच्छेदाय चतुरशीतिलक्षवर्षायुष्काय ईश्वरगौरीयक्षयक्षिसमेताय संमेदगिरौ संकुलकूटे कर्मक्षयंगताय श्रीश्रेयांसतीर्थंकराय नमस्कारं कुर्वे ॥ उदक० । अर्घ्यं ॥

॥ अथ वासुपूज्यतीर्थंकर पूजा ॥

अनु:—वसुपूज्यस्य सत्पुत्रं जिनेंद्रं वासुपूज्यकं ।
स्थापयाम्येव सद्भक्त्या सुखागारं शिवाप्तये ॥

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं वासुपूज्यतीर्थंकर अत्र अवतरावतर संवौषट् स्वाहा । आह्वानं । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । स्थापनं । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ सन्निधीकरणं ॥

॥ अष्टकम् ॥

(चामरवृत्त)

श्रीमदोषधीशवासितैरतीवनिर्मलैः। स्वादुभिः सुभाषितैरिवातिशीतलैर्जलैः
श्रीसमागमैकहेतुशारदाकुलास्पदं। महेशवासुपूज्यकं विशेषराजकं यजे ॥
ॐ ऱ्हीं० ॥ वासुपूज्यजिनाय जलं निर्वपामि स्वाहा ॥ १ ॥
मिश्रितैः सिताभ्रजेन रेणुवासपीतनै-। स्तैलपर्णिकागरुद्रवैः सुगंधबंधुरैः॥
पापतापछेदकाममूर्तिदीप्तिमद्वहं। महे० ॥ ॐ ऱ्हीं वासुपूज्य० ॥ गंधं ॥
पांडुरैः सुगंधिभिर्महामदापहारकै-। जैनवाक्चयैरिवोद्घमंडितैरखंडितैः॥
अक्षतैर्विलक्षकैः स्वरूपमापदुज्झितं। महे०॥ ॐ ऱ्हीं वा०॥ अक्षतान् ॥३॥
सौमनेयसप्तलेयमागधेयसच्चरै-। श्चंपकाञ्जकुञ्जकैरनंगबाणमत्सरैः ॥
पुष्पलिट्प्रमोदनादवद्भिरुद्भवांचितं। महे०॥ ॐ ऱ्हीं वा०॥ पुष्पं ॥४॥
मुक्तिकामिनीकटाक्षबाणविद्धवक्षसं । नष्टतत्प्रबंधकप्रकारकक्षरक्षकं ॥
आत्मनो मनोगतिं समाप्य तं चकासकं। महे०॥ ॐ ऱ्हीं वा० ॥ चरुं ॥५॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कोटिभास्करप्रतापलोपभूरितेजसं । विश्वलोकलोचनामृतस्रुतं हतैनसं ॥
स्फारविस्फुरत्प्रकाशकेवलैकचक्षुषं ॥ महे० ॥ ॐ ह्रीं वा०॥ दीपं ॥६॥
दिग्वधूमुखारविंदवृंदभृंगविभ्रमं । धारयंत मक्षरद्दलं प्रियं पयःसमं ॥
कर्मघर्मतागणप्रणाशहेतुमुत्तमं । महे० ॥ ॐ ह्रीं वा० ॥ धूपं ॥ ७ ॥
श्रीरसालकंदरालतालनारिकेलजै- । र्बीजपूरजंबुनिंबुदाडिमादिसत्फलैः ।
पादपीठनिर्लुठत्कठोरकोपकोपिनं । महे० ॥ ॐ ह्रीं वा० फलं ॥ ८ ॥
सर्वतोमुखैः सुगंधिभिश्च चंदनद्रवै— । रक्षतैर्लतांतदामभिश्च तैश्चरूवरैः ।
दीपधूपसत्फलैश्च निर्मितं शिवश्रिये । मल्लिभूषणस्तुताय संददेऽर्घ्यमर्हते ॥
अर्घ्यं ॥ शांतिधारा । पुष्पांजलिः ॥ ९ ॥

॥ स्तोत्रम् ॥

उपजाति०—

शिवासु पूज्योऽभ्युदयक्रियासु । त्वं वासुपूज्यस्त्रिदशेंद्रपूज्यः ।
मयाऽपि पूज्योऽल्पधिया मुनींद्र । दीपार्चिषा किं तपनो न पूज्यः ॥ १ ॥
न पूजयाऽर्थ स्त्वयि वीतरागे । न निंदया नाथ विवांतवैरे ।
तथाऽपि ते पुण्यगुणस्मृतिर्नः । पुनातु चित्तं दुरितांजनेभ्यः ॥ २ ॥
पूज्यं जिनं त्वाऽर्चयतो जनस्य । सावद्यलेशो बहुपुण्यराशौ ।
दोषाय नाऽलं कणिका विषस्य । न दूषिका शीतशिवांबुराशौ ॥ ३॥
यद्वस्तु बाह्यं गुणदोषसूते-- । र्निमित्तमभ्यंतरमूलहेतोः ।
अध्यात्मवृत्तस्य तदंगभूत-- । मभ्यंतरं केवलमप्यलं ते ॥ ४ ॥
बाह्येतरोपाधिसमग्रतेयं । कार्येषु ते द्रव्यगतः स्वभावः ।
नैवाऽन्यथा मोक्षविधिश्च पुंसां । तेनाऽभिवंद्यस्त्वमृषिर्बुधानां ॥ ५ ॥
इति स्तोत्रार्घ्यं ॥

॥ जयमाला ॥

अनु० पंचज्ञानप्रकाशो यः पंचेंद्रियविदारणः ।
पंचमीगतिनाथो यः पंचकल्याणपूजकः ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुरनरकिन्नरसेवितपादं । भवजलनिधिपोतं सुविदातं ।
चंपापुरवसुपूज्यसुतं तं । वासुपूज्यजिनममलमनंतं ॥ २ ॥
भव्यांभोरुहविकसितवदनं । निर्जितकर्मारातिसुमदनं । चंपा०॥३॥
चंद्रदिवाकरकोटिसुतेजं । दशदिग्मंडलद्योतिततेजं । चंपा० ॥ ४॥
अविचलपददायकजगदीशं । हरिहरदेवैर्नुतपदमीशं । चंपा० ॥ ५ ॥
ज्ञानाऽलोकाऽऽलोकितकथकं । शल्यत्रयमायादिकमथकं । चंपा० ॥६॥
दुंदुभिदिव्यध्वनिशोभितकं । चामरसिंहासनसन्नतकं । चंपा० ॥ ७ ॥
दोषाष्टादशदूरितकायं । मुनिगणहंसैःसेवितपादं । चंपा० ॥ ८ ॥
मुक्तिवधूसहकृतवरसंगं । जनहृद्रंजनमांगोपांगं । चंपा० ॥ ९ ॥
मातृजयावत्युदरेजातं । देहसुवर्णविराजितनाथं । चंपा० ॥ १० ॥
सप्ततिपंचोत्तरधनुरुत्तुंगं । देहसुदर्शनमंबुजनेत्रम् । चंपा० ॥ ११ ॥
द्वासप्ततिलक्षाब्दायुष्कं । तं पद्शतगणनीसेवितपादं । चंपा० ॥ १२॥
महिषांकं शोभितकेतुपताकं । धर्मामृतवर्षणहारिणांकं । चंपा० ॥ १३ ॥

घत्ता– ॥ त्रिजगत्पतिनाथं यं त्रिजगन्मंगलोदयं ।
जयमालां पठेद्भक्त्या वासुपूज्यं समर्चयेत् ॥ अर्घ्यं ॥

शार्दूल:- पंचप्रौढमदक्षवारणसमाजानेकपामित्रको ।
नित्यानंदकरः सुखामृतमहाकूपारमग्नः खलु ॥
संसारांबुधिमग्नजंतुसहसापोतायमानंगतः ।
श्रीमत्सुंदरवासुपूज्यजिनपः कुर्यात् स मे मंगलं॥ इत्याशीर्वादः ॥

भवावलिः—वसंत- पद्मोत्तरः प्रथम जन्मनि पार्थिवेशः ।
शुक्रेमहत्यमरषट्पदपादपद्मः ॥
यो वासुपूज्ययुवराट् त्रिजगत्प्रपूज्यो ।
राज्ये जिनः स जनयत्वतुलं सुखं वः ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वसुपूज्यनृपजयादेव्योर्जाताय कुमारबालब्रह्मचारिणे रक्तवर्णाय इक्ष्वाकुवंशाय महिषलांछनाय सप्ततिधनुरुच्छेदाय द्वासप्ततिलक्षवर्षायुष्काय सुकुमारगांधारीयक्षयक्षीसमेताय चंपापुरसमीपे रजतवालुकाख्य नदितीरे मंदरशैलशिखरे मनोहरोद्याने मोक्षंगताय श्रीवासुपूज्यतीर्थकराय नमस्कारं कुर्वे ॥ उदकचंदन० ॥ अर्घ्यं ॥

॥ अथ विमलतीर्थकरपूजा ॥

अनुष्टुभ्—त्रयोदशमतीर्थेशं विमलं मलवर्जितं ।
स्थापयामि जगत्पूज्यं सत्पुत्रं कृतवर्मणः ॥

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं विमलतीर्थंकर अत्र अवतरावतर संवौषट् स्वाहा आह्वानं ॥ ॐ० अत्र तिष्ठ २ ठठ स्वाहा । स्थापनं । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा । सन्निधीकरणं ॥

॥ अष्टकम् ॥

वसंतः—क्षीराब्धिनीरनिकरैर्निकरैः सुराणां ।
यः स्नापितो जिनवरो वनकावनीतैः ॥
कर्पूरपूरधरभूरिपरागनीरै— ।
श्चर्चे तमत्र विमलं कमनं जिनेंद्रं ॥
ॐ ऱ्हीं० विमलतीर्थंकराय जलं निर्वपामि स्वाहा ॥१॥
संसारभूरितरतापविनाशनोत्को ।
यः कर्मघर्मरहितो महितोऽमरेंद्रैः ॥
सद्गंधनैरिहसुचंदनचंदनौघै— ।
श्चर्चे० ॥ ॐ ऱ्हीं० विमल० ॥ गंधं ॥ २ ॥

अक्षीणपुण्यसदृशैः सुदृशामभिष्टै— ।
रक्षुण्णशालिजनिभिर्जनिभिर्विभेदैः ॥
दिव्याक्षतैः क्षतमलोऽक्षयसौख्यलब्धि— ।
श्चर्चे० ॥ ॐ ऱ्हीं० विमल० ॥ अक्षतान् ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुक्तींदिरासुहसितैर्हसितैर्जपाब्ज ।
जातीकदंबकलबंधुकमुख्यपुष्पैः ।
फुल्लद्भिरेभिरसमैः सुरपुष्पभेद्यै- ।
अर्चे० ॥ ॐ ह्रीं विमल० ॥ पुष्पं ॥ ४ ॥

सत्कारपूरपरमान्नपयोघृताद्यैः ।
किंवा दुहद्भिरमृतैरमृतांशुकांतैः ।
संतापपापतुदितं प्रचुरैर्हविर्भि- ।
अर्चे० ॥ ॐ ह्रीं विमल० ॥ चरुं ॥ ५ ॥

ज्ञानप्रदीपपरमाधिकदिव्यतत्वं ।
सद्दीपयद्भिरभितो वलयं दिशायाः ।
सद्दीपकैः कुमलतां धुतदुःसमूहै-- ।
अर्चे० ॥ ॐ ह्रीं विमलतीर्थंकराय ॥ दीपं ॥ ६ ॥

धूपैः प्रधूपितककुब्जघनैश्च धूम-- ।
स्तोमैः प्रमोदितविमानगणैर्गणेंद्रः ।
वैमानिकेन हृदयात्तसुसौरभो य-- ।
अर्चे० ॥ ॐ ह्रीं विमल० ॥ धूपं ॥ ७ ॥

यैस्तालतालसुरसालरसालमुख्यैः ।
शातोद्भवैरभिनवप्रमदप्रदैस्तैः ।
अन्यैः फलैः परममोक्षफलाप्तयेऽहं ।
चर्चे० ॥ ॐ ह्रीं विमल० ॥ फलं ॥ ८ ॥

वाश्चं दनाक्षतलतांतहविप्रदीपै-- ।
धूपैः फलैः रचितमर्घ्यमनर्घ्यकांतैः ।
देवेंद्रपूज्यविमलस्य पदाग्रतोऽद्य ।
ह्यातोद्यवाद्यनिनदैरवतारयेऽहं ॥
अर्घ्यं । शांतिधारा । पुष्पांजलिः ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ स्तोत्रम् ॥

य एव नित्यक्षणिकादयो नया । मिथोऽनपेक्षाः स्वपरप्रणाशिनः ॥
त एव तत्वं विमलस्य ते मुनेः । परस्परेक्षाः स्वपरोपकारिणः ॥१॥
यथैकशः कारकमर्थसिद्धये । समीक्ष्य शेषं स्वसहायकारकं ॥
तथैव सामान्यविशेषमातृका । नयास्तवेष्टा गुणमुख्यकल्पतः ॥ २ ॥
परस्परेक्षाऽन्वयभेदलिंगतः । प्रसिद्धसामान्यविशेषयोस्तव ॥
समग्रताऽस्ति स्वपरावभासकं । यथा प्रमाणं भुवि बुद्धिलक्षणं ॥३॥
विशेषवाच्यस्य विशेषणं वचो । यतो विशेषं विनियम्यते च यत् ॥
तयोश्च सामान्यमतिप्रसज्यते । विवक्षितात् स्यादिति तेऽन्यवर्जनं॥४॥
नयास्तव स्यात्पदसत्यलांछिता । रसोपविद्धा इव लोहधातवः ॥
भवंत्यभिप्रेतगुणा यतस्ततो । भवंतमार्याः प्रणता हितैषिणः ॥५॥
इति स्तोत्रार्घ्यं ॥

॥ जयमाला ॥

जयजिनविमलं वरसुखकमलं । विमलं दर्शनज्ञानधरं ।
जयज्ञानसुचंद्रं नमितनरेंद्रं । भद्रं भव्यानंदकरं ॥ १ ॥
जय मुनिवरगणधरशर्मकार । जय समवसरणभवभव्यतार ॥
जय सकलसभाशोभित जिनेंद्र । जय प्रथमकोष्ठे सेवितगणेंद्र ॥ २ ॥
जय द्वितीयकोष्ठे गणनिसेव । जय तृतीयकोष्ठे वरस्वर्गदेव ॥
जय तुरीयकोष्ठे ज्योतिष्कनारि । जय पंचमकोष्ठे भौमनारि ॥३॥
जय षष्ठे कोष्ठे नागनारि । जय सप्तमकोष्ठे स्वर्गनारि ।
जय अष्टमकोष्ठे ज्योतिष्कदेव । जय नवमे कोष्ठे भौमदेव ॥४॥
जय दशमे कोष्ठे नागसार । जय एकादशकोष्ठे मनुष्यसार ॥
जय द्वादशकोष्ठे सिंहभार । जय मध्मसुपीठे जिन भव्यतार ॥
जय चामरछत्रसुरपुष्पवृष्टि । जय दुंदुभ्यासनधर्मसुवृष्टि ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जय भामंडलवरदिव्यवाणि । जय वृक्षाशोक सुशर्मखाणि ॥

घत्ता—जयविमलजिनेंद्रं पापनिकंदं । नयनानंदं भव्यानां ।
जयमुनिगणसहितं यतिपतिमहितं । शांतिदासब्रह्मयतिशरणं ॥ अर्घ्यं॥

शार्दूल-स्पष्टानंतचतुष्टयादिकलितो मार्तंडकोटिप्रभो ।
दोषाष्टादशभिः प्रमुक्तसुतनुर्दिव्यैर्गुणैः संयुतः ॥
प्रोद्यद्बोधमयोरुचारुवचनैर्जीवौघसंबोधितः ।
श्रीमत्तीर्थकरो जिनेंद्रविमलः कुर्यात् स मे मंगलं॥ इत्याशीर्वादः

भवावलिः-मालिनी—विनिहितपरसेनः पद्मसेनो महीशः ।
सुरसमितिसमर्च्यस्पष्टसौख्योष्टमेंद्रः ॥
विपुलविमलकीर्तिर्विश्वविश्वंभरेशो ।
विमलजिनपतिस्तात्संस्तुतस्तुष्टये नः ॥ २ ॥

कांपिल्याख्यनगरे कृतवर्मनृपआर्यश्यामादेव्योर्जाताय सुवर्णवर्णाय इक्ष्वाकुवंशाय वराहलांछनाय षष्टिधनुरुच्छेदाय पंचाशल्लक्षवर्षायुष्काय षण्मुखवैरोटीयक्षयक्षिसमेताय संमेदगिरौ वीरसंकुलकूटे कर्मक्षयंगताय श्रीविमलतीर्थकराय नमस्कारं कुर्वे ॥ उदकचंदन० ॥ अर्घ्यं ॥

॥ अथ अनंततीर्थकरपूजा ॥

अनुष्टुम्--अनंततीर्थकर्तारं हरिषेणसुतोत्तमं ।
स्थापये विधिना भक्त्या जंतूनां सुखदायकं ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं अनंततीर्थंकर अत्र अवतरावतर संवौषट् स्वाहा। आह्वानं । ॐ० अत्र तिष्ठ २ ठठ स्वाहा। स्थापनं । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ सन्निधीकरणं ॥

॥ अष्टकम् ॥

द्रुतवि--कनकरत्नमयैः कलशैर्महा- । जलभृतैः शुचितीर्थधिनायकं ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चतुर्दशं जिननाथजिनेश्वरं । त्रिभुवनैर्महितं जिनमर्चये ॥
ॐ ह्रीं० अनंततीर्थकराय जलं निर्वपापि स्वाहा ॥ १ ॥
मलयपर्वतगंधपरिश्रमै– । र्विरहबाणजितं जिनराजकं ॥
चतु० ॥ ॐ ह्रीं० अनंत० ॥ गंधं ॥ २ ॥
महमनोहरकांतिसुतंडुलै- । र्घमघमाद्युपलाक्षितपुंजकैः ॥
चतु० ॥ ॐ ह्रीं० अनंत० ॥ अक्षतान् ॥ ३ ॥
बहुसुगंधसुसेवतिपारिजा । परिमलैः शुभकेतकिचंपकैः ॥
चतु० ॥ ॐ ह्रीं० अनंत० ॥ पुष्पं ॥ ४ ॥
घृतसुपायसशर्करमोदकै-- । रमृतक्षीररसैः परिपूरितैः ॥
चतु० ॥ ॐ ह्रीं० अनंत० ॥ चरुं ॥ ५ ॥
सुजनमोहनरत्नसुदीपकै- । र्ज्वलतया मणिपात्रविधिष्ठितैः ॥
चतु० ॥ ॐ ह्रीं० अनंत० ॥ दीपं ॥ ६ ॥
अगरुचंदनगुग्गुलमोहकैः । सुरभिलोकसुपूरणधूपकैः ॥
चतु० ॥ ॐ ह्रीं० अनंत० ॥ धूपं ॥ ७ ॥
पनसगंधरसैः कदलीफलै- । र्वरसुदाडिमकम्रकजंबुकैः ॥
चतु० ॥ ॐ ह्रीं० अनंत० ॥ फलं ॥ ८ ॥
कुसुमगंधसुतंडुलपुष्पकै-- । श्चरुसुरत्नसुदीपदशांगकैः ॥
फलभरैश्चरणांबुजयुग्मकं । त्रिभुवनैर्महितं जिनमर्चये ॥ अर्घ्यं ॥
शांतिधारा । पुष्पांजलिः ॥ ९ ॥

॥ स्तोत्रम् ॥

अनंतदोषाशयविग्रहो ग्रहो । विषंगवान् मोहमयश्चिरं हृदि ।
यतोजितस्तत्वरुचौ प्रसीदता । त्वया ततोऽभूर्भगवाननंताजित् ॥१॥
कषायनाम्नां द्विषतां प्रमाथिना-- । मशेषयन्नाम भवानशषेवित् ॥
विशोषणं मन्मथदुर्मदामयं । समाधिभैषज्यगुणैर्व्यलीनयत् ॥२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परिश्रमांबुर्भयवीचि मालिनी । त्वया स्वतृष्णा सरिदार्य शोषिता ॥
असंगघर्मार्क गभस्तितेजसा । परं ततो निर्वृति धामतावकम् ॥३॥

सुहृत् त्वयि श्रीसुभगत्वमश्नुते । द्विषंस्त्वयि प्रत्ययवत्प्रलीयते ॥
भवानुदासीनतमस्तयोरपि । प्रभो परं चित्रमिदं तवेहितं ॥ ४ ॥

त्वमीदृश स्तादृश इत्ययं मम । प्रलापलेशोऽल्पमतेर्महामुने ॥
अशेषमहात्म्य मनीरयन्नपि । शिवाय संस्पर्शइवाऽमृतांबुधेः ॥५॥
इति स्तोत्रार्घ्यं ॥

॥ जयमाला ॥

जय देवजिनेंद्रं पापनिकंदं । वंद्यं त्रिभुवनशर्मकरं ।
जय नाथाऽनंतं श्रीभगवंतं । वंदे संतं शांतकरं ॥ १ ॥
जय जिनवर भवहर वीरवीर । जय सकलविमलमते धीरधीर ॥
जय ज्ञानप्रपंचप्रचारचार । जय पुण्यपयोनिधिपारपार ॥ २ ॥
जय जिनमतपंकजसूरसूर । जय ज्ञानसुधारसपूरपूर ॥
जय परमतभंजनदंडदंड । जय सकलसुखामलपिंडपिंड ॥ ३ ॥
जय मोक्षवधूवरहारहार । जय सकलभुवनसुखकारकार ॥
जय सकलभुवनपतिवंद्यपाद । जय सबलघनाघनादिव्यनाद ॥ ४ ॥
जय मानविमर्दन देवदेव । जय दिनकरहिमकरसेवसेव ॥
जय पापनिकंदन परमगात्र । जय कमलसुलोचन परमपात्र ॥ ५ ॥
जय धर्मपयोनिधिचंद्रचंद्र । जय मोहविमर्दन रहिततंद्र ॥
जय जन्मजरामयमरणहरण । जय परमनिरंजन परमचरण ॥
घत्ता ॥ जय परमजिनेशं सकलगणेशं । ईशं त्रिभुवनभव्यकरं ॥
जय भगवंतं देवाऽनंतं शांतिदासब्रह्मशर्मकरं ॥ अर्घ्यं ॥
शार्दूल–लोकालोकसमस्तभावकथकः स्फूर्जत् सुबोधेन य–।
श्वांतातीतगुणांबुधिः शिववधूपाणिप्रियो धर्मदः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जंतूनां करुणामयैकहितकृत् श्रीमाननंतो जिनो ।
देवेंद्रैः सततं समर्चितपदः कुर्यात् स मे मंगलं ॥ इत्याशीर्वादः ॥

भवावलिः— वसंत-- प्राक्पालकः प्रथितपद्मरथः प्रथिव्याः
पश्चाद्विनिश्चितमतिस्तपसाच्युतेंद्रः ॥
तस्माच्युतोऽभवदनंतजिनस्सुकांतो ।
यस्मोवताध्दतमनंतभवांतकाद्वः ॥ २ ॥

अयोध्यापत्तने सिंहसेननृपतिजयश्यामादेव्योर्जाताय सुवर्णवर्णाय इक्ष्वाकुवंशाय पंचाशद्धनुरुच्छेदाय त्रिंशल्लक्षवर्षायुष्काय भल्लूकलांछनाय पातालअनंतमतीयक्षयक्षीसमेताय संमेदगिरौ स्वयंभुकूटे कर्मक्षयंगताय श्रीमदनंततीर्थकराय नमस्कारं कुर्वे ॥ उदकचं० ॥ अर्घ्यं ॥

मालिनी— मदनमदविदारी चारुचारित्रधारी ।
नरकगतिनिवारी मोक्षमार्गावतारी ॥
नृसुरनयनहारी केवलज्ञानधारी ।
जयतु जगति चंद्रोऽनंतनाथो जिनेंद्रः ॥इत्याशीर्वादः॥

स्रग्धराः-नीरैः सद्गंधसारैः कुसुमपरिमलैर्भक्ष्यनैवेद्यदीपैः-- ।
धूपैं रत्नैश्च नानाफलभरितसमर्घादिद्रव्येन दूर्वां ॥
दध्ये क्षीरेण दर्भप्रभृतिक्रमुककर्पूरनारंगवाह्लैः ।
पूर्णार्घ्यं शांतिदासो जगति महित ते संभ्रमेऽनंतनाथ ॥ पूर्णार्घ्यं ॥

उपेंद्रवज्राः-समस्तभव्यो यशदस्तु भूया- । न्मनोरथोऽप्यूर्जितधर्मभावः ॥
सद्भावका पुत्रकलत्रलक्ष्मी-- । जिनेश्वरांघ्रि कमलप्रसादात् ॥
इष्टप्रार्थना ॥ इति ब्रह्मशांति दासविराचिताऽनंतचतुर्दशीपूजा समाप्ता ॥

॥ अथ धर्मतीर्थकर पूजा ॥

अनु०:-सुप्रभा भानुराजेंद्रनंदनो धर्मतीर्थकृत् ।
प्राच्यतें कुरुवंशार्हश्रीयुग्रत्नपुरेश्वरः ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं धर्मतीर्थंकर अत्रावतरावतर संवौषट् स्वाहा ॥ आह्वानं । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । स्थापनं ॥ ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ सन्निधीकरणं ॥

॥ अष्टकम् ॥

चामरवृत्त—श्रीमदिंद्र वंद्य कीर्तिपूर्तिगौर भासुरैः ।
सोमचंदनादि वस्तु वृन्दयुक्त बंधकैः ॥
बंधुराष्ट भोगमुख्य दिव्यभोग भागिनम् ।
धर्मनाथमर्चयामि पाप ताप भेदिनम् ॥
ॐ० ॥ धर्मतीर्थंकराय जलं ॥ १ ॥

गंध वृंदमंदिरालिमालया विराजितै— ।
रिंदुकुंकुमादियुक्त गंध सारचंदनैः ॥
बंधुराष्ट० ॥ ॐ० ॥ धर्मतीर्थंकराय गंधं ॥ २ ॥

अक्षयत्वलक्ष्ययुक्तमुक्तिभूरुहांकुरै— ।
रक्षताच्छतादि लक्ष्मलक्षितैर्वराक्षतैः ॥
बंधुराष्ट० ॥ ॐ० ॥ धर्म० ॥ अक्षतान् ॥ ३ ॥

चंचरीक संचयेन संचितैर्मनोहरैः ।
पंकजोद्‌घमल्लिकादि चारुगंध पुष्पकैः ॥
बंधुराष्ट० ॥ ॐ० ॥ धर्मतीर्थ० ॥ पुष्पं ॥ ४ ॥

दूरसारतादि बोध्य चारुबाष्पपुष्पितैः ।
हैमराजतादि पात्रवासितोद्‌घ भक्ष्यकैः ॥
बंधुराष्ट० ॥ ॐ० ॥ धर्म० ॥ नैवेद्यं ॥ ५ ॥

अंधकार बंधनेन वंदित प्रकाशकैः ।
चंद्रसांद्रवर्ति सर्पीरंजित प्रदीपकैः ॥
बंधुराष्ट० ॥ ॐ० ॥ धर्म० ॥ दीपं ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कामदाम धूम सौम्य सौम्यगुग्गुलूद्भवैः ॥
व्योम धाम रामणीय भूमिपूर्ण धूपकैः ॥
बंधुराष्ट० ॥ ॐ० धर्मतीर्थेश्वराय ॥ धूपं ॥ ७ ॥

सत्फलायमान नव्यसत्फलैरनल्प कैः ।
कल्पवृक्षकल्प नारिकेलपूगभेदकैः ॥
बंधुराष्ट० ॥ ॐ० धर्मतीर्थकराय ॥ फलं ॥ ८ ॥

अर्घनिर्गताच्छ रत्नरंजितोच्छपात्रगै— ॥
रर्घ्ययोग्य वस्तुपूर्ण पावनैरथार्घ्यकैः ॥
बंधुराष्ट० ॥ ॐ० धर्मतीर्थकराय ॥ अर्घ्यं ॥ ९ ॥

शार्दूल—भव्यानां भुवनैक धाममाहिमा पूजासपर्याविधिः ।
कर्तॄणांप्रतिपालकस्थितिभृतां राज्ञां यतीनां तथा ॥
देशग्रामपुराकराभिजनता संसेव्यविश्वंभरा ।
चक्रस्याप्यखिलेंद्र वंदितपदः शांतिंप्रकुर्याज्जिनः ॥ शांतिधारा ॥

वसंत—देवेंद्रवृंदमाणिमौलिसमार्चितांघ्रि— ।
देवाधिदेवपरमेश्वरकीर्तिभाजः ॥
पुष्पायुधप्रमथनस्य जिनेश्वरस्य ।
पुष्पांजलिर्विरोचितोस्तु विनेयशांत्यै । पुष्पांजलिः ॥१॥

॥ स्तोत्रम् ॥

धर्मतीर्थमनघं प्रवर्तयन् । धर्म इत्यनुमतः सतां भवान् ।
कर्मकक्षमदहत्तपोऽग्निभिः । शर्म शाश्वतमवाप शङ्करः ॥ ७१ ॥
देवमानवनिकायसत्तमै— । रेजिषे परिवृतो वृतो बुधैः ।
तारकापरिवृतोऽतिपुष्कलो । व्योमनीव शशलाञ्छनोऽमलः ॥७२॥
प्रातिहार्यविभवैः परिष्कृतो । देहतोऽपि विरतो भवानभूत् ।
मोक्षमार्गमशिषन्नरामरा- । न्नापि शासनफलैषणातुरः ॥ ७३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कायवाक्यमनसां प्रवृत्तयों । नाऽभवंस्तव मुनेश्चिकीर्षया ।
नासमीक्ष्य भवतः प्रवृत्तयो । धीर तावकमचिन्त्यमीहितम् ॥७४॥

मानुषीं प्रकृतिमभ्यतीतवान् । देवतास्वपि च देवता यतः ।
तेन नाथ परमासि देवता । श्रेयसे जिनवृष प्रसीद नः ॥ ७५ ॥

॥ जयमाला ॥

जय अपराजवंजवजीवनकर्म, जयमदेभविदारणकेसरिधर्म ।
जय त्रिलोकशिरोगतपुण्याभिराम, जय महासुखमध्यप्रयोजकधर्म॥१॥

जय अखंडितचिन्मयशांतकरंड, जय घनैकपरोन्नतशक्तिसुपिंड ।
जय समुद्भवभीतिविमुक्तसमृद्ध, जय महासुख............... ॥ २ ॥

जय सुरासुरमानुषनूतपदाब्ज, जय विदूरितदुर्भरभावसमाज ॥
जय सुकेवलबोधसुदृष्टिसमृद्ध, जय महासुख० ॥ ३ ॥

जय मानमहीधरकुलिशसुदंड, जय ऐरावत करसम बाहुदंड ॥
जय सकलघनाघनसदृशसुनाद । जय महासुख० ॥ ४ ॥

जय रंभास्तंभसमानसुजंघ, जय बोधित चातुर्वर्ण्यसुसंघ ॥
जय विद्याधरफणिपतिनुतपाद, जय महासुख० ॥ ५ ॥

घत्ता—मालिनी समयरस समग्रं पूर्णभावं सुभावं ।
जनितशिव सुसौख्यं यः स्मरेद्धर्मनाथं ॥
निखिल भुवन पूज्यं भानुचंद्रादि सेव्यं ।
भवतिभुवनसारं तस्य पुंसोखिलार्थः ॥ अर्घ्यं ॥

मालिनी-विदलयतिकुबोधं बोधयत्यागमार्थं ।
सुगतिकुगतिमार्गौ पुण्यपापे व्यनक्ति ॥
अवगमयति कृत्याकृत्यभेदं जिनेंद्रः ।
स वितरतु सदा वो मंगलं धर्मनाथः ॥ इत्याशीर्वादः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवावलिः-गीतिः-निर्जित्य दशरथस्सन् रिपून् । नृपोंतेहमिंद्रतां प्राप्तः ॥
धर्मस्स पात प्राप्तै । धर्मायधि यस्य दशरथायं ते ॥ २ ॥

रत्नपुरे भानुमहाराजसुव्रता [सुप्रभा] महादेव्योर्जाताय हाटकवर्णाय इक्ष्वाकुवंशाय वज्रलांछनाय पंचोत्तरचत्वारिंशद्धनुरुच्छेदाय दशलक्ष-वर्षायुष्काय किन्नरमानसीयक्षयक्षीसमेताय सम्मेदेदत्तवरकूटेपरिनिर्वृ-ताय श्रीधर्मनाथ तीर्थेश्वराय नमस्कारं कुर्वे ॥ उदकचं० ॥ अर्घ्यं ॥ शांतिधारा ॥ पुष्पांजलिः ॥

सूनुः शांतिजिनेश्वरः कुरुकुलः कल्याणमालोज्वलः ॥
षट्खंडावनिपालपूजितपदः श्रीशंखचक्रांकितः ॥
कल्याणेद्धरुगर्च्य ते भवरिपुः श्रीहस्तिनाधीश्वरः ॥ १ ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं शांतितर्थिकर अत्रावतरावतर संवौषट् स्वाहा । आह्वाहनादि० ॥

॥ अष्टकम् ॥

भुजंगप्रयात-वियत्सिंधुनीरैः सुशीतांशुशीतैः। कनत्कांचनोद्धारकुंभप्रपूर्णैः।
सुरेंद्रादिवंद्यं जगत्पुण्यपुंजं । यजे शांतिनाथं त्रिलोकैकबंधुं ॥
ॐ ह्रीं शांतितीर्थकराय जलंनिर्वपामि स्वाहा ॥ १ ॥
जगत्तापनाशैः शशांकांशुशीतैः । भ्रमद्भृंगगानैः प्रसिद्धोरुगंधैः।
सुरेंद्रादिवंद्यं ०॥ ॐ ह्रीं० शांतितर्थि० ॥ गंधं ॥ २ ॥
बिसच्छेदशुभ्रैस्सुगंधाक्षतौघै। मृगांकांशुसौम्यैरखंडाभिरामैः ॥
सुरेंद्रादिवंद्यं० ॥ ॐ ह्रीं० शांतिनाथाय ॥ अक्षतान् ॥ ३ ॥
स्फुटच्चंपकौघैर्हटद्धाटकौघै- । र्लसत्कुंदमल्लीसरोजादिपुष्पैः ॥
सुरेंद्रादिवंद्यं० ॥ ॐ ह्रीं० शांतिजिनवराय ॥ पुष्पं ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

घृतोद्भूत नव्यैश्च नानाप्रकारैः । सुपूर्यादिसान्नैः सुभक्ष्यैर्मनोज्ञैः ॥
सुरेंद्रादिवंद्यं० । ॐ ह्रीं० । शांतिनाथ ॥ चरुं ॥ ५ ॥
तमस्तोमशुंडालसंघातसिंहैः । सितस्थूलकर्पूर जातप्रदीपैः ॥
सुरेंद्रादिवंद्यं० ॥ ॐ ह्रीं० शांति० ॥ दीपं ॥ ६ ॥
वियन्मंडलापूर्ण धूपैरुदारै- । र्निलिंपांगनानंदकृद्गंधधूपैः ॥
सुरेंद्रादिवंद्यं० ॥ ॐ ह्रीं० शांति० ॥ धूपं ॥ ७ ॥
कपित्थाम्र जंबूलसन्मातुलुंगैः । प्रशस्तोरुरंभादि शुंभत्फलौघैः ॥
सुरेंद्रादिवंद्यं० ॥ ॐ ह्रीं० शांति० ॥ फलं ॥ ८ ॥
सुवर्णोद्घपात्रस्थगंधाक्षतौघैः । सुसिद्धार्थसत्पुष्पहव्यैर्महार्घ्यैः ॥
सुरेंद्रादिवंद्यं० ॥ ॐ ह्रीं० शांति० ॥ अर्घ्यं ॥ ९ ॥
सुगांगेयभृंगार नालप्ररोह- । त्सुवारांसुधाराभिरर्च्यंमहेशं ॥
सुरेंद्रादिवंद्यं० ॥ ॐ ह्रीं० शांति० ॥ शांतिधारा ॥ १० ॥

अनुः—सुरनरौघपूजितंपरमशांति नामकं ॥
विचिकिलाब्जकैर्यजे भवावनाशकं जिनं ॥ पुष्पांजलिः ॥ ११ ॥

॥ स्तोत्रम् ॥

विधाय रक्षां परतः प्रजानां । राजा चिरं योऽप्रतिमप्रतापः ॥
व्यधात्पुरस्तात्स्वत एव शान्ति- । र्मुनिर्दयामूर्तिरिवाघशान्तिम् ॥१॥
चक्रेण यः शत्रुभयंकरेण । जित्वा नृपः सर्वनरेन्द्रचक्रम् ॥
समाधिचक्रेण पुनर्जिगाय । महोदयो दुर्जयमोहचक्रम् ॥ २ ॥
राजश्रिया राजसु राजसिंहो । रराज यो राजसुभोगतन्त्रः ॥
आर्हन्त्यलक्ष्म्या पुनरात्मतन्त्रो । देवासुरोदारसभे रराज ॥३॥
यस्मिन्नभूद्राजनि राजचक्रं । मुनौ दयादीधितिधर्मचक्रम् ॥
पूज्ये मुहुः प्राञ्जलि देवचक्रं । ध्यानोन्मुखे ध्वंसि कृतान्तचक्रम् ॥४॥
स्वदोषशान्त्याविहितात्मशान्तिः । शान्तेर्विधाता शरणं गतानाम् ॥
भूयाद्भवक्लेशभयोपशान्त्यै ॥ शान्तिर्जिनो मे भगवान् शरण्यः ॥५॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ जयमाला ॥

जय श्री जिनपं मुनिमानसहंसं । जय सौख्यकरं जगतामवतंसं ॥
जय भव्यजनाब्जविकासदिनेशं । जय वांछितदं परिणौमिजिनेशं ॥१॥
जय बोधपयोनिधिवर्धनचंद्रं । जय मानमदेभविनाशमृगेंद्रं ॥
जय पादपयोरुहविनमत्सुरेशं । जय वांछितदं परिणौमिजिनेशं ॥२॥
जय सद्वचनामृततोषितलोकं । जय ज्ञानसुलोचनालोकितलोकं ॥
जय शोकविमुक्तमजंभुवनेशं । जय वांछितदं परिणौमिजिनेशं ॥ ३ ॥
जय दंभमहीरूहमूलकुठारं । जय शीलधरंजितदुर्धरमारं ॥
जय प्राप्तभवांबुधिपाररमेशं । जय वांछितदं परिणौमिजिनेशं ॥ ४ ॥
जय दुःखदपापदवानलनीरं । जय कर्मघनाघनभूरिसमीरं ॥
जय काममहोजितकोटिदिनेशं । जय वांछितदं परिणौमिजिनेशं ॥ ५ ॥
जय सुंदररूपसुमंदरधीरं । जय मोहमहामदमर्दनवीरं ॥
जय पद्मदलायतनेत्रमधीशं । जय वांछितदं परिणौमिजिनेशं ॥ ६ ॥
जय पंचाजवंजवभीतिविनाशं । जय पंचमबोधधरंसकलज्ञम् ॥
जय पंचमसद्गतिदंसुगुणेशं । जय वांछितदं परिणौमिजिनेशं ॥ ७ ॥
जय सम्यगनंतचतुष्टयरूपं । जय सन्नुतनाकिफणीश्वरभूपं ॥
जय इन्द्रनरेन्द्रफणीन्द्रसुभूपं । जय वांछितदं परिणौमिजिनेशं ॥८॥

घत्ता— इतिस्तुतोभूज्जगदेकभूषणः । सुधर्मचंद्रश्रितधर्मभूषणः ॥
मुनीन्द्रदेवेन्द्रयशःप्ररूपकः । स नो जिनःपातुसुसौख्यरूपकः ॥अर्घ्यं॥९॥

शार्दूल० लक्ष्मीर्यं स्वयमभ्युपैति रभसा कीर्तिस्समालिंगति ॥
प्रीतिर्यं भजते मतिः प्रयतते यं लब्धमुत्कंठया ॥
स्वःश्रीर्यं परिरब्धुमिच्छति मुहुर्मुक्तिः समालोकते ।
सोयं मंगलमातनोतु भवतां शांतिर्जिनः श्रेयसे ॥ इत्याशीर्वादः

शार्दूलः— श्रीषेणः कुरुजः सुरः खगपतिर्देवोऽहमिंद्रोऽमरो ।
पश्चान्मेघरथो मुनीन्द्रमहितः सर्वार्थसिद्धिं श्रितः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवावलि:-शार्दूल:- श्रीषेणः कुरुजः सुरः खगपतिर्देवोहलेशोऽमरो ।
यो वज्रायुधचक्रभृत्सुरपतिः प्राप्तोऽहमिन्द्रंपदम् ॥
पश्चान्मेघरथो मुनीन्द्रमहितः सर्वार्थसिद्धिं श्रितः
शांतीशो जगदेक शांतिरतुलां दिश्याच्छ्रियं वश्चिरं ।१।

हस्तिनापुरे विश्वसेनमहाराजऐरांबामहादेव्योर्जाताय कांचनवर्णाय चत्वारिंशद्धनुरुच्छेदाय एकलक्षवर्षायुष्काय गरुडमहामानसीयक्षय-श्रीसमेताय हरिणलांछनाय कुरुवंशाय सम्मेदशिखरे प्रभासाख्यकूटे कर्मक्षयंगताय श्रीशांतिनाथतीर्थेश्वराय नमस्कारं कुर्वे ॥ उदकचं० ॥
॥ अर्घ्यं ॥ शांतिधारा ॥

॥ अथ श्रीकुंथुतीर्थंकरपूजा ॥

शार्दूल- श्रीकांतापतिसूरसेनतनयः श्रीवर्द्धमानोदयो ।
मेरुक्ष्माधरपांडुकाग्रविहितस्नानो रथांगप्रभुः ॥
धीमान् हास्तिननामरम्यनगरीनाथो नृपालाग्रणी- ।
र्हेमाभः कुरुवंशमस्तकमणिः कुंथुर्जिनः प्राच्यते ॥ १ ॥

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं कुंथुतीर्थंकर अत्रावतरावतर संवौषट् स्वाहा ।
आह्वाननमित्यादि० ॥

॥ अष्टकम् ॥

चामर- दुग्धसिंधुमुख्यतीर्थपूतदिव्यसज्जलै- ।
श्चंद्रमिश्रकुंकुमादिचारुवस्तुसंभवैः ॥
मंदराद्रिमंडनं सुरासुरेंद्रवंदितम् ।
जिनेंद्रचंद्रमर्चयामि कुंथुनाथमव्ययम् ॥

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं कुंथुतीर्थेश्वराय जलंनिर्वपामि स्वाहा ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चंद्रसांद्रकुंकुमैर्मनोहरैस्सुचन्दनै- ।
र्दिव्यनव्यवर्णसारगंधलुब्धषट्पदैः ॥
मन्द्राद्रिमंडनं० ॥ ॐ ह्रीं० ॥ कुंथुनाथाय ॥ गंधं ॥ ३ ॥

निर्मलांबुपत्रगंधवासितैस्सुतण्डुलैः ।
क्षीरफेनहारगौरभासुरैस्सुपुंजकैः ॥
मन्दराद्रि० ॥ ॐ ह्रीं० ॥ कुंथुजिनाय ॥ अक्षतान् ॥४ ॥

चंपकप्रसूनपद्मजातिकुन्दकुड्मलै- ।
र्देवभूजजातनव्यदिव्यगंधपुष्पकैः ॥
मन्दराद्रि० ॥ ॐ ह्रीं० कुंथु० ॥ पुष्पं ॥ ५ ॥

इड्डलीसुलड्डुकासुपूरिकादिभक्ष्यकैः ।
पायसान्नकैश्चभूरिशर्कराज्यसंयुतैः ॥
मन्दराद्रि० ॥ ॐ ह्रीं० कुंथु० ॥ नैवेद्यं ॥ ६ ॥

चन्द्रभानुरत्नरश्मिभासमानदीपकै– ।
र्वर्तिकाशिखोज्वलैश्चसर्वदोषनाशकैः ॥
मन्दराद्रि० ॥ ॐ ह्रीं० कुंथु० ॥ दीपं ॥ ७ ॥

चंदनादि चूर्णयुक्तदेवदारु धूपकै- ।
रगरुजोंगकादि धूपधूमलुब्धषट्पदैः ॥
मन्दराद्रि० ॥ ॐ ह्रीं० ॥ कुंथु० ॥ धूपं ॥ ८ ॥

आम्रपूगचोचमोचदाडिमादिसत्फलैः ।
स्वादुभिःसुवर्णपुष्पसौरभाभिरामकैः ॥
मन्दराद्रि० ॥ ॐ ह्रीं० ॥ कुन्थु० ॥ फलं ॥ ९ ॥

वारिगंधतण्डुलप्रसूनसच्चरुत्करै-- ।
र्दीपधूपसत्फलैर्विनिर्मितैर्महार्घ्यकैः ॥
मन्दराद्रि० ॥ ॐ ह्रीं० ॥ कुन्थु० ॥ अर्घ्यं ॥ शांतिधारा ॥ पुष्पांजलिः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ स्तोत्रम् ॥

वसंतः-कुन्थुप्रभृत्यखिलसत्वदयैकतानः।
कुन्थुर्जिनो ज्वरजरामरणोपशान्त्यै॥
त्वं धर्मचक्रमिह वर्तयसि स्म भूत्यै।
भूत्वा पुरा क्षितिपतीश्वरचक्रपाणिः॥ १॥

तृष्णार्चिषः परिदहन्ति न शान्तिरासा-।
मिष्टेन्द्रियार्थविभवैः परिवृद्धिरेव॥
स्थित्यैव कायपरितापहरं निमित्त-।
मित्यात्मवान्विषयसौख्यपराङ्मुखोऽभूत्॥ २॥

बाह्यं तपः परमदुश्चरमाचरंस्त्व-।
माध्यात्मिकस्य तपसः परिबृंहणार्थम्।
ध्यानं निरस्य कलुषद्वयमुत्तरस्मिन्।
ध्यानद्वये ववृतिषेऽतिशयोपपन्ने॥ ३॥

हुत्वा स्वकर्मकटुकप्रकृतीश्चतस्रो।
रत्नत्रयातिशयतेजसि जातवीर्यः॥
विभ्राजिषे सकलवेदविधेर्विनेता।
व्यभ्रे यथा वियति दीप्तरुचिर्विवस्वान्॥ ४॥

यस्मान्मुनीन्द्र तव लोकपितामहाद्या।
विद्याविभूतिकणिकामपि नाप्नुवन्ति॥
तस्माद्भवन्तमजमप्रतिमेयमार्याः।
स्तुत्यं स्तुवन्ति सुधियः स्वहितैकतानाः॥ ५॥

॥ अथ जयमाला ॥

जय दिवाकर चंद्रमनोहरभास। जय महागुणभूषितसहज निवास॥
जय कुमार कुभूज कुठार विदग्ध। जय सुरम्य सुरेड्य श्रीकुंथुजिनेंद्र॥१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जय तपोभरभूषित निर्मलयोग । जय प्रणष्टकुबाध विशोकविरोग ।
जय प्रदुःखदवानलमेघसुनाद । जय सुरम्य० ॥ २ ॥

जय विहतजरामरणारिसमूह । जय सकल विबुधजनवृंदाभिनंद ॥
जय वरचामीकरसदृशसुवर्ण । जय सुरम्य० ॥ ३ ॥

जय पंचमहाव्रतसामिति सुनीड । जय परिशोषितसर्व जनतापीड ॥
जय धर्मामृतपूरित भव्यकर्ण । जय सुरम्य० ॥ ४ ॥

जय निर्मल सकलकलावरवास । जय सुरपति पातित कुसुमसुवास ॥
जय यातुधानवशकारि सुयंत्र । जय सुरम्य० ॥ ५ ॥

घत्ता— ग्रंथान्कंथामिव त्यक्त्वा सग्रंथान्मोक्षगामिनः ।
रक्षन्सूक्ष्मांश्च कुंथुभ्यः कुंथुः पांथान् स पातुवः॥ अर्घ्यं॥

शार्दूलः—यस्संसारनिरासलालसमतिः मुक्त्यर्थमुत्तिष्ठते ।
यं तिर्थंकरयंति पावनतया येनास्ति नान्यःसमः ।
यस्मै देवपतिर्नमस्यति सतां यस्माच्छुभं जायते ।
कीर्तिर्यस्य सतां हि मंगलमयं कुर्यात् स कुंथुर्जिनः॥ इत्याशिर्वादः॥

भवावलिः—शार्दूलः—आसीत् सिंहरथो नृपः पृथुतपाः सर्वार्थसिद्धीश्वरः ।
कल्याणान्वयभाक्षडंगाशिविरस्त्रैलोक्यमुख्यार्चितः ॥
प्राप्ताष्टात्मगुणस्त्रिविष्टपशिखाप्रोद्भासिचूडामणिः ॥
दिश्याद्वः श्रियमप्रतीपमहिमाकुंथुर्जिनश्शाश्वतीं ॥ १ ॥

हस्तिनाख्यपत्तने श्रीसूरसेनमहाराजकमलामहादेव्योर्जाताय सुवर्ण-- वर्णाय पंचाधिकत्रिंशद्धनुरुच्छेदाय पंचोत्तरनवतिसहस्रवर्षायुष्काय अजलांछनाय कुरुवंशाय गंधर्वजयायक्षयक्षीसमेताय सम्मेदे ज्ञान-- धरकूटे कर्मक्षयंगताय श्रीकुंथुतीर्थेश्वराय नमस्कारं कुर्वे ॥ उदक०
॥ अर्घ्यं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri .

॥ अथ अरतीर्थंकरपूजा ॥

शार्दूलः-क्षोण्यांहस्तिनपत्तनप्रभुरथो श्रीमित्रसेनामनः ।
कंजादित्यसुदर्शनप्रियसुतः श्रीसोमवंशोद्भवः ॥
भर्माभश्वषडंगसैन्यमहितो देवेंद्रवृंदस्तुतो ।
स श्रीमानरतीर्थकृज्जिनवरः संपूज्यते भक्तितः ॥ १ ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं अरतीर्थंकर अत्रावतरावतर संवौषट् । आह्वानमित्यादि० ॥

अष्टकम्

रथोद्धताः—गंधवंधुरसनालकुंभगै- । रिन्दुकुन्दनिभतीर्थजीवनैः ॥
दृष्टिमुख्यविपुलाष्टगुणाढ्यं । पूजयेहमरतीर्थजिनेन्द्रं ।
ॐ० । अरतीर्थंकर परमजिनदेवाय जलं ॥ २ ॥

गन्धसारवहुगंधिलैर्वरै- । र्गन्धपादकृतचन्दनैस्सुभैः ॥
दृष्टिमुख्य० ॥ ॐ० । अरतीर्थंकर० ॥ गन्धं ॥ ३ ॥

लक्षपुण्यनवसौरभांकुरै- । रक्षतैःकलमशालिजाक्षतैः ॥
दृष्टिमुख्य० ॥ ॐ० । अरतीर्थंकर० । अक्षतान् ॥ ४ ॥

स्पष्टगन्धवृतमत्तभृंगकै- । रिष्टकंजनवमालतीसुमैः ॥
दृष्टिमुख्य० ॥ ॐ० । अरतीर्थंकर० । पुष्पं ॥ ५ ॥

व्यंजनैर्विविधभक्ष्यरंजनै- । रंजसासुरभिशालिजोदनैः ॥
दृष्टिमुख्य० ॥ ॐ० । अरतीर्थंकर० । चरुं ॥ ६ ॥

गव्यनव्यघृतचन्द्रवर्तिजै- । रव्ययालयनिवेदकदीपकैः ॥
दृष्टिमुख्य० ॥ ॐ० । अरतीर्थंकर० । दीपं ॥ ७ ॥

धूपिताष्टविधकर्मकज्जलै- । र्धूपधूमवरगुगुलूद्भवैः ॥
दृष्टिमुख्य० ॥ ॐ० । अरतीर्थंकर० । धूपं ॥ ८ ॥

कम्रताम्रनवजंबुजंभलै- । र्नम्रनाकजनसत्फलैः फलैः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दृष्टिमुख्य० ॥ ॐ० । अरतीर्थकर० । फलं ॥ ९ ॥

अष्टमाक्षितिविशिष्टपूजनै- । रष्टवस्तुनिभ्रुतोत्तमार्घ्यकैः ॥

दृष्टिमुख्य० ॥ ॐ । अरतीर्थकर० । अर्घ्यं ॥ १० ॥

अनु० लोकस्य राजराष्ट्रादि प्रभृतीनां च विघ्नकान् ।
हर्तृभृंगारनालेन शांतिधारा त्रयंसदा ॥ शांतिधारा ॥
पुष्पांजलिः ॥ ११ ॥

॥ स्तोत्रम् ॥

अनु० गुणस्तोकं सदुल्लंघ्य तद्बहुत्वकथा स्तुतिः ।
आनन्त्यात्ते गुणा वक्तुमशक्यास्त्वयि सा कथम् ॥ १ ॥

तथापि ते मुनीन्द्रस्य यतो नामापि कीर्तितम् ।
पुनाति पुण्यकीर्तेर्नस्ततो ब्रूयाम किञ्चन ॥ २ ॥

लक्ष्मीविभवसर्वस्वं मुमुक्षोश्चक्रलाञ्छनम् ।
साम्राज्यं सार्वभौमं ते जरत्तृणमिवाभवत् ॥ ३ ॥

तव रूपस्य सौन्दर्यं दृष्ट्वा तृप्तिमनापिवान् ।
द्व्यक्षः शक्रः सहस्राक्षो बभूव बहुविस्मयः ॥ ४ ॥

मोहरूपो रिपुः पापः कषायभटसाधनः ।
दृष्टिसम्पदुपेक्षास्त्रैस्त्वया धीर पराजितः ॥ ५ ॥

कन्दर्पस्योद्धुरो दर्पस्त्रैलोक्यविजयार्जितः ।
ह्रेपयामास तं धीरे त्वयि प्रतिहतोदयः ॥ ६ ॥

आयत्यां च तदात्वे च दुःखयोनिर्दुरुत्तरा ।
तृष्णा नदी त्वयोत्तीर्णा विद्यानावा विविक्तया ॥ ७ ॥

अन्तकः क्रन्दको नृणां जन्मज्वरसखा सदा ।
त्वामन्तकान्तकं प्राप्य व्यावृत्तः कामकारतः ॥ ८ ॥

भूषावेषायुधत्यागि विद्यादमदयापरम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रूपमेव तवाचष्टे धीरदोषविनिग्रहम् ॥ ९ ॥

समन्ततोऽङ्गभासां ते परिवेषेण भूयसा ।
तमो बाह्यमपाकीर्णमध्यात्मंध्यानतेजसा ॥ १० ॥

सर्वज्ञज्योतिषोद्भूतस्तावको महिमोदयः ।
कं न कुर्यात् प्रणम्रं ते सत्वं नाथ सचेतनम् ॥ ११ ॥

तव वागमृतं श्रीमत्सर्वभाषास्वभावकम् ।
प्रीणयत्यमृतं यद्वत् प्राणिनो व्यापि संसदि ॥ १२ ॥

अनेकान्तात्मदृष्टिस्ते सती शून्यो विपर्ययः ।
ततः सर्वं मृषोक्तं स्यात्तदयुक्तं स्वघाततः ॥ १३ ॥

ये परस्खलितोन्निद्राः स्वदोषेभनिमीलिनः ।
तपस्विनस्ते किं कुर्युरपात्रं त्वन्मतश्रियः ॥ १४ ॥

ते तं स्वघातिनं दोषं शमीकर्तुमनीश्वराः ।
त्वद्द्विषः स्वहनो बालास्तत्वावक्तव्यतां श्रिताः ॥ १५ ॥

सदेकनित्यवक्तव्यास्तद्विपक्षाश्च ये नयाः ।
सर्वथेति प्रदुष्यन्ति पुष्यन्ति स्यादितीहते ॥ १६ ॥

सर्वथा नियमत्यागी यथादृष्टमपेक्षकः ।
स्याच्छब्दस्तावके न्याये नान्येषामात्मविद्विषाम् ॥ १७ ॥

अनेकान्तोऽप्यनेकान्तः प्रमाणनयसाधनः ।
अनेकान्तः प्रमाणात्ते तदेकान्तोऽर्पितान्नयात् ॥ १८ ॥

गीति—इति निरुपमयुक्तशासनः प्रियहितयोगगुणानुशासनः ।
अरजिनदमतीर्थनायकस्त्वमिव सतां प्रतिबोधनायकः ॥१९ ॥

मतिगुणविभवानुरूपतस्त्वयि वरदागमदृष्टिरूपतः ।
गुणकृशमपि किञ्चनोदितं मम भवताद्दुरिताशनोदितम् ॥२०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ जयमाला ॥

जय कलिमलविरहित विमलशरीर । जय कंदर्पदर्पविदलनैकवीर ।
जय विगतभेदजितसकलकुरोष । जय सुरवरताडितनंदिसुघोप ॥ १॥
जय विनतभव्यजनजानितसुबोध । जय निरवसानविच्युतकुविरोध ॥
जय परमकरुणगुणरामाभिराम । जय भुवनलोकगुणरामाभिराम ॥ २ ॥
जय हतविषादपरधृतसुमहत्व । जय शरणागतपालितभव्यसत्व ॥
जय कोपहुताशनशमनसुजलद । जय मायाद्रुमभंजनभव्यवरद ॥ ३ ॥
जय जन्मजलाधितरणैकसुपात्र । जय भामंडल भूषितदिव्यगात्र ॥
जय निर्जित नित्यैकांतकुवाद । जय लोभरहित प्रविनष्टप्रमाद ॥ ४ ॥
जय निरुपमानशाश्वत वरवास । जय शांतवदनविगताट्टहास जय ॥
जय विकसितकमलसदृशसुनयन । जय देहिसौख्यदायक जिननाथ ॥५॥

घत्ताः--रत्नत्रयाराधकभव्यलोक- । ससंपूजितश्रीचरणारविंदः ॥
पायादपायादरतीर्थनाथो । भव्यानजस्रंभुवनैकनाथः ॥अर्घ्यं॥६॥

शार्दूलः-रत्नानामिवरोहणाक्षितिधरः खंतारकाणामिव ।
स्वर्गःकल्परुहामिव प्रसरसीपंकेरुहाणामिव ॥
पाथोधिः पयसामिवेंदुर्महसां स्थानंगुणानां यः ।
सो यं मंगलमातनोतु भवतां श्रीमानरेशोजिनः ॥इत्याशीर्वादः॥ १ ॥

भवावलिः—प्राग्यो भुनृपतिर्महान्धनपतिः पश्चाद्व्रतानां पतिः ।
स्वर्गाग्रेविलसज्जयंतजपतिः प्रोद्यत्सुखानांपतिः ॥
पट्खंडाधिपतिश्चतुर्दशलसद्रत्नैर्निधीनां पतिः ।
त्रैलोक्याधिपतिः पुनात्वरपतिः भक्तिं श्रितान् वश्चिरं ॥२॥

हस्तिनापुरे सुदर्शनमहाराजसुमित्रादेव्योर्जाताय सुवर्णवर्णाय कुरुवंशाय त्रिंशत् धनुरुच्छेदाय झपलांछनाय चतुरशीतिसहस्रवर्षायुष्काय माहेंद्रविजयायक्षयक्षीसमेताय सम्मेदगिरौ नाटककूटे कर्मक्षयंगताय श्रीमदरतीर्थेश्वराय नमस्कारं कुर्वे ॥ उदकं० ॥ अर्घ्यं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ मल्लितीर्थंकरपूजा ॥

उपेंद्रः- प्रजावतीवल्लभकुंभराज । तनुभवश्रीमिथिला पुरेशः ।
हिरण्यवर्णः पुरुदेववंशो । मल्लिर्जिनेंद्रः परिपूज्यतेद्य ॥ १ ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं मल्लिजिनेश्वर अत्रावतरावतर संवौषट् आह्वानमित्यादि ॥

॥ अष्टकम् ॥

मालिनी- सकलमलकलंकक्षालनैर्व्योमगंगा- ।
विमलमधुरनित्यस्पर्ध्यभिस्तीर्थवार्भिः ॥
दृगवगमचरित्रश्रीलतावर्धनीयैः ।
वयमिहमहयामोमाल्लिनाथं जिनेंद्रं ॥
ॐ ह्रीं० । मल्लि जिनेश्वराय० । जलं ॥ १ ॥
शिशिरसुरभिकान्तौर्गन्धनिष्ठालिवृंदै- ।
र्दिगधिपसुरकन्याघ्राणसंतोषदानैः ॥
अनुपदमनुलेपैरिंदुकाश्मीरमिस्रै— ।
र्वयमिह० ॥ ॐ ह्रीं ॥ मल्लि० ॥ गंधं ॥ २ ॥
विजितविधुकलापैरिंदुमुक्ताफलौघै- ।
रिहजगतिसुभिक्षां साधुसंपादयद्भिः ॥
विशदसदकपुंजैः पुण्यपुंजायमानै- ।
र्वयमिह० ॥ ॐ ह्रीं । मल्लि० ॥ अक्षतान् ॥ ३ ॥
प्रचुरपरिमलौघप्राप्तदिक्चक्रवालैः ।
निपतदलिकंदबैः कल्पभूजातजातैः ॥
बकुलकुवलयांभो जातजातीप्रसूनै-।
र्वयमिह० ॥ ॐ ह्रीं । मल्लि० । पुष्पं ॥ ४ ॥
रजतशिखरिबिभ्रच्छारदाभ्रप्रकाशै- ।
र्विपुलकनकपात्रस्थापितैर्दिव्यहव्यैः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उपरि च रसबाष्पामोदिभिर्व्यंजनाद्यै- ।
र्वयमिह० ॥ ॐ ह्रीं । मल्लि० ॥ चरुं ॥ ५ ॥

घृणिभिरखिललोकालोकयद्भिः प्रदीपै- ।
र्दुरिततिमिरलेशं स्थातुमत्रासहद्भिः ॥
रविभिरिवसुदीपैर्द्वादशैर्दीप्यमानै— ।
र्वयमिह० ॥ ॐ ह्रीं । मल्लि० ॥ दीपं ॥ ६ ॥

मरकतमणिबद्धस्वर्गसोपानशंकां ।
वियति विरचयद्भिस्सर्वभव्यप्रजानां ॥
सुरभिभिरिहधूपैर्बभ्रुजीमूतभासै- ।
र्वयमिह ॥ ॐ ह्रीं । मल्लि० ॥ धूपं ॥ ७ ॥

प्रतिनवपरिपाकामोदभारप्रपूर्णैः ।
कनक रुचिरवर्णैश्चोचमोचाम्रभेदैः ॥
शुभतरपनसोद्यैस्सत्फलप्राप्तिकांतै-- ।
र्वयमिह ॥ ॐ ह्रीं । मल्लि० ॥ फलं ॥ ८ ॥

अमलविपुलशुक्लध्यानानिर्दग्धदोषं ।
निखिलसुजनतौघानंददानप्रशौंडं ॥
परमकनकपात्रस्थापितैरर्घ्यवृंदै- ।
र्वयमिह० । ॐ ह्रीं । मल्लि० । अर्घ्यं । शांतिधारा ।
पुष्पांजलिः ॥ ९ ॥

॥ स्तोत्रम् ॥

यस्य महर्षेः सकलपदार्थ । प्रत्यक्षबोधः समजनि साक्षात् ।
सामरमर्त्यं जगदपि सर्वं । प्राञ्जलि भूत्वा प्रणिपतति स्म ॥ १ ॥

यस्य च मूर्तिः कनकमयीव । स्वस्फुरदाभाकृतपरिवेषा ।
वागपि तत्वं कथयितुकामा । स्यात्पदपूर्वा रमयति साधून् ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यस्य पुरस्ताद्विगलितमाना । न प्रतितीर्थ्या भुवि विवदन्ते ।
भूरपि रम्या प्रतिपदमासी । ज्ञातविकोशाम्बुजमृदुहासा ॥३॥
यस्य समंताज्जिनशिशिरांशोः । शिष्यकसाधुग्रहविभवोऽभूत् ।
तीर्थमपि स्वं जननसमुद्र । त्रासितसत्त्वोत्तरणपथोऽग्रम् ॥ ४ ॥
यस्य च शुक्लं परमतपोऽग्नि । ध्यानमनंतं दुरितमधाक्षीत् ।
तं जिनसिंहं कृतकरणीयं । मल्लिमशल्यं शरणमितोऽस्मि ॥ ५ ॥

॥ जयमाला ॥

जय सुरासुरमानवनिर्मितसेव । जय जगज्जनसम्मददायकदेव ॥
जय विमुक्त जरामरणोद्भवदोष । जय मनोभवभंजनवर्जितदोष ॥ १ ॥
जय सुभूतिदभूतदयापरमेश । जय महासुखमग्न चिदात्मगुणेश ॥
जय सुलब्ध दुरंतभवोदधिपार । जय जिनेंद्रविनिर्जितपापसमूह ॥ २ ॥
जय विनाशितकष्टदकुष्ठकुरोग । जय समर्पित भक्तजनेप्सितभोग ॥
जयामलकोमलकाय जिनेश । जय मुनिव्रजमानसकंजदिनेश ॥ ३ ॥
जय निवारितदुर्गतिदुःखसुदक्ष । जय भवाहितभीतिजनाहितकक्ष ॥
जय सुलक्षणलक्षितदेहजिनेंद्र । जयाघजताप निवारणचन्द्र ॥ ४ ॥
जय फणिन्द्र नरेन्द्र सुरेन्द्रविनूत । जय चराचररक्षण सुव्रतपूत ॥
जय मृषावचनोज्झितनीतपदार्थ । जय सुवर्जितभीरुमते सुपरार्थ ॥ ५ ॥
जय विसंग विरंगविभंगगतांत । जय शिवास्पदमुक्तिरमाकृतसंग ॥
जय विनाशितमायाकषायसमूह । जय विमुक्तवियोग विभोगविमोह ॥ ६ ॥
जय रजोमल भेदविभेदनदंड । जय चतुर्गतिवारिधि वारतरंड ॥
जय अनंतचतुष्टयचिन्मयपिंड । जयानघदर्शन रत्नकरंड ॥ ७ ॥
जय सुकेवलबोध विकासिततत्व । जय वचोमृतवर्षणतोषितसत्व ॥
जय गुणाष्टकयुक्तकलंक विमुक्त । जय त्रिलोकविभूषण सुव्रतदेव ॥ ८ ॥

घत्ताः—जन्माभिषेक सुपवित्रितभूधरेन्द्रो ।
देवेन्द्रकीर्तितयशोजिनधर्मचन्द्रः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सद्धर्मभूषणयुतोजयताज्जिनेन्द्रो ।
देवेन्द्रदर्शितसुनृत्यकृतिस्सुभक्त्या ॥ अर्घ्यं ॥

शार्दूल:—अव्याबाधनिरंजनस्वपरसंवेद्यस्वभावात्मको ।
लोकाऽलोकविलोकनैकनिपुणस्त्रैलोक्यचूडामणिः ॥
ज्ञानानूनयतीन्द्र वंदितपदः श्रीमान् सुमल्लिर्जिनः ।
देवेन्द्रादिसुवंदितो जिनवरः कुर्यात्समे मंगलं ॥इत्याशीर्वादः॥१॥

॥ भवावलिः ॥

द्रुतवि०अजनि वैश्रवणो धरणीश्वरः । पुनरनुत्तर नाम्न्यपराजिते ।
जितखलाखिलमोहमहारिपु— । र्दिशतु मल्लीरसावतुलं सुखं ॥२॥

मिथिलापत्तने कुंभमहाराजप्रभावतिदेव्योर्जाताय हाटकवर्णाय इक्ष्वाकुवंशाय पंचविंशतिधनुरुच्छेदाय पंचपंचाशत्सहस्रवर्षायुष्काय कुंभलांछनाय कुबेरअपराजितायक्षयक्षीसमेताय श्री सम्मेदे संबलकूटे कर्मक्षयंगताय श्रीमल्लीतीर्थेश्वराय नमस्कारं कुर्वे ॥ उदक० । अर्घ्यं ॥

॥ अथ मुनिसुव्रततीर्थंकरपूजा ॥

उपेंद्रवज्रा सुमित्रसोमावरगर्भसूति,- । र्हरीद्धवंशो मुनिसुव्रतेशः ॥
समर्च्यते राजग्रहाधिराजो । मयूरकंठच्छविरुद्धलक्ष्मा ॥ १ ॥

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं मुनिसुव्रतजिनेश्वरात्रावतरावतर संवौषट् स्वाहा
आह्वानमित्यादि... ॥

॥ अष्टकम् ॥

भुजंग— सुगांगेयकुंभस्थगंगाजलौघैः । सुमामोदयुक्तैर्गलद्दुर्मलौघैः ॥
जगद्देवदेवं कृतेंद्रादिसेवं । यजेहं जिनेन्द्रं मुनिसुव्रतं तं ॥
ॐ ऱ्हीं ...। मुनिसुव्रततीर्थेश्वराय जलं ॥ १ ॥
सुगंधाश्रिताहींद्रसंदर्शितांगै- । र्लसच्चंदनैश्चारुचंद्रादिमिश्रैः
जगद्देवदेवं० ॥ ॐ ऱ्हीं० ॥ मुनिसुव्रत० ॥ गंधं ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुशालीयतंडुलसुपुंजैः पवित्रैः । सतेजोजितेंदुप्रभाहारतारैः ॥
जगद्देवदेवं० ॥ ॐ ह्रीं० ॥ मुनिसुव्रत० ॥ अक्षतान् ॥ ४ ॥
अशोकाब्जकुंदादिकैस्सुप्रसूनै- । र्भ्रमद्भृंगगानाहितश्रव्यरावैः ।
जगद्देवदेवं० ॥ ॐ ह्रीं० ॥ मुनिसुव्रत० ॥ सुमनं ॥ ५ ॥
पयस्सर्पिरिक्षुद्रवैःपायसान्नैः । सुगांगेयपात्रार्पितैस्सन्निवेद्यैः ॥
जगद्देवदेवं० ॥ ॥ मुनिसुव्रत० ॥ नैवेद्यं ॥ ६ ॥
कृतामर्त्यरत्नैर्जितध्वांतजातैः । प्रणाशप्रयत्नैःप्रकाशप्रदीपैः ॥
जगद्वेददेवं०॥ मुनिसुव्रत० ॥ दीपं ॥ ७ ॥
सुकालागरूद्भूतधूपैरदभ्रै- । र्जनानांसुधूमाभिक्लप्तप्रशंकैः ॥
जगद्देवदेवं० ॥ ॐ ह्रीं० ॥ मुनिसुव्रत० ॥ धूपं ॥ ८ ॥
कपित्थाम्रजंबूलसन्मातुलुंगैः । प्रशस्तोरु रंभादि शुंभत्फलौघैः ॥
जगद्देवदेवं० ॥ ॐ ह्रीं० ॥ मुनिसुव्रत० ॥ फलं ॥ ९ ॥
कुशाद्यैः कुशोल्लासिसिद्धार्थदूर्वैः । कनत्कांचनस्थालसंस्थैःसदर्घ्यैः॥
जगद्देवदेवं० ॥ ॐ ह्रीं० ॥ मुनिसुव्रत० ॥ अर्घ्यं ॥ १० ॥
उशीरोरुकर्पूरशुंभत्सुगंध- । प्रभूतोद्घपानीयधाराभिरर्च्यं ॥
जगद्देवदेवं० ॥ ॐ ह्रीं० ॥ मुनिसुव्रत० ॥ शांतिधारा ॥ ११॥
गुणनिधिंचसुव्रतं वरविनेयसुव्रतं ॥
सुरभिकुंदकैर्यजे भवविनाशकंजिनं ॥ पुष्पांजलिः ॥ १२ ॥

॥ स्तोत्रम् ॥

अधिगतमुनिसुव्रतस्थिति । र्मुनिवृषभो मुनिसुव्रतोऽनघः ।
मुनिपरिषदि निर्बभौ भवा । नुडुपरिषत्परिवीतसोमवत् ॥ १ ॥
परिणतशिखिकण्ठरागया । कृतमदनिग्रहविग्रहाभया ।
तव जिन तपसः प्रसूतया । ग्रहपरिवेषरुचेव शोभितम् ॥ २ ॥
शशिरुचिशुचिशुक्ललोहितं । सुरभितरं विरजो निजं वपुः ।
तव शिवमतिविस्मयं यते । यदपि च वाङ्मनसीयमीहितम् ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थितिजननिरोधलक्षणं। चरमचरं च जगत्प्रतिक्षणम् ।
इति जिनसकलज्ञलांछनं। वचनमिदं वदतां वरस्य ते ॥ ४ ॥
दुरितमलकलंकमष्टकं । निरुपमयोगबलेन निर्दहन् ।
अभवदभवसौख्यवान् भवान् । भवतु ममापि भवोपशान्तये ॥५॥

॥ अथ जयमाला ॥

जय सकलामरखचराधिपवंद्यं । जय वरचरणं जनतातमवंद्यं ॥
जय गुणनिधि भवसागरगतपारं । जय नौमि जिनं त्रिभुवनसुखसारं ॥१॥
जय विदितसुलोकालोकप्रकारं । जय गणधर महितसुपाद पयोजं ॥
जय संश्रितसमवसृति श्रीविहारं । जय नौमि जिनं त्रिभुवन सुखसारं ॥२॥
जय शोकभिदं सदशोकसुयुक्तं । जय छत्रत्रय वंदितपरिमुक्तम् ॥
जय कृतसुरसुमनोवृष्टिमुदारं । जय नौमि जिनं त्रिभुवन सुखसारं ॥३॥
जय मिथ्यामतपर्वतपविदंडं । जय प्रबलाजवंजवजलधितरंडं ॥
जय विगतमलं कर्मारिविदूरं । जय नौमि जिनं त्रिभुवन सुखसारं ॥ ४ ॥
जय कवितिनुतनतिचरणसरोजं । जय फणिपतिकिन्नरनिर्मितसेवं ॥
जय प्रकटित तत्त्वातत्त्वविचारं । जय नौमि जिनं त्रिभुवन सुखसारं ॥५॥
जय सकलसुविद्यावारिधिचंद्रं । जय पादपयोरुह नतदिविजेन्द्रं ॥
जय वर्जित भूषविगतविहारं । जय नौमि जिनं त्रिभुवन सुखसारं ॥६॥
जय शुभदंमंदरगिरिवरधीरं । जय निर्मलवारिधिसमगंभीरं ॥
जय कमनीयं वरकरुणागारं । जय नौमि जिनं त्रिभुवन सुखसारं ॥७॥
जय शंकरसेवित विगतविरामं । जय परमानंदत्रिजगदभिरामं ॥
जय मुक्तिरमाकंदलगलहारं । जय नौमि जिनं त्रिभुवन सुखसारं ॥८॥

घत्ताः-सुधर्मचंद्रो जिनचंद्रदेवो । देवेंद्रवृंदस्तुतपादपद्मः ॥
सुरेंद्रनागेंद्र नरेंद्रपूज्यः । पायादपायान्मुनिसुव्रतो नः ॥१॥ अर्घ्यं ॥

शार्दूलः—यद्भक्तिः फलमर्हदादिपदवी मुख्यं कृषेःसस्यवत् ।
चक्रित्व त्रिदशेंद्रतादि तृणवत्प्रासंगिकं गीयते ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शक्तिर्यन्महिमस्तुतौ न दधते वाचोपिवाचस्पतेः ।
सोऽयं श्रीमुनिसुव्रतो वितनुतां सन्मंगलं मे सदा ॥ इत्याशीर्वादः ॥१॥

भवावलिः—प्रागासीद्धरिवर्मनामनृपतिर्लब्ध्वा तपोबद्धवान् ।
नामांत्यं बहुभावनः शुचिधृतिर्यः प्राणतेंद्रोऽभवत् ॥
च्युत्वास्तान्मुनिसुव्रतो हरिकुलव्योमामलेंदुर्जिनो ।
भूत्वाभव्य कुमुद्वतीं विकसयन्लक्ष्मीं प्रदिश्यात्सवः ॥ २ ॥

राजगृहपत्तने सुमित्रमहाराजसोमा (पद्मावती) देव्योर्जाताय इन्द्र-नीलरत्नवर्णाय विंशतिचापोन्नताय त्रिंशत्सहस्रवर्षायुष्काय कमठ (कच्छ) लांछनाय वरुणबहुरुपिणीयक्षयक्षीसमेताय हरिवंशाय सम्मेदगिरौ निर्जरकूटे कर्मक्षयंगताय श्रीमुनिसुव्रततीर्थेश्वराय नमस्कारं कुर्वे ॥ उदक०॥ अर्घ्यं ॥ शांतिधारा । पुष्पांजलिः ॥

॥ अथ श्रीनमितीर्थंकरपूजा ॥

अनु० विजयाख्यमहाराजवपिंलातुकसुवर्णरुक् ॥
मिथिलेंद्रो नमिर्देवः पूज्यते वृषभान्वयः ॥ १ ॥

ॐ न्हीं श्रीं क्लीं ऐं अर्हं नमितीर्थंकरपरमजिनदेवात्रावतरावतर संवौषट् स्वाहा आह्वानमित्यादि० ॥

॥ अष्टकम् ॥

इंद्रवज्राः—व्योमापगाद्युत्तमतीर्थवारां- । धाराभिरंभोजपरागसारैः ॥
नमीश्वरस्यामलपादयुग्मं । समर्चयामि त्रिदशेंद्रवंद्यं ॥
ॐ न्हीं० नमितीर्थंकरपरमजिनदेवाय जलंनिर्वपामि स्वाहा ॥ २ ॥
काश्मीरकृष्णागरुगंधशुंभ- । त्कर्पूरसारस्यविलेपनेन ॥
नमीश्वरस्या० ॥ ॐ न्हीं० ॥ नमितीर्थंकर० ॥ गंधं ॥ ३ ॥
आमोदमाधुर्यनिदानपुंजैः । सौंदर्यशुंभत्कलमाक्षतानां ॥
नमीश्वरस्या० ॥ ॐ न्हीं० नमितिर्थ० ॥ अक्षतान् ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुजातजातकुमुदाब्जकुंद- । मंदारमल्लीवकुलादिपुष्पैः ॥
नमीश्वर० ॥ ॐ ह्रीं० ॥ नमितीर्थ० ॥ पुष्पं ॥ ५ ॥
नानारसव्यंजनदुग्धसर्पिः । पक्वान्नशाल्यन्नदधीक्षुभक्ष्यैः ।
नमीश्वर० ॥ ॐ ह्रीं० ॥ नमितीर्थ० ॥ चरुं ॥ ६ ॥
कर्पूरपारी भवदीपवृंदै- । र्नानातमस्तोमविनाशदक्षैः ॥
नमीश्वर० ॥ ॐ ह्रीं० ॥ नमितीर्थकर० ॥ दीपं ॥ ७ ॥
श्रीखंडकृष्णागरुवस्तुगर्भै- । र्धूपैर्जगत्तापविनाशशौंडैः ॥
नमीश्वरस्या० ॥ ॐ ह्रीं० ॥ नमितीर्थ० ॥ धूपं ॥ ८ ॥
नारंगपूगाम्रकपित्थपूर्वैः । फलोत्तमाद्युद्घफलैस्सुरम्यैः॥
नमीश्वर० ॥ ॐ ह्रीं० ॥ नमितीर्थ० ॥ फलं ॥ ९ ॥
वार्गंधतंडूललसत्सुमहव्यदीप- । धूपप्रक्लसपरमार्घ्यकदंबकेन ॥
नमीश्वर० ॥ ॐ ह्रीं० ॥ नमितीर्थ० ॥ अर्घ्यं ॥ १० ॥
इत्याह्वानादिकंकर्म । संप्रीतोनित्यमस्तु ते ॥
तत्सर्वंपूर्णतामेति । शांतिकांतिभिरादरात् ॥ शांतिधारा ॥
भुविनमिंसुनायकं । भव पयोधिपारगं ॥
विमलपुष्पकैर्यजे । भवविनाशकंजिनं ॥ पुष्पांजलिः ॥ १२ ॥

॥ स्तोत्रम् ॥

शिखरिणीः-स्तुतिस्तोतुः साधोः कुशलपरिणामाय स तदा ।
भवेन्मा वा स्तुत्यः फलमपि ततस्तस्य च सतः ॥
किमेवं स्वाधीन्याजगति सुलभे श्रायसपथे ।
स्तुयान्नत्वा विद्वान्सततमपि पूज्यं नमिजिनम् ॥ १ ॥
त्वया धीमन् ब्रह्मप्रणिधिमनसा जन्मनिगलं ।
समूलं निर्भिन्नं त्वमसि विदुषां मोक्षपदवी ॥
त्वयि ज्ञानज्योतिर्विभवकिरणैर्भाति भगव- ।
न्नभूवन् खद्योता इव शुचिरवावन्यमतयः ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विधेयं वार्यं चानुभयमुभयं मिश्रमपि तत्
विशेषैः प्रत्येकं नियमविषयैश्चापरिमितैः ॥
सदान्योन्यापेक्षैः सकलभुवनज्येष्ठगुरुणा ।
त्वया गीतं तत्वं बहुनयविवक्षेतरवशात् ॥ ३ ॥
अहिंसा भूतानां जगति विदितं ब्रह्म परमं
न सा तत्रारम्भोस्त्यणुरपि च यत्राश्रमविधौ ॥
ततस्तत्सिध्यर्थं परमकरुणो ग्रन्थमुभयं ।
भवानेवात्याक्षीन्न च विकृतवेषोपधिरतः ॥ ४ ॥
वपुर्भूपायेषव्यवधिरहितं शान्तिकरणं
यतस्ते संचष्टे स्मरशरविपातंकविजयम् ॥
विना भीमैः शस्त्रैरदयहृदयामर्षविलयं ।
ततस्त्वं निर्मोहः शरणमसि नः शान्तिनिलयः ॥ ५ ॥

॥ जयमाला ॥

जय अमरासुरनरसेवितचरण । जय भवभयपीडित जनता शरण ॥
जय सहज दुःख महाजन करुण । जय नानाविध देहिषुकृत करुण ॥१॥
जय प्रमुदित भव्य सुमानसहंस । जय धर्म कर्म निर्मूलितशोक
जय केवल नयनालोकितलोक । जय मारवीररण दारणदक्ष ॥ २ ॥
जय प्रशम बाणहत कर्मविपक्ष । जय ध्यानानलदग्धध्वांत कुकक्ष ॥
जय निजमत निर्जित परमत पक्ष । जय बोध दर्शन सुखकमलसुशयन ॥३॥
जय नखमणि दीधितिभासितककुभ । जय परमत बोध कानन दावाग्नि ।
जय मुक्तिसाम्राज्याधिप जिननाथ । जय मोहारिनाशक शिवपदाधिष्ठित ४
जय मुनिजनवंदित परमसुचरण । जय दुस्तर संसारवारिधि तरण ॥
जय घाति जलद कल्पांत मारुतजिन । जय पश्चादुत्पन्नानंतशांत ॥५॥
जय विजितपरीषहदुर्धर कदन । जय स्यादस्ति नास्ति सुभंगादिवचन ।
जय परमजिनेश्वर गुणगणमुद्र । जय निरुपम सुखवर हत मोहतंद्र ॥६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जय ज्ञानाद्यनंत चतुष्टयरूप। जय शील गुणाकर दिव्यरूप जय ॥
जय जीवदया परधर्म कथन जय। जय पंचाक्षासुरदर्पमथन जय॥७॥

घत्ता:-मालिनी—स जयतु जिननाथो बोधसंपत्सनाथो।
विनमदमरनाथो मुक्तिकांताधिनाथः ॥
प्रविजितरतिनाथो देवदेवाधिनाथो।
मुदितमनुजनाथो भव्यसंघाधिनाथः ॥ अर्घ्यं ॥ ८॥

शार्दूल--अव्याबाधनिरंजनस्वपरसंवेद्यस्वभावात्मको।
लोकालोकविलोकनैकनिपुणस्त्रैलोक्यचूडामणिः ॥
ज्ञानानूनयतींद्रवंदितपदः श्रीमान्नमीशोजिनः।
देवेंद्रादि सुवंदितो जिनवरः कुर्यात्समे मंगलं॥इत्याशीर्वादः॥१॥

मत्तावलिः—कौशंब्यां प्रथितस्तृतीयजननेसिद्धार्थनामानृपः।
कृत्वातत्र तपोतिघोरमभवत्तुर्योधिकेनुत्तरे ॥
तस्मादेत्य पुरे बभूवमिथिलानाम्नींद्रवंद्योनमि-।
स्तीर्थेशस्त्रिजगद्धितार्थवचनो व्यक्तैकविंशोजिनः ॥२॥

मिथिलाख्यपत्तने विजयनृपवार्पिलामहादेव्योर्जाताय कनकवर्णाय पंचदशधनुरुच्छेदाय दशसहस्रवर्षायुष्काय कैरवलांछनाय भृकुटिचामुंडीयक्षयक्षीसहिताय इक्ष्वाकुवंशाय सम्मेदगिरौमित्रधरकूटे कर्मक्षयंगताय श्रीनमितीर्थेश्वराय नमस्कारं कुर्वे॥ उदकचं० ॥ अर्घ्यं॥

शांतिधारा॥ पुष्पांजलिः॥

॥ अथ नेमितीर्थंकरपूजा ॥

आर्या:-नेमिजिनःशिवदेवीसमुद्रविजयात्मजः सुनीलाभः ॥
द्वारावतीपुरवर्यो हरिवंशभवोर्च्यते श्रीमान् ॥१॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं नेमितीर्थेश्वर अत्रावतरावतर संवौषट् स्वाहा। आह्वानमित्यादि॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अष्टकम् ॥

वसंततिलकाः—देवापगादि वरतीर्थनदी जलौघैः ।
सौवर्णपंकजपराग समूहमिश्रैः ॥
श्री ऱ्ही धृतीड्य शिवदेव्युदराब्धिचंद्रम् ।
श्रीनेमिचंद्रजिनचंद्रमहं यजामि ॥

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं नेमितीर्थकराय जलं निर्वपामि स्वाहा ॥ १ ॥

श्रीगंधसारघनसारविमिश्रगंधैः ।
सौरभ्यझंकृतमदांधमधुव्रतौघैः ॥
कालोरुनीरदनिभामलदिव्यदेहम् ।
श्रीनेमि० ॥ ॐ ऱ्हीं० । नेमितीर्थकर० । गंधं ॥ २ ॥

शालीयदीर्घधवलाक्षतपूतपुंजैः ॥
शीतांशुखंडसदृशैरिवपुण्यपुंजैः ॥
श्रीयादवाख्यवरवंशसुधाब्धिचंद्रम् ।
श्रीनेमि० ॥ ॐ ऱ्हीं० । नेमितीर्थकर० । अक्षतान् ॥ ३ ॥

जातीकदंबसरसीरुहपारिजातैः ।
सौगंधिकादिमधुपावृतदिव्यपुष्पैः ॥
नासापुटैकपरिशब्दितपांचजन्यम् ।
श्रीनेमि० ॥ ॐ ऱ्हीं० । नेमितीर्थकर० । पुष्पम् ॥ ४ ॥

योषादिसंस्कृतसितोत्तमभक्ष्ययुक्तैः ।
शाल्यन्नदुग्धदधिमिश्रसमस्तहव्यैः ॥
श्रीवासुदेवबलनूतपदारविंदम् ।
श्रीनेमि० ॥ ॐ ऱ्हीं० । नेमितीर्थकर० । चरुं ॥ ५ ॥

पापांधकारभरभंजनदक्षशोण— ।
माणिक्यदीपनिकरैर्वरभाजनस्थैः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

राजीमतीविरहकृद्वरदीक्षयेड्यम् ।
श्रीनेमि० ॥ ॐ ह्रीं० ॥ नेमितीर्थंकर० ॥ दीपं ॥ ६ ॥

आशावधूविशदकेशकलापशोभैः ।
कालागरुप्रभृतिबंधुरधूपधूमैः ॥
घातिक्षयाप्तविमलानघबोधभासं ॥
श्रीनेमि० ॥ ॐ ह्रीं० ॥ नेमितीर्थ० ॥ धूपं ॥ ७ ॥
नारंगजंबुकदलीपनसाम्रपूगैः ।
कूष्मांडचोचफलपूरमुखैः फलौघैः ॥
आनम्रमानवखगेंद्रलसत्सुरेन्द्रम् ।
श्रीनेमि० ॥ ॐ ह्रीं० ॥ नेमितीर्थंकर० ॥ फलम् ॥ ८ ॥
देवांगनाविरचितैर्वरपात्रमध्ये ।
नंद्यादिचित्रमहनीयमहार्घ्यवृंदैः ॥
द्वारावतीपतिसमुद्रमहेशसूनुम् ।
श्रीनेमि० ॥ ॐ ह्रीं० ॥ नेमिर्थंकर० ॥ अर्घ्यं ॥९ ॥
देवापगादिवरतीर्थजलैर्मनोज्ञैः ।
भृंगारनालविगलद्वरशांतिधाराम् ॥
आपातयामि हरिवंशशिखामणीड्य- ।
श्रीनेमि० ॥ ॐ ह्रीं० ॥ नेमितीर्थंकर० ॥ शांतिधारा ॥१०॥
शशिकरौघकीर्तिकं । विशदनेमिनामकम् ॥
तमरविंदकैर्यजे । भवविनाशकंजिनम् ॥ पुष्पांजलिः ॥ ११ ॥

॥ स्तोत्रम् ॥

भगवानृषि परमयोगदहनहुतकल्मषेन्धनः ।
ज्ञानविपुलकिरणैः सकलं प्रतिबुध्य बुद्धकमलायतेक्षणः ॥१॥
हरिवंशकेतुरनवद्यविनयदमतीर्थनायकः ।
शीलजलधिरभवो विभवस्त्वमरिष्टनेमिजिनकुञ्जरोऽजरः ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्रिदशेन्द्रमौलिमणिरत्नकिरणविसरोपचुम्बितम् ।
पादयुगलममलं भवतो विकसत्कुशेशयदलारुणोदरम् ॥ ३ ॥
नखचन्द्ररश्मिकवचातिरुचिराशिखराङ्गुलिस्थलम् ।
स्वार्थनियतमनसः सुधियः प्रणमन्ति मन्त्रमुखरा महर्षयः ॥४॥
द्युतिमद्रथाङ्गरविबिम्बकिरणजटिलांशुमण्डलः ।
नीलजलदजलराशिवपुः सहबन्धुभिर्गरुडकेतुरीश्वरः ॥ ५ ॥
हलभृच्च ते स्वजनभक्तिमुदितहृदयौ जनेश्वरौ ।
धर्मविनयरसिकौ सुतरां चरणारविन्दयुगलं प्रणमेतुः ॥ ६ ॥
ककुदं भुवः खचरयोषिदुषितशिखरैरलंकृतो ।
मेघपटलपरिवीततटस्तव लक्षणाणि लिखितानि वज्रिणा ॥७॥
वहतीति तीर्थमृषिभिश्च सततमभिगम्यतेऽद्य च ।
प्रीतिविततहृदयैः परितो भृशमूर्जयन्त इति विश्रुतोऽचलः ॥८॥
बहिरन्तरमप्युभयथा च करणमविघाति नार्थकृत् ।
नाथ युगपदखिलं च सदा त्वमिदं तलामलकवद्विवेदिथ ॥९॥
अत एव ते बुधनुतस्य चरितगुणमद्भुतोदयम् ।
न्यायविहितमवधार्य जिने त्वयि सुप्रसन्नमनसः स्थिता वयं १०

॥ जयमाला ॥

जय श्रीनरनाथामरकृतसेवं । जय श्रीपतिसंसेवितमधिदेवं ॥
जय कर्मकलंकाद्रि वज्रसमानं । जय नौमिजिनेशं सुगुणनिदानं ॥ १ ॥
जय सर्वदयालुंयतिनुतपादं । जय धर्मसुधुर्यं जलधरनादं ॥
जय वर्जितकामंविगलितमानं । जय नौमिजिनेशंसुगुणनिदानं ॥ २ ॥
जय दर्शिततत्त्वंपरिगतरोषं । जय पालितसत्त्वोत्करमपदोषं ॥
जय अब्धिगभीरंसदभयदानं । जय नौमिंजिनेशंसुगुणनिदानं ॥ ३ ॥
जय मर्दितमिथ्यामततरुकंदं । जय भक्तजनानंदकरविधुतुंडं ॥
जय जन्मनिमेरौसुरकृतगानं । जय नौमिजिनेशंसुगुणनिदानं ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जय पुण्यलतासेचनघनरूपं । यज कोटिमनोभूविजय स्वरूपं ॥
जय भव्य जनानांसुकृतनिदानं । जय नौमिजिनेशं सुगुणनिदानं ॥५॥
जय कोटिदिनाधीश्वरजयभासं । जय खंडितमृत्यूद्भवभयपाशं ॥
जय केवलबोधामृतकृतपानं । जय नौमि० ॥ ६ ॥
जय नाशितबंधंसुरागिरिधीरं । जय मोहपयोदप्रबलसमीरं ॥
जय नृत्यदभूसुंदरिकृततानं । जय नौमिजिनेशं सुगुणनिदानं ॥ ७ ॥
जय त्यक्तसभं सद्गुणयुक्तं । जय अंतिमयष्ठ्यावरतनुमुक्तम् ॥
जय भूत्रयमूर्धस्थितिकमानं । जय नौमिजिनेशं सुगुणनिदानं ॥ ८ ॥
घत्ता— संसारमुक्तोजिनधर्मचंद्रः । सद्धर्मकर्तावरधर्मसूर्तिः ॥
देवेंद्रकीर्तीकृतदेवकीर्तिः । पायादजस्रंजिननेमिनाथः ॥ अर्घ्यं ॥ ९॥

शार्दूल:-यस्माद्विघ्नपरंपराविघटते दास्यं सुराः कुर्वते ।
कामः शाम्यति दाम्यतींद्रियगणः कल्याणमुत्सर्पति ॥
उन्मीलंतिमहर्द्धयः कलयति ध्वंसं च यः कर्मणाम् ।
शंखांको विदधातुमंगलमलं श्रीनेमिनाथोजिनः ॥ इत्याशीर्वादः

भवावलि:--प्राक्चिंतागतिरावभावनुपमः कल्पेचतुर्थेऽमरो ।
जज्ञेस्मादपराजितः क्षितिपतिर्जातोच्युतेंद्रस्ततः ॥
तस्मात्सोजनिसुप्रतिष्ठ नृपतिर्देवो जयं तेऽन्वभू- ।
दासीदत्रमहोदयोहरिकुलव्योमामलेंदुर्जिनः ॥ २ ॥

शौरीपुराधीश्वरसमुद्रविजयमहाराजमहादेवीशिवदेव्योर्जाताय नील-नीरदनिभवर्णाय दशचापोन्नताय सहस्रवर्षायुष्काय शंखलांछनाय हरिवंशतिलकाय सर्वाह्नकूष्मांडिनीयक्षयक्षीसहिताय रैवतके (ऊर्ज-यन्तशिखरे) परिनिर्वृताय श्रीनेमितीर्थेश्वराय नमस्कारं कुर्वे ॥
उदकचं० ॥ अर्घ्यं । शांतिधारा । पुष्पांजलिः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ पार्श्वतीर्थंकरपूजा ॥

वसंतः-वाराणसीनगरनायकविश्वसेन- ।
ब्राह्मीकुमारमभवं नवशालिकांतिं ॥
उग्रान्ववायतिलकं जिनमर्चयामि ।
श्रीपार्श्वनाथमहिभोगसितातपत्रं ॥ १ ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं पार्श्वतीर्थंकरजिनदेवात्रावतरावतर संवौषट् स्वाहा ॥ आह्वानमित्यादि० ॥

॥ अष्टकम् ॥

इंद्रवज्राः-श्रीमद्भिरंभोजगभृंगवद्भि- । रंभोभिरापादितगंधवद्भिः ॥
श्रीपार्श्वनाथंधरणेंद्रयक्ष- । पद्मावतीपूजितमर्चयामि ॥
ॐ ह्रीं० ॥ श्रीपार्श्वतीर्थेश्वराय जलं ॥ २ ॥

गंधैस्सुगंधप्रकरैस्सुगंधैः । नानासुगंधैर्जितमष्टगंधैः ॥
श्रीपार्श्वनाथं० ॥ ॐ ह्रीं० ॥ श्रीपार्श्वतीर्थे० ॥ गंधं ॥

शाल्यक्षतैरक्षतपुण्यपुंजै- । रक्षूणलक्ष्मीकरकर्मदक्षैः ॥
श्रीपार्श्वनाथं० ॥ॐ ह्रीं० ॥श्रीपार्श्वतीर्थेश्वराय ॥ अक्षतान् ॥४॥

निष्पापनिष्पादितपुष्पदामैः । निष्पापपुष्पंधयसुप्रजातैः ॥
श्रीपार्श्वनाथं० ॥ ॐ ह्रीं० ॥ श्रीपार्श्वतीर्थेश्व० ॥ पुष्पं ॥ ५ ॥

हव्यैस्सुनव्यैः सुकृतैस्सुगंधैः । सव्यंजनैः संवृतगंधसारैः ॥
श्रीपार्श्वनाथं० ॥ ॐ ह्रीं० ॥ श्रीपार्श्वतीर्थे० ॥ चरुं ॥ ६ ॥

कर्पूरदीपैः कनकोज्वलांगैः । स्फुरत्तमस्तोमविनाशदक्षैः ॥
श्रीपार्श्वनाथं० ॥ ॐ ह्रीं० ॥ श्रीपार्श्वतीर्थे० ॥ दीपं ॥ ७ ॥

दशांगकालागरूधूपधूमै- । र्नासासुमेयैस्समताभिरामैः ॥
श्रीपार्श्वनाथं० ॥ ॐ ह्रीं० श्रीपार्श्वतीर्थे० ॥ धूपं ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सकल्पसंकल्पविमुक्तमुक्ति- । प्रदानकोद्भव्यफलैःफलौघैः ॥
श्रीपार्श्वनाथं० ॥ ॐ० ह्रीं० ॥ श्रीपार्श्वतीर्थे० ॥ फलं ॥ ९ ॥

भृंगारघंटाध्वजसुप्रतिष्ठ-- । प्रादर्शछत्रत्रयतालवृंतैः ॥
सच्चामराद्यैर्वरमंगलाद्यैः । श्रीपार्श्वनाथांघ्रियुगंयजेहं ॥
अर्घ्यं ॥ १० ॥

कर्मादिरोगादिदरिद्रदोप- । संजातविघ्नौघसमस्तशांत्यै ॥
भृंगारनालार्पितशांतिधारा- । कृत्येनयायुर्जिनपार्श्वनाथं ॥
शांतिधारा ॥

वरसहस्रनामकं । सुरभिचंपकैर्यजे ॥
रहितघातिकर्मकं । परमपार्श्वनामकं ॥ १ ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं नमोऽर्हते भगवते श्रीमते श्रीमद्गर्भावतरण जन्माभिषेकपरिनिष्क्रमणकेवलज्ञानोदयसमयसमायातधनदनिर्मित-- शुंभन्मानस्तंभधूलिसालाद्यलंकृतसमवसरणमध्यस्थद्वादशगणपरिवृत-- पीठत्रयोपरिम लसद्गंधकुटीमध्यस्थितसिंहासनाद्यष्टमहाप्रातिहार्य- चतुस्त्रिंशदतिशयसकलशतेंद्रवृंदवंद्यपरमाभ्युदय लक्ष्मीसहिताय अनंत- दर्शनज्ञानवीर्यसुखात्मकाय कठिणकमठोपसर्गविजयपार्श्वतीर्थंकराय सुरभिसुमनोंजलिं निर्वपामि स्वाहा ॥

हितसरोज सर्गकं । कमलपुष्पकैर्यजे ॥
रहितघातिकर्मकं । परमपार्श्वनामकं ॥ २ ॥

त्रिभुवनेंद्र वंदितं । कनककेतकैर्यजे ॥ रहित० ॥ ३ ॥

नवसुलब्धिसंयुतं । बकुलपुष्पकैर्यजे ॥ रहित० ॥ ४ ॥

वरशतेंद्रवंदितं । कुरबकैः सुमैर्यजे ॥ रहित० ॥ ५ ॥

ऋषिगणेंद्रवंदितं । सुरभिचंपकैर्यजे ॥ रहित० ॥ ६ ॥

वरगुणौघसंयुतं । कुमुदपुष्पकैर्यजे ॥ रहित० ॥ पुष्पांजलिः ।७।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ स्तोत्रम् ॥

तमालनीलैः सधनुस्तडिद्गुणैः। प्रकीर्णभीमाशनिवायुवृष्टिभिः।
बलाहकैर्वैरिवशैरुपद्रुतो । महामना यो न चचाल योगतः ॥१॥
बृहत्फणामण्डलमण्डपेनयं । स्फुरत्तडित्पिङ्गरुचोपसर्गिणाम् ।
जुगूह नागो धरणो धराधरं। विरागसंध्यातडिदम्बुदो यथा ।२॥
स्वयोगनिस्त्रिंशनिशातधारया । निशात्य यो दुर्जयमोहविद्विषम् ।
अवापदार्हन्त्यमचिंत्यमद्भुतं। त्रिलोकपूजातिशयास्पदं पदम् ।३।
यमीश्वरं वीक्ष्य विधूतकल्मषं। तपोधनास्तेऽपि तथा बुभूषवः ।
वनौकसः स्वश्रमवन्ध्यबुद्धयः । शमोपदेशं शरणं प्रपेदिरे ॥४॥
स सत्यविद्यातपसां प्रणायकः। समग्रधीरुग्रकुलाम्बरांशुमान् ॥
मया सदा पार्श्वजिनः प्रणम्यते। विलीनमिथ्यापथदृष्टिविभ्रमः।५॥

॥ जयमाला ॥

जय संसारार्णव तारण नावं। जय ध्यानामृत कृतप्रगटसुभावं ॥
जम कर्ममहाकानन वरदहनं। जय रूपस्वरूप विचिंतनगहनं ।१॥
जय वाराणसिनगरी कृतवासं। जय विश्वसेनसुतमतिसुखभासं ॥
जय मोहमहानलजलदगभीरं। जय क्रोधविघटभटभंजनवीरं ॥ २ ॥
जय शाकिनिढाकिनिगृहकृतत्रासं। जय भूतपिशाचव्यंतरभयनाशं ॥
जय व्याधिविपमविषखंडनमंत्रं। जय मुक्तिरमावरमोहनयंत्रं ॥ ३ ॥
जय व्याघ्रोरगगजघनभयहरणं। जय पार्श्वजिनंवंदेनतचरणं ॥
जय दूरीकृतनिष्ठुरतरमरणं। जय पापतिमिरनाशनरविकिरणं ॥ ४ ॥
जय इंद्रामरनरखचरसुमहितं। जय नागराजपद्मावतीसहितं ॥
जय दुर्जनमृगमर्दनजिनराजं। जय सेवकजनकृतसौख्यसमाजं ॥ ५ ॥
जय मदनमहारिपुबंधनपाशं। जय कमठमहाशठमदकृतत्रासं ॥
जय चिंतामणिसुरवृक्षसमानं। जय कामधेनुवरकरुणनिदानं ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जय योगनियोगवियोगविमुक्तं । जय अष्टादशदोषारिविमुक्तं ॥
जय जीवदयामृतपारावारं । जय पार्श्वजिनंवंदेसुखपारं (सारं) ॥७॥

घत्ता– सिद्धंविशुद्धंमहिमावेषं । दुष्टारिमारिग्रहदोषनाशं ॥
सर्वेषुयोगेषुफलप्रदानं । समर्चयेपार्श्वजिनाधिनाथं ॥ ८ ॥ अर्घ्यं ॥

शार्दूल० यस्यानुग्रहतोऽर्णवः स्थलमरिर्मित्रंसुराः किंकराः ।
कांतारंनगरंगिरिर्गृहमहिर्माल्यंमृगारिर्मृगः ॥
पातालंबिलमस्त्रमुत्पलदलं व्यालः सृगालोविषं– ।
पीयूषं जिनवीर मे कलयतांपार्श्वप्रभुर्मंगलं ॥ इत्याशीर्वादः ॥

भवावलि-जातःप्राङ्मरुभूतिरन्विभपतिर्देवस्सहस्रारजो ।
विद्येशोच्युतकल्पजःक्षितिभृतां श्रीवज्रनाभिःपतिः ॥
देवोमध्यममध्यमे नृपगुणैरानंदनामा ततो ।
देवेंद्रोहतघातिसंहतिरवत्वस्मान् स पार्श्वेश्वरः ॥ १ ॥

वाराणसीनगरे विश्वसेनमहाराजब्राह्मिलामहादेव्योर्जाताय हरितवर्णाय नवकरोन्नताय शतवर्षायुष्काय सर्पलांछनाय धरणेंद्रपद्मावतीयक्षयक्षी सहिताय उग्रवंशाय सम्मेदागिरौ सुवर्णभद्रकूटे परिनिर्वृताय भगवान् श्रीपार्श्वतीर्थेश्वराय नमस्कारं कुर्वे ॥ उदकचं० ॥ अर्घ्यं ॥ शांतिधारा ॥ पुष्पांजलिः ॥

॥ अथ श्रीवर्धमानतीर्थंकरपूजा ॥

शार्दूल–श्रीमत्कुंडपुराधिनाथविलसत्सिद्धार्थभूवल्लभ- ।
प्रेमार्द्राप्रियकारिणीप्रियसुतः संप्रार्च्यते सन्मतिः ॥
पंचास्योन्नतकेतनः कनकरुङ्मातंगसिद्धायिनी ।
माणिक्याभरणाभिरंजितपदप्रोत्फुल्लपंकेरुहः ॥ १ ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं श्रीवर्धमानतीर्थेश्वरात्रावतरावतर संवौषट् स्वाहा ॥ आह्वानमित्यादि० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

।। अष्टकम् ।।

इंद्रवज्राः-गांगेयपात्रावधृतैरनल्पै- । गंगादिजातामलपुण्यतीर्थैः ।।
सिद्धार्थराजात्मजमिंद्रवंद्यं । श्रीवर्धमानंजिनमर्चयामि ।।
ॐ ह्रीं श्रीं क्लीं ऐं अर्हं श्रीवर्धमानतीर्थंकरपरमाजिनदेवाय जलं ।।२।।

कर्पूरकाश्मीरमुखप्रसिद्ध- । सद्गंधसाराश्रितगंधपंकैः ।।
सिद्धार्थराजा० ।। ॐ ह्रीं० ।। श्री वर्धमान०।। गंधं ।। ३ ।।

अखंडितैः शुभ्रतरैर्विशुद्धैः । शाल्यक्षतैरीक्षण कोमलांगैः ।।
सिद्धार्थराजा० ।। ॐ ह्रीं० ।। श्रीवर्धमान० ।। अक्षतान् ।।४।।

गंधभ्रमद्भृंगनिकायकम्र- । झंकाररम्यैर्वरपुष्पजालैः ।।
सिद्धार्थराजा० ।। ॐ ह्रीं० ।। श्रीवर्धमान० ।। सुमनम् ।।५।।

नानाविधैर्नव्यघृतोद्भवोद्भ- । भक्ष्यैर्मनोज्ञैश्चरुभिस्सुपक्वैः ।।
सिद्धार्थराजा० ।। ॐ ह्रीं० ।। श्रीवर्धमान० ।। चरुं ।।६ ।।

कर्पूरजातैर्विमलैःप्रभौघ- । दूरीकृतध्वांतगणैः प्रदीपैः ।।
सिद्धार्थराजा० ।। ॐ ह्रीं० ।। श्रीवर्धमान० ।। दीपं ।। ७ ।।

दिव्यैस्सुकालागरुमुख्यधूप- । योगप्रमुक्तामलधूप धूमैः ।।
सिद्धार्थराजा० ।। ॐ ह्रीं० ।। श्रीवर्धमान०।। धूपं ।। ८ ।।

फलैर्वरैर्दाडिमनारिकेल- । कपित्थरंभाम्रसुबीजपूरैः ।।
सिद्धार्थराजा० ।। ॐ ह्रीं० ।। श्रीवर्धमान० ।। फलं ।। ९ ।।

अर्घ्यैरनर्घ्यैः फलगंधपुष्प- । शाल्यक्षताद्यान्वितपात्रसंस्थैः ।।
सिद्धार्थराजा० ।। श्रीवर्धमान० ।। अर्घ्यं ।। १० ।।

शांत्यै सुकांत्यै पयसां मनोज्ञ- । धाराभिराराध्यमहींद्र वंद्यं ।।
सिद्धार्थराजा० ।। ॐ ह्रीं० ।। श्रीवर्धमान० ।। शांतिधारा।।११।।

सुभगवर्धमानकं । विबुधवर्धमानकम् ।।
सुरभिपुष्पकैर्यजे । भवविनाशकंजिनं ।। पुष्पांजलिः ।। १२ ।।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ स्तोत्रम् ॥

स्कंध-कीर्त्या भुवि भासितया वीर त्वं गुणसमुत्थया भासितया ।
भासोडुसभासितया सोम इव व्योम्नि कुन्दशोभासितया ॥१॥
तव जिन शासनविभवो जयति कलावपि गुणानुशासनविभवः
दोषकशासनविभवः स्तुवंति चैनं प्रभाकृशासनविभवः ॥ २ ॥
अनवद्यः स्याद्वादस्तव दृष्टेष्टाविरोधतः स्याद्वादः ।
इतरो न स्याद्वादो सद्वितयविरोधान्मुनीश्वराऽस्याद्वादः ॥ ३ ॥
त्वमसि सुरासुरमहितो ग्रन्थिकसत्त्वाशयप्रणामामहितः ।
लोकत्रयपरमहितोऽनावरणज्योतिरुज्ज्वलद्धामहितः ॥ ४ ॥
सभ्यानामभिरुचितं दधासि गुणभूषणं श्रिया चारुचितम् ।
मग्नं स्वस्यां रुचिरं जयसि च मृगलांछनं स्वकान्त्या रुचितम् ॥५॥
त्वं जिन गतमदमायस्तव भावानां मुमुक्षुकामदमायः ।
श्रेयान् श्रीमदमायस्त्वया समादेशि सप्रयामदमायः ॥ ६ ॥
गिरिभित्त्यवदानवतः श्रीमत इव दन्तिनः स्रवद्दानवतः ।
तव शमवादानवतो गतमूर्जितमपगतप्रमादानवतः ॥ ७ ॥
बहुगुणसंपदसकलं परमतमपि मधुरवचनविन्यासकलम् ।
नयभक्त्यवतंसकलं तव देव मतं समन्तभद्रं सकलम् ॥ ८ ॥

॥ जयमाला ॥

॥ भुजंगप्रयात ॥

सदानंददानंगुणानांनिदानं । विधानंसुधर्मा सुसंमुक्तमानं ॥
कृतानेकगीर्वाणसत्कीर्तिगानं । जिनाधीश्वरं नौमिलक्ष्मीनिदानं ॥ १ ॥
शुशांतंसुकांतंसदाचाररूपं । सुशीलंसुलीलं सदानम्रभूपं ॥
सुबोधंविरोधातिगंदिव्यमानं । जिनाधीश्वरं नौमिलक्ष्मीनिदानं ॥ २ ॥
विरोषंविदोषं सदामुक्तभोगं । वियोगं सुयोगं तरां त्यक्तरोगं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गुणैर्मंडितंपंडितानंददानं । जिनाधिश्वरं नौमिलक्ष्मीनिदानं ॥ ३ ॥
विमुक्तं सुयुक्तं समासक्तचित्तं । मुमुक्षुव्रजैर्वंदितं चिन्निमित्तं ॥
सदासेवितं देवदेवैरमानं । जिनाधीश्वरं नौमिलक्ष्मीनिदानं ॥ ४ ॥
विगर्वं विखर्वं सुसर्वप्रकाशं । विवर्णं विगंधं कृताघप्रणाशं ॥
सदासेवितं भव्यलोकैकमानं । जिनाधीश्वरं नौमिलक्ष्मीनिदानं ॥ ५ ॥
विगात्रं सुपात्रं कुमिथ्यात्वदात्रं । लसत्पद्मनेत्रं पवित्रं विचित्रं ॥
सुपूर्णेंदुवक्त्रं समक्षीरपानं । जिनाधीश्वरं नौमिलक्ष्मीनिदानं ॥ ६ ॥
विलोभं विशोभं विदंभं विदारं । विमारं विकारातिगं त्यक्तहारं ॥
हरं शंकरं ब्रह्मरूपं हरीशं । जिनाधीश्वरं नौमिलक्ष्मीनिदानं ॥ ७ ॥
सुवीरं सुधीरं भवप्राप्तितीरं । गताशं विनाशं कुदुःखाग्निनीरं ॥
सुमूर्तिं सुकीर्तिं जगत्प्राप्तमानं । जिनाधीश्वरं नौमिलक्ष्मीनिदानं ॥ ८ ॥

घत्ता वसंत- इत्थं स्तुतो जिनवरो जगदार्ति हर्ता ।
चंचद्भवाब्धिषु नृणां पततां सुपाता ॥
श्रीवीरनाथ इह धर्मसुभूषणाढ्यो ।
देवेंद्रकीर्तितयशः सुखतां विधत्तां ॥ अर्घ्यं ॥ ९ ॥

शार्दूल० कर्मारातिविघातको जिनवरः शक्रादिदेवार्चितः ।
सर्वज्ञसुखदायको गुणनिधिर्भव्याब्जिनीभानुमान् ॥
संसारार्णवतारकोभवभृतां सद्भक्तिभाजांसदा ।
भूयान्मोक्षपदाप्तयेच भवतां कल्याणवल्लीघनः ॥ १ ॥

अनु— वर्धमानोजिनः श्रीमान् नामान्वर्थंसमुद्वहन् ॥
देयान्मेवृमुद्धिद्धूत । घातिकर्मविनिर्मितां ॥ इत्याशीर्वादः

भवावलिः- पुरूरवास्सुरः प्राच्यकल्पेभूद्भरतात्मजः ॥
मरीचिर्ब्रह्मकल्पोत्थस्ततोभूज्जटिलद्विजः ॥ १ ॥
सुरस्सौधर्मकल्पेनु पुष्यमित्रद्विजस्ततः ॥
सौधर्मजोऽमरस्तस्मामद्विजन्माग्निसमाह्वयः ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सनत्कुमारदेवोस्मादग्निमित्राभिदोद्विजः ॥
मरुन्माहेंद्रकल्पेभूद्भारद्वाजोद्विजान्वये ॥ ३ ॥
जातोमाहेन्द्रकल्पेउ मानुष्योनुततश्च्युतः ॥
नरकेषुत्रसस्थावरेष्वसंख्यातवत्सरान् ॥ ४ ॥
भ्रांत्वा ततोविनिर्गत्यस्थावराख्योद्विजोऽभवत् ॥
ततश्चतुर्थकल्पेभूद्विश्वनंदीततश्च्युतः ॥ ५ ॥
महाशुक्रे ततोदेवस्त्रिखंडेशस्त्रिपिष्ठवाक् ॥
सप्तमे नरके तस्मा त्तस्माच्चगजविद्विषः ॥ ६ ॥
आदिमे नरके तस्मा त्सिंहस्सद्धर्मनिश्चलः ॥
ततःसौधर्मकल्पेभूत्सिंहकेतुःसुरोत्तमः ॥ ७ ॥
कनकोज्वलनामाभू त्ततोविद्याधराधिपः ॥
देवस्सप्तम कल्पेनु हरिषेणस्ततोनृपः ॥ ८ ॥
महाशुक्रे ततोदेवः प्रियमित्रोनु चक्रभृत् ॥
ससहस्रार कल्पेभू देवस्सूर्यप्रभाह्वयः ॥ ९ ॥
राजानंदाभिधस्तस्मा त्पुष्पोत्तरविमानजः ॥
अच्युतेन्द्रस्ततश्च्युत्वा वर्धमानाजिनेश्वरः ॥ १० ॥
प्राप्तपंचमहाकल्या णर्द्धिःप्रास्तुतसिद्धिभाक् ॥
प्रदिश्याद्गुणभद्रेभ्यः । स विभुः सर्वमंगलम् ॥११॥

श्रीकुण्डपुरे सिद्धार्थनरेशप्रियकारिणीदेव्योजाताय हेमवर्णाय सप्तहस्तोन्नताय द्वासप्ततिवर्षायुष्काय केसरिलांछनाय मातंगासिध्दायिनीयक्षयक्षीसमेताय नाथवंशायपावापुरमनोहरवनांतरे बहूनांसरसांमध्ये महामणिशिलातले परिनिर्वृताय श्रीमहावीरवर्धमान तीर्थेश्वराय नमस्कारं कुर्वे ॥ उदकचंदन० ॥ अर्घ्यं ॥ शांतिधारा । पुष्पांजलिः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ बाहुबलिस्वामिपूजा ॥

इंद्रवज्राः-श्रीपौदनेशं पुरुदेवसूनुं । तुंगात्मकं तुंगगुणाभिरामं ॥
देवेंद्रनागेंद्रनरेंद्रवंद्यं । श्री दोर्बलीशंमहयामि भक्त्या ॥ १ ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं बाहुबलिजिनदेवात्रावतरावतर संवौषट् आह्वानं ॥

॥ अष्टकम् ॥

चामरः-दिव्यदीर्घिकादिनव्यतीर्थपावनोदकैः ।
सेव्यमानभव्यवृंदपापतापनाशकैः ॥
विंध्यशैलमस्तके सुरासुरौघपूजितं ।
सुंदरांगमर्चयामि गोमटेशमच्युतम् ॥ जलं ॥ २ ॥
चंदनागरुप्रयुक्तचारुगंधचंदनै- ।
रिंदुकुंकुमादिजातसौरभाभिरामकैः ॥
इंद्रवृंदनंदितोरुगंधवृष्टिशोभितम् ।
वंधुरांगमर्चयामि दोर्बलीशमव्ययम् ॥ गंधं ॥ ३ ॥
रूप्यशुभ्रसाग्रदीर्घदभ्रशालितंडुलैः ।
प्रेक्षमाणभक्तलोकस्वार्थदङ्गमनोहरैः ॥
मोक्षलोकदायकप्रवीणधर्मनायकम् ।
यक्षवंद्यमर्चयामि दोर्बलीशमिष्टदम् ॥ अक्षतान् ॥ ४ ॥
सिंधुवारकैरवाब्जयूथिकादिपुष्पकैः ।
गंधलीनभृंगराजसौरभाभिरामकैः ॥
गुह्यकामरौघनीतदिव्यपुष्पवृष्टिगम् ।
गंधमूर्तिमर्चयामिगोमटेशमच्युतम् ॥ पुष्पं ॥ ५ ॥
मोदकप्रमोदजातलड्डुकादिसंयुतैः ।
क्षीरशर्कराज्ययुक्तपायसैर्मनोहरैः ॥
स्तूयमानसर्वलोकवारसौख्यदायकम् ।
स्वात्मसौख्यमर्चयामि दोर्बलीशमक्षयम् ॥ चरुं ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

फेनपिंडभासमानचंद्रखंडदीपकैः ।
शातकुंभनिर्मितोरुभाजनादिरंजितैः ॥
विश्वलोकव्याप्तदिव्यज्ञानलोचनान्वितम् ।
पूजयामि दोर्बलीशमक्ष्यायकारणम् ॥ दीपं ॥ ७ ॥

गंधसारसारगुग्गुलादिपांशुधूपकैः ।
गंधलीनभृंगराजसौरभाभिरामकैः ॥
ज्ञानदावदग्धकामदोषदारुवृन्दकम् ।
देवदेवमर्चयामि दोर्बलीशमंजसा ॥ धूपं ॥ ८ ॥

बीजपूरमोचपूगनागरंगकर्कटी ।
नारिकेलजंबुनिंबमृद्विकादिसत्फलैः ॥
कोमलारुण प्रवालसंयुतांघ्रि युग्मकम् ।
पूर्वकामदेवमर्चयामिगोमटेशिनम् ॥ फलं ॥ ९ ॥

वारिगंधचारुशालितण्डुलप्रसूननै-- ।
वेद्यदीपधूपसत्फलौघनिर्मिताघ्र्यकैः ॥
देवराजभोगिराजभूमिराजपूजितम् ।
देवदेवमर्चयामिविश्वजीवदायिनम् ॥ अर्घ्यं ॥ १० ॥

व्योमनिम्नगादिपूरसारवारिधारया ।
हेमजातपूतकुंभनालरंध्रमुक्तया ॥
भूमिमंडलप्रसिद्धविंध्यशैलशोभितम् ।
कामदेवमर्दनोत्कदोर्बलीशमर्चये ॥ शांतिधारा ॥ ११ ॥

सहजसौख्यमंडितं विमलबोधभासुरम् ॥
नलिनसंकुलैर्यजेदोर्बलीशमिष्टदम् ॥ १२ ॥

विनुतभव्यकामदं प्रणुतदेवमंडलम् ॥
भुजबलिशमर्चयेमल्लिका दिभिरंजसा ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दिव्यबोधभासुरं । श्राव्यकाव्यबोधकम् ॥
नव्यजातिपुष्पकैः । दोर्बलीशमर्चये ॥ २ ॥

सकलदेववंदितं । विकलमोहसंकुलम् ॥
कुटजकुड्मलैर्यजे । दोर्बलीशमिष्टदम् ॥ ३ ॥

सोमसूर्यभायुतं । कामदेवमग्रिमम् ॥
बकुलमालया यजे । दोर्बलीशमच्युतम् ॥ ४ ॥

मालिनीः-दरदलितसरोजाशोकबंधूकसूनैः ।
सुरभिनिकरसर्वाल्हादसंतानदानैः ॥
पुरुजिनपतिसूनोः पंडितार्याब्जभानोः ।
वरपदकमले पुष्पांजलिं प्रार्चयामि ॥ पुष्पांजलिः ॥ ५ ॥

॥ श्रीबाहुबली स्तोत्रम् ॥

श्रीमन्नाभेयजातः प्रथममनसिजो नाभिराजस्य नप्ता ।
संसारं देहभोगं तृणमिव विमुचे भारते संगरे यः ॥
कायोत्सर्गं वितन्वन्महदुरगलसद्गर्भवल्मीकजुष्टम् ।
सोऽयं विंध्याचलेशो विजयतु सुचिरं गोमटेशो जिनेशः ॥ १ ॥

परब्रह्मात्मजं देवं नरोरग मुनीडितम् ॥
परात्परं परतरं भजे श्रीगोमटेश्वरम् ॥ २ ॥

विशालाक्षं महोरस्कं स्मितास्यं सुंदराकृतिम् ॥
विपुलांसं महीयांसं भजे श्रीगोमटेश्वरम् ॥ ३ ॥

आसेचनकरूपाभिरामं संसारतारकम् ॥
कैवल्यकामिनीकांतं भजे श्रीगोमटेश्वरम् ॥ ४ ॥

चिदानंदमहाकायं सर्व तीर्थमयं जिनम् ॥
त्रिलोकेशं त्रिकालेशं भजे श्रीगोमटेश्वरम् ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मोक्षलक्ष्मीकटाक्षेद्धवक्षसं भूरि तेजसम् ॥
विनाशितजनायासं भजे श्रीगोमटेश्वरम् ॥ ६ ॥

अनाद्यनिधनं सिद्धं शुद्धानंदवरप्रदम् ॥
जन्ममृत्युजरातीतं भजे श्रीगोमटेश्वरम् ॥ ७ ॥

दातारंसर्वविद्यानां भूर्भुवः स्वः सुखप्रदम् ॥
भवरोगमहावैद्यं भजे श्रीगोमटेश्वरम् ॥ ८ ॥

निरायुधं निर्विकारं निरलं (हं)कार बंधुरम् ॥
निरंबरं विनेतारं भजे श्रीगोमटेश्वरम् ॥ ९ ॥

गोमटेशाष्टकमिदं भुक्तिमुक्ति फलप्रदम् ॥
त्रिशुध्यायोहिपठते श्रायसं सुखमाप्नुयात् ॥ १० ॥

धर्म्यमर्थ्यं यशस्यं च गोमटेशाष्टकं पठन् ॥
लब्ध्वा परतरब्रह्मसूरिर्भूरिसुखो भवेत् ॥ ११ ॥

मालिनीः-मुकुरविमलगंडं चंद्रसंकाशतुंडम् ।
गजकरभुजदंडं कामदावाग्निकुंडम् ॥
विनुतमुनिपषंडं गोमटेप्रशचंडम् ।
गुणनिवहकरंडं नौमिनाभेयपिंडम् ॥ १२ ॥

इंद्रवज्राः-अंभोजनेत्रं हरितोरुगात्रं । दयाकलत्रं वरशक्तिपात्रम् ॥
भव्याब्जमित्रं भुवनेपवित्रं । नाभेयपुत्रं प्रणमामि नित्यम् ॥ १३ ॥
श्रीदोर्बलीशं सुरराजपूज्यं । नाकेंद्रनारीपरिगीतकीर्तिम् ॥
देदीप्यमानांगसुलक्षणाढ्यं । वंदे विभुं ध्वस्तकुकिल्विषौघम् । १४ ।

॥ जयमाला ॥

जय दोर्बलिजिनवरसुरनरपूज्य । जय नाभिमहाराजनप्तृरत्न जय ॥
जय पुरुजिनपतिसुतमंदरधीर । जय देवीसुनंदागर्भजन्म जय ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जय पौदनपुरजन्माधकाम जय। जय मरकतमणिनिभकायवर्ण जय ॥
जय प्रथनत्रयलब्धकुसुमवर्ष जय। जय जयघातिसंघात ज्योति जय॥२॥
जय भरतचक्रिकृतकेवलपूज। जय पार्वणहिमकरसुंदरवदन ॥
जय संसारपंचकदुःखविमुक्त। जय भवसागरमग्नजीवपोत जय ॥ ३ ॥
जय हायनमेकं निश्चलध्यान। जय माधवीवल्लरी मंडितगात्र ॥
जय आकृतिसन्निभतुंगगुणाढ्य। जय सेवितबुधजनचिंतितदातः ॥ ४ ॥
जय सहजसमुध्दसत्सौख्यसमूह। जय यतिपतिततिनुतपादसरोज ॥
जय भव्यजनेडितपावनभाव। जय मुक्तिरमावरमानसहंस ॥ ५ ॥
घत्ता:-जयभुवनेश नम्रनरेश। सेवितसेवक कर्महर ॥
जय नंद जिनेशानंदितभव्य। दोर्बलीशबुधनुतचरण ॥ अर्घ्यं ॥ ६ ॥

॥ मंगलाष्टकम् ॥

स्रग्धरा:-भव्योल्लासाय भूयाद्विनमदमरराड्दिव्यकोटीरकोटी-।
रत्नाग्रप्रत्नमुक्ता मणिगणविसरत्कांतिकिंजल्कजुष्टम् ॥
पादाब्जं यस्यभव्यभ्रमरकलरुतं सोयमुद्वेलसौख्यः ।
श्रीमान्विंध्याचलेशो जयतु गुणनिधिर्गोमटेशोजिनेशः ॥ १ ॥

शिखरिणी:-महामूर्तिश्शांतेर्निखिलमहसां शाश्वतपदः ।
शरच्चंद्रज्योत्स्ना प्रकृतिविकृतिः कंजवदनः ॥
ज्वलच्छुक्लध्यानस्फुरदमलशुक्लाह्वयमहा- ।
लेश्याद्रव्याकारस्स जयतु गिरौ गोमटजिनः ॥ २ ॥

कलाकेलिः कांतेर्विमलतरसौंदर्यनिलयो ।
महापुण्यैर्दृश्यस्त्रिदशपतिपूज्यांघ्रिकमलः ॥
लसन्निर्वाणश्रीघनतरपरीरंभविसर- ।
न्महायोगानंदस्स जयतु गिरौ गोमटजिनः ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लतादंभान्मुक्तेर्ललितभुजसंवेष्टिततनुः ।
महानंदात्किंचिन्मुकुलितविशालाक्षियुगलः ॥
लसत्कायोत्सर्गव्यतिकरसुखान्निश्चलवपुः ।
सुराधीशाराध्यस्स जयतु गिरौ गोमटजिनः ॥ ४ ॥

अनुः---क्षेमायजगतां भूयात् गोमटेशकृपाझरी ॥
वरीवरयितुं श्रेयः कामिनीं भोभवीतिया ॥ ५ ॥

विसट्टकंदोट्ट दलाणुयार । सुलोयणं चंदसमानतुंडं ॥
घोणाविणिज्जियसुचंपयपुप्फसोहं । तं गोम्मटेसरजिणं पणमामि णिच्चं ।६।

अध्दायसच्छायजलंतगंडं । आबाहुदोलंतसुकण्णपासं ॥
गयिंदसुंडुज्जलबाहुदंडं । तं गोम्मटेसरजिणं पणमामि णिच्चं ॥७॥

सिरिकंठसोहाजयदिव्वसोक्खं । हिमायुलुद्दामविसाल अंसं ॥
सुपेक्खणिज्जामलसत्थमज्झं । तं गोम्मटेसरजिणं पणमामि णिच्चं ॥८॥

विज्जायलग्गे पविभासयंतं । सिहामगिं सव्वसुचेदियाणं ॥
तिलोयसंतोसयपुण्णचंदं । तं गोम्मटेसरजिणं पणमामि णिच्चं ॥९॥

लयासमक्कंतमहासरीरं । भव्वावलीलद्धसुकप्परुक्खं ॥
देविंदविंदच्चियपायपहुमं । तं गोम्मटेसरजिणं पणमामि णिच्चं ॥ १०॥

卐 ॥ अथपातालयक्षपूजा ॥

वसंत०:--सव्ये कलाहलफलान्यपसव्यहस्ते ।
बिभ्राणमंकुशसशूलसरोरुहाणि ॥
पातालकं त्रिफणनागशिरस्त्रिवक्त्र- ।
मर्चाम्यनंतजिनमादरतोऽर्चयंतं ॥ १ ॥

卐 अनंत चतुर्दशी नोपीच्या दिवशी पाताळयक्ष व अनंत मतियक्षीची ही पूजा जरूर करून घेणे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ऱ्हीं 卐 क्रौं प्रशस्तवर्ण सर्वलक्षणसंपूर्ण स्वायुधवाहनवधू चिन्हसहपरिवार हे पातालयक्ष अत्रागच्छागच्छ संवौषट् । आह्वानं । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । स्थापनं ॥ ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा । सन्निधीकरणं ॥

॥ अष्टकम् ॥

इंद्रवज्रा:- रम्यैर्जलैर्भिश्रितचंदनौघैः । संसारसंतापहरैस्सुशीतैः ॥
जराजरीसंगमविप्रमुक्तं । पातालयक्षं प्रयजे मुदाहम् ॥
ॐ० ॥ पातालयक्ष देवाय जलं ॥ २ ॥

सत्कुंकुमैस्साब्जभरैस्सुगंधैः । संतप्तहेमोद्भवरसैरखंडैः ॥
कर्पूरकालागरुचंद्रमिश्रैः । पातालयक्षं० ॥ ॐ० ॥ गंधं ॥ ३ ॥

पुंजैरिवाखंड यशस्य दीप्त्यै- । स्तुंगैस्समुत्तुंगमनोभिलाषैः ॥
रम्यैरखंडाक्षतनव्यपुंजैः । पातालयक्षं० ॥ ॐ० ॥ अक्षतान् ॥४॥

गंधावलुब्धाखिलपुष्पलिड्भिः । सत्पुष्पघ्राणासुहरैस्सुपुष्पैः ॥
राजीवकुंदोत्पलमल्लिकाद्यैः । पातालयक्षं० ॥ ॐ० ॥ पुष्पं ॥ ५ ॥

साज्यैस्समृद्धैर्वरसुप्रसिद्धैः । नैवेद्यकैर्नव्यरसार्थभावैः ॥
बाष्पायमानैर्ह्हृदयावभासैः । पातालयक्षं० ॥ ॐ० ॥ चरुं ॥ ६ ॥

रत्नप्रभाभासुरदीप्रदीपैः । सद्दीपतैलोज्वलकांतियुक्तैः ॥
कीर्णप्रकाशायतसुप्रकाशैः । पातालयक्षं० ॥ ॐ० ॥ दीपं ॥७॥

कालागरुप्रचुरचंदनजोंगकादि- । वस्तूद्भवैर्गंधितसर्वदिक्कैः ॥
सध्दूपधूमैर्धृतधर्मसिध्यै । पातालयक्षं० ॥ ॐ० ॥ धूपं ॥ ८ ॥

घोंटासुनारंगसुलांगलीभिः । द्राक्षासुराजादनदाडिमाद्यैः ॥
फलैर्निराशाफलभावलब्धैः । पातलयक्षं० ॥ ॐ० ॥ पाताल० ॥फलं॥९॥

卐 ॐ आँ क्रौं ऱ्हीं इत्यपि पाठः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्लक्ष्णैर्मनोज्ञैर्वरदिव्यवस्त्रैः । कौशेयसारैर्धृतचित्रशिल्पैः ॥
पूतैस्सुखस्पर्शयुतैरुदारैः । पातालयक्षं प्रयजे मुदाहम् ॥
ॐ० ॥ पातालयक्षदेवायविचित्रकौशेयवस्त्रार्पणम् ॥ १० ॥

उत्कृष्टरत्नप्रकरप्रभाभि- । र्देदीप्यमानैरतुलैरमेयैः ॥
कोटीरहारप्रमुखोद्घभूषैः । पातालयक्षं प्रयजे मुदाहम् ॥
ॐ० ॥ पातालयक्ष देवाय किरीटादि नानाभरणार्चनम् ॥११॥

प्रफुल्लमल्लीवरमालतीनां । मालाभिरामोदितदिक्तटानाम् ॥
समीहितार्थप्रदमार्यसेव्यं । पातालयक्षं प्रयजे मुदाहम् ॥
ॐ० ॥ पातालयक्षदेवाय पुष्पमालार्चनं करोमि ॥ १२ ॥

यज्ञोपवीतैर्वसुयज्ञभागैः । तांबूलवीटीभिरुदारपूगैः ॥
भूपालमौल्यर्चितपादपद्मं । पातालयक्षं प्रयजे मुदाहम् ॥
ॐ० ॥ पातालयक्षदेवाय यज्ञोपवीतदक्षिणयज्ञभागार्चनं ॥१३॥

अनु:—अर्घ्ययाम्यर्घ्यमर्घ्येण वार्गंधाक्षतशालिना ॥
अनर्घ्यगुणसंघातमुद्घश्रीयक्षनायकम् ॥ अर्घ्यं ॥ १४ ॥
इत्येवं यक्षनाथस्य पूजामष्टप्रकारकम् ॥
सुगंधद्रव्ययुक्तेन शांतिधारां करोम्यहम् ॥ शांतिधारा ॥
पुष्पांजलिं क्षिपाम्यस्य यक्षनाथस्य पादयोः ॥
सुमनोजनसंदोहप्रार्थितार्थप्रदायिनः ॥ पुष्पांजलिः ॥१६॥

॥ अथ अनंतमतियक्षीपूजा ॥

अधिज्यधन्व्युत्तममातुलुंगं । निशातवाणं दधतीष्टदानं ॥
समर्चितानंतमतीप्रसन्ना । भूयादिहानंतजिनेशयक्षी ॥ १ ॥
ॐ ह्रीं क्रों० अनंतमतियक्षि अत्रागच्छागच्छ संवौषट् आह्वानमित्यादि० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अष्टकम् ॥

इंद्रवज्रा–तापापहैराहितदिव्यगंधै-- । र्देवापगानिर्मलपूततोयैः ॥
देवीमनंतमतियक्षिमुदारचिन्हा- । मर्चाम्यनंतजिननाथपदाब्जभृंगीं ॥
ॐ० अनंतमति० जलं ॥ २ ॥

चंद्रागरुश्रीमलयोद्भवादि-- । प्रसिद्धसद्वस्तुसुगंधसारैः ॥
देवीमनंतमतियक्षि० ॥ ॐ० ॥ अनंतमति० ॥ गंधं ॥ ३ ॥
क्षीराब्धिफेनेंदुसुतारहार । नीहारगौरैः कलमाक्षतौघैः ॥
देवीमनंतमतियक्षि० ॥ ॐ० ॥ अनंतमति० ॥ अक्षतान् ॥४॥
पुन्नागवल्लीवकुलादि झिंटी । मंदारजात्यादि सुपुष्पजातैः ॥
देवीमनंतमतियक्षि० ॥ ॐ० ॥ अनंत० ॥ पुष्पं ॥ ५ ॥
सान्नाय्यशाल्यन्नसुदुग्धभक्ष्य-- । सद्व्यंजनाद्यैर्वरभक्ष्ययुक्तैः ॥
देवीमनंतमतियक्षि० ॥ ॐ० ॥ अनंत० ॥ चरुं ॥ ६ ॥
प्रध्वस्तमिथ्यात्वघनांधकारै-- । र्दीपैर्मनोज्ञामलभाजनस्थैः ।
देवीमनंतमतियक्षि० ॥ ॐ० अनंत० ॥ दीपं ॥ ७ ॥
श्रीचंदनाद्युत्तमवस्तुजातै-- । र्धूपैस्सुराणां वरतोपदानैः ॥
देवीमनंतमतियक्षि० ॥ ॐ० ॥ अनंत० ॥ धूपं ॥ ८ ॥
रंभाकपित्थाम्रसुनारिकेलै- । र्जंबीर जंबुप्रमुखैः फलौघैः ॥
देवीमनंतमतियक्षि० ॥ ॐ० ॥ अनंत० ॥ फलं ॥ ९ ॥
चीनांशुकैर्नूतनचित्ररम्यै-- । र्दिव्यैर्विभास्वन्मणिराजितांतैः ॥
देवीमनंतमतियक्षि० ॥ ॐ० ॥ अनंत० ॥ दुकूलार्चनं ॥ १० ॥
ताटंकहारामलनू पुरादि-- । सन्मंडनैर्मौक्तिकरत्नदीपैः ॥
देवीमनंतमतियक्षि० ॥ ॐ० ॥ अनंत० ॥ षोडशाभरणार्चनं ॥११॥

स्रग्भिर्जपापाटलचंपकानां । सौरभ्यभाराहितषट्पदानां ॥
देवीमनंतमतियक्षि० ॥ ॐ० ॥ अनंत० ॥ पुष्पमालार्चनं ॥ १२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कस्तूरिकाभिर्वरकुंकुमैश्च ॥ कर्पूरवीव्यादिसुगंधलेपैः ॥
देवीमनंतमतियक्षि० ॥ ॐ० ॥ अनंत० ॥ कुंकुमार्चनं ॥ १३ ॥

जलादिवस्तूत्करनिर्मितेन । अर्घ्येणस्वर्गादिसुसौख्यदेन ॥
देवीमनंतमतियक्षि० ॥ ॐ० ॥ अनंत० ॥ अर्घ्यं ॥ १४ ॥

श्रीशांतिधारामहमातनोमि । संसारसंतापनिरासहेतोः ॥
देव्याश्चतुर्दशजिनाधिपभक्तयक्ष्याः । पादांबुजातपुरतस्त्विह चादरेण ॥
ॐ० ॥ अनंत० ॥ शांतिधारा ॥ १५ ॥

पुष्पांजलिः कमलकैरवकेतकीनां । सौरभ्यभारहृतलोकसुनालिकानां ॥
पातालयक्षिहृदयांबुजभानुभायाः । देव्याःपदांबुजयुगेप्रतनोमि भक्त्या ॥
पुष्पांजलिः ॥ १६ ॥

(अथ अनंतचतुर्दशीक्रियायां पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावंदनास्तवसमेतं श्रीमत्सिद्धभक्तिकायोत्सर्गं करोम्यहं " इत्यादि ह्मणून सिद्धभक्ति, चैत्यभक्ति, पंचगुरुभक्ति, शांतिभक्ति व समाधिभक्ति म्हणून घेऊन विसर्जन करणें.) पान ३१ पाहणें.

॥ श्री चतुर्विंसति तीर्थंकर पूजा समाप्ता ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परिशिष्ट नं. १

॥ अथ ज्वालामालिनी पूजा ॥

इंद्रवज्रा- चंद्रोज्वलां चक्रफलां च पाश- । वर्मत्रिशूलां झपपाणिहस्तां ॥
श्रीज्वालामालिनीं सार्धधनुःशतोच्चां । जिनांगतांकोणगतां यजामि॥१॥
ॐ आं क्रों ह्रीं ज्वालामालिनि महायक्षीदेवि अत्र एहि २ संवौषट् स्वाहा । आह्वानं । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । स्थापनं ॥ ॐ० अत्र मम सन्निहिता भव २ वषट् स्वाहा ॥ सन्निधीकरणम् ॥

कर्पूरचंदनविमिश्रिततीर्थवारि- । धारा सुवर्णकनकालुकनालमुक्ता ॥
श्रीज्वालिनीरचितवज्रसुपंजराख्यं । सौभाग्यसिद्धिजननं सुरभीकरोतु ॥
ॐ आँ क्रों ह्रीं ज्वालामालिनि महायक्षीदेवि जलं गृहाण २ ॥ १ ॥
आलेपनं सुरभिचंदनबंधुरैश्च । काश्मीरचंद्रमलयोद्भवदिव्यगंधैः ॥
श्रीज्वा० ॥ ॐ० ॥ गंधम् ॥ २ ॥
शाल्यक्षतैर्मसृणकुंकुमरंजितांतै- । र्दिव्यामयातिकलमौक्तिकजालपद्मैः ॥
श्रीज्वा० ॐ० ॥ अक्षतान् ॥ ३ ॥
मंदारकुंदकुवलोत्पलपाटलैश्च । पुन्नागचंपकसुगंधिलतांतमाल्यैः ॥
श्रीज्वा० ॥ ॐ० ॥ पुष्पम् ॥ ४ ॥
कैलासशैलधवलैः कलमाक्षतैश्च । सिद्धैर्वरैः कनकपात्रभृतैर्हविर्भिः ॥
श्रीज्वा० ॥ ॐ० ॥ चरुम् ॥ ५ ॥
अज्ञानसं तमसहारिनिजप्रकाशै- । र्नीराजनांगविहितैर्घनसारदीपैः ॥
श्रीज्वा० ॥ ॐ० ॥ दीपं ॥ ६ ॥
आमोदिताखिलदिशैर्घननीलवर्णैः । कालागरूर्जितसुगंधिदशांगधूपैः ॥
श्रीज्वा० ॥ ॐ० ॥ धूपम् ॥ ७ ॥
पुंड्रेक्षुकांडशुभभूरुहसत्फलौघैः । संवासितक्रमुकनागदलैः फलैश्च ॥
श्रीज्वा० ॥ ॐ० ॥ फलम् ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वार्भिस्तु गंधकलमाक्षतपुष्पजाति- । नैवेद्यदीपवरधूपफलोत्तमार्घ्यैः ॥
श्रीज्वा० ॥ ॐ० ॥ अर्घ्यम् ॥ ९ ॥

तुभ्यं मया रचितमर्चनपूजनं च । दत्तं गृहाण कनकालुकनालमुक्तं ॥
आराधिताखिलजलं जगतां प्रशांत्यै । धर्मार्थकामफलदं च ममेष्टसिद्ध्यै॥
शांतिधारा ॥ १० ॥

श्रीतीर्थकृत्परमभक्तिमुपाश्रितायाः। पुष्पांजलिः क्रमसरोरुहयोर्विमुक्तः॥
श्रीज्वालिनीरचितवज्रसुपंजराख्यं । सौभाग्यसिद्धिजननं सुरभीकरोतु ॥
पुष्पांजलिः ॥ ११ ॥

॥ ज्वालिनीस्तोत्रम् ॥

स्रग्धरा- श्रीमद्दैत्योरगेंद्रामरमुकुटतटालीढपादारविंदे ।
मद्यन्मातंगकुंभस्थलदलनपटुश्रीमृगेंद्राधिरूढे ॥
ज्वालामालाकराले शशधरधवले पद्मपत्रायताक्षि ।
ज्वालामालिन्यभीक्ष्णं प्रहसितवदने रक्ष मां देवि नित्यं ॥ १ ॥

ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः महाच्छेक्षणरुचिरुचिरांगांगदे देवि वं मं ।
हं सं तं पं बीजमंत्रैः कृतसकलजगत्क्षेमरक्षे विधाने ॥
क्षां क्षीं क्षूं क्षें समस्ते क्षितितलमहिते ज्वालिनि रौद्रमूर्ते ।
क्षैं क्षौं क्षं क्षः क्षिं बीजैर्विहितदशदिशाबंधने रक्ष रक्ष ॥ २ ॥

हूंकारारावघोरभ्रुकुटिपुटहटद्रक्तलोलेक्षणाग्नि- ।
ज्वालाविक्षेपलक्ष क्षपितनिजविपक्षोदयक्षूणरक्षे ।
भास्वत्कांचीकलापे मणिमुकुटहटज्ज्योतिषां चक्रवाले— ।
श्रंचच्चंडांशुमन्मंडलसमरजये पातु मां देवि नित्यं ॥ ३ ॥

ॐ ह्रीं कारोपयुक्तं र र र र र र रां ज्वालिनीसंप्रयुक्तं ।
ह्रीं क्लीं ब्लूं द्रां द्रीं सरेफं वियदमलकलापंचकोद्भासि हूं हूं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धूं धूं धूमांधकारिण्यखिलमिह जगन्मे विधेह्याशु वश्यं ।
वौषण्मंत्रं स्मरंतं प्रतिभयमथने ज्वालिनी मामत्र त्वं ॥ ४ ॥

ॐ ऱ्हीं क्रों सर्ववश्यं कुरु कुरु सरसंक्रामणि तिष्ठ तिष्ठ ।
हूं हूं हूं रक्ष रक्ष प्रबलबलमहाभैरवारातिभीतेः ॥
द्रां द्रीं द्रं द्रावय द्रावय हन हन फट् फड् वषड् बंध बंध ।
स्वाहा मंत्रं पठंतं त्रिजगदभिनुते देवि मां रक्ष रक्ष ॥ ५ ॥

हं झं झ्वीं क्ष्वीं सहंसः कुवलयकलिते भूरसि भूतदात्रि ॥
झ्वीं झ्वं ह्वः पक्षि हं हं हर हर हरहूं पक्षिपः पक्षिकोपं ॥
वं झं हं सः परं झं सर सर सर सूं सः सुधाबीजमंत्रै- ।
र्मां ज्वालामालिनि स्थावरचरमविषसंहारिणि रक्ष रक्ष ॥ ६ ॥

हाहाकारोग्रनादैर्ज्वलदनलशिखाकल्पदीर्घद्विजिह्वै- ।
र्भीमास्यैस्तीव्रनेत्रैर्विषमविषधरालंकृतैस्तीक्ष्णदंष्ट्रैः ।
भूतैः प्रेतैः पिशाचैः स्फुटघटितरुषापादितोग्रोपसर्गात् ।
दूरीकृत्य स्वधाम्नाघनकुचयुगले देवि मां रक्ष रक्ष ॥ ७ ॥

झ्रां झं झ्रौं शाकिनीनां समुपनतभयध्वंसिनी नीरजास्ये ।
ग्लौं क्ष्मं ठं दिव्यजिह्वागतिमतिकुपितस्तंभिनि दिव्यदेहे ॥
फट् फट् सर्वापरोगग्रहमरणभयोच्चाटने घोररूपे ।
आं क्रों क्षीं मंत्रपूते मदगजगमने देवि मां पालय त्वं ॥ ८ ॥

इत्थं मंत्राक्षरोत्थं स्तवनमनुपमं वन्हिदेव्याः प्रतीतं ।
विद्वेषोच्चाटनस्तंभनजनवशकृत् पापरोगापनोदि ॥
प्रोत्सर्पज्जंगमस्थावरविषमाविषध्वंसिनं स्वायुरारो- ।
ग्यैश्वर्यापादि नित्यं स्मरति पठति यः सोऽश्नुतेऽभीष्टसिद्धिं ॥९॥

शार्दूलः– इत्थं पंडितलक्ष्मिसेनरचितं श्रीज्वालिनीदेविका- ।
स्तोत्रं शांतिकरं भयापहरणं सौभाग्यसंपत्करं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रातर्मस्तकसन्निवेशितकरो नित्यं पठेद्यः पुमान् ।
श्रीसौभाग्यमनोऽभिवांछितफलं प्राप्नोत्यसौ लीलया ॥ ११ ॥

॥ ज्वालामालिनीमंगलारती ॥

जय मंगलं नित्यशुभमंगलं । जय जगज्जननि ज्वालिनिदेवि ते ॥
जय मंगलं नित्यशुभमंगलं ॥ पल्लव ॥
धवलांगि धवलमौक्तिकहारधारिणि । धवलभासुरकुंडलभासिनि ॥
धवलचामरधरस्त्रीजनविराजिनि । प्रविराजसच्छामयक्षराणि ॥जय०॥१॥
पद्मपादे तद्मदलसमविलोचने । पद्मनाभे पद्मसौगंधिके ॥
पद्महस्ते पद्ममित्रसमकांतिके । पद्मानने भासुरमूर्तिके ॥ जय० ॥ २ ॥
गजवैरिवाहने झषपाशधारिणि । कुजनसंहारिणि भव्यजननि ॥
वृजिनहरजिनबिंबमणिमुकुटधारिणि । सुजनपोषिणि सुवांछितदायिनी ॥
जय० ॥ ३ ॥

॥ अथ पद्मावतीपूजा ॥

वसंत— श्रीपार्श्वनाथजिननायकरत्नचूडा ।
पाशांकुशाभयफलांकितदोश्वतुष्टा ॥
पद्मारुणा त्रिनयना त्रिफणावतंसा ।
पद्मावती जयतु पद्मकुटाधिवासा ॥ १ ॥

ॐ आं क्रों ह्रीं प्रशस्तवर्णे सर्वलक्षणसंपूर्णे स्वायुधवाहनचिन्हसपरिवारे हे पद्मावतीदेवि अत्र एहि २ संवौषट् स्वाहा । आह्वानं । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । स्थापनं । ॐ० अत्र मम सन्निहिता भव २ वषट् स्वाहा ॥ सन्निधीकरणं ॥

शार्दूल--भृंगारेण मनोहरेण विलसद्गंगादितीर्थोदकैः ।
शीतैः स्वर्णहिमांबुपूर्णरचनैः श्रीखंडसंमिश्रितैः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीमत्पंबुजपत्तने प्रविलसन्निर्गुंडिकावासिनी ।
वांछच्छ्रीजिनदत्तरायवरदे मां पाहि पद्मावति ॥
ॐ आं क्रों ह्रीं पद्मावतीदेवि जलं गृहाण २ ॥ १ ॥

काश्मीरागरुशीतभानुकलितैः सच्चंदनैर्वंधुरैः-- ।
गंधाढ्यैर्भ्रमरौघरागरचितैः श्रीखंडसंमिश्रितैः ॥
श्रीम० ॥ ॐ० ॥ गंधं ॥

कुंदेंदुप्रवर प्रचूर्णनिकरैः शाल्यक्षतैरक्षतैः-- ।
र्मुक्तैर्मुक्तिसुधांशुकांतिसदृशैर्मंजुष्करैः पुंजकैः ॥
श्रीम० ॥ ॐ० ॥ अक्षतान् ॥ ३ ॥

पुष्पैः सत्कुसुमैः प्रसूनरचितैः प्रौढैर्मनोहारिभि-- ।
र्भृंगीमंगलगीतबंधुरतरैर्जात्यादिपुष्पैर्वरैः ॥
॥ श्रीम० ॥ ॐ० ॥ पुष्पं ॥ ४ ॥

नैवेद्यैर्वरपद्मरागरचितश्रीहेमपात्रस्थितै-- ।
र्नानाव्यंजनरंजनैः सितघृतैरित्यादिभक्ष्यैर्वरैः ॥
श्रीम० ॥ ॐ० ॥ चरुं ॥ ५ ॥

कर्पूरोज्वलरत्नज्योतिनिकरैः श्रीदीपकैः संपदै-- ।
र्मोहध्वांतविनाशनैर्दिनकरै रेवोज्वलैर्वेष्टितैः ॥
श्रीम० ॥ ॐ० ॥ दीपं ॥ ६ ॥

भक्त्या चागरुलालरागविलसद्घ्राणेन राजास्मितं ।
तातानेऽमलसौरभेण विलसद्धूपैर्दशांगादिभिः ॥
श्रीम० ॥ ॐ० ॥ धूपं ॥ ७ ॥

चोचैर्मोचकपित्थकैर्वररसैर्द्राक्षाफलैर्जंबिरै-- ।
र्नारंगैर्वरदाडिमादिकदलीपूगाम्रखज्जूरकैः ।
श्रीम० ॥ ॐ० ॥ फलं ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्घ्येण क्रमवर्तिसध्द्रुवतरैः सद्द्रव्यमालावरै-- ।
र्युक्तैर्भक्तिसमादितंडुलचयैः सिद्धार्थदूर्वावरैः ।
श्रीम० ॥ ॐ० ॥ अर्घ्यं ॥ शांतिधारा ॥ पुष्पांजलिः ॥

॥ स्तोत्रम् ॥

श्रीमद्गीर्वाणचक्रस्फुरिततिमिरकोद्घृष्टपादारविंदे ।
सद्धर्मत्राणदक्षे प्रबलभुजबलोजृंभणोत्क्रांतवक्त्रे ॥
व्याघ्रारूढे सहस्रज्वलदनलशिखे लोलपाशांकुशाढ्ये ।
आं क्रों ह्रीं मंत्ररूपे क्षुभितकलिमले रक्ष मां देवि पद्मे ॥ १ ॥

स्थित्वा पातालमूले स्वकवलकलिते लीललोलाकराले ।
विद्युद्दंडे प्रचंडे प्रहरणकलिते तद्भुजे तर्जयंती ॥
दैत्येंद्रक्रूरदंष्ट्रे खिलि खिलि खिलितैः स्पष्टभीमाट्टहासे ।
मायाजीमूतवाहे कुहरतिगमने रक्ष० ॥ २ ॥

क्रौंचत्कोदंडखांडे डमरुगविदितक्रूरघोरोपसर्गे ।
दिव्यं वज्रातपत्रं प्रगुणमणिगणं किंकिणिक्वाणरम्यं ॥
भास्वद्वैडूर्यदंडं मदनविजयिनो बिभ्रती पार्श्वभर्तुः ।
स्याद्देवी पद्महस्ते कृतकरकमले रक्ष० ॥ ३ ॥

भृंगीकालीकरालीपरिजनसहिते चंडि चामुंडि नित्ये ।
क्ष्मां क्ष्मीं क्ष्मूं क्ष्मौं क्ष्मः क्षणाद्रक्षत रिपुनिहिते ह्रीं महामंत्रवश्ये ।
भ्रां भ्रीं भ्रूं भ्रौं भ्रः भृकुटि चलमुखे त्रासितोद्दामदैत्ये ।
झ्रां झ्रीं झ्रूं झ्रौं झ्रः स्तुतिशतमहिते रक्ष० ॥ ४ ॥

चंचत्कांचीकलापे स्तनतटिविशदोद्दामहाकोमलीके ।
प्रोत्फुल्लपारिजातद्रूमकुसुममहामंजरीपुंजपादे ॥
द्रां द्रीं क्लीं ब्लूं समेते भुवनवशकरि क्षोभिणी द्राविणे ते ।
आं ईं ऊं औं अः कुरु कुरु कलिते रक्ष० ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नीलाव्यालोत्पलादादलिते तज्ज्वलद्वाडवाग्नि- ।
र्ज्वालाज्वालास्फुलिंगे स्फुरदुरुकिरणेऽत्युग्रवज्राग्रहस्ते ॥
ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः हर हर हूंकारभीमैकनादे ।
पद्मे पद्मासनस्थे कृतकरकमले रक्ष० ॥ ६ ॥

कोपं वं झं झ्वीं क्ष्वीं हं सः कुवलयकलिते वानलीलाप्रबंधे ।
द्रां द्रीं द्रः ह्रीं ह्रः पवित्रेतरशिशिरकरे पक्षिपक्षीरघोरे ॥
प्रत्नव्यावज्रजातं प्रबलबलमहाकालकूटं वदंति ।
हा हा हूंकारनादे वरकरकमले रक्ष मां० ॥ ७ ॥

प्रातर्बालार्करश्मिस्फुरिततरमहासांद्रसिंदूरधूली- ।
संध्यारागारुणानां त्रिदशवरमहादेवि देवेंद्रवंद्ये ॥
चंचच्चंडांशुधाराप्रहरति कुटिते कुंतलोद्घृष्टगंडे ।
स्रां स्रीं स्रूं स्रौं स्रः मदगजगमने रक्ष० ॥ ८ ॥

दिव्यं स्तोत्रं नमस्ते पटुतरपटुना भक्तिपूर्वं त्रिसंध्यं ।
लक्ष्मीसौभाग्यमानं दलितकलिमलं मंगलानां सुपूर्वं ॥
पूज्यं कल्याणमानं जनयति सततं पार्श्वनाथप्रसादात् ।
देवी पद्मासनस्थे कृतकरकमले रक्ष मां देवि पद्मे ॥ ९ ॥

॥ पद्मावतीमंगलारती ॥

जय मंगलं जयतु शुभमंगलं । जय नागपतियुवति पद्मांबिके ॥
जय मंगलं जयतु शुभमंगलं ॥ पल्लव ॥

मणिमुकुटरत्नकुंडलहारराजिते । मणिखचितकेयूरकरभूषिते ॥
मणिहेमनिर्मितसुविष्टराधिष्ठिते । फणिफणाटोपावतंसलसिते ॥
जय० ॥ १ ॥

वरदफलपाशांकुशकरविराजिनि । वरदिव्यवसनभूषणशोभिनि ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सरस मृदु मधुरतर गंभीरवरवाणि । वरकमलमृदुलसममृदुलपादपाणे ॥
जय० ॥ २ ॥

मत्तगजगामिनि वृत्तकुचमंडने । चित्तजस्त्रीविजयरूपधरणे ॥
धत्तजिनशासने भक्तजनरक्षिणि । सत्तमे भयहरणे वरदायिनि ॥
जय० ॥ ३ ॥

॥ क्षेत्रपालमंगलारती ॥

जय मंगलं सदा शुभमंगलं । जय क्षेत्रपाल सद्गुणशील ते ॥
जय मंगलं सदा शुभमंगलं ॥ पल्लव ॥
धृतरत्नमयमुकुटरत्नकुंडलहार । धृतशूल खड्गकरवालकर ते ॥
जितसुमनशररूप नागसंभववर्ण । जितचंडकरतेज वरधीर ते ॥
जय० ॥ १ ॥
गजवैरिपोतसम सारमेयारूढ । भुजकिरीटादिभूपणभूप ते ॥
राजेंद्र चंद्र पूजित चरणकमलयुग । द्विजसूत्रधर हितकरभाप ते ॥
जय० ॥ २ ॥
व्यंतरामरवंद्य कृतसज्जनामोद । भूतपैशाचभयदूरकर ते ॥
चिंतितार्थदायकसुचिंतामणिरत्न । संततजिनगेह रक्षणकार ते ॥
जय० ॥ ३ ॥

॥ अथ भट्टारकपूजा ॥

शार्दूल—श्रीमद्भव्यनिकाय पद्मनिकर बोधार्कसन्मंडलाः ।
श्रीस्याद्वादसुकोविदाः सुमनसश्चारित्रमालांकिताः ॥
मिथ्यावादिगजेंद्रसिंहसदृशाः सेनान्वये संति ये ।
तेषां श्रीचरणाब्जपूजनविधौ ख्यातोत्सवं प्रारभे ॥ १ ॥
ॐ ह्रीं श्रीगुरुचरणाय पुष्पाक्षतं क्षिपेत् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीपादाब्जयुगं सुतीर्थसलिलैः शीतैश्च सुस्वादिभि- ।
राचार्यस्य महात्मनो गुणनिधेः श्रीमूलसंघेशिनः ॥
सुप्रक्षाल्य शुभैर्महत्वसहितैर्गंधांबुमत्तंडुलै- ।
राह्वानादिविधिं करोमि महसा भक्त्याऽद्य भव्यात्मना ॥ २ ॥

इंद्रवज्रा-श्रीमूलसंघाब्धिसुचारुचंद्रान् । आचार्यवर्यान् गुणरत्नयुक्तान् ॥
भक्त्याऽऽह्वयाम्यत्र सुवर्णपीते । संस्थापयामीह यतींद्रवंद्यान् ॥३॥

ॐ ह्रूँ भो आचार्यवर्य अत्र एहि २ संवौषट् स्वाहा । आह्वानं । ॐ ह्रूँ भो॰ अत्र तिष्ठ २ ठठ स्वाहा । स्थापनं । ॐ ह्रूँ भो॰ अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ सन्निधीकरणं ॥

गंगानदीतीर्थसुपुण्यतोयैः । कर्पूरकाश्मीरसुगंधयुक्तैः ।
सेनांतजिनपूर्वसमंतभद्र । श्रीवीरसेनांघ्रियुगं यजेऽहं ॥

ॐ ह्रूँ *श्रीजिनसेनभट्टारकवरेण्याय जलं निर्वपामि स्वाहा ॥ १ ॥

काश्मीरमिश्रैश्च सुचारुवर्णैः । सौवर्णपात्रार्पितदिव्यगंधैः ॥
सेनांत॰ ॥ ॐ ह्रूँ जिनसेन॰ ॥ गंधं ॥ २ ॥

शुभ्रैः सदभ्रैर्वरदीर्घकैश्च । सामोदशालीयसुतंडुलैश्च ॥
सेनांत॰ ॥ ॐ ह्रूँ जिनसेन॰ ॥ अक्षतान् ॥ ३ ॥

सन्मल्लिकाचंपककुजातिकुंदैः । सत्केतकी पद्म लवंग युक्तैः ॥
सेनांत॰ ॥ ॐ ह्रूँ जिनसेन॰ ॥ पुष्पं ॥ ४ ॥

हय्यंगवीनाज्यविचित्रभक्ष्यै- । र्बाष्पायमाणैश्च सुपायसैश्च ॥
सेनांत॰ ॥ ॐ ह्रूँ जिनसेन॰ ॥ चरुं ॥ ५ ॥

डिंडीरपिंडोज्वलभासमानै- । रामोद कर्पूर सुरत्नदीपैः ॥
सेनांत॰ ॥ ॐ ह्रूँ जिनसेन॰ ॥ दीपं ॥ ६ ॥

निश्वासितास्वाससुवासधूपैः । कर्कोरकालागरुशिल्पधूपैः ॥
सेनांत॰ ॥ ॐ ह्रूँ जिनसेन॰ ॥ धूपं ॥ ७ ॥

---

* येथें लक्ष्मीसेन असे ही म्हणावे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जंबीर जंबू पनसाम्रपूग । सुमातुलुंगैर्वरनारिकेलैः ॥
सेनांत० ॥ ॐ ह्रूँ जिनसेन० ॥ फलं ॥ ८ ॥
वार्गंधसत्तंडुलपुष्पभक्ष्यै— । र्दीपैश्च धूपैर्वरनारिकेलैः ॥
सद्यज्ञभागादिमहार्घ्यपूरै— । राचार्यपादौ सममर्चयामि ॥
ॐ ह्रूँ जिनसेन० ॥ अर्घ्यं ॥ ९ ॥
गंगादितीर्थोद्भववारिधारां । सौवर्णभृंगारसुनालकोद्घां ।
श्रीजैनसस्यालिफलाभिवृद्धये । श्रीशांतिधारां प्रकरोमि शांत्यै ॥
ॐ ह्रूँ जिनसेन० ॥ शांतिधारा ॥ १० ॥

शार्दूल—श्रीमत्सेन गणाब्धिचंद्रमुनयः सामंतभद्रादय- ।
स्तेषां पादसुपूजितो हि जगतां धान्यैर्धनैः सूरिभिः ॥
कुंदेंदीवर मालतींदु बकुल सत्केतकीसत्फलै— ॥
र्वासंतीवरचंपकैश्च रचितं पुष्पोपहारं भजेत् ॥११॥ पुष्पांजलिः॥
श्रीकोल्लापुरमंडलस्थितिगणसिंहासनाधीश्वरा ।
विद्यावेदसुतर्कशास्त्रनिपुणाः सेनेगणेऽधीशिनः ॥
तेभ्यः श्रीवृषभादिसेनगणिनां विज्ञेय भूतिश्रियं ।
ख्यातश्रीजिनसेनवर्यगणिनां पुष्पोपहारं भजेत् । पुष्पांजलिः ॥१२॥

॥ भट्टारकमंगलारती ॥

जय मंगलं भवतु शुभमंगलं । जय शीलगुणधीर * जिनसेन ते ॥
जय मंगलं भवतु शुभमंगलं । पल्लव ॥
दिल्लिकोल्हापुरजिनकंचिपिनगोंडि- । सल्लक्ष्मसिंहासनाधीश ते ॥
उल्लसच्छ्रीमूलसंघपुष्करगच्छ । फुल्लशरविजय परयोगीश ते ॥ जय० ॥१॥
तर्कव्याकरणादिसकलशास्त्राधीत । कर्कशक्षपणवाग्जालधर ते ॥
अर्कस्तंभनसकलमंत्र तंत्र ज्ञवर । कर्कशविरागता धरधीर ते ॥ जय० ॥२॥
त्रैकाल्यजपतपानुष्ठानचरणपर । सकलसज्जनसदुपदेशपर ते ॥

* मासेन म्ह. लक्ष्मीसेन म्हणणे.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अकलंकचरित जनहृत्कुमुदशीतकर। विकटखलवादि भूधरभिदुर ते ॥ जय० ॥ ३ ॥

त्रस स्थावरजीवरक्षण विचक्षणक। रसिकजन प्रीतिकर मुनिराज ते ॥
असमगंभीर महामंदराचलधैर्य। लसद्धाटकपिच्छ गुरुराज ते ॥ जय० ॥ ४ ॥

रत्नमणिहेमादिरचितशिविकारूढ। रत्नत्रयालंकृतरूप ते ॥
नूत्नमौक्तिकजाल लसितछत्रच्छाय। प्रत्नमहामंत्रसंजपितजप ते ॥ जय० ॥ ५ ॥

॥ *अथ अर्हदूगद्यम् ॥

निहतघनघातिदोषः संप्राप्तातिशयपंचकल्याणः। समवसृतिसभानाथो जिनेश्वरो ददातु मे बोधं ॥ घातिघनपटलविघटनवातविंबाय। जातिजरारोगादिदोषगिरिशंबाय। कल्याणपंचकांचितवीतरागाय। शल्यत्रयातीतनित्यसुखबोधाय। प्रातिहार्याष्टकालंकृतजिनेंद्राय। भूतहितसमवसृतिराजितजिनेंद्राय। समवसरणादिबहिरंगविभवेशाय। विमलगुणमणिगणविभूतिपरमेशाय। द्रव्यगुणपर्याययुक्तचिद्रूपाय। भव्यजनवंदितानंदचिद्रूपाय। वरगणधरप्रभृतिमुनिनिवहनाथाय। निरुपमानंतबलकलितगुणयूथाय। नवनरामरसरसजनहृत्कमलसूर्याय। नवलब्धिलब्धशुद्धात्मसत्कार्याय। त्रिषष्टिकर्ममलविलयनसमर्थाय। दोषाष्टादशदूरपरमाचित्स्वार्थाय। दिव्यध्वनिप्रकटितात्मस्वरूपाय। सुव्यक्तचैतन्यनित्यप्रभावाय। स्याद्वादविद्याविलासिनीनंदाय। विद्वज्जनानंदकंदलीकंदाय। निर्मलनिजानंदभावार्थसौख्याय। भर्माभतीर्थकरपुण्यपुंजाख्याय। चंद्रार्ककोटिसन्निभदिव्यदेहाय। इंद्रशतनमितवरगुणगणसमूहाय। लोकत्रयाशेषवस्तुविज्ञाताय। नाकनायकनमितपादकंजाताय। परमपावनरूपदेवाधिदेवाय। परमकारुण्यरससंतृप्तजीवाय। वृंदारकवृंदवंदनसमर्थाय। वंदनामंगलोत्तमशरणभूताय। जातात्मने नमः। पूतात्मने नमः शुद्धात्मने नमः। बुद्धात्मने नमः ॥

---

* हें नित्य पूजेंत सांगणें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ सर्व वास्तुदेवांचे समान्यबालिपदार्थ ॥

तांदळाचे वडे, तूप व मोदक.

॥ विषेशबालिपदार्थ खालीं कोष्टकांत क्रमानें लिहिलेप्रमाणें. ॥

	वास्तूचीं नांवें.	बलिपदार्थांचीं नांवें.	बलिपदार्थभरून ठेवण्याच्या पात्रांची संख्या.		वास्तूचीं नांवें.	बलिपदार्थांचीं नांवें.	बलिपदार्थ भरून ठेवण्याच्या पात्रांची संख्या.
१	ब्रह्मास	भाताच्या लाह्या, तूप, साखर व क्षीरान्न,	४	११	विवस्वान् यास	उडिदाच्या घुगऱ्या व तीळ	३
				१२	मित्रास	दहि, हाराळी व कानवलें	३
२	इंद्रास	कोष्ठ व फुलें	२	१३	भूधरास	दूध	३
३	अग्नीस	दूध, तूप व तगर	१	१४	सवित्रास	धनें व भाताच्या लाह्या	१
४	यमास	तिळाचें चूर्ण व वरणाच्या घुगऱ्या	२	१५	सावित्रास	कापूर, काश्मीर, लवंग या सुगंध द्रव्यांनीं मिश्र केलेलें पाणी	१
५	नैऋत्यास	तिळाचें तल तिळाचें पेंड	१				
६	वरुणास	धनें व क्षीरान्न	२	१६	इंद्रास	मुगाचें चूर्ण व फुलें	१
७	पवनास	हळदीचें पीठ	१	१७	इंद्रराजास	तांदळाचें वडे व मुगाचें चूर्ण	१
८	कुबेरास	तांदळाचें पायस	२				
९	ईशान्यास	तूप व क्षीरान्न	१	१८	रुद्रास	गूळ व कानवले	१
१०	आर्यास	कानवलें व फल	३				

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

	वास्तूचीं नांवें	बलिपदार्थांचीं नांवें.	बलिपदार्थभरून ठेवण्याच्या पात्रांचीं संख्या		वास्तूचीं नांवें.	बलिपदार्थांचीं नांवें.	बलिपदार्थ भरून ठेवण्याच्या पात्रांचीं संख्या.
१९	रुद्रराजास	गूळ, तांदळाचें पीठ व आंबोळी	१	३३	मृषदेवास	उडिदाच्या घुगऱ्या	१
				३४	दौवारिकास	तांदळाचें पीठ	१
२०	आप यास	गूळ, तांदळाचें पीठ, पांढरें कमळ, शंख व आंबोळी	१	३५	सुग्रीवास	मोदक	१
				३६	पुष्पदंतास	पुष्प व पाणी	२
				३७	असुरास	तांबडा भात	२
२१	आपवत्सास	”	१	३८	शोषास	तीळ अक्षता	२
२२	पर्जन्यास	तूप	१	३९	रोगास	घारग्या	१
२३	जयंतास	ताजे लोणी	१	४०	नागास	साखर, दूध, भा. लाह्या	१
२४	भास्करास	गूळ व कुंदपुष्प	२	४१	मुख्यास	श्रीखंड	१
२५	सत्यकास	ताजे लोणी	२	४२	भल्लाटास	गूळभात	२
२६	भृश यास	ताजा लोण्याचा गोळा	२	४३	मृगदेवास	गुळाचें कानवलें	२
२७	अंतरिक्षास	हळदीचें व उडिदाचें चूर्ण	१	४४	अदितीस	मोदक	२
२८	पूष यास	वरणाच्या घुगऱ्या व दूध	१	४५	उदितीस	तिळाचें कानवलें	१
२९	वितथास	सुंठ, मिरे व पिंपळ	१	४६	विचारीस	मीठ घालून केलेला भात	१
३०	राक्षसास	गूळ	२	४७	पूतनेस	तीळ व तांदळाचें पीठ	१
३१	गंधर्वास	कर्पूर व चंदन यांचा गंध	२	४८	पापराक्षसी	मुगाच्या घुगऱ्या	१
३२	भृंगराजास	क्षीरान्न	२	४९	चरकीस	तूप व गूळ	१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ मंडुकपद वास्तुयंत्रस्यलक्षणम् ॥



परिशिष्ट नं. २

॥ अथ वास्तुविधानं ॥

ॐ परमब्रह्मणे नमो नमः स्वस्ति २ जीव २ नंद २ वर्धस्व २ विजयस्व २ अनुशाधि २ पुनीहि २ पुण्याहं २ मांगल्यं २ पुष्पांजलिः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

घंटाटंकारवीणाक्वणितमुरजधां धां क्रियां काहलार्चि- ।
झींकारोदारभेरीपटहदलदलंकारसंभूतघोषैः ।
आक्रम्याऽशेषकाष्ठातटमघटितं प्रोद्घटं दभ्रटिभ्र- ॥
मिष्टाधिष्टार्हदिष्टिप्रमुखमिह लतांतांजलिं प्रोत्क्षिपामि ॥ १ ॥

ॐ ऱ्हीं वाद्यमुद्घोषयामि स्वाहा। वाद्यमुद्घोषणं ॥

ॐ जलस्थलशिलावालुकापर्यंतरभूमिशोधनपुरःसरपरिपूरितशुद्धवालुकेष्टकोमलमृत्स्नाधिष्ठिताधिष्ठाने । पंचविधरत्नरमणीय पंचालंकारोपित शातकुंभमयस्तंभसंभृते। सततशैत्यमांद्यसौरभसंसक्तमंदानिलांदोलित पताकापंक्तिविलसिते । सुवर्णशिखरविन्यस्तमाणिक्यमयूखमालांबरविराचितश्रीविमानविराजमाने । चतुर्दिक्षु गोपुरद्वारतोरणोभयपार्श्वप्रदेशविनिहितमणिमयमंगलकलशे । विविधविमलांबरविरचितवितानविलंबितमुक्तादामाद्यलंकृते । मुक्तिवधूस्वयंवरश्रीविवाहविभवनिवासभासुरे । समुचितसमस्तसपर्यायद्रव्यसंदोहसमन्वितविपुलतरललितचैत्यायतने । जिनेंद्रकल्याणाभ्युदयमहामहोत्सवाभिरामेषु । वास्तुमंडपाभ्यंतरेषु पुष्पांजलिः ॥

॥ अथ पूजाक्रमः ॥

पूर्ववद्वायुकुमारादिप्रयोगेण भूमिसंस्कारः ॥

इंद्रवज्राः- श्रीमोक्षलक्ष्मीशजिनेंद्रबिंबं । श्रीमोक्षलक्ष्मीशवचोविलासं ।
श्रीमोक्षलक्ष्मीशगणेंद्रपाद्रौ । श्रीमोक्षलक्ष्मीशपुरः समर्चे ॥१॥

शार्दूल—वातांब्वग्निसुधाशनैश्च भुजगान् श्रीक्षेत्रपालं कृतं ।
संतर्प्याऽऽशु कुशान् दिशासु नवसु ब्रह्मादिकासु क्रमात् ॥
गंधार्द्राहरितालितालिकालितान् रत्निप्रमाणान्विता ।
विन्यस्याऽक्षयसंपदे बहुफलैः श्रीवास्तुभूमिं यजे ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ सर्वाभ्युदयनिश्रेयसदुस्तरानिस्थितसुखसाधकतया रत्नत्रयसद्धर्मप्र--
तिपादकसर्वज्ञवीतरागपरमार्हत्परमेश्वरस्थापनान्यासानिबंधनचैत्यचै-
त्यालयसंरक्षणसर्वविघ्नोपनोदननिकायिकानां । संभावितसर्वमाननीय—
भाव्यधिपत्रास्तुदेवपूजाधिकरणभूतस्य । समुचितोद्देशविरचित एकच-
तुर्द्वादशविंशत्यष्टोत्तरविंशतिषट्त्रिंशत्प्रमाणाष्टकमालाशिलापट्टकसूत्रसं-
धिचतुष्टयादिविशिष्टलक्षणोपलक्षितचतुःषष्टिकोष्टमंडितमंडुकपदस्य ।
मध्यमभागे स्थितब्रह्मणस्तदभिमुखदेवभागाः । पूर्वादिदिग्गतात्रित्रि—
भागभागिनां चतुर्णामार्यादिदेवानां । मानुषपदाग्नेयादिकोणचतुष्टया-
र्धार्धसमस्थितिसविंद्राद्यष्टदेवानां । पूर्वादिदिग्गताष्टदिक्पालकेशवाम-
तरालादिपदवर्तिपजघन्यादिचतुर्विंशतिदेवोपलक्षितपैशाचिकपदे वर्त--
मानानां । स्वस्वदक्षिणैकैकांतपदभोगिनां । जयांतांतरे पर्जन्यादिपा-
वक पूप नैऋत दौवारिक पवन नागाभिधानदेवानां । अग्नेयादिचतुः—
कोणबहिरवस्थितानां । विचारीप्रभृत्यपदचतुर्देवानां । ब्रह्मणो
दाक्षिणमवलोकं यथा महेशां सर्वेषां । आर्यशिरोब्रह्मकायविवस्वद्भूध
रदक्षिणोत्तरपार्श्वमित्रमोहनसविंद्रायुगापनवेतरभुजेंद्रद्वयदाक्षिणोत्तरभर -
णक्रुज्जदौर्मुखशायिनां । मर्मादिनीतवास्तुसहभरितसर्ववास्तुदेवानां ।
जलगंधाक्षतपुष्पदीपधूपान्वितेन पूपव्यंजनमोदकस्वस्वरूपसामान्य—
बलिना । जलधारांत्य वक्ष्यमाणविशेषबलिना । पुनर्जलधारावसा—
नेन स्वस्वमंत्राभिमंत्रितेन समलंकृतकन्यासुयोगगणिकान्यतमोध्दृतेन
सुप्रसादमापादयतुकामाः । स्नानानुस्नान सितधौतांतरीयोत्तरीयप—
रिवासभूषानुलेपनमाल्यप्रासादनकलिताः । कृतसकलीकरणक्रियाः ।
तत्प्रतींदाः । सत्परिचारकाः । एते वयं देवाद्यर्हत्सुहृदादिस्वगृहा—
दिसुखविविध्नेच्छितेषु । विधीयमानेष्वष्टकर्मणि दैवितोपद्रवे वा
भवद्भावितसर्वविघ्नोपशमतायु मु(उ)क्तसर्ववास्तुदेवानां प्रत्येकपूजाक्रमं
यथाक्रममुपक्रमामहे । पुनः पुष्पांजलिः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इंद्रवज्रा–अथाऽर्हदीशप्रतिमाप्रतिष्ठा । विधाननिर्विघ्नसमाप्तसिद्ध्यै ।
ततोंऽकुरार्चा दिवसाच्च पूर्वे । दिने क्षपायां विदधीत नांदीं ॥१॥
तत्राऽपि पूर्वं विदधीत वास्तु । दिवौकसां भेकपदे स्थितानाम् ।
ततः परे वा विधिवत्सपर्यां । क्रमेण सामान्यविशेषकल्पां ॥२॥
नत्वा समाचम्य समेत्य धाम । कृत्वा तदीर्यापथशोधनं च ।
स्तुत्वा च सिद्धान् सकलीविधानं । कृत्वैकतानो विजनप्रदेशे ।३।
कृत्वा समासाज्जिनराजपूजां । श्रुतं समाराध्य तथा मुनींद्रान् ।
गुरोरनुज्ञां शिरसा गृहीत्वा । दत्वा नियोगं परिचारकाणां ॥४॥
प्रत्यग्रधौतोत्तम शुभ्रवासः ॥ कृत्वांतरीयं च तथोत्तरीयं ।
हैमोपवीतांगदहारमुद्रा । किरीटकर्णाभरणैर्विभूषितः ॥ ५ ॥
तद्देवपूजासमये समुक्त । मंत्रात्परं वाक्यमभाष्यमाणः ।
चतुःपरीचारविधिज्ञयुक्तः । समाहितात्मा यजनप्रवीणः ॥ ६ ॥
इंद्रः प्रतींद्रेण समं विधाय । पदं क्रियार्थे मखमंडपादौ ।
पदेऽत्र दद्यात् पददेवतानां । बलिं सुयोगागणिकादिनित्यं ॥७॥
बलिश्च सामान्यविशेषभेदात् । सुरादितुष्टो द्विविधः पदेशां ।
एकस्तु सव्यंजनपूपभक्तः । शेषस्तु तत्तत्पृथगिष्टवेद्यः ॥ ८ ॥
ब्रह्माणमिंद्राधिवसादिनाथा । नार्यादिदेवांश्च सविंद्रपूर्वान् ।
पर्जन्यपौरस्त्यदिवौकसोऽपि । विचारिकाद्याश्च यजे क्रमेण ॥९॥
तदा तु पूजां सकलामराणा– । मुच्चारयन्मानस एव मंत्रं ।
तत्र प्रयुक्तं वचनं च यद्यो । तन्मंत्रतः प्राक् पठनीयमेत्र ॥१०॥

॥ इति प्रारंभनिरूपणम् ॥

॥ अथ अर्हत्पूजा ॥

आर्या–विदधामि सलिलमलयजकुसुमैः संपूर्णपाणिपात्रेण ।
आह्वाहनस्य करणं स्थितिकरणं सन्निधीकरणं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ह्रीं अर्हत्परमेष्ठिन् अत्र अवतरावतर संवौषट् स्वाहा। आह्वानम्। ॐ० अत्र तिष्ठ २ ठठ स्वाहा। स्थापनं। ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा॥ सन्निधीकरणं॥

॥ अष्टकम् ॥

इंद्रवज्रा—गंगादितीर्थहृददिव्यतोयैः—। गांगेयमुख्योज्वलकुंभपूर्णैः।
शीतांशुशीतैर्भवतापहारैः। संपूजयामो जिनपादपद्मौ॥
ॐ ह्रीं अर्हत्परमेष्ठिने जलं निर्वपामि स्वाहा॥ १॥

काश्मीरकालागरुपुष्करेंदु। व्यामिश्रितात्युत्तमगंधसारैः।
तापापनोदैः सुरभीकृताशैः। संपू०॥ ॐ ह्रीं अर्ह०॥ गंधं॥ २॥

शालीयशुभ्राक्षतमंजुपुंजैः—। राविष्कृताराधनपुण्यपुंजैः।
पाथेयभूतैः सुदृशां सुमार्गे। संपू०॥ ॐ ह्रीं अर्ह०॥ अक्षतान्॥३॥

आघ्राणनप्रीणनकारिभूरि। सौरभ्यसंतर्पितसर्वलोकैः।
सत्पुष्पमाल्यैः श्रितपुष्पलिड्भिः। संपू०॥ ॐ ह्रीं अर्ह०॥ पुष्पं॥ ४॥

सुभक्ष्यसंव्यंजनसोपदंशैः। शेषार्थतालस्थितशालिवर्द्धिः।
सौरभ्यवर्द्धिर्मधुरैः सदुग्धैः। संपू०॥ ॐ ह्रीं अर्ह०॥ चरुं॥ ५॥

कर्पूरधूलीकृतगर्भसर्पि—। रम्याक्तवर्तिज्वलितप्रदीपैः।
सदुज्वलैर्धूत तमःसमूहैः। संपू०॥ ॐ ह्रीं अर्ह०॥ दीपं॥ ६॥

कक्कोलजातीफलपत्रकादि। गंधोल्वणद्रव्यकृतोद्घधूपैः
अंगारसंगप्रभवप्रधूपैः। संपू०॥ ॐ ह्रीं अर्ह०॥ धूपं॥ ७॥

जंबीरजंबूकदलीकपित्थ। नारंगधात्रीसहकारपूर्वैः।
फलोत्करैः पुण्यफलोपमानैः। संपू०॥ ॐ ह्रीं अर्ह०॥ फलं॥ ८॥

वार्गंधपूर्वैर्वरवस्तुजातैः। सिद्धार्थदूर्वादिसुमंगलैश्च।
पवित्रपात्रे रचितं महार्घ्यं। निवर्तयामः पुरतो जिनस्य॥ अर्घ्यं॥ ९॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वसंत– शांतिं करोतु सततं यतिनां गणस्य ।
शांतिं करोतु सततं जिनभाक्तिकानां ॥
शांतिं करोतु सततं जनपस्य दातुः ।
शांतिं करोतु सततं कृतशांतिधारा ॥ शांतिधारा ॥ १० ॥

देवेंद्रवृंदमणिमौलिसमर्चितांघ्रे– ।
देवाधिदेवपरमेश्वरकीर्तिभाजः ।
पुष्पायुधप्रमथनस्य जिनेश्वरस्य ।
पुष्पांजलिर्विरचितोऽस्तविने यशांत्यै ॥ पुष्पांजलिः ॥

॥ अथ श्रुतपूजा ॥

वसंत० स्याद्वादकल्पतरुमूलविराजमानां ।
रत्नत्रयांबुजसरोवरराजहंसीं ॥
अंगप्रकीर्णकचतुर्दशपूर्वकाया– ।
मार्हत्यसद्गुणमयीं गिरमाह्वयामि ॥ १ ॥

ॐ ह्रीं श्रीं क्लीं ऐं अर्हं हस्क्लीं २ ह्रौं ह्रः सर्वशास्त्रप्रकाशिनि वद वद वाग्वादिनि अत्र अवतरावतर संवौषट् स्वाहा। आह्वानं। ॐ० अत्र तिष्ठ २ ठठ स्वाहा। स्थापनं। ॐ० अत्र मम सन्निहिता भव २ वषट् स्वाहा ॥ सन्निधीकरणं ॥

॥ अष्टकम् ॥

अनु-- वारितार्घैर्जलौघैश्च सत्तीर्थानि पवित्रितैः ।
श्रीमज्जैनेश्वरीं वाणीं यायजे ज्ञानसंपदे ॥

ॐ ह्रीं शब्दब्रह्मणे जलं निर्वपामि स्वाहा ॥ १ ॥

सौगंधिबंधुरैः सर्वानंदनैर्हरिचंदनैः ।
श्रीम० ॥ ॐ ह्रीं श० ॥ गंधं ॥ २ ॥
अक्षुण्णैः क्षीरवाराशिवलक्षैः कलमाक्षतैः ।
श्रीम० ॥ ॐ ह्रीं श० ॥ अक्षतान् ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उत्फुल्लैर्मल्लिकामाल्यै रतुलै रलिझंकृतैः ।
श्रीम० ॥ ॐ ह्रीं श० ॥ पुष्पं ॥ ४ ॥
क्षीरान्नैश्चरुकैर्दिव्यैर्बाष्पमुद्वहमानकैः ।
श्रीम० ॥ ॐ ह्रीं श० ॥ चरुं ॥ ५ ॥
दैदिप्यमानैर्माणिक्यदीपैर्द्विगुणितातपैः ।
श्रीम० ॥ ॐ ह्रीं श० ॥ दीपं ॥ ६ ॥
दशांगैर्द्वादशांगीयां धूपैस्तुष्टदिशाधिपैः ।
श्रीम० ॥ ॐ ह्रीं श० ॥ धूपं ॥ ७ ॥
विनम्रैः स्तवकैश्चंचद्रसालादिफलैरलं ।
श्रीम० ॥ ॐ ह्रीं श० ॥ फलं ॥ ८ ॥

शार्दूल—गंधाढ्योदकधारया हृदयहृद्गंधैर्विशुद्धाक्षतै— ।
रोचिष्णुप्रसवैर्विचित्रसुरभिस्फारस्फुरद्दीपकैः ॥
गीर्वाणस्पृहणीयधूमविलसद्धूपैः सुधासत्फल— ।
स्तोमैः स्वस्तिकपूर्वकैः सुरुचिरं श्रुत्यै ददेऽर्घ्यं विभो ॥अर्घ्यं॥९॥

अनु—इत्यमीभिः समाराध्य पूजाद्रव्यं श्रुतं वरं ।
भवसंतापविच्छेदा शांतिधारा विधीयते ॥ शांतिधारा ॥१०॥
द्वादशांगांगिनीं भास्वद्रत्नत्रयविभूषणां ।
सर्वभाषात्मकां स्वच्छंजैनीं वाणीमुपास्महे ॥ पुष्पांजलिः ।११।

॥ अथ गणधरपूजा ॥

इंद्रवज्रा—ये येऽनगरा ऋषयो यतींद्रा । मुनीश्वरा भव्यभवद्व्यतीताः ।
तेषां [1]व्रतीशां पदपंकजानि । संपूजयामो गुणशीलसिद्ध्यै ॥

ॐ ह्रीं सम्यग्दर्शनज्ञानचारित्रपवित्रतरगात्रचतुरशीतिलक्षगुणगण—धरचरणा अत्र अवतरतावतरत संवौषट् स्वाहा । आह्वानं । ॐ० अत्र तिष्ठत २ ठठ स्वाहा । स्थापनं । ॐ० अत्र मम सन्निहिता भवत २ वषट् स्वाहा ॥ सन्निधीकरणं ॥

---

१ व्रतेशां वा समेशां इत्यपि पाठः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अष्टकम् ॥

उपजाति-पुनातु नः सौरभलोललोभ । मधुव्रतश्रेणिहृतानुषंगा ।
नादेयगंगायमुनार्जितैषा । मुनींद्रपादार्चनवारिधारा ॥

ॐ ह्रीं सम्यग्दर्शनज्ञानचारित्र पवित्रतरगात्र चतुर्शीतिलक्ष गुणगणधरचरणेभ्यो जलं निर्वपामि स्वाहा ॥ १ ॥

मितोपमिश्रीकृतविश्वगंध । परिस्फुरन्नूतनवासवृंदः ।
तपोधनादेशपदानुलेपो । यशो मदीयं विशदीकरोतु ।
ॐ ह्रीं० ॥ गणधर० ॥ गंधं ॥ २ ॥

शशिप्रभाबीजसमानरोचि– । र्विनेयपुण्यांकुरजालकांतिः ।
क्षुधादिदुःखक्षतये मुनींद्र । पादाब्जतस्तंदुलराशिरस्तु ॥
ॐ ह्रीं० । गणधर० ॥ अक्षतान् ॥ ३ ॥

प्रगल्भगंधाहृतषट्पदालि– । र्विनाकृताशागजगंधभाजः ।
करोतु योगींद्रपदावतीर्णो । मनःसमाधिं सुमनःसमूहः ॥
ॐ ह्रीं० । गणधर० ॥ पुष्पं ॥ ४ ॥

सितांबुवाहाहितभक्ष्यभूपं ! निभर्म यद् योगिपदार्चितं नः ।
करोति तृप्तिं परिणामसद्य । सुगंधशालीमयि चंधुवुद्धया ॥
ॐ ह्रीं० । गणधर० ॥ चरुं ॥ ५ ॥

मधुव्रतालंबितकोटिभाग । प्रत्युज्वलचंपककुड्मलश्रीः ।
सगर्जनो योगिवरार्घ्यदीपः । करोति तीतस्तमहापहारः ॥
ॐ ह्रीं० । गणधर० ॥ दीपं ॥ ६ ॥

मदन्मयन्विभ्रमभूमिरोह । स्तमालनीलः सुरभिः करोति ।
विभास्वदंगारविरूढयश्री– । र्गणेश्वराराधनधूपधूमः ॥
ॐ ह्रीं० । गणधर० ॥ धूपं ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हस्तद्वये संकरनीरमूर्ध्नि । गंधच्छलाब्जांतनभोऽतराणि ।
मुनीश्वरश्रीचरणार्चितानि । स्वयं फलानीष्टफलाय संतु ॥
ॐ ह्रीं० । गणधर० ॥ फलं ॥ ८ ॥

मालिनी:- गुणगणमणिसिंधून् भव्यलोकैकबंधून् ।
प्रकटिताजिनमार्गान् तथ्यनित्यात्मवर्गान् ॥
परिचितानिजतत्वान् पादकेशेषदत्तान् ।
समरसजिनचंद्रानर्घ्ययामो मुनींद्रान् ॥ अर्घ्यं ॥ ९ ॥
ज्वलितसकललोकालोकलोकत्रयश्री ।
कलितललितमूर्ते कीर्तितेंद्रैर्मुनींद्रैः ॥
मुनिवर तव पादोपांततः पातयामो ।
जिनसमयविश्वत्तान् वर्तितान् शांतिधारां ॥ शांतिधारा ॥१०॥

वसंत०—देवासुरेंद्र मनुजेंद्र फणीश्वराणाम् ।
रत्नोज्वलन्मुकुटकुंडलघृष्टपार्श्वे ॥
सिद्धेंदु यक्ष खचर स्तवनीय वंदे ।
पुष्पांजलिप्रकरपादयुगं मुनीश ॥ पुष्पांजलिः ॥ ११ ॥

॥अथ पुष्पांजलिपुरःसरब्रह्मादिवास्तुदेवानां पृथगिष्टिः॥

शार्दूल- श्रीमज्जैनमहामहोत्सवविधिव्यापारसंसिद्धये ।
भव्यानामपि तन्नियोगनिचयश्रद्धापरीतात्मनाम् ॥
क्षेमार्थं क्रियमाणवास्तुविधिवत्संघातसंपूजने ।
प्रस्तावे [1]प्रविकीर्यते जय जयाऽऽरावेण पुष्पांजलिः ॥ १ ॥
ॐ ह्रीं श्रीं क्षीं भूः स्वाहा प्रस्तावनायपुष्पांजलिः ॥

शार्दूल- ग्राम क्षेत्र गृहादि भेदविविधोर्वीभागमध्याश्रय- ।
स्तत्तद्भागपरिच्छदो बहुविधस्वात्मप्रदेशो विभुः ॥
ब्रह्मादिक्षितिपूर्वदेवनिकरैरात्मोन्मुखैर्वेष्टितो ।
लाजाज्यान्वितदुग्धभक्त मधुना गृण्हातु रक्तप्रभः ॥ २ ॥

---

१ प्रविकीर्यते इत्यपिपाठः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ आँ क्रों ऱ्हीं रक्तवर्ण सर्वलक्षणसंपूर्ण स्वायुधवाहनवधूचिन्हसपरिवार हे ब्रह्मन् आगच्छ २ संवौषट् स्वाहा। आह्वानं॥ ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा॥ स्थापनं॥

॥ बलिमंत्रः ॥

ॐ ब्रह्मणे स्वाहा। ब्रह्मपरिजनाय स्वाहा। ब्रह्मानुचराय स्वाहा। ब्रह्ममहत्तराय स्वाहा। अग्नये स्वाहा। अनिलाय स्वाहा। वरुणाय स्वाहा। सोमाय स्वाहा। प्रजापतये स्वाहा। ॐ स्वाहा। [1]ॐ भूः स्वाहा। भुवः स्वाहा। भूर्भुवः स्वाहा। स्वः स्वाहा। स्वधा॥ (स्वाहा) हे ब्रह्मन् इदमर्घ्यं पाद्यं जलं गंधं अक्षतान् पुष्पं दीपं चरुं बलिं फलं स्वस्तिकं यज्ञभागं च यजामहे प्रतिगृह्यतां २ इति स्वाहा॥

(ब्रह्मास भाताच्या लाह्या, तूप, साखर व क्षीरान्न ह्या सर्व जिनसा द्रोणांत भरून ठेवणें.) एवं इंद्रादिसर्वत्र योज्यं॥ (याप्रमाणें इंद्र आदिकरून सर्व वास्तुदेवांची पूजा करणें.) इति ब्रह्मार्चनं॥ १॥

(२) इंद्रवज्रा-ऐरावतस्कंधमाधिश्रयंतं। वज्रायुधं रुच्यशचीसमेतं॥
प्रत्यूहविध्वंसकमर्हदिष्टौ। कोष्ठप्रसूनैः प्रयजामि शक्रं॥ २॥

ॐ आँ क्रों ऱ्हीं सुवर्णवर्ण सर्वल० हे इंद्र आगच्छ २ संवौषट्। आह्वानं॥ ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा॥ स्थापनं॥

॥ बलिमंत्रः ॥

इंद्राय स्वाहा। इंद्रपरिजनाय स्वाहा इत्यादि॥ हे इंद्र इदमर्घ्यं पाद्य मित्यादि॥ (इंद्रास कोष्ठ व फुलें) इति इंद्रार्चनं॥ २॥

(३) ज्वालाकलापात्मकशक्तिहस्तो। बस्ताधिरूढः सुपरिष्कृतांगः।
स्वाहामहिष्या सममग्निदेवः। प्रीणातु दुग्धैस्तगरैस्तथाज्यैः॥३॥

ॐ आँ क्रों ऱ्हीं रक्तवर्ण सर्वल० हे अग्ने आगच्छ २ संवौषट्। आह्वानं। ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा॥ स्थापनं॥

---

१ भूः स्वाहा इत्यपिपाठः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ बलिमंत्रः ॥

अग्नये स्वाहा । अग्निपरिजनाय स्वाहा इत्यादि ॥ हे अग्ने इदमर्घ्यं पाद्य-मित्यादि ॥ (अग्नीस दूध, तूप व तगर) इति अग्न्यार्चनं ॥ ३ ॥

(४) छायासमेतं महिषाधिरूढं । दंडायुधं दंडितवैरिवर्गं ॥
वैवस्वतं विघ्नहरं तिलान्नैः । सिवानयुक्तैः परितर्पयामि ॥४॥

ॐ आँ क्रों ऱ्हीं कृष्णवर्ण सर्वल० हे यम आगच्छ २ संवौषट् । आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

यमाय स्वाहा । यमपरिजनाय स्वाहा इत्यादि ॥ हे यम इदमर्घ्यं पाद्य मित्यादि ॥ (यमास तिळाचेंचूर्ण व वर्णाच्या घुगऱ्या.) इति यमार्चनं ॥४॥

(५) नैऋत्यधीशो निऋतिः सुऋक्ष । मृक्षांगवाहं द्विपदं सुरक्षः ॥
आरूढवानुध्दृतमुद्गरास्त्रः । पिण्याकमायच्छतु तैलमिश्रं ॥

ॐ आँ क्रों ऱ्हीं नीलवर्ण सर्वल० नैऋत आगच्छ २ संवौषट् । आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा । स्थापनं ॥

॥ बलिमंत्रः ॥

नैऋताय स्वाहा । नैऋतपरिजनाय स्वाहा इत्यादि ॥ हे नैऋत इदमर्घ्यामित्यादि ॥ (नैऋत्यास तिळाचें तेल व तिळाचें पेंड.)

इति नैऋतार्चनं ॥ ५ ॥

(६) मालिनी:-करधृतफणिपाशो मंडनोद्योतितांशः ।
करिमकरसमूर्तिर्लोकसंक्रामकीर्तिः ॥
सुरुचिरवरुणानीप्राणनाथः सुयुक्तो ।
वरुण इह समेत्य लातु दुग्धान्नधान्यं ॥

ॐ आँ क्रों ऱ्हीं सुवर्णवर्ण सर्वल० । हे वरुण आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ बलिमंत्रः ॥

वरुणाय स्वाहा । वरुणपरिजनाय स्वाहाइत्यादि ॥ हे वरुण इद--मर्घ्यमित्यादि ॥ वरुणास घर्णे व क्षीरान्न. इति वरुणार्चनं ॥

(७) इंद्रवज्राः-ऊर्ध्वीरुहासायुधशक्तिहस्त- । मध्वाधिरूढं परिमंडितांगं ॥
सद्वायुनेगीसुखदत्तदृष्टिं । पिष्टैर्निशायाः पवनं यजामि ॥१॥

ॐ आँ क्रों ऱ्हीं सुवर्णवर्णसर्वल० । हे पवन आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा । स्थापनं ॥

॥ बलिमंत्रः ॥

पवनाय स्वाहा । पवनपरिजनाय स्वाहाइत्यादि ॥ हे पवन इद--मर्घ्यमित्यादि ॥ पवनास हळदीचें पीठ. इति पवनार्चनं ॥

(८) सद्रत्नरुक्पुष्पितपुष्पकाभ्र- । यानाधिरूढ स्फुरितोग्रशक्ते ॥
संजानियूथ्यव्रज यक्षराज । दत्तं मया स्वीकुरु पायसान्नं ॥ १ ॥

ॐ आँ क्रों ऱ्हीं सुवर्णवर्ण सर्वल० हे कुबेर आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

कुबेराय स्वाहा । कुबेरपरिजनाय स्वाहाइत्यादि । हे कुबेर इदमर्घ्यपाद्य-मित्यादि ॥ कुबेरास तांदळाचें पायस. इति कुबेरार्चनं ॥

(९) उमासमेतो वृषभाधिरूढो । जटाकिरीटः फणिभूषितांगः ॥
त्रिशूलहस्तः प्रथमाधिनाथो । गृण्हातु दुग्धान्नमिदं ससर्पिः ॥१॥

ॐ आँ क्रों ऱ्हीं शुभ्रवर्ण सर्वल० हे ईशान आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

ईशानाय स्वाहा । ईशानपरिजनाय स्वाहाइत्यादि ॥ हे ईशान इदमर्घ्य-मित्यादि । ईशानास तूप व क्षीरान्न-आटीवखीर. इति ईशानार्चनं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(१०) वेद्याः पुरोदेशमवंतमार्यं । ध्वस्तात्मदेशप्रतिरोधवीर्यं ॥
सत्पूरिकामोदक पूपकादि- । भक्ष्यैः प्रहृष्टं विदधे फलैश्च ॥१॥

ॐ आँ क्रों न्हीं शुभ्रवर्ण सर्वल० हे आर्य आगच्छ २ संवौषट् । आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

आर्याय स्वाहा । आर्यपरिजनायस्वाहाइत्यादि ॥ हे आर्य इदमर्घ्यमित्यादि ॥ आर्यास कानवले व फळ. इति आर्यार्चनं ॥

(११) ब्रह्मापसव्यं पदमावसानो । बभासमानो मुकुटादिभाभिः ॥
सामीप्यसंवीतभुजिष्यवर्गो । देवो समाधान्नतिलैर्विवस्वान् ॥१॥

ॐ आँ क्रों न्हीं रक्तवर्ण सर्वल० हे विवस्वन् आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

विवस्वते स्वाहा । विवस्वत्परिजनाय स्वाहाइत्यादि ॥ हे विवस्वन् इदमर्घ्यमित्यादि ॥ विवस्वान् यास उडिदाच्या घुगऱ्या व तीळ. इति विवस्वतार्चनं ॥

(१२) शत्रुशक्तिविनिवारणक्षमो । मित्ररक्षणविधानदक्षिणः ।
प्रत्यगीश इह मित्रनिर्जरः । स्वीकरोतु दधिदूर्विकामपि ॥१॥

ॐ आँ क्रों न्हीं सुवर्णवर्ण सर्वलक्ष० हे मित्र आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

मित्राय स्वाहा । मित्रपरिजनाय स्वाहाइत्यादि ॥ हे मित्र इदमर्घ्य-मित्यादि ॥ मित्रास दही, हाराळी व कानवले. इति मित्रार्चनं ॥

(१३) प्रजापतेः सव्यसुधासिभागे । महीमवंतं महिमानमाप्तं ॥
महीधरं मंडनमंडितांगं । महामहस्कं महयामि दुग्धैः ॥१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ आँ क्रों र्‍हीं कृष्णवर्ण सर्वल० हे भूधर आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

भूधराय स्वाहा । भूधरपरिजनाय स्वाहाइत्यादि ॥ हे भूधर इदमर्घ्यमित्यादि ॥ भूधरास दूध. इति भूधरार्चनं ॥

(१४) सविंद्रदेवाय स विक्रमाय । तनूनपात्पक्षमुपाश्रिताय ।
वनामरानीकपुरःसराय । ददामि पुंजीकृतधान्यलाजं ॥ १ ॥

ॐ आँ क्रों र्‍हीं नीलवर्ण सर्वल० हे सविंद्र आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

सविंद्राय स्वाहा । सविंद्रपरिजनाय स्वाहाइत्यादि ॥ हे सविंद्र इदमर्घ्यमित्यादि ॥ सविंद्रास धणे व भाताच्या लाह्या. इति सविंदार्चनं।

(१५) वैश्वानरा दिक् समुपाश्रिताय । साविंद्रदेवाय सविक्रमाय ।
कर्पूरकाश्मीरलवंगकोष्ठै- । रुपस्कृतं पुण्यजलं ददामि ॥१॥

ॐ आँ क्रों र्‍हीं धूम्रवर्ण सर्वल० हे साविंद्र आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

साविंद्राय स्वाहा । साविंद्रपरिजनाय स्वाहाइत्यादि ॥ हे साविंद्र इदमर्घ्यमित्यादि ॥ साविंद्रास कापूर, काश्मीर, लवंग कोष्ठ व सुगंध-द्रव्यांनीं मिश्र केलेलें पाणी. इति साविंद्रार्चनं ॥

(१६) इंद्रं वनामर्त्यकदंबकेंद्रं । मंद्रारवं पुण्यजनस्य पक्षं ।
प्रत्यूहजालं विनिपातयंतं । मुद्गस्य चूर्णैः प्रयजे सपुष्पैः ॥१॥

ॐ आँ क्रों र्‍हीं अरुणवर्ण सर्वल० हे इंद्र आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ बलिमंत्रः ॥

इंद्राय स्वाहा । इंद्रपरिजनायस्वाहाइत्यादि ॥ हे इंद्र इदमर्घ्य-मित्यादि ॥ इंद्रास मुगाचे चूर्ण व फुलें. इति इंद्रार्चनं ॥

(१७) इंद्रराज गततंद्र निर्जिता- । रातिवर्ग निजवर्गपोषक ।
आशरादिप्रतिपक्षमाश्रिता- । ऽऽदेहि पूपयुतमुद्गचूर्णकं ॥ १ ॥

ॐ आँ क्रों ऱ्हीं श्वेतवर्ण सर्वल० हे इंद्रराज आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

इंद्रराजाय स्वाहा । इंद्रराजपरिजनाय स्वाहा इत्यादि ॥ हे इंद्रराज इदमर्घ्यमित्यादि ॥ इंद्रराजास तांदळाचे वडे व मुगाचें चूर्ण. इति इंद्रराजार्चनं ॥

(१८) समीराग्रभूमौ समुद्भासमानं । निजं देशभागं सदा पालयंतं ।
यजे रुद्र मक्षुद्रवन्यामरेंद्रं । गुडापूपवर्गैरुपस्कारयुक्तैः ॥१॥

ॐ आँ क्रों ऱ्हीं प्रवालवर्ण सर्वल० हे रुद्र आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

रुद्राय स्वाहा । रुद्रपरिजनायस्वाहाइत्यादि ॥ हे रुद्र इदमर्घ्यं पाद्यमित्यादि ॥ रुद्रास गूळ व कानवले. इति रुद्रार्चनं ॥

(१९) रुद्रजयाख्यं परिमितरौद्रं । क्षुद्रनिकायं वनसुरमुख्यं ।
मारुतविघ्नं गुडपरिपिष्टैः । पिष्टकवर्गैरिह महयामि ॥ १ ॥

ॐ आँ क्रों ऱ्हीं पीतवर्ण सर्वल० हे रुद्रराज आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

रुद्रराजाय स्वाहा । रुद्रराजपरिजनाय स्वाहा इत्यादि ॥ हे रुद्रराज

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इदमर्घ्यमित्यादि ॥ रुद्रराजास गूळ तांदळाचें पीठ व आंबोळी.
इति रुद्रराजार्चनं ॥

(२०) आमोदमाप्नोति गुणाधिकेषु । विद्वेषमुध्दृत्य जनेषु यश्च ।
आपः स देवो गुडपिष्टयुक्तं । सकैरवं शंखमुपैतु सैव ॥ १ ॥

ॐ आँ क्रों ऱ्हीं श्वेतवर्ण सर्वल० हे आप आगच्छ २ संवौषट् आह्वानं ।
ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

आपाय स्वाहा । आपपरिजनाय स्वाहाइत्यादि ॥ हे आप इदमर्घ्य-मित्यादि ॥ आप यास गूळ, तांदळाचें पीठ, पांढरे कमळ, शंख, आंबोळी.
इति आपार्चनं ॥

(२१) धर्मानुरक्तानतुमोदमानं । पापानुसक्तानपसारयंतं ।
महेश्वरायुक्तमिहाऽऽपवत्सं । संपूजयेऽहं बलिना तथैव ॥ १ ॥

ॐ आँ क्रों ऱ्हीं शंखवर्ण सर्वल० हे आपवत्स आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

आपवत्साय स्वाहा । आपवत्सपरिजनाय स्वाहा इत्यादि ॥ हे आपवत्स इदमर्घ्यमित्यादि ॥ आपवत्सास गूळ, तांदळाचें पीठ, पांढरें कमळ, शंख व आंबोळी. इति आपवत्सार्चनं ॥

(२२) पर्जन्यपर्जन्यनिनादतुल्य । नादेह दूरीकृतवैरिलोक ।
स्वतर्जनीचालनतार्जितात्म । वाचाटभृत्याज्यमुपैहि माद्र[1] ॥१॥

ॐ आँ क्रों ऱ्हीं जलवर्ण सर्वल० हे पर्जन्य आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

पर्जन्याय स्वाहा । पर्जन्यपरिजनाय स्वाहा इत्यादि ॥ हे पर्जन्य इद-मर्घ्यमित्यादि ॥ पर्जन्यास तूप. इति पर्जन्यार्चनं ॥

---

१ रौद्र.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(२३) जयं तनोति प्रतिरोधरोधात् । स्वयं तनोति स्वजनानुवृत्तेः ।
योऽसौ जयंतो हरिदक्षिणस्थो । गृण्हातु पूतं नवनीतमेतत् ॥१॥

ॐ आँ क्रों ऱ्हीं कृष्णवर्ण सर्वल० हे जयंत आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

जयंताय स्वाहा । जयंतपरिजनाय स्वाहा इत्यादि ॥ हे जयंत इदमर्घ्यमित्यादि ॥ जयंतास ताजे लोणी. इति जयंतार्चनं ॥

(२४) संक्रंदनापुष्ट्युपदेशितारं । तापप्रकाशं प्रतिभासमानं ।
तमोपहं भास्करदेव मेतं । कुर्वे प्रहृष्टं मधुकुंददानात् ॥ १ ॥

ॐ आँ क्रों ऱ्हीं श्वेतवर्ण सर्वल० हे भास्कर आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

भास्कराय स्वाहा । भास्करपरिजनाय स्वाहा इत्यादि ॥ हे भास्कर इदमर्घ्यमित्यादि ॥ भास्करास गूळ व कुंदपुष्प. इति भास्करार्चनं ॥

(२५) सत्यामरं नित्य मसत्यदूरं । गोत्रद्विषद्धामपदे वसंतं ।
सद्धर्मनित्यानुकृतप्रमोदं । संपूजये पूर्वसपर्ययैव ॥ १ ॥

ॐ आँ क्रों ऱ्हीं श्यामवर्ण सर्वल० हे सत्यक आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

सत्यकाय स्वाहा । सत्यकपरिजनाय स्वाहा इत्यादि ॥ हे सत्यक इदमर्घ्यं पाद्यमित्यादि ॥ सत्यकास गूळ व कुंदपुष्प. इति सत्यकार्चनं ॥

(२६) भृशं विवक्षुर्गुणवप्रसंगं । भृशं दिदृक्षुर्मुनिमुख्यसंगं ।
भृषामरः संश्रितवृत्रशत्रू- । रातु प्रमोदान्नवनीतपिंडं ॥ १ ॥

ॐ आँ क्रों ऱ्हीं पुष्पवर्ण सर्वल० हे भृष आगच्छ २ संवौषट् आह्वानं ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ।। स्थापनं ।।

।। बलिमंत्रः ।।

भृषाय स्वाहा । भृषपरिजनाय स्वाहा इत्यादि ।। हे भृष इदमर्घ्यं पाद्यमित्यादि ।। भृष यास ताजा लोण्याचा गोळा, इति भृषार्चनम् ।।

(२७) अथांऽतरिक्षे विहरन् विनोदं । वनेषु पश्यन् सुजनोपसर्गं ।
नुदन् बृहद्भानुसखांऽतरिक्ष-। श्चूर्णं निशामाषज माददैतत् ।।१।।

ॐ आँ क्रों न्हीं कुंदवर्ण सर्वल० हे अंतरिक्ष आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ।। स्थापनं ।।

।। बलिमंत्रः ।।

अंतरिक्षाय स्वाहा । अंतरिक्षपरिजनाय स्वाहाइत्यादि ।। हे अंतरिक्ष इदमर्घ्यं पाद्यमित्यादि ।। अंतरिक्षास हळदीचें व उडदाचें चूर्ण. इति अंतरिक्षार्चनं ।।

(२८) पुष्णातु यः सज्जनतोपकारं । मुष्णाति चाऽसज्जनदुर्विलासं ।
कृपीटयोनेः सुहृदेष पूषः । शिंबान्न मेतत् सपयः प्रतीच्छेत् ।।१।।

ॐ आँ क्रों न्हीं रक्तवर्ण सर्वल० हे पूष आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ।। स्थापनं ।।

।। बलिमंत्रः ।।

पूषाय स्वाहा । पूषपरिजनाय स्वाहा इत्यादि ।। हे पूष इदमर्घ्यं पाद्यमित्यादि ।। पूष यास वण्यांच्या घुगऱ्या व दूध. इतिपूषार्चनं ।।

(२९) वितथाख्यं वितथीकृतारिशक्तिं प्रधानं साधुजनोपकारं ।
प्रतीतं दंडधराख्यं प्रदक्षिणस्थं । वरकट्वन्नसमर्चितं करोमि ।।१।।

ॐ आँ क्रों न्हीं इंद्रचापवर्ण सर्वल० हें वितथ आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ।। स्थापनं ।।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ बलिमंत्रः ॥

वितथाय स्वाहा । वितथपरिजनाय स्वाहा इत्यादि ॥ हे वितथ इदमर्घ्यं पाद्यमित्यादि ॥ वितथास सुंठ, मिरें व पिंपळ. इति वितथार्चनं ॥

(३०) रक्षः परीचारकसत्त्वरक्षं । दक्षं सुमार्गे विहितप्रमोदं ।
कालापसव्याश्रयराक्षसेंद्रं । मधुप्रदानात् सुखिनो भवंति ॥१॥

ॐ आँ क्रों ह्रीं इंदुवर्ण सर्वल० हे राक्षस आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

राक्षसाय स्वाहा । राक्षसपरिजनाय स्वाहा इत्यादि ॥ हे राक्षस इदमर्घ्यं पाद्यमित्यादि ॥ राक्षसास गूळ. इति राक्षसार्चनम् ॥

(३१) सुगंधगंधर्वसुपर्वहस्त । प्रशस्तवीणाघनगानगीतं ।
गंधर्वदेवं घनसारपूर्वै- । र्गंधैः समर्चे यममाश्रयंतं ॥ १ ॥

ॐ आँ क्रों ह्रीं पद्मवर्ण सर्वल० हे गंधर्व आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

गंधर्वाय स्वाहा । गंधर्वपरिजनाय स्वाहा इत्यादि ॥ हे गंधर्व इदमर्घ्यं पाद्यमित्यादि ॥ गंधर्वास कर्पूर व चंदन यांचा गंध. इति गंधर्वार्चनं ॥

(३२) यो विक्रमाक्रांतजनप्रसंग । स्तपोधनाधीशपदाब्जभृंगः ।
स भृंगराज श्रितधर्मराज । पवित्रदुग्धान्न मुपाददातु ॥ १ ॥

ॐ आँ क्रों ह्रीं नीलवर्ण सर्वल० हे भृंगराज आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

भृंगराजाय स्वाहा । भृंगराजपरिजनाय स्वाहा इत्यादि ॥ हे भृंगराज इदमर्घ्यं पाद्यमित्यादि ॥ भृंगराजास क्षीरान्न. इति भृंगार्चनम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(३३) मृषीकृताधर्मपरप्रभावं । मृषोक्तिदूरं मृषनामधेयं ।
रक्षादपायात्तमुदारशक्तिं । माषान्नसंतर्पितमातनोमि ॥ १ ॥

ॐ आँ क्रों ह्रीं मेषवर्ण सर्वल० हे मृषदेव आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

मृषाय स्वाहा । मृषपरिजनाय स्वाहा इत्यादि ॥ हे मृषदेव इदमर्घ्यं पाद्यमित्यादि ॥ मृषदेवास उडिदाच्या घुगऱ्या. इति मृषार्चनम् ॥

(३४) तपोधना जन्यनिवारणार्थं । वनाश्रमद्वारि सदा निषण्णं ।
दौवारिकं सेवितयातुधानं । संतर्पयेऽहं वरशालिपिष्टैः ॥१॥

ॐ आँ क्रों ह्रीं श्वेतवर्ण सर्वल० हे दौवारिक आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

दौवारिकाय स्वाहा । दौवारिकपरिजनाय स्वाहा इत्यादि ॥ हे दौवारिक इदमर्घ्यं पाद्यमित्यादि ॥ दौवारिकास तांदळाचे पीठ. इति दौवारिकार्चनम् ॥

(३५) सुग्रीवया तन्वितवीणया वै । गायन् नितांतं गुणिनां गुणौघं ।
सुग्रीवदेवः श्रितपाशहस्तः । प्रमोदवान् मोदकदानतोऽस्तु ॥१॥

ॐ आँ क्रों ह्रीं चंद्रवर्ण सर्वल० हे सुग्रीव आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

सुग्रीवाय स्वाहा । सुग्रीवपरिजनाय स्वाहा इत्यादि ॥ हे सुग्रीव इदमर्घ्यं पाद्यमित्यादि ॥ सुग्रीवास मोदक. इति सुग्रीवार्चनम् ॥

(३६) विभांति पुंसां गुणसंकथा ये । पुष्पावदाताः खलु यस्य दंताः ।
स पुष्पदंतो वरुणांतिकस्थः । पुष्पाणि गृण्हातु जलान्वितानि ॥१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ आँ क्रों न्हीं श्वेतवर्ण सर्वल० हे पुष्पदंत आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

पुष्पदंताय स्वाहा । पुष्पदंतपरिजनाय स्वाहा इत्यादि ॥ हे पुष्पदंत इदमर्घ्यं पाद्यमित्यादि ॥ पुष्पदंतास पुष्प व पाणी. इति पुष्पदंतार्चनम् ॥

(३७) असुरकल्पसुरोऽभितक्रियो । गिरिनदादिविहारलोलुपः ।
वरुणप्रांतमहीमुपाश्रितो । भजतु लोहितमन्नमुत्तमं ॥ १ ॥

ॐ आँ क्रों न्हीं कृष्णवर्ण सर्वल० हे असुर आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

असुराय स्वाहा । असुरपरिजनाय स्वाहा इत्यादि ॥ हे असुर इदमर्घ्यं पाद्यमित्यादि ॥ असुरास तांबडा भात. इति असुरार्चनम् ॥

(३८) संशुद्धमार्गप्रतिरोधिवाहि । नीशोषं सदा यः कुरुते प्रभावात् ।
शोषः सपक्षीकृतयादसांप-- । तिर्लातु प्रधौतं तिलमक्षतं च ॥१॥

ॐ आँ क्रों न्हीं धवलवर्ण सर्वल० हे शोष आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

शोषाय स्वाहा । शोषपरिजनाय स्वाहा इत्यादि ॥ हे शोष इदमर्घ्यं पाद्यमित्यादि ॥ शोषास तीळ व अक्षता. इति शोषार्चनम् ॥

(३९) रोगोपघातांग तपोधनानां । दृष्टास्थिचिंता मनुकंपमानं ।
रोगं मरुत्पक्षकृतानुरागं । सुखीकरोम्युत्तमकारिकाभिः ॥१॥

ॐ आँ क्रों न्हीं सवितृवर्ण सर्वल० हे रोग आगच्छ २ संवौषट् स्वाहा आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ बलिमंत्रः ॥

रोगाय स्वाहा । रोगपरिजनाय स्वाहा इत्यादि ॥ हे रोग इदमर्घ्यं पाद्यमित्यादि ॥ रोगास घारग्या. इति रोगार्चनम् ॥

(४०) नागं समाराधितयोगिनाथं । नागाधिनाथेन पलायितारं ।
वातापसव्याश्रय माश्रयंतं । मधुप्रदुग्धैर्महयामि लाजैः ॥ १ ॥

ॐ आँ क्रों ऱ्हीं शंखवर्ण सर्वल० हे नाग आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

नागाय स्वाहा । नागपरिजनाय स्वाहा इत्यादि ॥ हे नाग इदमर्घ्यं पाद्यमित्यादि ॥ नागास साखर दूध व भाताच्या लाह्या. इति नागार्चनं ॥

(४१) मुख्यं यजे व्यंतरदेवमुख्यं । यक्षेण सत्रा कृतचारुसख्यं ।
विख्यातकांतारविहारशक्तं । संतं प्रवेकैर्वरवस्तुयुक्तैः ॥ १ ॥

ॐ आँ क्रों ऱ्हीं मौक्तिकवर्ण सर्वल० हे मुख्य आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

मुख्याय स्वाहा । मुख्यपरिजनाय स्वाहा इत्यादि ॥ हे मुख्य इदमर्घ्यं पाद्यमित्यादि ॥ मुख्यास श्रीखंड. इति मुख्यार्चनं ॥

(४२) भल्लाटदेवं प्रतिमल्लदट्ट । संघट्टनाविष्कृतसर्वशक्तिं ।
वीरं कुबेरं प्रवणं प्रतीतं । गुडान्नदानेन सुखीकरोमि ॥ १ ॥

ॐ आँ क्रों ऱ्हीं श्वेतवर्ण सर्वल० हे भल्लाट आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

भल्लाटाय स्वाहा । भल्लाटपरिजनाय स्वाहा इत्यादि ॥ हे भल्लाट इदमर्घ्यं पाद्यमित्यादि ॥ भल्लाटास गूळभात. इति भल्लाटार्चनं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(४३) द्रुतविलंबित- मृगगणैस्तपसाऽवशीकृतं। मृगयते मुनियं ननु नायते।
तमहमत्र मृगंधनदाश्रयं। परिचरामि गुडान्वितपूपकैः॥ १॥
ॐ आँ क्रों ऱ्हीं रक्तोत्पलवर्ण सर्वल० हे मृगदेव आगच्छ २ संवौषट्
आह्वानं। ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा॥ स्थापनं॥

॥ बलिमंत्रः ॥

मृगदेवाय स्वाहा। मृगदेवपरिजनाय स्वाहा इत्यादि ॥ हे मृगदेव
इदमर्घ्यं पाद्यमित्यादि॥ मृगदेवास गूळाचे कानवलें. इतिमृगदेवार्चनं॥

(४४) धनदवामधरातलभागधी–। स्तदतिनंदनमुख्यसुरादृतः।
अदितिरुग् भवनामरपूजितो। मुदितवान् भवतादिह मोदकैः॥१॥
ॐ आँ क्रों ऱ्हीं कपिलवर्ण सर्वल० हे अदिते आगच्छ २ संवौषट्
आह्वानं। ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा॥ स्थापनं॥

॥ बलिमंत्रः ॥

अदितये स्वाहा। अदितिपरिजनाय स्वाहा इत्यादि ॥ हे अदिते
इदमर्घ्यं पाद्यमित्यादि ॥ अदितीस मोदक. इतिअदित्यर्चनं॥

(४५) मोचाफलस्येव द्युतिर्यदास्या–। दुदेति वाचाटनिवारणार्थं॥
मुमुक्षुसाक्षादुदितिः सुभुंक्ते। भक्ष्यं तिलोपेतमुपास्यते सः॥ १॥
ॐ आँ क्रों ऱ्हीं कुंदवर्ण सर्वल० हे उदिते आगच्छ २ संवौषट्
आह्वानं॥ ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा॥ स्थापनं॥

॥ बलिमंत्रः ॥

उदितये स्वाहा। उदितिपरिजनाय स्वाहा इत्यादि ॥ हे उदिते इद-
मर्घ्यं पाद्यमित्यादि ॥ उदितीस तिळाचें कानवलें. इतिउदित्यर्चनं॥

(४६) विचारि सत्कृत्यविनोदशक्ते। विचारयुक्ते सुजनानुरक्ते॥
कृशानुवाह्यावनिभागयुक्ते। गृण्हातु भक्तं लवणप्रयुक्तं॥ १॥
ॐ आँ क्रों ऱ्हीं अग्निवर्ण सर्वल० हे विचारि आगच्छ २ संवौषट्
आह्वानं। ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा॥ स्थापनं॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ बलिमंत्रः ॥

विचार्यै स्वाहा । विचारिपरिजनाय स्वाहा इत्यादि ॥ हे विचारि इदमर्घ्यं पाद्यमित्यादि ॥ विचारीस मीठ घालून केलेला भात. इति-विचार्यार्चनं ॥

(४७) कायेन वाचा मनसा पवित्र- । मावर्जयंती तपसामधीशं ॥
रक्षोबहिस्था तिलपिष्टकाभ्यां । संतुष्यतां संप्रति पूतनाख्या ॥१॥

ॐ आँ क्रों ह्रीं हेमवर्ण सर्वल० हे पूतने आगच्छ २ संवौषट् आह्वानं। ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा स्थापनं ॥

॥ बलिमंत्रः ॥

पूतनायै स्वाहा । पूतनापरिजनाय स्वाहा इत्यादि ॥ हे पूतने इद-मर्घ्यं पाद्यमित्यादि ॥ पूतनेस तीळ व तांदळाचे पीठ. इति पूतनेऽर्चनं ॥

(४८) पापान्महापौरुषकारिणो या । राक्षासिरूपादपराय तर्जेत् ॥
सा मारुताशावनिबाह्यसंश्रिता । कुल्माषमायच्छतु पापराक्षसी ॥१॥

ॐ आँ क्रों ह्रीं मेघवर्णे सर्वल० हे पापराक्षसि आगच्छ २ संवौषट् आह्वानं । ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

॥ बलिमंत्रः ॥

पापराक्षस्यै स्वाहा । पापराक्षसीपरिजनाय स्वाहा इत्यादि ॥ हे पाप-राक्षसि इदमर्घ्यं पाद्यमित्यादि ॥ पापराक्षसीस मुगाच्या घुगऱ्या. इति-पापराक्षस्यार्चनं ॥

(४९) यत्र यत्र मुनयो वसंतिते तत्र तत्र तदजन्यचारिणी ॥
या चरत्यवनिमीशबाह्यतां । सा ददातु चरकी घृतं मधुं ॥१॥

ॐ आँ क्रों ह्रीं शंखवर्णे सर्वल० हे चरकी आगच्छ २ संवौषट् आह्वानं ॥ ॐ० स्वस्थाने तिष्ठ २ ठठ स्वाहा ॥ स्थापनं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ बलिमंत्रः ॥

चरक्यै स्वाहा । चरकीपरिजनाय स्वाहा इत्यादि ॥ हे चरकी इदमर्घ्यं पाद्यमित्यादि ॥ चरकीस तूप व गूळ. इतिचरक्यार्चनं ॥

शार्दूल–एते वास्तुसुराः समस्तधरणीं संवासिता वाऽसतः ।
प्रत्यूहस्य विधायिन स्त्वपचिताः प्रत्यूहसंहारकाः ॥
अद्याऽत्रार्पितपूजनात् प्रमुदिताः सर्वप्रभावान्विताः ।
यष्टुर्याजक भूप मंत्रि शुभकृन्नाम्नाश्च संतु श्रियै ॥ १ ॥

ॐ आँ क्रों ह्रीं ब्रह्मेंद्रादिचरकीवास्तुदेवतांत्यसर्वेवास्तुदेवताः पूर्णार्घ्यदानेन बहुमानयेत् पूर्णार्घ्यं ॥

अनु– यस्यार्थं क्रियते पूजा वास्तुदेवा धराधिपाः ।
शांतिके पौष्टिके चैवसर्वविघ्नोपशांतये ॥ शांतिधारा ॥ २ ॥

शार्दूल–इत्थं प्रार्थनयाऽनुगृह्य विदितं सामान्यमन्यं बलिं ।
सर्वे वास्तुसुराः प्रसीदत भवद्भाव्यंतरायास्तु ये ॥
गेहे धाम्नि त्रिदित्सते च विविधोत्साहेऽथवा विष्टपे ।
संत्येतान् सकलान् निवारयत तत्सर्वं सदा रक्षत ॥ ३ ॥

इंद्रवज्रा-एवं जिनाधीश्वरयज्ञकाले । संतर्पिताः स्वस्वविभूतियुक्ताः ॥
वन्यामराः किन्नरदेवमुख्याः । कुर्वंतु शांतिं जिनभाक्तिकानां ॥४॥
संपूजिता इत्यसुरेंद्रमुख्या । महामहेऽमी प्रतिभासमानाः ॥
दशप्रकारोदितभावनेंद्राः । कुर्वंतु शांतिं० ॥ ५ ॥
मुख्याविमौ चंद्रदिवाकरौ च । शेषग्रहा अश्वयुगादिताराः ॥
प्रकीर्णकाज्योतिरमर्त्यवर्गाः । कुर्वंतु० ॥ ६ ॥
जिनेंद्रचंद्रस्य महामहेऽस्मिन् । संपूजिताः कल्पनिकायवासाः ॥
सौधर्ममुख्यास्त्रिदशाधिनाथाः । कुर्वंतु० ॥ ७ ॥
पृथ्वीविकारात् सलिलप्रदेशा– । दग्नेश्च दाहात् पवनप्रकोपात् ॥
चोरप्रयोगादपि वास्तुदेवा– । श्चैत्यालयं रक्षतु सर्वकालं ॥८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तिर्यक्प्रचारादशनिप्रघाता-- । द्वीजप्ररोहाद्द्रुमखंडपातात् ॥
कीटप्रवेशादपि वास्तुदेवा-- । श्चैत्यालयं० ॥ ९ ॥
इष्टप्रार्थनाय पुष्पांजलिः ॥

संस्थाप्य मध्येऽष्टदिशासु बाह्ये । जलप्रपूर्णान् स हिरण्यगर्भान् ॥
सद्वस्त्रमाल्यांबुजदर्पणाढ्यान् । कुंभान् यजे वास्तुसमृद्धिसिद्ध्यै ॥१०॥
ॐ ऱ्हीं समस्तनदीतीर्थजलं भवतु । कुंभेषु हिरण्यं निक्षिपामि स्वाहा ।
ॐ ऱ्हीं नेत्राय संवौषट् । कलशार्चनं ॥ अथ पुण्याहवाचनसंकल्पः
(येथें कलशार्चन वगैरे करून घेऊन पुण्याहवाचन करणें त्याशिवाय विधि पूर्ण होत नाहीं.) इति वास्तुविधानं संपूर्णं ॥

ग्रहस्थ (श्रावकांनीं) उपनयन, विवाह, सूतक, पातक, ग्रहपीडा, ग्रहप्रवेश इत्यादि संदर्भामध्ये शांति आणि शुद्धिसाठीं आपल्या घरीं होम करवावे असा विधि आहे. होमांमध्ये पुढें विधीत येणारे पुष्कळ देव-देवींच्या पूजा होतात म्हणून त्यादेवांच्या अनुग्रहाने ग्रहपीडा शांत होते; तसेच नीच (मिथ्यादृष्टि) देवतांचे उच्चाटनही होते; ग्रहशुद्धि होउन मनालाही संतोष होतो इतकेंच नव्हे तर होमांत पुष्कळ मंत्रांचा घोष होतो त्या योगानें व होमाचे धूराने घरातील वातावरणही पण शुद्ध होते. म्हणून घरी होम करविणे किती जरुरीचे आहे हे सहज कळून येईलच. तो विधि पुढील प्रमाणे आहे.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परिशिष्ट नं. ३

॥ अथ ग्रहहोमविधानं ॥

वसंत- श्रीमत्त्रिलोक जनशांति करप्रशांतिं ।
संसारसंतति परिभ्रमणोपशांतिं ॥
श्रीशांतिनाथमभिवंद्य समस्तशांतिं ।
होमोत्सवाय कुसुमांजलिमुत्क्षिपामि ॥

ॐ ऱ्हीं श्रीं क्षीं भूः स्वाहा होमप्रस्तावनाय पुष्पांजलिः ॥ १ ॥

स्रग्धरा--भेरी गंभीरनादा प्रविततकहलाशंखढकामृदंगाः ।
प्रध्वातध्वानघंटा झणझणरवसज्झर्झरादिप्रघोषैः ॥
रंगद्रंगातरंगोद्भवतुमुलरवाशंकितैः क्षुभ्यदब्धि-- ।
र्ध्वानैरेकैः प्रगर्जद्घनरवसदृशैः श्रीजिनांघ्रिं यजामः ॥ २ ॥

ॐ ऱ्हीं पुष्पाक्षतं विनिक्षिप्य ध्वानकेन वाद्यमुद्घोषणं ॥ (येथें सकल वाद्यांवर फुलें व अक्षता टाकून, सकळ वाद्यें वाजविणें.)

॥ अथ पंचकुमारपूजा ॥

वसंतः–उत्खातपूरितसमीकृतसंस्कृतायां ।
पुण्यात्मनीय भगवन्मखमंडपोर्व्यां ॥
वास्त्वर्चनादिविधिलब्धिमखादिभाग ।
वेद्यां यजामि शशिभृद्दिशि वास्तुदेवं ॥ १ ॥

ॐ ऱ्हीं हे वास्तुकुमारदेवात्रागच्छ २ संवौषट् स्वाहा । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ ॥ १ ॥ ॐ ऱ्हीं हे वास्तुकुमारदेव इदमर्घ्यं पाद्यं जलं गंधं अक्षतान् पुष्पं चरुं दीपं धूपं फलं बलिं स्वस्तिकं यज्ञभागं च यजामहे प्रतिगृह्यतां २ स्वाहा । यस्यार्थं०॥ शांतिधारा ॥१॥

इंद्रवज्रा– आयात भो वायुकुमारदेवाः । प्रभोर्विहारावसराप्तसेवाः ।
यज्ञांगमुद्धेदसुगंधिशीत- । मृद्वायुना शोधयताऽध्वरोर्वीं ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ह्रीं हे वायुकुमारदेव सर्वविघ्नविनाशनाय महीं पूतां कुरु २ हूँ फट् स्वाहा। षड्दर्भपूलेन भूमिं सम्मार्जयेत् ॥ १ ॥ ॐ ह्रीं हे वायुकुमारदेव अत्र आगच्छ २ संवौषट् स्वाहा । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ ॐ ह्रीं हे वायुकुमारदेव इदमर्घ्यमित्यादि ॥ २ ॥

इंद्रवज्रा-आयात भो मेघकुमारदेवाः । प्रभोर्विहारावसराप्तसेवाः ॥
गृण्हीत यज्ञं समुदीर्णशंपा । गंधोदकैः प्रोक्षत यज्ञभूमिं ॥ १ ॥

ॐ ह्रीं हे मेघकुमारदेव धरां प्रक्षालय २ अं हं सं वं झं ठं क्षः फट् स्वाहा। षड्दर्भपूलोपात्तजलेन भूमिं सिंचेत् ॥ ॐ ह्रीं हे मेघकुमारदेव अत्र आगच्छ २ संवौषट् स्वाहा। ॐ० अत्र तिष्ठ २ ठठ स्वाहा। ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ ॐ ह्रीं हे मेघकुमारदेव इदमर्घ्यमित्यादि ॥ ३ ॥

इंद्रवज्रा-आयात भो वन्हिकुमारदेवा। आदानविद्यादिविधीयसेवाः ॥
भजध्वमिज्जां समिधां मखोर्वीं। ज्वालाकलापेन परं पुनीत ॥१॥

ॐ ह्रीं वन्हिकुमारदेव ज्वल प्रज्वल अमिततेजसे स्वाहा । षड्दर्भ-पूलानलेन भूमिं ज्वालयेत् ॥ ॐ ह्रीं हे वन्हिकुमारदेव अत्र आगच्छ २ संवौषट् स्वाहा। ॐ० अत्र तिष्ठ २ ठठ स्वाहा। ॐ० अत्र मम सान्नि ह्इतो भव २ वषट् स्वाहा॥ ॐ० हे वन्हिकुमारदेव इदमर्घ्यमित्यादि ॥४॥

इंद्रवज्रा- नागाः समुत्थाय महीमुपेत्य। संचारशीलाः सुखिनः समर्थाः ॥
जिनाध्वरे षष्टिसहस्रसंख्याः। प्रतृप्यताऽनेन सुधारसेन ॥१॥

ॐ ह्रीं भूः षष्टिसहस्रसंख्येभ्यो नागेभ्योऽमृतांजलिं प्रसिंचामि स्वाहा। ईशान्यां दिशि नागसंतर्पणं ॥ ॐ ह्रीं हे नागकुमारा अत्र आगच्छत २ संवौषट् स्वाहा । ॐ० अत्र तिष्ठत २ ठठ स्वाहा । ॐ० अत्र मम सन्निहिता भवत २ वषट् स्वाहा ॥ ॐ० हे नागकुमारा इदमर्घ्यमित्यादि ॥ इति पंचकुमारपूजा समाप्ता ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ क्षेत्रपालपूजा ॥

अनुष्टुभ्—क्षेत्रपालाय यज्ञेऽस्मिन्नेतत्क्षेत्राधिरक्षणे ।
बलिं दास्यामि दिश्यग्रेवेंद्यां विघ्नविघातिने ॥ १ ॥

ॐ आँ क्रों ह्रीं हे क्षेत्रपाल अत्रावतरावतर संवौषट् स्वाहा । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥

॥ अष्टकं ॥

इंद्रवज्रा—श्रीजैनबिंबांकितरत्नमौलिं । माणिक्यचूडामणिभासिचूडं ॥
श्रीखंडसंमिश्रितवारिणाऽहं । श्रीब्रह्मदेवं वरमर्चयामि ॥

ॐ ह्रीं ब्रह्मदेवाय जलं समर्पयामि ॥ १ ॥

सिंदूर रत्नोरुषिदग्रभागं । सपाटिरत्नत्रयभासिबालं ॥
काश्मीरचंद्रार्चितचंदनेन । श्रीब्र० ॥ ॐ ह्रीं ब्र० ॥ गंधं ॥ २ ॥

जिनेशपादार्चितकल्पवल्ली । प्रसूनगुच्छामलकर्णपूरं ॥
शाल्यक्षतैः शुभ्रतरैरखंडैः । श्रीब्र० ॥ॐ ह्रीं ब्र० ॥ अक्षतान् ॥ ३ ॥

रत्नोज्वलत्कुंडलकांतवर्णं । सद्रत्नकंठाभरणाभिरामं ॥
मंदारजातीवकुलप्रसूनैः । श्रीब्र० ॥ ॐ ह्रीं ब्र० ॥ पुष्पं ॥ ४ ॥

चतुर्भुजं दक्षिणपाणिपद्मं । लीलारविंदं दुरगोरुभृंगं ॥
क्षीरान्नशाल्यन्नघृतान्नभक्ष्यैः । श्रीब्र० ॥ ॐ ह्रीं ब्र० ॥ चरुं ॥ ५ ॥

आमोदहस्तं धृतबीजपूरं । खड्गैकहस्तं भयदानहस्तं ॥
दीपैरधूमैरभिरत्नदीपैः । श्रीब्र० ॥ ॐ ह्रीं ब्र० ॥ दीपं ॥ ६ ॥

विशालवक्षास्पदगौरहार- । मलंकृतं श्यामलबाहुपूरं ॥
दशांगकालागरुधूपधूमैः । श्रीब्र० ॥ ॐ ह्रीं ब्र० ॥ धूपं ॥ ७ ॥

सुदिव्यवस्त्रं कटिसूत्ररम्यं । कलद्वयं नूपुरचारुपादं ॥
नारंगपूगाम्रफलैः सिताश्वं । श्रीब्र० ॥ ॐ ह्रीं ब्र० ॥ फलं ॥ ८ ॥

केयूरहारांगदवर्णपूर । मंजीरमुद्रास्यदगोरुपट्टैः ॥
दुकूलनेत्रादिविचित्रवस्त्रैः ॥ श्रीब्र० ॥ॐ ह्रीं ब्र० ॥ वस्त्राभरणं ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्रग्धराः—श्रीखंडैर्मेघपुष्पैर्बहुलपरिमलैस्तंडुलैर्हारिपुष्पै—।
नैवेद्यैर्दिव्यसाध्यैं रमल्लफलशतैः स्निग्धगंभीरधूपैः ॥
दिव्यैर्दीपैश्च नानामलमणिरचितैः कुंडलैश्चारुहारै-।
रन्यैर्देवांगवस्त्रै निधिविशदविधुं ब्रह्मदेवं यजामि ॥ अर्घ्यं ॥

इंद्रवज्रा—इत्यर्चयित्वा जिनपादभक्तं । भक्तानुरक्तं वरदानदक्षं ॥
यक्षेंद्रमेतत्पदविघ्नकानां । शांतिं प्रकुर्वे वरशांतिधारां ॥
शांतिधारा ॥ १ ॥

॥ अथ पुण्याहवाचनं ॥

श्रीनिर्जरेशाधिपचक्रपूर्वमित्यादिंकृत्वा संकल्पपूर्विकांत्यं पठेत् ॥

॥ अथ दर्भस्थापना ॥

उपजाति-पवित्रभूमिं परितो दिशासु । पूर्वादिकासु प्रथितान् प्रशस्तान् ॥
अशेषविघ्नोपशमाय दर्भान् । संस्थापयामो हरितान् क्रमेण ॥१॥

ॐ ह्रीं दर्पमथनाथ नमः स्वाहा । ब्रह्मदर्भः ॥ एवंशेषदिशास्वपिदर्भान्[२]-।
न्यसेत् ।

॥ अथ भूम्यर्चनम् ॥

उपजाति-गंधछटाभिः परित प्रसिक्तां । काश्मीरसारेण कृतानुलेपां ॥
सुगंधिपुष्पप्रकरां धरित्रीं । यज्ञोचितां सांप्रतमर्चयामि ॥ १ ॥
ॐ ह्रीं भूः स्वाहा । भूर्भूमिदेवते इदं जलं गृण्ह २ । एवं गंधादिभिः
भूम्यर्चनं ॥ इतिभूम्यर्चनं ॥

॥ अथ दर्भासनं ॥

अनु—दर्भं प्रस्तीर्य वस्त्रं वा वेत्रासनमथोऽपि वा ।
अत्रोपवेशनं कुर्वे वामे पल्यंकयोगतः ॥ १ ॥
ॐ ह्रीं अर्हं क्ष्मं ठठ मम दर्भासनं करोमि स्वाहा ॥

---

१. पृष्ठ ५० पहा. २ पृष्ठ ६३ पहा.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ पीठस्थापनं ॥

शार्दूल—श्रीमद्देवनिकाय किन्नरमहा विद्याधरैः सेवितं ।
रत्नस्वर्णमयं जिनेंद्रभवने राराज्यमानं सदा ॥
तीर्थाधीश्वर जन्म मज्जनजलैः पूतं महामंदरं ।
नत्वा पीठमिदं निवेश्य च यजे संस्थापनार्थं विभोः ॥ १ ॥

ॐ ऱ्हीं अर्हं क्ष्मं ठठ श्रीपीठस्थापनं करोमि स्वाहा । ॐ ऱ्हीं सम्यग्दर्शनाय नमः स्वाहा । होममंडपप्रत्यग्विहितपीठस्थापनार्चनं ॥ (येथे होमकुंडाच्या पश्चिमेस पीठ ठेवून त्यास अर्घ्य देणें.)

॥ अथ प्रतिमास्थापनम् ॥

वसंततिलका— श्रीहोममंडपपुरोदिशि भासमाने ।
सन्मंडपे विहितमंजुलमंदराग्रे ॥
संस्थापिते जिनपतेः प्रातिबिंबमेत— ।
दानीय होमविधये निदधामि पीठे ॥ १ ॥

ॐ ऱ्हीं श्रीं क्लीं ऐं अर्हं जगतां सर्वशांतिं कुर्वन्तु श्रीपीठे प्रतिमास्थापनं करोमि स्वाहा । (येथें त्या पीठावर श्रीजिनप्रतिमा ठेवणें व त्या प्रतिमेवर पुष्पाक्षता टाकणें.)

॥ अथ श्रीजिनार्चनम् ॥

शालिनी- देवो दैत्यः किन्नरः खेचरेंद्रो । यक्षो रक्षश्चंद्रसूर्यादयश्च ॥
नामं नामं यं समाराधयंति । ध्यायं ध्यायं तं जिनं पूजयामि ॥१॥

ॐ ऱ्हीं अर्हं नमः अर्हत्परमेष्ठिने जलं निर्वपामि स्वाहा । एवं गंधाद्यष्टविधार्चनं कुर्यात् ॥ (अष्टद्रव्यानीं पूजाकरणें.)

॥ अथ चक्रत्रयार्चनम् ॥

स्त्रग्धरा- तीर्थेशश्रीविहारे समवसृतिपुरो देशविभ्राजमाने ।
श्रीमद्यक्षेंद्रमूर्ध्नि स्फुरदुरुकिरणैः शोभितं धर्मचक्रं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यद्भाभातिस्म पूर्वं सुर नर खचर स्तोमविस्मापकांतं ।
नत्वा चक्रत्रयं श्रीजिनपतिविलसद्यज्ञभूमौ यजामि ॥ १ ॥
ॐ ह्रीं धर्मचक्राय अप्रतिहततेजसे स्वाहा । इतिचक्रत्रयार्चनम् ॥

॥ अथ छत्रत्रयार्चनम् ॥

स्रग्धरा- ऊर्ध्वाऽधोमध्यभेदात् त्रिभुवनमहितं लांछनं श्रीजिनेशो ।
मुक्तालंभूषणैकं मणिकनक कनत्तुंगबिंबाभिरामं ॥
शुंभद्वैडूर्यदंडं चक्रचकितशरच्चंद्रबिंबत्रयाभं ।
यज्ञेऽस्मिन्नेतदासेचनकमथ यजाम्यातपत्रत्रयं च ॥ १ ॥
ॐ ह्रीं श्वेतछत्रत्रयश्रियै स्वाहा । इतिछत्रत्रयार्चनम् ॥

॥ अथ श्रुतपूजा ॥

स्रग्धरा- जाता सर्वज्ञवक्त्राद् गणधरनिकरैर्विस्तृता वीध्रबोधै- ।
रंगोपांगादिभेदैस्तदनु मुनिजनैश्चापि दृग्भाविशेषात् ॥
श्रेयोमार्गप्रकाशे स्फुटरुचिविलसद्दीपिका सर्वलोक- ।
व्यापारस्य प्रमात्रा त्रिभुवनमहिता शारदा पूज्यतेऽद्य ॥ १ ॥
ॐ ह्रीं सरस्वत्यै नमः जलं । प्रतिमादक्षिणभागे वाग्देवतार्चनम् ॥

॥ अथ गणधरपूजा ॥

अनु- सिद्धांतसूक्तिसंकीर्णे श्रुतस्कंधवने घने ।
श्रुतकेवलिनः पादौ पूजयामि महामुनेः ॥ १ ॥
ॐ ह्रीं गणधरपरमेष्ठिने जलं ॥ प्रतिमावामभागे गणधरार्चनं ॥

॥ अथ यक्षार्चनम् ॥

स्रग्धरा- श्रीमज्जैनेंद्रमार्गे प्रमुदितहृदयः साधुलोकोपकारी ।
मिथ्यादृष्टिप्रयोगप्रकटितनिखिलोन्मार्गविध्वंसनोत्कः ॥
नानापुण्यप्रदेश प्रातिहरणपटुर्विक्रियाशक्तियुक्तः ।
श्रीमान् यक्षाधिराजः प्रचुरतरमहः पूज्यते पुण्ययज्ञे ॥ ११ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ऱ्हीं कलियुगप्रबंधदुर्मार्गविनाशन परमसन्मार्गपरिपालन भगवन् यक्षेश्वर जलादिकमर्चनं गृहाण २। इत्यादियक्षार्चनं दक्षिणे ॥

॥ अथ शासनदेवतार्चनम् ॥

स्रग्धरा–लोके सत्वानुकंपां परपरमजिनेंद्रोक्तसद्धर्मसेवां।
दक्षां न्यक्षां मुमुक्षुव्रजमपि परमादादरादानमंतीं ॥
स्याद्वादन्यायखड्गक्षपितकलियुगानेकदुर्मार्गकक्षां।
यक्षीं यक्ष्यामि यज्ञे त्रिजगदधिपतेः सर्वविघ्नोपशांत्यै ॥ १ ॥

ॐ ऱ्हीं कलियुगप्रबंधदुर्मार्गविनाशनपरे सन्मार्गप्रतिपालिनि भगवति यक्षिदेवि जलादिकमर्चनं गृहाण २॥ इत्यादिशासनदेवतार्चनं वामे ॥ ॐ ऱ्हीं उपवेशन भूः शुध्यतु स्वाहा। होमकुंडपूर्वभागे दर्भपूलेन उपवेशनभूमिशोधनं॥ ॐ ऱ्हीं परमब्रह्मणे नमोनमः। ब्रह्मासनेऽहं उपविशामि स्वाहा। होमकुंडाग्रे होतुरुपवेशनं॥ ततः। (येथें होम करणाऱ्यानें होमकुंडापुढें मांडलेल्या पाटावर बसणें व त्यानंतर ॐ ऱ्हीं स्वस्तये कलशमुद्धारयामि स्वाहा। पुण्याहकलशमुध्दृत्य होमकुंडदक्षिणभागे स्थापनं॥ (होमकुंडाच्या उजव्या बाजूस पुण्याह कलश उचलून ठेवणें.) ॐ ऱ्हीं स्वस्तये मंगलकुंभस्थापयामि स्वाहा। वामे मंगलकुंभस्थापनं॥ (डाव्या बाजूस मंगलकुंभ ठेवणें.)

॥ अथ होमकुंडार्चनं ॥

अनुष्टुभ्–त्रिकोणमुज्वलज्वालं रक्तस्वस्तिकलांछनं।
ब्रह्मरेफाक्षरोपेतं दिक्कोणं शिखिमंडलं॥ १ ॥
रक्तचूर्णेन कुंडेऽस्मिन्नग्निमंडललेखनम्।
(येथें अग्निकुंडांत तांबड्या रंगानें त्रिकोण अग्निमंडल काढणें)

अनु–तिथिदेवैर्ग्रहैर्भावनादिदेवैर्दिगीश्वरैः।
परिष्कृतमिदं शांत्यै होमकुंडं यजामहे॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ऱ्हीं निरजसे नमः इत्यादिजलैर्दर्भैर्गंधादिभिश्च कुंडार्चनं ॥

॥ अथ अग्निसंधुक्षणम् ॥

इंद्रवज्रा–संशुष्कदर्भाग्रविलग्नवन्हि । ज्वालाकलापैरिव सेंधनौघैः ॥
त्रैलोक्यशांतिप्रदहोमकुंडे । दर्भाग्निसंधुक्षणमातनोमि ॥ १ ॥

ॐ ४ रं ४ अग्निं स्थापयामि स्वाहा । अग्निमंडले पवित्राग्निस्थापनं । अग्निसंधुक्षणं करोमि स्वाहा । अग्निसंधुक्षणं ॥ (या मंत्रानें अग्निमंडलांत विस्तू ठेवून पेटविणें.)

॥ अथ अग्निकुमारपूजा ॥

इंद्रवज्रा–श्रीमच्छलाकापुरुषप्रतीत । गर्भान्वयाद्यास्वपि सत्क्रियासु ।
संसिद्धये यः पुरुषैः प्रणीतो । वह्निं तमाहूय समर्चयेऽद्य ॥१॥

ॐ आँ क्रों ऱ्हीं रक्तवर्ण सर्वलक्षणसंपूर्ण स्वायुधवाहनयुवतिजनसहित हे अग्निकुमारदेव अत्र आगच्छ २ संवौषट् स्वाहा । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥

॥ अष्टकम् ॥

दोधकवृत्त–अंबरसिंधुसमुध्दृतनीरै- । श्चंदनचंद्रयुतै रतिशीतैः ॥
विघ्नसमूहविनाशनदक्षं । वन्हिकुमारमहं परिचाये ॥
ॐ ऱ्हीं वन्हिकुमाराय जलं समर्पयामि ॥ १ ॥

कुंकुमचंद्रसमन्वितगंधै– । र्गंधविलोभमुदन्मदभृंगैः ।
विघ्नसमूह ॥ ॐ ऱ्हीं वन्हिकुमा० ॥ गंधं ॥ २ ॥

शालिमनोहरतंडुलपुंजै–। श्चंद्रकलापकरैरिव गौरैः ।
विघ्नसमूह ॥ ॐ ऱ्हीं वन्हिकुमा० ॥ अक्षतान् ॥ ३ ॥

कुंदसुकैरवचंपकनीपा– । शोकसरोजमुखैर्वरपुष्पैः ॥
विघ्नसमूह ॥ ॐ ऱ्हीं वन्हिकुमा० ॥ पुष्पं ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भक्ष्याविशेष समंचितहव्यैः। सर्वहृषीकसुखामृतसारैः ॥
विघ्नसमूह ॥ ॐ ऱ्हीं वन्हिकुमा० ॥ चरुं ॥ ५ ॥
दूरितभूरि तमोनिकुरूंबै–। र्भूरिलसन्मणिदीपकदंबैः ॥
विघ्नसमूह ॥ ॐ ऱ्हीं वन्हिकुमा० ॥ दीपं ॥ ६ ॥
चंद्रपटीरसकुंकुमजातै-। र्धूपितदिग्विवरैर्वरधूपैः ॥
विघ्नसमूह ॥ ॐ ऱ्हीं वन्हिकुमा० ॥ धूपं ॥ ७ ॥
पूगकपित्थनोहरजंबू- । चारुतरामलकादिफलौघैः ॥
विघ्नसमूह ॥ ॐ ऱ्हीं वन्हिकुमा० । फलं ॥ ८ ॥

मालिनीः–जलमलयजहृद्यामोदशाल्यक्षताद्यै– ।
विंरचितमह मुच्चैर्जैनपादाब्जभक्त्या ॥
इह सकलजनानां पापतापोपशांत्यै ।
वरमनलकुमारस्याऽग्रतः संदधेऽर्घ्यं ॥ अर्घ्यं ॥ शांतिधारा ॥

॥ अथ तिथिदेवतार्चनम् ॥

उपेंद्रवज्रा-यक्षादिदेवाः प्रथिताःपुरोगा-। स्तिथिप्रभावस्य विधौ धुरीणाः॥
जिनाधिराजस्य पवित्रयज्ञे । सुखप्रदाः पंचदशापि संतु ॥ १ ॥

ॐ आँ क्रों ऱ्हीं प्रशस्तवर्ण सर्वलक्षणसंपूर्णस्वायुधवाहनवधूचिन्ह-सपरिवारा हे पंचदशतिथिदेवता अत्र आगच्छत २ संवौषट् स्वाहा। ॐ० अत्र तिष्ठत २ ठठ स्वाहा । ॐ० अत्र मम सन्निहिता भवत २ वषट् स्वाहा ॥ ॐ आँ क्रों ऱ्हीं हे पंचदश तिथिदेवता इदमर्घ्यमित्यादि ॥ प्रथममेखलायां तिथिदेवतार्चनम् ॥

॥ अथ नवग्रहार्चनम् ॥

शार्दूल–आदित्यादिमहाग्रहा निजनिजस्फुर्जद्विमानाश्रिताः ।
सौम्याऽसौम्यदशाः शुभाऽशुभलसत्कार्यप्रदानक्षमाः ॥
नित्यं मेरुपरीतयः स्थिरतरा ब्रह्मादिभिश्चान्विता ।
आगच्छंतु जिनोत्सवं विदधतः प्रीणंतु ते धार्मिकान् ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ आँ क्रों ह्रीं प्रश० हे नवग्रहदेवा अत्र आगच्छत २ संवौषट् स्वाहा॥ ॐ० अत्र तिष्ठत २ ठठ स्वाहा। ॐ० अत्र मम सन्निहिता भवत २ वषट् स्वाहा ॥ ॐ आँ क्रों ह्रीं हे नवग्रहदेवा इदमर्घ्यमित्यादि ॥ द्वितीयमेखलायां नवग्रहार्चनम् ॥

॥ अथ चतुर्णिकायामरेंद्रार्चनम् ॥

शार्दूल-भास्वंतो भवनामरा वनसुरा ज्योतिष्कदेवा स्तथा ।
कल्पोद्यद्विभवान्विता इति चतुर्भेदाः सुराधीश्वराः ॥
नानाशक्तियुताः पुरार्जितमहापुण्योदयप्राग्भवाः ।
पूज्यंते जिनराजयज्ञसमये सत्कार्यसंसिद्धये ॥ १ ॥

ॐ आँ क्रों ह्रीं प्रश० हे चतुर्णिकायामरदेवा अत्र आगच्छत २ संवौषट् स्वाहा । ॐ० अत्र तिष्ठत २ ठठ स्वाहा । ॐ० अत्र मम सन्निहिता भवत २ वषट् स्वाहा। ॐ आँ क्रों ह्रीं हे चतुर्णिकायामरदेवा इदमर्घ्यमित्यादि ॥ तृतीयमेखलायां चतुर्णिकायामरेंद्रार्चनम् ॥

॥ अथ दिक्पालकपूजा ॥

शार्दूल-- कल्याणेषु जिनेश्वरस्य निचया भक्त्या च शक्राज्ञया ।
स्थित्वा दिक्षु निजांकवाहनवधूशस्त्रप्रभावान्विताः ॥
ये निघ्नंति परप्रयुक्तविविधप्रत्यूहजालं तथा ।
तानिंद्रादिदिशाधिपान् दशविधानंचामि होमोत्सवे ॥ १ ॥

ॐ आँ क्रों ह्रीं प्रश० हे इंद्रादिदशलोकपाला अत्र आगच्छत २ संवौषट् स्वाहा । ॐ० अत्र तिष्ठत २ ठठ स्वाहा । ॐ० अत्र मम सन्निहिता भवत २ वषट् स्वाहा ॥ ॐ आँ क्रों ह्रीं हे इंद्रादिदशलोकपाला इदमर्घ्यमित्यादि ॥ इति दिक्पालकार्चनं ॥

॥ अथ आज्याहुतिः ॥

उपेंद्रवज्रा- स्रुवेण वाऽश्वत्थदलेन नव्यं । गव्यं घृतं मंत्रसमेतमेतत् ।
अपिच्छलं प्रज्वलिताऽग्निकुंडे । जुहोमि वारं शतमष्टयुक्तं ॥१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(डाबानें किंवा पिप्पळवृक्षाच्या पानानें ताजें तूप घेऊन, पुढील मंत्रानें होमकुंडांत आहुति देणें.) आज्याहुतिमंत्रः

ॐ ऱ्हीं अर्हत्सिद्धकेवलिभ्यः स्वाहा । ॐ ऱ्हीं पंचदशतिथिदेवेभ्यः स्वाहा । ॐ ऱ्हीं नवग्रहदेवेभ्यः स्वाहा । ॐ ऱ्हीं द्वात्रिंशदिंदेभ्यः स्वाहा । ॐ ऱ्हीं दशलोकपालकेभ्यः स्वाहा । ॐ ऱ्हीं अग्नींद्राय स्वाहा ॥ षडेतान् मंत्रान् अष्टादशकृत्वः पुनरावर्तनेनोच्चारयन् प्रत्येकमाज्याहुतिं कुर्यात् ॥ (आज्याहुतीचें मंत्र ६ आहेत. हें मंत्र फिरून फिरून १८ वेळा म्हणावें व प्रत्येक मंत्रानें तुपाची आहुति देणें.)

अनुष्टुभ्—तर्पणं पीठिकामंत्रैः कुसुमाक्षतचंदनैः ।
मिश्रांबुपूर्णपाणिभ्यां कुर्वंतु परमेष्ठिनां ॥ २ ॥

ॐ ऱ्हां अर्हत्परमेष्ठिनस्तर्पयामि । ॐ ऱ्हीं सिद्धपरमेष्ठिनस्तर्पयामि । ॐ ऱ्हूं आचार्यपरमेष्ठिनस्तर्पयामि । ॐ ऱ्हौं उपाध्यायपरमेष्ठिनस्तर्पयामि । ॐ ऱ्हः सर्वसाधुपरमेष्ठिनस्तर्पयामि ॥ गंधपुष्पाक्षतदर्भखंडान्वितजलेन मितपात्रास्थितेन पंचपरमेष्ठिनस्तर्पयामि ॥ (येथें गंध पुष्प अक्षत दर्भखंड व पाणी हीं द्रव्यें दोनी हातांत घेऊन वर सांगितलेल्या अर्हत्परमेष्ठी आदिकरून पंच परमेष्ठीस तर्पण करणें.) ॐ ऱ्हीं आग्निं परिषेचयामि । क्षीरेण अग्निपर्युक्षणं ॥ (येथें यामंत्रानें अग्नींत दुधाचा सिंतोंडा देणें.) ॐ ऱ्हीं अर्हत्सिद्धकेवलिनस्तिथिदेवता महानवग्रहदेवताः सुरेंद्रादयो दिक्पाला अग्नींद्रश्च सर्वेऽप्येते अघोरहोमैराराधिताः प्रसन्नवंतो भवंतु । तत्प्रसादादस्य यजमानस्य शांतिर्भवतु । संघस्य शांतिर्भवतु । राज्ञः शांतिर्भवतु गृहस्य शांतिर्भवतु । लोकस्य शांतिर्भवतु जलधारानिपातेन प्रार्थना ॥ इति आज्याहुतिः ॥ (येथें या वरील मंत्रानें जलधारापूर्वक प्रार्थना करणें. याप्रमाणें आज्याहुति करणें.)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ समिधाहुतयः ॥

उपजाति-पलाशजाता मधुरप्रयुक्ता । आहोस्विदश्वत्थतरुप्रसूताः ॥
आर्द्राः सुवृत्ताः कथितप्रमाणाः । करेण सम्यक् समिधा जुहोमि ॥१॥

(पळस, रुई, पिंपळ, खैर, व चंदन उंबर सौंदड वगैरे झाडांच्या ढाळीचीं लाकडें यांस समिधा ह्मणतात.) ह्या थोड्या ओलसर, गोल व वीतीच्या प्रमाणाच्या आसाव्यात. अशा समिधा अग्नीस आहुति देणें.

॥ समिधाहुतिमंत्रः ॥

ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः अ सि आ उ सा सर्वशांतिं कुरु २ स्वाहा ॥ अनेन मंत्रेण समिद्भिराहुतयः । करेण होतव्याः ॥ इति समिधा होमः ॥ (या मंत्रानें समिधाहुति हातानें १०८ वार करणें.) ततः पूर्ववत् षड-ज्याहुतिः पंचतर्पणैकपर्युक्षणानि ॥ समिधाहुति केल्यानंतर पूर्वीं सांगि-तल्याप्रमाणें आज्यहुति, पंचतर्पण करून अग्नीस एक वेळा दुधाचा शितोडा देणें.) विश्वे देवताधिष्ठितमहायंत्र प्राणभूतस्य मूलमंत्राभिधेयरूपा अर्हत्परमेष्ठिनः सिद्धाः सूरयः पाठकेंद्राः सर्वसाधवश्चैते महानुभावाः समिधो होमैराराधिताः प्रसन्नवंतो भवंतु । तत्प्रसादादस्य यजमानस्य शांतिर्भवतु । संघस्य शांतिर्भवतु । राज्ञः शांतिर्भवतु । गृहस्य शांति-र्भवतु । लोकस्य शांतिर्भवतु । जलधारानिपातेन प्रार्थना ॥ इति समिधाहुतयः ॥

॥ अथ लवंगाहुतयः ॥

उपेंद्रवज्रा-लवंगगंधाक्षतशालिराज- । तिलाज्यसद्गुग्गुलकुंकुमं च ॥
कर्पूरलाजागरुशर्करं च । शृगाक्षमात्रं मिलितं जुहोमि ॥ १ ॥

लवंग, गंध, अक्षत, भात, तीळ, तूप, गुगळी, केशर, कापूर भाताच्या लाह्या, अगर साखर ह्या सर्व जिनसा कुटून आवळ्या एवढ्या गोळ्या १०८ बांधून आहुति देणें.)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ लवंगाहुतिमंत्रः ॥

ॐ ऱ्हाँ अर्हद्भ्यः स्वाहा । ॐ ऱ्हीं सिद्धेभ्यः स्वाहा । ॐ ऱ्हूँ सूरिभ्यः स्वाहा । ॐ ऱ्हौं पाठकेभ्यः स्वाहा । ॐ ऱ्हः सर्वसाधुभ्यः स्वाहा । ॐ ऱ्हीं जिनधर्मेभ्यः स्वाहा । ॐ ऱ्हीं जिनागमेभ्यः स्वाहा । ॐ ऱ्हीं जिनचैत्येभ्यः स्वाहा । ॐ ऱ्हीं जिनचैत्यालयेभ्यः स्वाहा । ॐ ऱ्हीं सम्यग्दर्शनाय स्वाहा । ॐ ऱ्हीं सम्यग्ज्ञानाय स्वाहा । ॐ ऱ्हीं सम्यक् चारित्राय स्वाहा । ॐ ऱ्हीं जयाद्यष्टदेवताभ्यः स्वाहा । ॐ ऱ्हीं रोहिण्यादिषोडशविद्यादेवताभ्यः स्वाहा । ॐ ऱ्हीं चतुर्विंशति-यक्षेभ्यः स्वाहा । ॐ ऱ्हीं चतुर्विंशतियक्षीभ्यः स्वाहा । ॐ ऱ्हीं दश-विध भवनामरेभ्यः स्वाहा । ॐ ऱ्हीं अष्टविधव्यंतरदेवेभ्यः स्वाहा । ॐ ऱ्हीं पंचविधज्योतिष्कसुरेभ्यः स्वाहा । ॐ ऱ्हीं द्वादशविध कल्पामरेभ्यः स्वाहा । ॐ ऱ्हीं अष्टदिक्कन्यकाभ्यः स्वाहा । ॐ ऱ्हीं दशलोकपालकेभ्यः स्वाहा१ ॥

ॐ ऱ्हीं अग्नींद्राय स्वाहा । ॐ स्वाहा । भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा ॥ एतान् सप्तविंशतिमंत्रान् चतुर्वारानुच्चार्य प्रत्येकलवंगा-दिद्रव्यैराहुतिंकुर्यात् ॥ इति लवंगादिद्रव्याहुतिः ॥ [हे २७ मंत्र ४ वेळा ऊच्चारून लवंगादिद्रव्याच्या गोळ्या १०८ प्रत्येक मंत्रानें आहुति देणें. याप्रमाणें लवंगाहुति करणें.] ततः पूर्ववत् षडाज्याहुतिपंचतर्पणैकपर्यु-क्षणानि ॥ लवंगाहुति केल्यानंतर पूर्वी सांगितल्याप्रमाणें आज्याहुति आदि सर्वविधि करणें. अर्हदादयो नवदेवताः सम्यग्दर्शनज्ञानचारित्राणि जयाद्यष्टदेवता रोहिण्यादयो विद्यादेव्यश्च । गोमुखादयो यक्षेंद्राश्चक्रे-श्वर्यादयः शासनदेवताश्च । असुरेंद्रादयः सर्वे सुरेंद्राः । श्रीप्रभृतयो दिक्कन्यका इंद्रपौरस्त्यादिक्पाला अग्नींद्रश्च । एते सर्वेऽपि देवता लवं--

१ अत्रस्थाने ॐ ऱ्हीं नवग्रहेभ्यः स्वाहा इतिशेषः प्रतिभाति.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गादिहोमैराराधिताः सुप्रसन्ना भवंतु । तत्प्रसादादस्य यजमानस्य शांतिर्भवतु । संघस्य शांतिर्भवतु । राज्ञः शांतिर्भवतु । गृहस्य शांतिर्भवतु । लोकस्य शांतिर्भवतु । जलधारानिपातेन प्रार्थना ॥

॥ अथ अन्नाहुतयः ॥

इंद्रवज्रा-शाल्योदनक्षीरविचित्रभक्ष्यैः । पक्वान्नसर्पिःसितपायसं च ॥
सुस्वादपक्वं कदलीफलं च । मृगाक्षमात्रं मिलितं जुहोमि ॥ १ ॥

[तांदळाचा भात, दूध, लाडू वगैरे भक्ष्यपदार्थ, पक्वान्न, तूप, शुभ्रखीर व स्वादयुक्त केळें ह्या सर्व जिनसा एकत्र कालवून आवळया एवढ्या गोळ्या १०८ बांधून आहुति देणें].

॥ अन्नाहुतिमंत्रः ॥

टीपः—एक पुस्तकांत प्रत्येक मंत्रांच्या आदि ॐ ऱ्हीं पाठ आहे, दुसरे पुस्तकांत कांहीं नाहींत. परंतु ॐ ऱ्हीं असणें योग्य दिसते.

ॐ सत्यजाताय नमः । ॐ अर्हज्जाताय नमः । ॐ परमजाताय नमः । ॐ अनुपमजाताय नमः । ॐ स्वप्रदाय नमः । ॐ अचलायनमः । ॐ अक्षयाय नमः । ॐ अव्याबाधाय नमः । ॐ अनंतज्ञानाय नमः । ॐ अनंतदर्शनाय नमः । ॐ अनंतवीर्याय नमः । ॐ अनंतसुखाय नमः । ॐ निरजसे नमः । ॐ निर्मलाय नमः । ॐ अच्छेद्याय नमः । ॐ अभेद्याय नमः । ॐ अजराय नमः । ॐ अमराय नमः । ॐ अप्रमेयाय नमः । ॐ अगर्भवासाय नमः । ॐ अक्षोभ्याय नमः । ॐ अविलीनाय नमः । ॐ १ परमपुरुषाय नमः । ॐ परमकाष्ठयोगरूपाय नमः ॥ ॐ लोकाग्रनिवासिने नमः । ॐ परमसिद्धेभ्योर नमः । ॐ अर्हत्सिद्धेभ्यो नमः । ॐ केवलिसिद्धेभ्यो नमः । ॐ अंतकृत्सिद्धेभ्यो नमः । ॐ परंपरासिद्धेभ्यो नमः । ॐ अनादिपरंपरासिद्धेभ्यो नमः । ॐ अनाद्य-

१ परमघनायनमः पाठांतर, । २ नमो नमःइत्यपिपाठः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नुपमसिद्धेभ्यो नमः । ॐ सम्यग्दृष्टे २ आसन्नभव्य २ निर्वाणपूजार्ह २ अग्नींद्राय स्वाहा ॥ सेवाफलं षट्परमस्थानं भवतु । अपमृत्युविनाशनं भवतु । समाधिमरणं भवतु ॥ ततः पूर्वोक्तमंत्रेण षडज्याहुतिपंचतर्पणैकपर्युक्षणानि ॥ पीठिकामंत्रैःषट्त्रिंशद्भेदभिन्नैः प्रतिमंत्रैस्त्रिवारानुच्चारितैः प्राक्संख्याय अन्नाहुतिं विदध्यात् ॥ इत्यन्नाहुतयः ॥ (या अन्नाहुतींचे मंत्र ३६ आहेत हे मंत्र ३ वेळां उच्चारून प्रत्येक मंत्रानें अन्नाहुतीच्या गोळ्या १०८ आहुति देणें. त्यानंतर पूर्वी सांगितल्याप्रमाणें आज्याहुति आदि सर्वविधि करणें. याप्रमाणें अन्नाहुति करणें.]

दरमपीठिकारूपदिव्यमंत्राभिधेयास्तेऽनादिसिद्धा जातिमंत्ररूपार्हन्मंत्रादयोऽन्नाहुतयः समाराधिताः प्रसन्नवंतो भवंतु । तत्प्रसादादस्य यजमानस्य शांतिर्भवतु । संघस्य शांतिर्भवतु । राज्ञः शांतिर्भवतु । गृहस्य शांतिर्भवतु । लोकस्य शांतिर्भवतु । जलधारानिपातेन प्रार्थना ॥ इत्यन्नाहुतयः ॥

॥ अथ पूर्णाहुतिः ॥

उप०—जिनेश्वराणां च तिथीश्वराणां । ग्रहामराणां च दिशाधिपानां ॥
अग्निप्रसादाहुतिदिव्यमंत्रै— । राज्येन पूर्णाहुतिमातनोमि ॥१॥

॥ पूर्णाहुतिमंत्रः ॥

ॐ ह्रीं पंचदश तिथिदेवाः प्रसीदंतु । नवग्रहदेवाः प्रत्यवायं पराभवंतु । भावनादयो द्वात्रिंशदिंद्राः प्रमोदयंतु । इंद्रादयो विश्वदिक्पालाः पालयंतु । अग्नींद्रमौल्युद्भवोऽप्यग्निदेवः प्रसन्नो भवतु । शेषाः सर्वेऽपि देवता एते राजानं विराजयंतु । दातारं तर्पयन्तु । संघं च श्लाघयतुं । वृष्टिं वर्षयंतु । ईतिं विघातयंतु । मारिं निवारयंतु ॥ ॐ नमोऽर्हते भगवते श्रीशांतिनाथाय शांतिकराय । केवलदर्शनप्रज्वलनाय ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पूर्णाहुतिज्वालितज्ञानाय । संपूर्णफलार्थं पूर्णाहुतिं विद्महे ॥ पूर्णार्घ्यं ॥ इति पूर्णाहुतिः ॥ (या मंत्रांनीं तुपाची धार एकसारखी अग्नीवर धरणें व मंत्र संपल्यानंतर अग्नीस पूर्णार्घ्य देणें याप्रमाणें पूर्णाहुति करणें.)

ॐ दर्शनोद्योत ज्ञानप्रज्वलित सर्वलोक प्रकाशक भगवन्नर्हन् अस्य.... नामधेयस्यपुत्रकलत्र बंधुजन सहितस्यास्य यजमानस्य श्रद्धां मेधां । प्रज्ञां बुद्धिं श्रियं बलमानुष्यं तेज आरोग्यं सर्वशांतिं विधेहि स्वाहा ॥

(या मंत्राने शांतिधारा सोडून नंतर पुष्पांजलि करणें)

शांतिजिनं शशिनिर्मलवक्त्रं इत्यादि पठित्वाविसर्जनंकुर्यात् ॥ इति ग्रहहोमविधानं समाप्तम् ॥

॥ अथ जलहोमविधानं ॥

वसंत– श्रीमत्सुरेंद्र भवनेंद्र नरेंद्रवंद्यं ।
पूज्यं जिनेंद्रमभिवंद्य मुनींद्रवंद्यं ।
त्रैलोक्यनाथ सवनाभ्युदये विनेय- ।
शांत्यै करोमि कुसुमांजलिमंजसैव ॥ १ ॥

ॐ ऱ्हीं श्रीं क्ष्रीं भूः स्वाहा प्रस्तावनाय पुष्पांजलिः

श्रीमत्त्रिलोकजनशांतिकरप्रशांतिं– ।
संसारसंततिपरिभ्रमणोपशांतिं–॥
श्रीशांतिनाथमभिवंद्य समर्च्य शांति ।
होमोत्सवाय कुसुमांजलिमुत्क्षिपामि ॥ २ ॥

जलहोमप्रारंभे प्रस्तावनाय पुष्पांजलिः ॥ जलस्थलशिलावालुकापर्यं-तभूमिशोधनपूर्वकं भूमिशोधनं करोमि स्वाहा । भूमिशोधनं ॥

अनु– शांतिनाथं नमस्कृत्य सर्वविघ्नोपशांतये ।
सर्वभव्यालिशांत्यर्थं शांतिहोमोऽयमुच्यते ॥ ३ ॥

ॐ परमब्रह्मणे नमो नमः । स्वस्ति २ । जीव २ । नंद २ । वर्धस्व २ । विजयस्व २ । अनुशाधि २ । पुनीहि २ । पुण्याहं २ । मांगल्यं २ । पुष्पाक्षतं क्षिपेत् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्रग्धरा-- श्रीमद्गीर्वाणलोके प्रवणमणिगणाश्लिष्टमौलिप्रकृष्ट-- ।
श्रीभिःशोभाभिरालिंगित पद्महसामर्हतां सर्वदोर्वी ॥
रक्षत्यक्षादिरात्मा समवसरणगां योजनद्वादशांगां ।
त्वंतस्थं क्षेत्रपालं विधिवदखिलदुर्विघ्ननिर्विघ्नमंचे ॥ ४ ॥
भेरी गंभीरनादा प्रविततकहलाशंखढकामृदंगाः ।
प्रध्वातध्वानघंटा झणझणरवसाज्झर्झरादिप्रघोषैः ॥
रंगद्रंगातरंगोद्भवतुमुलरवाशंकितैः क्षुभ्यदब्धि-- ।
ध्वानैरेकै प्रगर्जद्घनरवसदृशैः श्रीजिनांघ्रिं यजामः ॥ ५ ॥

ॐ ऱ्हीं पुष्पाक्षतं विक्षिप्य ध्वानकेन वाद्यमुद्घोषणं ॥

क्षेत्रं सर्वं पवित्रं गृह नगर वनोद्यानधन्वादिभेदं ।
यो रक्षत्यक्षसाक्षादपि समवसृतेः क्षेत्र मेतद्विशेषात् ॥
तैलैः सिंदूरधूलीगुडकुसुमलसद्गंधकौसुंभवस्त्रै ।
रत्नौघश्चापि यज्ञे प्रमुदितहृदयं तं यजे क्षेत्रपालं ॥ ६ ॥

ॐ आँ क्रों ऱ्हीं प्रशस्तवर्ण सर्वलक्षणसंपूर्ण स्वायुधवाहनाचिन्हसपरि--वार हे क्षेत्रपाल अत्र आगच्छ २ संवौषट् । स्वाहा । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ ॐ ऱ्हीं क्षेत्रपालाय तैलाभिषेचनं करोमि स्वाहा । ॐ ऱ्हीं क्षेत्रपालाय सिंदूरधूलीसेचनं करोमि स्वाहा । ॐ ऱ्हीं क्षेत्रपालाय सुगंधगंधानुलेपनं करोमि स्वाहा । ॐ ऱ्हीं क्षेत्रपालाय कौसुंभवस्त्रवेष्टनंकरोमि स्वाहा । ॐ ऱ्हीं क्षेत्रपालाय पुष्पमालावेष्टनं करोमि स्वाहा । ॐ ऱ्हीं क्षेत्र--पालाय गुडमोदकार्पणं करोमि स्वाहा । ॐ ऱ्हीं क्षेत्रपालाय सुगंध--द्रव्यार्चनं करोमि स्वाहा । ॐ ऱ्हीं क्षेत्रपालाय जलं गंधं अक्षतान् पुष्पं चरुं दीपं धूपं फलं अर्घ्यं शांतिधारां समर्पयामि ॥

मागे ४४ पानांत जसे क्षेत्रपालाचि तेलाभिषेक शेंदूर, गंध, पुष्पमाला, आणि वस्त्रादिकानीं पूजा केली आहे, त्याप्रमाणें येथेही करून घेणें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ पंचकुमारपूजा ॥

वसंत–उत्खातपूरितशमीकृतसंस्कृतायां ।
पुण्यात्मनीयभगवन्मखमंडपोर्व्यां ॥
वास्त्वर्चनादिविधिलब्धिमखादिभागं ।
वेद्यां यजामि शशिभृद्दिशि वास्तुदेवं ॥

ॐ ह्रीं हे वास्तुकुमारदेव अत्र आगच्छ २ संवौषट् स्वाहा । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा । ॐ ह्रीं हे वास्तुकुमारदेव इदमर्घ्यं पाद्यं जलं गंधं अक्षतान् पुष्पं चरुं दीपं धूपं फलं बलिं स्वस्तिकं यज्ञभागं च यजामहे प्रतिगृह्यतां २ स्वाहा ॥ शांतिधारा ॥ १ ॥

इंद्रवज्रा– आयात भो वायुकुमारदेवाः । प्रभोर्विहारावसराप्तसेवाः ॥
यज्ञांगमुद्भेदसुगंधिशीत । मृद्वायुना शोधयताध्वरोर्वीं ॥

ॐ ह्रीं हे वायुकुमारदेव सर्वविघ्नविनाशनाय महीं पूतां कुरु २ हूं फट् स्वाहा । षड्दर्भपूलेन भूमिं संमार्जयेत् ॥ ॐ ह्रीं वायुकुमारदेव अत्र आगच्छ २ संवौषट् स्वाहा । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ ॐ ह्रीं हे वायुकुमारदेव इदमर्घ्यमित्यादि ॥ २ ॥

आयात भो मेघकुमारदेवाः । प्रभोर्विहारावसराप्तसेवाः ॥
गृण्हीत यज्ञं समुदीर्णशंपा । गंधोदकैः प्रोक्षत यज्ञभूमिं ॥

ॐ ह्रीं हे मेघकुमारदेव धरां प्रक्षालय २ अंहंसंवंझंठंक्षः फट् स्वाहा । षड्दर्भपूलोपात्तजलेन भूमिं सिंचेत् ॥ ॐ ह्रीं हे मेघकुमारदेव अत्र आगच्छ २ संवौषट् स्वाहा । ॐ अत्र तिष्ठ २ ठठ स्वाहा । ॐ० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ ॐ० ह्रीं हे मेघकुमारदेव इदमर्घ्यमित्यादि ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आयात भो वन्हिकुमारदेवा । आदानविद्यादिविधीयसेवाः ॥
भजध्वमिज्यां समिमां मखोर्वीं । ज्वालाकलापेन परं पुनीत ॥

ॐ ह्रीं हे वन्हिकुमारदेव ज्वल प्रज्वल अमिततेजसे स्वाहा । पद्द-र्भपूलानलेन भूमिं ज्वालयेत् ॥ ॐ०हे वन्हिकुमार अत्र आगच्छ२ संवौषट् स्वाहा । ॐ०हे व० अत्र तिष्ठ २ ठठ स्वाहा । ॐ०हे व०अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ ॐ ह्रीं हे वन्हिकुमारदेव इदमर्घ्यमित्यादि ॥४॥

नागाः समुत्थाय महीमुपेत्य । संचारशीलाः सुखिनः समर्थाः ॥
जिनाध्वरे षष्टिसहस्रसंख्याः । प्रतृप्यताऽनेन सुधारसेन ॥

ॐ ह्रीं हे भूषष्टिसहस्रसंख्येभ्यो नागेभ्योऽमृतांजलिं प्रसिंचामि स्वाहा । ईशान्यां दिशि नागसंतर्पणं ॥ ॐ० हे नागकुमारदेव अत्र आगच्छ २ संवौषट् स्वाहा । ॐ० हे ना० अत्र तिष्ठ २ ठठ स्वाहा । ॐ० हे ना० अत्र मम सन्निहितो भव २ वषट् स्वाहा ॥ ॐ ह्रीं हे नागकुमारदेव इदमर्घ्य-मित्यादि ॥ ५ ॥

॥ अथ [1]पुण्याहवाचनपरिधानन्यासनं ॥

श्रीनिर्जरेशाधिपचक्रपूर्वं इत्यादि पुण्याहवाचनं पठेत् ॥

उपजाति- पवित्रभूमिं परितो दिशासु । पूर्वादिकासु प्रथितान् प्रशस्तान् ॥
अशेषविघ्नोपशमाय दर्भान् । संस्थापयामो हरितान् क्रमेण ॥

ॐ ह्रीं दर्पमथनाय नमः स्वाहा । ब्रह्मादिदशदिक्षु दर्भाः[2] ॥ १ ॥
(दहाही दिशामध्यें दर्भ स्थापन करून घेणें.)

इंद्रवज्रा—गंधच्छटाभिः परितः प्रसिक्तां । काश्मीरसारेण कृतानुलेपां ॥
सुगंधिपुष्पप्रकरां धरित्रीं । यज्ञोचितां संप्रति चर्चयामि ॥

ॐ ह्रीं भूः स्वाहा । भूर्भूमिदेवते इदं जलं गृहाण २ । जलैर्गंधादिभिश्च भूम्यर्चनं ॥ २ ॥

---

१ पृष्ट ५० पहा.२ पृष्ट ६३ पहावें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दर्भं प्रस्तीर्य वस्त्रं वा वेत्रासनमथोऽपि वा ।
अत्रोपवेशनं कुर्वे वामे पल्यंकयोगतः ॥

ॐ ऱ्हीं अर्हं क्ष्मं ठठ मम दर्भासनं करोमि स्वाहा ॥ ३ ॥

॥ अथ इंद्रालंकारः ॥

मदीयपरिणामसमानविमलतमसलिलस्नानपवित्रीभूतसर्वांगयष्टिः । सर्वांगिनार्द्रहरिचंदनसौगंध्यादिग्विदिग्विवरो हंसांसधवलदुकूलांतरीयोत्तरीयः ॥

ॐ श्वेतवर्णे सर्वोपद्रवहारिणी सर्वजनमनोरंजिनी परिधानोत्तरीयं धारिणी हं २ झं २ वं २ सं २ तं २ पं २ परिधानोत्तरीयं धारयामि स्वाहा ॥ प्रस्त्राभरणं ॥ ४ ॥

गीति-- अतिनिर्मलमुक्ताफलललितं यज्ञोपवीतमतिपूतं ।
रत्नत्रयमिति मत्वा करोमि कलुषापहरणमाभरणं ॥

ॐ ऱ्हीं सम्यग्दर्शनज्ञानचारित्राय नमः स्वाहा यज्ञोपवीतसंधारणं ॥५॥

शार्दूल- धृत्वा शेखरपट्टहारपदकंग्रैवेयकालंबकं ।
केयूरांगदमध्यबंधुरकटीसूत्रं च मुद्रान्वितं ॥
चंचत्कुंडलकर्णपूरममलं पाणिद्वये कंकणं ।
मंजीरं कटकं पदे जिनपतेः श्रीगंधमुद्रांकितं ॥ ६ ॥

षोडशाभरणं ॥ अत्र शुद्धयंममंत्रपवित्रजलं परिषिंच्य दर्भपूलेन भूमिं संमार्जयेत् ॥ (येथें शुद्ध यंत्रमंत्रांनीं पवित्र झालेलें पुण्याहकलशाचें पाणी सिंपून दर्भानें यज्ञभूमि झाडावी.) ॐ ऱ्हीं झ्वंह्वंपःहः अर्हं सर्वशांतिं कुरु २ स्वाहा ॥ पुष्पांजलिः ॥

शालिनी—देवो दैत्यः किन्नरः खेचरेंद्रो । यक्षो रक्षश्चंद्रसूर्यादयश्च ।
नामं नामं यं समाराधयंति । ध्यायं ध्यायं तं जिनं पूजयामः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ ह्रीं अर्हं नमः 卐परमेष्ठिने जलं निर्वपामि स्वाहा। एवं गंधाद्यष्टविधार्चनं कुर्यात् ॥

स्रग्धरा—जाताः सर्वज्ञवक्त्राद् गणधरनिकरैर्विस्तृता वीध्रबोधै।
रंगोपांगादिभेदै स्तदनुमुनिजनैश्चापि दृग्भाविशेषात् ॥
श्रेयोमार्गप्रकाशे स्फुटरुचिविलसद्दीपिका सर्वलोक— ।
व्यापारस्य प्रमात्री त्रिभुवनमहिता शारदा पूज्यतेऽद्य ॥ १ ॥

ॐ ह्रीं *सरस्वत्यै नमः जलं ॥ प्रतिमादक्षिणभागे वाग्देवतार्चनं ॥

सिद्धांतसूक्तिसंकीर्णे श्रुतस्कंधवने घने ।
श्रुतकेवलिनः पादौ पूजयामि महामुनेः ॥ १ ॥

ॐ ह्रीं गणधरपरमेष्ठिने जलं ॥ प्रतिमावामभागे गणधरार्चनं ॥

स्रग्धरा—श्रीमज्जैनेंद्रमार्गे प्रमुदितहृदयः साधुलोकोपकारी ।
मिथ्यादृष्टिप्रयोगप्रकटितनिखिलोन्मार्गविध्वंसनोत्कः ॥
नानापुण्यप्रदेशप्रविहरणपटुर्विक्रियाशक्तियुक्तः ।
श्रीमान् यक्षाधिराजः प्रचुरतरमहा पूज्यते पुण्ययज्ञे ॥ १ ॥

ॐ ह्रीं कलियुगप्रबंधदुर्मार्गविनाशन परमसन्मार्गप्रतिपालयन् भगवन् यक्षेश्वर जलादिकमर्चनं गृहाण २ स्वाहा ॥ यक्षार्चनं दक्षिणे ॥

स्रग्धरा—लोके सत्वानुकंपां परपरमजिनेंद्रोक्तसद्धर्मसेवां ।
दक्षां न्यक्षां मुमुक्षुव्रजमपि परमादादरादानमंतीं ॥
स्याद्वादन्यायखड्गक्षपितकलियुगानेकदुर्मार्गकक्षां ।
यक्षीं यक्ष्यामि यज्ञे त्रिजगदधिपतेः सर्वविघ्नोपशांत्यै ॥

ॐ ह्रीं कलियुगप्रबंधदुर्मार्गविनाशनपरे सन्मार्गप्रतिपालिनि भगवति यक्षिदेवि जलादिकमर्चनं गृहाण २ स्वाहा ॥ शासनदेवतार्चनं वामे ॥ इत्येवं होमकुंडपश्चिमभागस्थपरमब्रह्मसपर्यामभिधाय तत्कुंडमलंकृत्य

卐 अरहंत पूजा करणें. * सरस्वति पूजन करणें, १ गणधरपूजा करून घेणें.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भूम्यर्चनाक्रमेणाभ्यर्च्य पुण्याहकलशं संस्थाप्य सर्वोपद्रवनाशनकृज्जलयंत्रं तन्मध्ये निक्षिप्य क्रमादाराधयिष्यामः ॥ (याप्रमाणें जलहोमकुंडाच्या पश्चिमभागीं असलेल्या श्रीजिनप्रतिमेची पूजा करून, त्या जलहोमकुंडास अलंकार करून, भूम्यर्चनाक्रमानें अर्चना करून, पुण्याहकलश स्थापून, त्या पुण्याहकलशांत सर्वोपद्रव नाशकरणारें जलयंत्र ठेवून, पुढें सांगितल्याप्रमाणें पूजा चालविणें.)

अनु–हस्तप्रमाणविस्तारमायामेनावगाढतः ।
चतुरंगुलविस्तारमेखलात्रितयान्वितं ॥ १ ॥

इंद्रवज्रा–श्रीप्रातिहार्याष्टकवैभवेऽस्मिन् । श्रीविष्णुभृत्येशफणींद्रवंद्यं ॥
नत्वा जिनेंद्रं जलहोममेवं । वक्ष्ये प्रशांत्यै विषमग्रहाणां ॥ २ ॥

शार्दूल–यस्तद्वर्तुलकुंडलक्षणमिदं श्रीवारिहोमो जिनैः ।
प्रोक्तं ताम्रमृदादिवस्तुरचितं कुंडं समारोप्यते ॥
कुर्याच्छ्रीतिथिदेवता ग्रहसुरान् शेषांश्च संतर्पणं ।
शांत्यर्थं जलहोम मिष्टममलं दुष्टग्रहाणां बुधः ॥ ३ ॥

सत्कुर्यादग्निहोमं च जलहोमंच सद्विजः ।
प्रत्यग्न्यस्यच यो जैनो वारिशासनसंयुतः ॥ ४ ॥

श्रीखंडतंडुलस्रग्भिः संभूषितगलं वरं ।
शुद्धतीर्थोदकैः पूर्णं जलकुंडं महाम्यहं ॥ ५ ॥

सुधौतशोभिते व्रीहीपुंजे जिनमहामहे ।
संस्थाप्य पूजकाचार्यो जलहोमं समाचरेत् ॥ ६ ॥

ॐ नमोऽर्हते भगवते श्रीमते पद्ममहापद्मतिगिंछकेसरीमहापुंडरीकपुंडरीकगंगासिंधुरोहिद्रोहितास्याहरिद्धरिकांतासीतासीतोदानारीनरकांतासुवर्णकूलारूप्यकूलारक्तारक्तोदाद्यनेकनदीनदजलप्रवाहपरिपूर्णमधुरजलधीक्षुरससमुद्रघृतार्णवक्षीरसागरप्रभृत्यखिलतीर्थदेवतामणिमयमंगलकलशसंभृतं नवरत्नसुगंधचूर्ण पुष्पफलकुशाद्यैश्च रचितं तीर्थोदकं-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पवित्रं कुरु २ झौं २ वं मं हं सं तं पं झ्वीं हं सः असिआउसा जलशुद्धिं कुरु २ नमः स्वाहा ॥ जलपवित्रकरणमंत्रः ॥ (येथें हा मंत्र म्हणत जलहोमकुंडाच्या पश्चिम भागीं उजवीकडे मांडलेल्या कुंभावर हातानें पाणी धरणें; म्हणजे त्या कुंभांतील पाणीं पवित्र होतें.)



हें जलयंत्र होय. हें यंत्र, एका लहानशा ताटांत लिहून तयार करणें.

अनु—संपूर्णपूर्णकुंभेषु गंधचंदनचर्चितं ।
कुंडाय च जलं दद्यात् पश्चात् पूजां समाचरेत् ॥ ४ ॥

(येथें मंत्रानें ज्या कुंभाचें पाणी पवित्र झालें आहे तो कुंभ त्या जलकुंडांत ओतणें. नंतर पुढील पूजा चालविणें.)

शार्दूल—झंठं यत् स्वरवेष्ठितं विधुवृतं पंवं च दिकोणयो-- ।
रूर्ध्वाधः श्रितपंचसप्तदलभृत् पद्मद्वयांभःपुरः ॥
बाह्ये मंत्रतले विलिख्य कुशलै स्तद्यंत्रगंधार्चितं ।
शुद्ध्यर्थं निजमूर्ध्नि मंत्रितपयः सिंचाम्यहं पावनं
यंत्रमत्रलिख्यते ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनु०—पश्चिमाभिमुखः सूरिः पद्मासनसमन्वितः ।
उपविश्याब्जमादाय स्थापयेत् कुंडमध्यतः ॥ ९ ॥

पद्मासनं कुर्यात् ॥ (येथें पंडितानें पश्चिमेकडे तोंड करून होमकुंडाच्या पूर्वेस मांडलेल्या दर्भासनावर पद्मासनानें बसणें आणि एक कमल घेऊन जलहोमकुंडाच्या मध्यभागी ठेवणें.)

उपजाति—ततः परं शंबरनामधेयं । क्षिप्त्वा च यंत्रं लसदंबुकुंडे ।
शीतोष्णजातज्वरविग्रहाणां । नृणां प्रशांत्यै प्रयजेयमित्थं ॥१॥

(त्यानंतर लिहून तयार केलेलें तें श्रेष्ठ जलयंत्र जलकुंडांत ठेवून, शीतज्वर व उष्णज्वर ज्यांच्या शरीरास प्राप्त झाले आहेत अशा मनुष्यांच्या शांति-करितां पुढें सांगितल्याप्रमाणें त्या यंत्राची पूजा चालविणें.)

॥ अथ जलयंत्रपूजा ॥

वसंत—स्वच्छांबुगंधविमलाक्षतपुष्पजातै- ।
नैवेद्यदीपवरधूपफलोत्कारार्घ्यैः ।
शीतोष्णतप्तजनशांतिकरी हिमांशुः ॥
श्रीवारियंत्रमनघं महयामि भक्त्या ॥ १ ॥

आगच्छ तिष्ठ तिष्ठेति सन्निधि मे भज शंबराख्ययंत्र त्वं ।
आह्वानक्रियादिकयाऽऽनंदान्नौमि शांतिकृते ॥

ॐ ऱ्हीं शंबरनामधेययंत्र अत्र अवतर २ संवौषट् स्वाहा । ॐ० अत्र तिष्ठ २ ठठ स्वाहा । ॐ० अत्र मम सन्निहितं भव २ वषट् स्वाहा ॥

॥ अष्टकम् ॥

दोधक—अंबुभिरंबुदमार्गतटिन्यु । च्चुंबितशुंभदनूनसुगंधैः ।
शंबरशत्रुविडंबसमक्षं । शंबरचक्रमहं परिचाये ॥
ॐ ऱ्हीं शंबरनामधेयाय जलं ॥ १ ॥
गंधगजेंद्रकपोलमिलिंपाऽ- । नंतकरींदुकरंबपटीरैः ।
शंबर० ॥ ॐ ऱ्हीं शं० ॥ गंधं ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अक्षयमोक्षबलाक्षसमक्षै । रक्षतमूर्तिभिरक्षतपुंजैः ॥
शंबर० ॥ ॐ ह्रीं शं० ॥ अक्षतान् ॥ ३ ॥
जातिजपांबुजमल्लिसुमल्ली । केतकिकैरवजातलतांतैः ॥
शंबर० ॥ ॐ ह्रीं शं० ॥ पुष्पं ॥ ४ ॥
इक्षुगुडाज्यपयःपरिपाकै । रक्षहरैर्वरभक्ष्यसमूहैः ॥
शंबर० ॥ ॐ ह्रीं शं० ॥ चरुं ॥ ५ ॥
शोणमहामणिनिर्मितदीपैः । प्राणिमनस्तिमिराहतदक्षैः ॥
शंबर० ॥ ॐ ह्रीं शं० ॥ दीपं ॥ ६ ॥
कुंकुमकृष्णागरुभरजातैः । प्रेंखखदिरतरुधूपसमूहैः ॥
शंबर० ॥ ॐ ह्रीं शं० ॥ धूपं ॥ ७ ॥
भव्यभवज्वरनाशनहेतु । दिव्यफलैः सकलामयभेदैः ॥
शंबर० ॥ ॐ ह्रीं शं० ॥ फलं ॥

मालिनी- सलिलसदकगंधोत्फुल्लदीपप्रधूपैः ।
प्रवरचरुफलादिद्रव्यसंदर्भगर्भैः ॥
कनकमयसुपात्रेष्वर्घ्यमुद्धारयामो ।
जिनवरपदमूले शंबरस्योद्धरामि ॥ अर्घ्यं ॥ शांतिधारा ॥

अनुष्टुभ्- तिथिग्रहसुरैर्लोकपालैरप्यभिवेष्टितं ।
होमकुंडं शुभं प्राहुः सर्वशांतिक्रियास्वपि ॥ १ ॥

॥ अथ प्रथममेखलाभ्यंतरे तिथिदेवतार्चनं ॥

वसंत-- जैनेंद्रशासनरतास्तिथिदेवतास्ता ।
यक्षादयो जिनमुखाश्रितयज्ञभागाः ॥
वस्त्रायुधाभरणलक्षणवाहनांका ।
निघ्नंतु विघ्ननिचयं हवनोत्सवेऽस्मिन् ॥ १ ॥

ॐ ह्रीं क्रों पंचदशतिथिदेवता अत्र आगच्छत २ संवौषट् स्वाहा ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ॐ० अत्र तिष्ठत २ ठठ स्वाहा । ॐ० अत्र मम सन्निहिता भवत २ वषट् स्वाहा ।।

इंद्रवज्रा- यक्षादिकान् जैनमहामहेऽस्मिन् ।
पंचादशाऽहं तिथिनिर्जरांस्तान् ॥
हुत्वा च संस्थाप्य विधिक्रमेण ।
प्रीत्या मुखांस्तैः परितर्पयामि ॥ २ ॥

स्रग्धरा- यक्षो वैश्वानराक्षिः प्रबल तरमहा मोहरक्षः सुदेवौ ।
नैऋत्याक्षिः समन्तादसुरगृहशिशुः पन्नगो विश्वमाली ॥
आगत्य स्वायुधाद्यैरिह तु चमरवैरोचनौ विद्यमारौ ।
विश्वर्तिपडाशनौ ये जिनमहसमये तान्यजे सुश्रियै ते ॥ १ ॥

ॐ ह्रीं क्रों यक्षादिपंचदशतिथिदेवा इदमर्घ्यं पाद्यं जलं गंधं अक्षतान् पुष्पं चरुं दीपं धूपं फलं बलिं स्वस्तिकं यज्ञभागं च यजामहे प्रतिगृह्यतां २ स्वाहा ।। शांतिधारा ।। इति तिथिदेवतार्चनं ।।

।। अथ द्वितियमेखलायां नवग्रहार्चनं ।।

उपजाति-निर्माय नित्यं क्षणिकादिकानां । प्रदक्षिणीकृत्य च मंदराद्रिं ।।
स्फुरंति कांत्या गगनांगणे ते । सर्वे ग्रहा होममहे भवंतु ।।१।।

ॐ आँ क्रों ह्रीं प्रशस्तवर्णाः सर्वलक्षणसंपूर्णाः स्वायुधवाहनवधूचिन्ह-सपरिवारा हे नवग्रहदेवात्रागच्छत २ संवौषट् स्वाहा । ॐ० अत्र तिष्ठत २ ठठ स्वाहा । ॐ० अत्र मम सन्निहिता भवत २ वषट् स्वाहा ।।

शार्दूल- आदित्यादिमहाग्रहा नवविधाः सर्वे जिनेंद्रोत्सवे ।
कल्याणाभिरताः प्रसन्नवदना विघ्नौघविध्वंसकाः ।।
नानावर्णतनुप्रपूरितग्रहा ज्योतिःप्रभावात्मकाः ।
शुद्धाः यज्ञमहा भवंतु सहिता वध्वायुधांकादिभिः ॥ २ ॥

वसंत-- आदित्यसोमधरणीसुतसोमसूनु ।
जीवाऽसुरार्चितशनैश्चरराहुकेतून् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सर्वान् ग्रहान् सपरिवारवधूसमेतान् ।
भर्तुर्महोत्सवविधावहमा[1]ह्वयामि ॥

ॐ आँ क्रों ऱ्हीं आदित्यादिनवग्रहदेवा इदमर्घ्यमित्यादि ॥ इति नवग्रहार्चनं ॥

॥ अथ तृतीयमेखलायां द्वात्रिंशदिंद्रार्चनं ॥

अनु—भवनव्यंतरज्योतिष्कद्वादशाद्यानिवासिनः ।
द्वात्रिंशतःसुरानर्घ्यैरंचेऽहं हवनोत्सवे ॥

ॐ आँ क्रों ऱ्हीं प्रशस्त० हे द्वात्रिंशदिंद्रा अत्रागच्छत २ संवौषट् स्वाहा। ॐ० अत्र तिष्ठत २ ठठ स्वाहा। ॐ० अत्र मम सन्निहिता भवत २ वषट् स्वाहा ॥

शार्दूल—ज्योतिष्का भवनामरास्तदनु वा सुव्यंतराः स्वर्गिणो ।
ये ये स्वायुधवाहनादिविभवा द्वात्रिंशदिंद्रादयः ॥
तांस्तांश्चारुचतुर्विधान् प्रियतयाऽत्राऽऽहूय भक्त्या पुनः ।
कुर्वेऽहं विधिवत् सुवस्तुभिः सुसिद्धाष्टाभिरिष्टिं भुवि ॥ २ ॥

मालिनी—असुरभुजगविद्युत्सत्सुपर्णाग्निवात— ।
स्तनितजलधिनाथद्वीपकाष्ठाकुमारान् ॥
दशभवननिवासान् स्वायुधस्त्रीसमेतान् ।
जिनपतिसवनार्थं प्रार्थयाम्यागमार्थं ॥

ॐ आँ क्रों ऱ्हीं असुरकुमारादिभवनेंद्रा इदमर्घ्यमित्यादि ॥ ३ ॥

आर्या—किंन्नरकिंपुरुषगरुडगंधर्वाधीशयक्षराजेंद्रान् ॥
राक्षसभूतपिशाचान् जिनशासनव्यंतरानष्टौ ॥

ॐ आँ क्रों ऱ्हीं किन्नराद्यष्टविधव्यंतरेंद्रा इदमर्घ्यमित्यादि ॥

वसंत—सन्मार्गवर्तनप्रकाशकलौ सुवृत्त-- ।
लोकोपकारिकिरणेष्टवनौऽहमिंद्रौ ॥

---

१ यजामि इति साधु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ध्वस्ताऽखिलांधतमसौ सवने जिनस्य ।
तीव्रांशुशीतकिरणावहमाह्वयामि ॥
ॐ आँ क्रों ह्रीं सोमेंद्रादिपंचविधज्योतिरिंद्रा इदमर्घ्यमित्यादि ।।४॥

सौधर्मकल्पपतिमीशसनत्कुमार- । माहेंद्रपद्मभवलांतवशुक्रकल्पान् ॥
देवं सतारसहितानत माह्वयामि । सप्राणतारणसुरेंद्रमदच्युतेंद्रं ॥
ॐ आँ क्रों ह्रीं द्वात्रिंशदिंद्रा इदमर्घ्यमित्यादि ॥ ५ ॥

॥ अथ दिक्पालकपूजा ॥

इंद्रवज्रा--पूर्वादिकाष्ठः शुचिलोकपाला । होमोत्सवं वा परिपालयध्वं ।
गृण्हंतु पूर्णाहुतिमादरेण । त्वदीयनामार्जितहोमशांत्यै ॥ १ ॥

आर्या-सुरयमवरुणनिध्रीशान् हुतवहराक्षससमीरगौरीशान् ।
यज्ञेऽर्हतामिहेंदुं पातालेश माह्वये भक्त्या ॥ १ ॥

स्रग्धरा--पूर्वाशाधीशहव्याशनमहिषगता नैऋते पाशपाणे ।
वायोयक्षेंद्र चंद्राभरण फणिपते रोहिणीजीवितेश ॥
सर्वेऽप्यायात वाहायुधयुवतिजनैः सार्धं मों भूर्भुवः स्वः ।
स्वधा स्वाहा गृण्हीध्वं चरुममृतमिदं स्वस्तिकं यज्ञभागं ॥
ॐ आँ क्रों ह्रीं इंद्रादिदशदिक्पाला इदमर्घ्यमित्यादि ॥ यस्यार्थं० ॥
शांतिधारा ॥

॥ अथ सप्तधान्याहुतिः ॥

वसंततिलका-प्रस्थप्रमाणचणकाढकमाषमुद्ग-- ।
गोधूमशालियवमिश्रितसप्तधान्यैः ॥
होमः पृथग्विधृतमुष्टिभिरंबुकुंडे ।
वाराश्च सप्त विषमग्रहदोषशांत्यै ॥ १ ॥

(हरभरे,तुरी,उडीद, मूग, गहू, साळी व भात (जव) हीं ७ धान्यें होत. ह्यांतील प्रत्येक धान्य शेरभर शेरभर मोजून घेऊन एकंदर मिश्र करणें याला सप्त--

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धान्य ह्मणतात. पुढें सांगितलेल्या अकरा मंत्रानीं हे मूठभर मूठभर घेऊन जलहोमकुंडांत त्रिषमग्रहदोषान्या शांतिकरितां ७ वार आहुति देणें.)

॥ मंत्रः ॥

ॐ ऱ्हीं इंद्र दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ ऱ्हीं अग्ने दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ ऱ्हीं यम दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ ऱ्हीं नैऋत्य दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ ऱ्हीं वरुण दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ ऱ्हीं पवन दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ ऱ्हीं धनद दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ ऱ्हीं ईशान दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ ऱ्हीं धरणींद्र दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ ऱ्हीं सोम दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ ऱ्हीं शंबरनामधेयाय स्वाहा ॥

(या मंत्रानें सप्तधान्यहुति देणें.)

अनु--तर्पणं पीठिकामंत्रैः कुसुमाक्षतचंदनैः ।
मिश्रांबुपूर्णपाणिभ्यां कुर्वंतु परमेष्ठिनां ॥ १ ॥

ॐ ऱ्हाँ अर्हत्परमेष्ठिनस्तर्पयामि । ॐ ऱ्हीं सिद्धपरमेष्ठिनस्तर्पयामि । ॐ ऱ्हूँ आचार्यपरमेष्ठिनस्तर्पयामि । ॐ ऱ्हौं अुपाध्यायपरमेष्ठिनस्तर्पयामि । ॐ ऱ्हः सर्वसाधुपरमेष्ठिनस्तर्पयामि ॥ गंधपुष्पाक्षतदर्भखंडान्वितजलेन मितपात्रस्थितेन पंचपरमेष्ठिनां तर्पयामि ॥ ॐ ऱ्हीं सुरेंद्रादयो दिक्पालाः शंबरनामधेयाश्च सर्वेऽप्येते चणकादिसप्तधान्यहोमैराराधिताः प्रसन्नवंतो भवंतु । तत्प्रसादादस्य यजमानस्य शांतिर्भवतु । संघस्य शांतिर्भवतु । राज्ञः शांतिर्भवतु । गृहस्य शांतिर्भवतु । लोकस्य शांतिर्भवतु ॥ जलधारानिपातेन प्रार्थना ॥ इतिसप्तधान्याहुतिः ॥

॥ अथ त्रिधान्याहुतिः ॥

वसंततिलका-हुत्वा स्वमंत्रचितमंबुनि सप्त सप्त ।
मुष्टिगृहीततिलशालियवं च प्रस्थं ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नित्यादृतष्ठुतसमाद्धिरथांबुकुंडे ।
एकस्थदर्शि वरदंतु सदा ग्रहा वः ॥ १ ॥

(तीळ, साळी व भात (जव) हीं ३ धान्यें होत. ह्यांतीलही प्रत्येक धान्य शेरभर शेरभर मोजून घेऊन एकंदर मिश्र करणें याला त्रिधान्य ह्मणतात. पुढील प्रत्येक मंत्रानें हें मूठभर मूठभर घेउन त्याच जलहोमकुंडात ७ वार आहुति देणें. येणेंकरून सर्व ग्रह सदोदीत प्रसन्न होतात.)

॥ मंत्रः ॥

ॐ आँ क्रों ऱ्हीं हूं फट् आदित्यमहाग्रह दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ० सोममहाग्रह दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ० कुजमहाग्रह दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ० बुधमहाग्रह दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ ०बृहस्पतिमहाग्रह दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ० शुक्रमहाग्रह दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ० शनिमहाग्रह दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ० राहुमहाग्रह दातुरस्य सर्वशांतिं कुरु २ स्वाहा । ॐ० केतुमहाग्रह दातुरस्य सर्वशांतिं कुरु २ स्वाहा ॥ (या मंत्रानें त्रिधान्याहुति देणें.) तर्पणं पीठिकामंत्रैः ॥ इत्यादिपंचपरमेष्ठिनां तर्पयामि ॥ येथेही मागील— प्रमाणें तर्पण देणें.) ॐ ऱ्हीं आदित्यादयो नवग्रहाः सर्वेऽप्येते तिला— दित्रिधान्यहोमैराराधिताः प्रसन्नवंतो भवंतु । तत्प्रसादादस्य यजमानस्य शांतिर्भवतु । संघस्यशांतिर्भवतु । राज्ञः शांतिर्भवतु । गृहस्य शांतिर्भवतु । लोकस्य शांतिर्भवतु । जलधारानिपातेन प्रार्थना ॥ इति त्रिधान्याहुतिः ॥

॥ अथ जलतर्पणानि ॥

ॐ ऱ्हीं सत्यजाताय नमः । ॐ ऱ्हीं अर्हज्जाताय नमः । ॐ ऱ्हीं परमजाताय नमः । ॐ ऱ्हीं अनुपमजाताय नमः । ॐ ऱ्हीं स्वप्रदाय नमः । ॐ ऱ्हीं अचलाय नमः । ॐ ऱ्हीं अक्षयाय नमः । ॐ ऱ्हीं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अव्याबाधाय नमः । ॐ ह्रीं अनंतज्ञानाय नमः । ॐ ह्रीं अनंत-दर्शनाय नमः । ॐ ह्रीं अनंतवीर्याय नमः । ॐ ह्रीं अनंतसुखाय नमः । ॐ ह्रीं निरजसे नमः । ॐ ह्रीं निर्मलाय नमः । ॐ ह्रीं अछेद्याय नमः । ॐ ह्रीं अभेद्याय नमः । ॐ ह्रीं अजराय नमः । ॐ ह्रीं अमराय नमः । ॐ ह्रीं अप्रमेयाय नमः । ॐ ह्रीं अगर्भवासाय नमः । ॐ ह्रीं अक्षोभ्याय नमः । ॐ ह्रीं अविलीनाय नमः । ॐ ह्रीं [1]परमपुरुषाय नमः । ॐ ह्रीं परमकाष्ठयोगरूपाय नमः । ॐ ह्रीं लोकाग्रनिवासिने नमः । ॐ ह्रीं परमसिद्धेभ्यो नमः । ॐ ह्रीं अर्हत्सिद्धेभ्यो नमः । ॐ ह्रीं केवलिसिद्धेभ्यो नमः । ॐ ह्रीं अंतकृत्सिद्धेभ्यो नमः । ॐ ह्रीं परंपरासिध्येभ्यो नमः । ॐ ह्रीं अनादिपरंपरासिद्धेभ्यो नमः । ॐ ह्रीं अनाद्यनुपमसिद्धेभ्यो नमः । ॐ ह्रीं सम्यग्दृष्टिभ्यो नमः । ॐ ह्रीं आसन्नभव्येभ्यो नमः । ॐ ह्रीं निर्वाणपूजार्हेभ्यो नमः । ॐ ह्रीं [2]शंवरनामधेयाय नमः ।

सेवाफलं षट्परमस्थानं भवतु । अपमृत्युविनाशनं भवतु । समाधिमरणं भवतु । तर्पणं पीठिकामंत्रैः इत्यादिपंचपरमेष्ठिनां तर्पयामि ॥ परम-पीठिकारूपदिव्यमंत्राभिधेयास्तेऽनादिसिद्धा जातिमंत्ररूपार्हन्मंत्रादयो जलाहुतयः समाराधिताः प्रसन्नवंतो भवंतु । तत्प्रसादादस्य यजमानस्य शांतिर्भवतु । संघस्य शांतिर्भवतु । राज्ञः शांतिर्भवतु । गृहस्य शांति-र्भवतु । लोकस्य शांतिर्भवतु । जलधारानिपातेन प्रार्थना ॥ इति जलतर्पणानि ॥

॥ अथ पुनर्जलतर्पणानि ॥

ॐ ह्राँ अर्हद्भ्यो नमः स्वाहा । ॐ ह्रीं सिद्धेभ्यो नमः स्वाहा । ॐ ह्रूँ सूरिभ्यो नमः स्वाहा । ॐ ह्रौं पाठकेभ्यो नमः स्वाहा । ॐ

---

१ परमघनाय इत्यपि २ अग्नींद्राय नमः इत्यपिपाठः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्‍हः सर्वसाधुभ्यो नमः स्वाहा । ॐ र्‍हीं जिनधर्मेभ्यो नमः स्वाहा । ॐ र्‍हीं जिनागमेभ्यो नमः स्वाहा । ॐ र्‍हीं जिनचैत्येभ्यो नमः स्वाहा । ॐ र्‍हीं जिनचैत्यालयेभ्यो नमः स्वाहा । ॐ र्‍हीं सम्यग्दर्शनाय नमः स्वाहा । ॐ र्‍हीं सम्यग्ज्ञानाय नमः स्वाहा । ॐ र्‍हीं सम्यक्चारित्राय नमः स्वाहा । ॐ र्‍हीं जयाद्यष्टदेवताभ्यो नमः स्वाहा। ॐ र्‍हीं रोहिण्यादिषोडशविद्यादेवताभ्यो नमः स्वाहा । ॐ र्‍हीं चतुर्विंशतियक्षेभ्यो नमः स्वाहा । ॐ र्‍हीं चतुर्विंशतियक्षीभ्यो नमः स्वाहा। ॐ र्‍हीं दशविधभवनवासिभ्यो नमः स्वाहा। ॐ र्‍हीं अष्टविधव्यंतरेभ्यो नमः स्वाहा । ॐ र्‍हीं पंचविधज्योतिष्केभ्यो नमः स्वाहा । ॐ र्‍हीं द्वादशकल्पवासिभ्यो नमः स्वाहा। ॐ र्‍हीं अष्टदिक्कन्यकाभ्यो नमः स्वाहा । ॐ र्‍हीं दशलोकपालकेभ्यो नमः स्वाहा । ॐ र्‍हीं शंबरनामधेयाय नमः स्वाहा । ॐ स्वाहा । भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । तर्पणं पीठिकामंत्रैः इत्यादि । पंचपरमेष्ठिनां तर्पयामि ।। अर्हदादयो नवदेवताः । सम्यग्दर्शनज्ञानचारित्राणि । जयाद्यष्टदेवताः । रोहिण्यादयो विद्यादेवताश्च । गोमुखादयो यक्षेंद्राः चक्रेश्वर्यादयः शासनदेवताश्च । असुरेंद्रादयः सर्वे सुरेंद्राः । श्रीप्रभृतयो दिक्कन्यकाः । इंद्रपौरस्त्यदिक्पालाः । शंबरनामधेयश्च । एते सर्वेऽपि देवता जलहोमैः समाराधिताः सुप्रसन्ना भवंतु । तत्प्रसादादस्य यजमानस्य शांतिर्भवतु । संघस्य शांतिर्भवतु । राज्ञः शांतिर्भवतु । गृहस्य शांतिर्भवतु । लोकस्य शांतिर्भवतु । जलधारानिपातेन प्रार्थना ।। इति पुनर्जलतर्पणाणि ।। ॐ र्‍हीं सम्यग्दर्शनाय नमः स्वाहा । ॐ र्‍हीं सम्यग्ज्ञानाय नमः स्वाहा । ॐ र्‍हीं सम्यक्चारित्राय नमः स्वाहा । इमान्मंत्रान् त्रिरुच्चार्य जलं सिंचेत्[1]।।

---

१ एका ग्रंथांत सिंचेत् पाठ आहे. आणि एका ग्रंथांत क्षिपेत् पाठ आहे. आणखी एका ग्रंथांत पिबेत् पाठ आहे. यांत सिंचेत्—सेचन करणें, क्षिपेत्-टाकणें. आणि पिबेत्-पिणें, याप्रमाणें अर्थ होतात. हे सर्व अर्थ बरोबर आहेत.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ अथ आचमनम् ॥

ॐ ३ ऱ्हीं ३ झ्वीं २ क्ष्वीं वं मं हं सं तं पं द्रां द्रीं हं सः स्वाहा। द्वादशांगस्पर्शनम् ॥ ॐ भूर्भुवःस्वः असिआउसा अर्हं प्राणायामं करोमि स्वाहा ॥ इमं मंत्रं नासिकामंगुष्ठानामिकाग्रेण धृत्वा त्रिवारान् जपेत् ॥ (हा मंत्र, अंगुष्ठ व अनामिका या दोनी बोटांच्या शेवटानें नाक धरून तीन वेळा म्हणून जप करणें.)

शार्दूल—दिक्पालाः प्रतिसेवनाकुलजगद्दोषार्हदंडोद्भटाः ।
सौधर्मः प्रणयेन बद्धभगवत्सेवानियोगेन वा ॥
पूजापात्रकराग्रतः सदसुपेत्योपात्य बालार्चनं ।
प्रत्यूहान् निखिलान् निरस्यतु जिनस्नानोत्सवोत्साहिनां ॥

आदेषणार्घ्यः ॥

ॐ आँ क्रों ऱ्हीं प्रशस्तवर्ण सर्वलक्षणसंपूर्णस्वायुधवाहनवधूचिन्हस-परिवाराः । हे पंचदशतिथिदेवा नवग्रहदेवता द्वात्रिंशदिंद्रा दशलोक-पालाः शंबरनामधेयादि सर्वे देवता इदं जलादिकमर्चनं यूयमत्र गृण्हिध्वं २ । ॐ भूर्भुवः स्वाहा ॥ पूर्णाहुतिः ॥ (येथें पूर्णार्घ्य करणें.) अतःपरं पुण्याहमंत्रेण सिंचेत् शांत्यष्टकं पठेत् ॥

॥ अथ पुण्याहमंत्रम् ॥

शार्दूल--कर्मारातिचतुष्टयीक्षयमगात् संजातवान् बोधवान् ।
वाणी विश्वहितंकरा समभवद्विश्वार्थसंदर्शिनी ॥
येषां देवमहेशितं श्रुतपदं भव्याब्जपूष्णा सताम् ।
लक्ष्मीः शांतिमनारतं जिनवरान् सेवंतु ते भाविकाः ॥ १ ॥

अनेन यंत्राग्रे शांतिधारां प्रकल्प्येत्थं बलिं दद्यात् ॥ ॐ अर्हद्भ्यो नमः । सिद्धेभ्यो नमः । सूरिभ्यो नमः । पाठकेभ्यो नमः । सर्वसाधुभ्यो नमः । अतीतानागतवर्तमानत्रिकालगोचरानंतगुणपर्या-यात्मकवस्तुपरिच्छेदकसम्यग्दर्शनज्ञानचारित्राद्यनेकगुणाधारपंचपरमे-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ष्ठिभ्यो नमो नमः ॥ ॐ पुण्याहं ३ । प्रीयंतां ३ । वृषभादिमहतिमहावीरवर्धमानपर्यंततीर्थंकरपरमदेवाः । तत्समयपालिनोऽप्रतिहतचक्रचक्रेश्वरीप्रभृतिचतुर्विंशतिशासनदेवताः । गोमुखयक्ष प्रभृतिचतुर्विंशतियक्षाः । आदित्यचंद्रमंगलबुधबृहस्पतिशुक्रशनिराहुकेतुप्रभृत्यष्टाशीतिग्रहाः । वासुकी शंखपाल कर्कोटक कुलिकानंत तक्षक पद्ममहापद्म जय विजयनागाः । देवनागयक्षगंधर्वब्रह्मराक्षसभूतव्यंतरप्रभृतिभूताः । सर्वेऽप्येते जिनशासनवत्सलाः । ऋष्यार्जिकाश्रावकश्रावकी यष्टृ याजक राज मंत्रि पुरोहित सामंत रक्षक प्रभृति समस्तलोकसमूहानां शांतिवृद्धितुष्टिक्षेमकल्याणस्वायुरारोग्यप्रदाभवंतु । सर्वसौख्यप्रदाश्च संतु । देशराष्ट्रपुरेषु च सर्वे अनिष्टाः चोरारिमारीदुर्भिक्षावग्रहविघ्नौघदुष्ट ग्रहभूतपिशाच शाकिनीप्रभृतयो देवाः प्रलयं यांतु । राजप्रभृतिसमस्तलोकाः सततं जिनधर्मवत्सलाः पूजादानव्रतशीलमहोत्सवप्रभृतिसंपादिता भवंतु । चिरकालं नंदयंतु । अत्रस्थभव्यप्राणिनः संसारसागरं लीलयोत्तीर्य अनुपमसिद्धिसौख्यमनंतकालमनुभवंतु । इतश्चाशेषप्राणिगणतरणभूतं जिनशासनं नंदत्विति स्वाहा ॥ इति पठित्वा सर्वतः पुष्पाक्षतादिभिर्बलिं दद्यात् । (येथें बलि देणें त्याशिवाय विधि पूर्ण होत नाहीं.) इति पुण्याहमंत्रम् ॥

॥ अथ शांत्यष्टकम् ॥

शार्दूल- न स्नेहाच्छरणं प्रयांति भगवन् पादद्वयं ते प्रजा ।
हेतुस्तत्र विचित्रदुःखनिचयः संसारघोरार्णवः ॥
अत्यंतस्फुरदुग्ररश्मिनिकरव्याकीर्णभूमंडलो ।
ग्रैष्मःकारयतींदुपादसलिलच्छायानुरागं रविः ॥ १ ॥
क्रुद्धाशीविषदष्टदुर्जयविषज्वालावलीविक्रमो ।
विद्याभेषजमंत्रतोयहवनैर्याति प्रशांतिं यथा ॥
तद्वत्ते चरणारुणांबुजयुगस्तोत्रोन्मुखानां नृणां ।
विघ्नाः कायविनायकाश्च सहसा शाम्यंत्यहो विस्मयाः ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संतप्तोत्तमकांचनक्षितिधरश्रीस्पर्धिगौरद्युते ।
पुंसां त्वच्चरणप्रणामकरणात् पीडाः प्रयांति क्षयं ॥
उद्यद्भास्करविस्फुरत्करशतव्याघातनिष्कासिता ।
नानादेहिविलोचनद्युतिहरा शीघ्रं यथा शर्वरी ॥ ३ ॥
त्रैलोक्येश्वर भंगलब्धविजयादत्यंतरौद्रात्मकान् ।
नानाजन्मशतांतरेषु पुरतो जीवस्य संसारिणः ॥
को वा प्रस्खलतीह केन विधिना कालोग्रदावानला- ।
न्नस्याच्चेत्तव पादपद्मयुगलस्तुत्याऽपगा वारणम् ॥ ४ ॥
लोकालोकनिरंतरप्रविततज्ञानैकमूर्ते विभो ।
नानारत्नपिनद्धदंडरुचिरश्वेतातपत्रत्रय ॥
त्वत्पादद्वयपूतगीतरवतः शीघ्रं द्रवंत्यामया ।
दर्पाध्मातमृगेंद्रभीमनिनदाद्वन्या यथा कुंजराः ॥ ५ ॥
दिव्यस्त्रीनयनाभिराम विपुलश्रीमेरुचूडामणे ।
भास्वद्बालदिवाकरद्युतिहरप्राणीष्टभामंडल ॥
अव्याबाधमचिंत्यसारमतुलं त्यक्तोपमं शाश्वतं ।
सौख्यं त्वच्चरणारविंदयुगलस्तुत्यैव संप्राप्यते ॥ ६ ॥
यावन्नोदयते प्रभापरिकरः श्रीभास्करो भासयन् ।
तावद्धारयतीह पंकजवनं निद्रातिभारश्रमं ।
यावत् त्वच्चरणद्वयस्य भगवन् न स्यात् प्रसादोदय- ।
स्तावज्जीवनिकाय एष वहति प्रायेण पापं महत् ॥ ७ ॥
शांतिं शांतिजिनेंद्र शांतमनसस्त्वत्पादपद्माश्रयात् ।
संप्राप्ताः पृथिवीतलेऽपु बहवः शांत्यर्थिनः प्राणिनः ॥
कारुण्यान्मम भाक्तिकस्य च विभो दृष्टिं प्रसन्नां कुरु ।
त्वत्पादद्वयदैवतस्य गदतः शांत्यष्टकं भक्तितः ॥ ८ ॥

इति शांत्यष्टकं समाप्तम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अणुव्रतानि पंचैव त्रिप्रकारं गुणव्रतं ।
शिक्षाव्रतानि चत्वारि इत्येतद्द्वादशात्मकं ॥ १ ॥
अर्हत्सिद्धाचार्योपाध्यायसर्वसाधून् साक्षीकृत्य ।
सम्यक्त्वपूर्वकं सुव्रतं दृढव्रतं समारूढं मे भवतु ३ ॥ २ ॥

॥ अनंतनाथस्य यंत्रम् ॥



वरील यंत्र सुवर्णताटांत अष्टगंध पसरून वाळवून त्याजवर सुवर्णशलाकानें म्हणजे सोन्याच्या मोळ्यानें लिहिणें आणि ते ताट नवदेवता यंत्रावर स्थापन केलेल्या कुंभावर ठेवणें.

(वरील अनंतनाथ यंत्र इतर ठिकाणीं थोडें निराळें आहे, तें असें— वरील यंत्रांत आठ पाकळ्या आहेत. पण इतर यंत्रांत चौदा असून त्यांत आदिनाथापासून अनंतनाथापर्यंत चौदा तीर्थंकरांचीं नांवें लिहिलीं आहेत.)

॥ श्रीमदाशाधरादिविरचितः ॥

॥ श्रीमज्जिनेंद्रपूजापाठः समाप्तः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सिद्धपरमेष्ठिपूजा या भावाष्टकं

निजमनोमणिभाजनभारया, समरसैकसुधारसधारया,
सकलबोधकलारमणीयकं, सहजसिद्ध महं परिपूजये ।। जलम् ।। १ ।।

सहजकर्मकलंकविनाशनैरमलभावसुवासितचंदनैः ।
अनुपमानगुणावलिनायकं, सहज सिद्ध महं परिपूजये ।। चंदनं ।। २ ।।

सहजभावसुनिर्मल तन्दुलैः सकलदोषविशालविशोधनैः ।।
अनुपरोधसुबोधनिधानकं सहज सिद्धमहं परिपूजये।। अक्षतान् ।। ३ ।।

समयसारसुपुष्पसु मालया सहजकर्मकरेण विशोधया ।
परमयोगबलेन वशीकृतं सहजसिद्धमहं परिपूजये ।। पुष्पम् ।। ४ ।।

अकृतबोधसुदिव्यनिवेद्यकैर्विहितजातजरामरणांतकैः
निरवधिप्रचुरात्मगुणालयं सहजसिद्धमहं परिपूजये ।। नैवेद्यम् ।। ५ ।।

सहजरत्नरुचिप्रतिदीपकै रुचिविभूतितमः प्रविनाशनैः ।
निरवधिस्वविकाशप्रकाशनैः सहजसिद्धमहं परिपूजये ।। दीपम् ।। ६ ।।

निजगुणाक्षयरूपसुधूपनैः स्वगुणघातिमलप्रविनाशनैः ।
विशदबोधसुदीर्घसुखात्मकं सहजसिद्धमहं परिपूजये ।। धूपम् ।। ७ ।।

परमभावफलावलिसम्पदा सहजभावकुभावविशोधया ।
निजगुणाऽऽस्फुरणात्मनिरंजनं सहज सिद्धमहं परिपूजये ।। फलम् ।।८।।

नेत्रोन्मीलिविकाशभावनिवहैरत्यंतबोधाय वै ।
वार्गन्धाक्षतपुष्पदामचरुकैः सद्दीपधूपैः फलैः ।
यश्चिन्तामणिशुद्धभावपरमज्ञानात्मकैरर्चयेत् ।
सिद्धं स्वादुमगाधबोधमचलं संचर्चयामो वयम् ।। ९ ।। अर्घ्यम् ।।

---

१ जानिडतियोग्यंभाति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

— शुद्धीपत्रकं —

पृष्ठ	ओळ	अशुद्धि	शुद्धि
०	१६	द्वादग	द्वादश
३	१३	इत्यं	इत्थं
८	२३	प्रीतमा	प्रतिमा
११	१९	प्रशास्ति	प्रशस्ति
१४	८	दशकानां	दक्षकानां
१५	१८	मुद्धनः	मुध्दृतः
१९	२	मारोरः	मारारेः
१९	१२	साम्यदीव	साम्यादिव
,,	१४	जिनभि	जिनमभि
,,	१५	सन्नाय	सान्नाय
३५	१६	केविलि	केवली
४०	१८	विश्च	विश्व
४१	२२	नोपपक	नोपक
५०	९	महाषुरुष	महापुरुष
५०	११	लक्षिजंबू	लक्षितजंबू
५०	१५	वसने	वसाने
५०	१९	दुप्य	दुष्य
५१	११	पुण्यह	पुण्याह
५१	१३	स्योंप्ररि	स्योपरि
५२	१८	महाप्रति	महाप्राति
५३	७	कलाती	कालती
५३	१०	कुमुट	मुकुट
५६	५	अश्वसेन	विश्वसेन
५८	६	नेंद्राच	नेंद्राश्च
५९	२	नंतत	नंत
५९	५	विमुक्ताः	विप्रमुक्ताः
५९	१६	पंचदशा	पंचदश
६०	८	सर्वार्थीदि	सर्वार्थी-दिशा
६१	१८	णायुर्व	आयुर्व
६२	१५	स्त्रपने	स्नपने
६३	६	खंडे	खंडं
६४	८	दर्भमत्थाप	दर्भमवस्थाप
६४	२४	दादामि	ददामि
६५	१	दिविग्भा	विदिग्भा
६८	१९	पनस्रा	पनस्र
६८	२२	भास्रा	भास्र
६९	१	स्राग्वर्णं	स्रग्वर्णं
७०	१	सूत्रणि	सूत्राणि
७०	६	पद्यं	पद्मं
७०	९	जानलं	जाननं
७३	३	रिततन	रितन
७५	१३	स्नपनं	स्नपन
७६	६	छल	फ़ल
७९	१५	स्रापिता	स्नापिता
७९	२४	भेयारं	भेर्यार
८०	१५	ब्रुवाणः	ब्रुवाणै
८१	१७	प्रक्षलन	प्रक्षालन
८२	८	क्रौडैः	क्रोडैः
८२	११	गेमिष्ठन्	मेष्ठिन्
८२	१५	निर्मंद्रं	निर्मुद्र
८८	११	षुष्पांज	पुष्पांज
९१	१	शद्वये	शब्दये
९१	१२	वक्रदंत	वक्त्रदंत
९४	४	ममति	मति
९४	१२	०	नैऋतानुचरा-यस्वाहा
९६	६	पनदेव	पवनदेव
१००	१३	स्वमित्	स्वस्मिन्
१००	१४	परजन	परिजन
१०६	१३	चउर्दरिंदि	चउरिंदि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पृष्ठ	ओळ	अशुध्दि	शुध्दि
१०९	५	इत्युश्चार्य	इत्युच्चार्य
११२	११	ऱ्हूं आइरि	ऱ्हूं णमो आइरि
११९	१०	नोऽव्यात्	सनोऽव्यात्
१२२	६	नाद्यै:	नादि
१२२	८	भावन्	भावम्
१२२	१४	व्रज्य	व्रज्या
१२४	२२	कृन	कृत
१३२	४	कडादोरा	कडदोरा
१४३	२४	घोरो	धीरो
१४९	४	मननं	मनघं
१४९	५	सहस्त्र	सहस्र
१४९	६	सहस्त्र	सहस्र
१५१	३	धतनया	धनतया
१५२	११	मान्यसे	मन्यसे
१५३	१३	अंहंझं	अंहंसंवंझं
१५४	९	सहस्त्र	सहस्र
१५५	१६	वर्णां	वर्णं
१५५	१८	खडग	खड्ग
१५५	१८	नाम	नाग
१५६	५	प्रीपत:	प्रापित:
१५६	९	मूर्घं	मूर्धं
१५६	११	रक्तवर्णं	रक्तवर्णं
१५७	८	यंमं	यं यं
१५७	१२	खडगाग	खड्गांग
१५८	४	यद्भुवं	यध्द्रुवं
१५८	४	चर्यं	चर्यं
१६१	२	शात्रोक्त	शास्त्रोक्त
१६१	१९	भ्रायमन्	भ्रामयन्
१६४	८	नागुराज	नागराज
१६६	८	सौख्यदि	सौख्यादि
१६७	१२	वंजित	वंदित
१७०	२	करोन्महं	करोम्यहं

पृष्ठ	ओळ	अशुध्दि	शुध्दि
१७२	१	चंडोग्न	चंडोग्र
१७२	९	विधै:	विधैः
१७२	२१	वीर्यपय	वीर्यपरा
१७३	१०	निजंरन	निरंजन
१७४	२	सिद्यै	सिध्यै
१७५	१६	हतुं	हंतु
१७६	१२	पुनदर्भव	पुनर्भव
१७८	१२	मारति	भारति
१८०	१	मोष्ठिभ्यो	मेष्ठिभ्यो
१८४	२२	पुष्पफै:	पुष्पकै:
१९१	१	दिष्टानै	दिष्टदानै:
१९४	५	रंभोमि:	रंभोभि:
२०३	११।१२	अनंत अनंत दर्शनायज्ञानाय	अनंतदर्शनाय अनंत ज्ञानाय
२०७	१७	दीपे	द्विपे
२१६	१०	कुटे	कूटे
२१९	९	डाकिना	डाकिनिना
२२०	१६	दकीव धूज्व लेदहकं	दर्कंविधूज्वल देहकं
२२४	१७	फ़ैल	फ़लै
२२५	१५	स्थिरव	स्थिरवर
२२६	४	दायसति	दासयति
२२८	७	प्यजस्त्रं	प्यजस्रं
२२८	१४	जिनं	जिन
२२८	२०	मददावानल-पाथ	मदनदवानल तोय
२३४	२०	याङन्याय	वाङन्याय
२३५	१५	सेव्मान	सेव्यमान
२३५	२०	सकस	सकल
२३९	९	रामा	जयरामा
२३९	१४	प्रिपासु	प्रियासु
२४१	७	देवं	देव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पृष्ठ	ओळ	अशुद्धि	शुद्धि
२४१	२१	ध्दृढथो	ध्दृढरथो
२५२	२३	नशषेवित्	नशेषवित्
२६०	४	परयो	पयो
२६०	१४	बोघधरं	बोधधरं
२६४	१६	षडंगा	षडंग
२६८	१८	भुनृप	भूनृप
२६९	२	तनुभव	तनूभव
२६९	८	स्पर्ध्यंभि	स्पर्धिभि
२६९	१२	कांतौ	कांतै
२७६	२०	जगति	ज्जगति
२७८	१५	मिथिलारख्य	मिथिलाख्य
२८२	१	यज	जय
२८५	११	विस्रमः	विश्रमः
२८६	३	महिमावेषं	महिमानवेषं
२८९	१७	सवंज्ञ	सवंज्ञः
२८९	२१	वृमुद्धि	वृद्धिमु
२८९	२५	स्तस्मामद्धि	स्तस्माद्धि
२९२	४	मक्ष्याय	मक्षयाय

पृष्ठ	ओळ	अशुद्धि	शुद्धि
२९५	२	जयजयघाति संघात	जयघाति- संघात सघात
२९६	१८	कलाहल	कशाहल
३००	१५	विंसति	विंशति

परिशिष्टः-

पृष्ठ	ओळ	अशुद्धि	शुद्धि
१	४	ज्वालामालिनीं	ज्वालिनीं
५	११	पुष्पैर्वरैः	पुष्पैर्वरैः
२१	४	चतुशोति	चतुरशीति
३९	१	द्ररुम	द्रुम
४४	२	विधाधरैः	विद्याधरैः
५०	१६	आग्नि	अग्नि
५४	२२	श्लाघयतुं	श्लाघयंतु
५५	६	मानुष्यं	मायुष्यं
५६	१३	रत्नौघ	रत्नाद्यै
५८	२	समिमां	समिधां
५९	१८	यंम	यंत्र
६५	२५	केतूनू	केतून्

श्रीमाघनंद्याचार्यविरचितं [लघुसमंतभद्रस्तोत्रम्]

शार्दूलः-वंदेतानमर प्रत्येकमुकुटप्रोत्तारुणप्रस्फुर- ।
द्दामस्तोमविमिश्रिताः पदनखाभीषूत्करारेजिरे ॥
येषांतीर्थकरेशिनां सुरसरिद्वारिप्रवाहा यथा
दिव्यद्दवनितंबिनीस्तनगलत्काश्मीरपूरान्विताः ॥ १ ॥
वृषभंत्रिभुवनपतिशतवंद्यं । मंदरगिरिमिव धीरमनिंद्यम् ।
वंदेमनसिजगजमृगराजं । राजिततनुमजितं जिनराजम् ॥ २ ॥
संभवदुज्वलगुणमहिमानं । शंभवजिनपतिमप्रतिमानम् ॥
अभिनंदनमानंदितलोकं । विद्यालोकितलोकालोकम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुमतिंप्रशामितकुनयसमूहं । निर्दलिताखिलकर्मसमूहम् ॥
वंदेपद्मप्रभजिनदेवं । देवासुरनर कृतपदसेवम् ॥ ४ ॥
सेवकमुनिजनसुरुचिरपार्श्वं । प्रणमामिप्रथितंचसुपार्श्वम् ॥
त्रिभुवजननयनोत्पलचंद्रं । चंद्रप्रभमघवर्जित चंद्रम् ॥ ५ ॥
सुविधिंविधुधवलोज्वलकीर्तिं । त्रिभुवनजनपातिकीर्तितमूर्तिम् ॥
भूतलपतिनुतशीतलनाथं । ध्यानमहानलहुतरति नाथम् ॥ ६ ॥
स्पष्टानंतचष्टुयानिलयं । श्रेयोजिनपतिमपगतविलयम् ॥
श्रीवसुपूज्यसुतंनुतपादं । भव्यजनप्रियदिव्यनिनादम् ॥ ७ ॥
कोमलकमलदलायत नेत्रं । विमलं केवलसस्यक्षेत्रम् ॥
निर्जितकंतुमनंतजिनेशं । वंदेमुक्तिवधूपरमेशम् ॥ ८ ॥
धर्मंनिर्मल शर्मापन्नं । धर्मपरायण जनताशरणम् ॥ [सन्नम्]
शांतिं शांतिकरंजनताया । भक्तिभरक्रमकमलनतायाः ॥ ९ ॥
कुंथुंगुणमणिरत्नकरंडं । संसारांबुधि तरणतरंडम् ॥
अमरीनेत्रचकोरीचंद्रं । अरपरमंपदविनुतमहेंद्रम् ॥ १० ॥
उद्धतमोहमहासटसल्लं । मल्लिंफुल्लशरप्रतिमल्लम् ॥
सुव्रतमपगतदोषानिकायं । चरणांबुजनुतदेवनिकायम् ॥
नौमिनमिंगुणरत्नसमुद्रं । योगिनिरूपितयोगसमुद्रम् ॥
नीलश्यामलकोमलगात्रं । नेमिस्वामिनमेनोदात्रम् ॥ १२ ॥
फणिफणमंडपमंडितदेहं । पार्श्वंनिजहितगतसंदेहम् ॥
वीरमपारं चरित्रपवित्रं । कर्ममहीरुहमूललवित्रम् ॥ १३ ॥
संसारप्रतिमप्रतिबोधं । परिनिष्क्रमणं केवलबोधम् ॥
परिनि ति सुखबोधितबोधं । साराऽसारविचारविबोधम् ॥ १४ ॥
वंदेमंद रमस्तकपीठे । कृतजन्माभिषवं नुतपाठे ॥
दर्शनांतविलब्धिविकरणं । केवलबोधामृतसुखकरणम् ॥ १५ ॥
अनणुगुणानिबद्धामर्हतां माघनंदी । व्रतिरचितसुवर्णानेकपुष्पव्रजानाम् ॥
सभवतिनुतिमालां (जयमालां) योविभर्त्तस्वकंठे ।
प्रियपतिरमरश्रीमोक्षलक्ष्मी वधूनाम् ॥ १६ ॥ ॥ जयमाला समाप्ता ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्री दिगंबर जैन स्याद्वाद ग्रंथ मालेंतील–" दुसरें पुष्प "

– व्रत (नोपी) विधानें –

लवकरच प्रसिद्ध होत आहे !!

॥ अहिंसा परमोधर्मः, यतो धर्मस्ततो जयः ॥



Ganesh Varni Digambar Jain Institute, Naria, Varanasi